दने वृषादित्वात् कलच्· सहस्रमक्षीण्यस्य· बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ऋभवः क्षियंत्यत्र· क्षि निवासगत्योः डः ऋभुक्षः स्वर्गवज्रयोरिति विश्वः सोस्यास्तीति ऋभुक्षा इति पथि

संक्रंदनो दुश्च्यवनस्तुराषाण्मेघवाहनः आखंडलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया ४४ पुलोमजा शची इंद्राणी नगरी त्वमरावती हय उच्चैःश्रवाः
वन्यदा· ऋच्छति इयतीति वा· अर्तेर्भुक्षिन् कृप्रत्ययः पंचत्रिंशदादिं इन्द्रस्य ४४ पुलोम्नो मुनेर्जाता पंचम्यामजातावितिडः अत एव १९ सूतो मातलिर्नंदनं वनम् ४५ ॥
पौलोम्यपि· तस्यापत्यमित्यण् गोत्रत्वेन जातित्वात् ङीष्· शचति· शच व्यक्तायां वाचि· इन् कृदिकारादितिङीष्· स्यादिंद्राणी शतावरी चारुधारा महेंद्राणी शक्राणी जयवादिनीति र·
भसः शक्रमणति आनयति जीवयतीति वा शक्राणी· सर्वेंद्रियेषु सचंते· षच समवाये· इन्· सचिरैत्यादिरपि· इंद्रस्य स्त्री इंद्रवरुणेति ङीषानुकौ· यत्तु अनुकि कर्तव्ये दीर्घो
कारमानुकं शास्त्रितज्ज्ञापयति यत्तो विहितस्ततोन्यत्रापि भवति तेन कीर्योणी गीर्याणी त्यादि सिद्धं भवतीति धातुपारायणं· अत एव शक्राणीति मुकुटश्चतत्
न्न· अनुकि कृते अतो गुण इति पररूपप्रसंगात्· ननु कारोच्चारणसामर्थ्याद्दीर्घो भविष्यति· अन्यथा ह्रीनुकमेव कुर्यादिति चेन्न· अल्लोपो नइत्यस्य बाधेन चारि
तार्थत्वात् पत्युर्न इति वदादेशः कर्तव्ये आगमलिंगककारोच्चारणसामर्थ्याद्वा ल्लोपो न भविष्यतीति चेन्न· शर्वशब्दे ककारस्य चारितार्थ्यात्· नहि तत्र लोपोस्ति
न संयोगादिति निषेधात्· तस्मात्ककाराकारयोः सामर्थ्याविरहे पररूपबाधनार्थे दीर्घोच्चारणमावश्यकं· प्रयोगनिर्वाह स्त्वक्रु एव· नीलींद्रपत्न्याः अमराः संत्य·
स्यां मतुप्· मतो बह्वचोनजिरादीनामिति दीर्घः एकं· उच्चैः श्रवसी यस्य· उच्चैः शृणोतीति वा· असुन् उच्चैर्महत् श्रवो यशो यस्येति वा· एकं· मतलाति आतोनुपतिकः मत

CC-0. In Public Domain. Digitization by eGangotri

वैजयंत्यः पताकाः संत्यस्य · अर्श आद्यच् · वैजयंतो महेंद्रस्य ध्वजप्रासादयोः पुमान् वैजयंती पताकायां जयंती पादपे स्त्रियां · इंद्रगृहस्यैकं · जयति · हुभूवहीत्यादिना झच् · क्तो
नः पाकशासनस्यापत्यं · अत इञ् · इंद्रपुत्रस्यैकं · इरा उदकानि संत्यस्मिन् · मतुप् · इरावत्यब्धौ भवः तत्र भव इत्यण् · अभ्रं मेघस्तद्वान् को मातंगः शाकपार्थिवादिः · अभ्रे आ
काशे मेघे वा विद्यमानो मातंग इति वा · इरया उदकेन वलति वलशब्दे · पचाद्यच् · इरावलः ततः प्रज्ञाद्यण् · इरा सुरा वनमुदकं यस्मिन् · पूर्वपदादिति णत्वं · इरावणो भवः त
त्र भव इत्यण् · स्वामी तु इरावतो भवः तत्र भव इत्यण् · विभाषौषधीति वा णत्वमिति तन्न · ऐरावन इत्यस्यापि प्राप्तेः · अभ्रे खे भाति · नभ्राण्नपादिति वा · मंथरगामिनीत्वात् वा
हुलकाद् · अभ्रमो वल्लभः । चत्वारि इंद्रहस्तिनः ४८ ह्राद इत्यव्ययं · ह्रादः अव्यक्ते शब्दे आवश्यके णिनिः ह्रादोस्त्यस्या इति वा · इनिः वजति वजगतौ ऋज्रेंद्रेति र
न् · अस्त्री स्यादिति पूर्वोत्तराभ्यामन्वेति संनिधानाविशेषात् · अस्त्रियो वज्रकुलिशाविति संसारावर्त्तोच · वज्रोऽस्त्रीति वक्ष्यमाणत्वसैवानुवादः · कुलिर्हस्तो

स्यात्प्रासादो वैजयंतो जयंतः पाकशासनिः । ऐरावतोभ्रमातंगैरावणाभ्रमुवल्लभाः ॥ ४८ ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शंबो दंभोलिरशनिर्द्वयोः ॥ ४९ ॥ ९ भुजा इत्यत्र त्रिकांडशेषः कुलो शजे · अन्येभ्योपीति डः कुलिनः पर्वतान् श्यतिवा · शो तनू
करणे · आतोनुपसर्गे इति कः कुत्सितमीषद्वा लिशति · लिश अल्पीभावे · इगुपधेति कः कुलिशो न स्त्रियां प्रोक्तो दंभोलौ नाकृथांतरे · भिनत्ति · विदिभिदिच्छिदेः कु
रच् · यत्तु कर्मकर्तरि चायमिष्यत इत्यत्र चकारः कर्त्तरीत्यनुकर्षणार्थस्ते नाकर्मकर्त्तर्यपि भवतीति वामन इति मुकुटेनोक्तं · तन्न तत्र भाष्ये स्वार्थस्यादर्श
नात् · निष्फलत्वाच्च भिदिरमिति पाठे तु इषिमदीत्यादिना किरच् · पुनाति · अचइः शतं कोटयो धारा अस्य स्वरति स्वृ शब्दोपतापयोः शृस्वृस्निहीत्युः शोभनान्य स्वृ
विधारा अस्येति · सांतोपि शाम्यत्यरीन् · अंतर्भावितण्यर्थो ल्वमेर्वन् · शं शुभमस्यास्त्येव त्यादिति वा कं शंभ्यामिति वः पत्ससूयेपि दंतोष्ठ्यः शंव संबंधने · चुरा
दिः शंवयति संवध्नाति शत्रूनिति विग्रहे तु पवर्गीयः संवयतेर्विग्रहे दंत्यादिरपि · तालव्या अपि दंत्याश्च संवसूकरशंसव इत्यूष्मविवेकः दंभु रोधने असुन् दंभासे
रोधने अलिः समर्थः अलं भूषणपर्याप्तिवारणेषु इन् इत्यस्नोति स्वेदयति · दंभु दंभने · औणादिक ओलिरिति वा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·

अ·को अश्नाति· अश्यते नेनेनेति वा· अर्त्तिसृधृधम्यम्यश्यवितृभ्यो निः इह वज्राशनिरिति समुदितमपि बोध्यं· वज्राशनिर्द्वयोर्वज्रमिति त्रिकांडशेषात्· अथ वज्राशनिर्द्वयोरिति
टी·रा नामनिधानाच्च व्योमयानस्य ४७ व्योम्नि यांत्यनेन· करणे ल्युट्· व्योम याति· कृत्यल्युटो बहुलमिति कर्त्तरि ल्युडिति वा विशिष्टं मानमस्यं त्यनेन पुंसि संज्ञायामिति करणे घः घ
९३ ञिति मुकुटः तन्न परत्वात् ल्युट्प्रसंगात् घस्तु करणाधिकरणयोर्विहितः विशेषेण मांत्यस्मिन्निति वा· अधिकरणे ल्युट् विगतमानमुपमा ऽस्येति वा· वि
मानो व्योमयाने च सप्तभूमगृहे पि च· घोटके यानमात्रे च पुन्नपुंसकयोर्मतः द्वे देवरथस्य· नरस्य धर्म्यः नराच्चेति वक्तव्यमित्यण्· नारं ददाति आतोनुपेति कः य
द्वा नारं पानीयमित्युक्तं तत्पितृभ्यः सदा भवान् ददातितेन तेनाम नारदेति भविष्यतीत्यागमः नारं नरसमूहं द्यति कलहेनेति वा· नुरिदं नारमज्ञानं· तत्र द्यति ज्ञा
नोपदेशेनेति वा· दो अवखंडने· कः आद्येन तुंबुरुभरतपर्वतदेवलादयः सुराश्चते ब्रह्मादिपुत्रत्वाद् ऋषयश्च· षष्ठी समासो वा· एकं॥ शोभनो धर्मोस्यां· धर्माद नि

व्योमयानं विमानोस्त्री नारदाद्याः सुरर्षयः॥ स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ४८॥

च् केवलात्· डाबुभाभ्यामिति पक्षे डाप्· अनो बहुव्रीहेरिति ङीप्न· सह भांत्यस्यां· सभा राजेति निपातनाद्दः· देवानां सभा आस्थानगृहं· द्वे· पीयते· पीय इति सौ
त्रो धातुः पीयेरूषन्· बहुलवचनात्पक्षे गुणः स्यात् पेयूषं च पीयूषं नवक्षीरे ऽमृते पि चेति हारावली· पीयूषं सप्तदिवसावधिक्षीरे तथामृते· न म्रियंते ऽनेन· न
नि मृङ्भ्यां किच्चेति तन्· अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते· अयाचिते च मोक्षे च ना धन्वंतरि देवयोः सुखेन धीयते· धेट् पाने· आतश्चोपसर्ग इति कर्मण्यङ्· य
त्तु अङ्डि· घोकारकाधिकारेण निवृत्त इति मुकुटः तदाकरविरुद्धं द्वितीयभावग्रहणस्य कारकाधिकारनिवृत्त्यर्थत्वादिति हेतुरपि स्वरूपासिद्धः अभिविधौ भाव इत्यस्याग्रे
ऽनुवर्तनात्· यदपि सुष्ठु दधाति पुष्णाति शरीरमिति पचाद्यजंताट्टाप् इति तदपि न नित्यत्वादंतरंगत्वाच्चैकादेशे अदंतत्वाभावेन टाबयोगात्॥ एकादेशस्य पूर्वांतत्वे
न ग्रहणात् सस्याल्लोपप्रसंगाच्च आतश्चोपसर्ग इति कप्रत्ययो वक्तुमुचितः· त्रीण्यमृतस्य ४८॥

CC-0. In Public Domain. Digitization by eGangotri

मंदमकिंतुं शीलमस्याः अककुटिलायां गतौ· सुधीतिलिनिः· वियति वियतो वा गंगा स्वः स्वर्गस्य नदी· पूर्वपदात्संज्ञायामिति णत्वं· सुराणां दीर्घिकेव· चत्वारि देवगंगायाः॥ मिनो
ति उच्चत्वात् ज्योतींषि· डु मिञ् प्रक्षेपणे· मिपीभ्यां रुः· मापोरुरिच्चेति मुकुटः· तन्न उज्ज्वलदत्तादावस्य सूत्रस्यानुपलब्धेः· सुमेरुरिति उपसर्गात्तिरनिष्टत्वमर्थ मुक्तं हेम्नोऽद्रिः र
त्नानि सानावस्य· सुराणामालयः· पंचमेरोः ५८ मंदते मोदयति मदि स्तुति मोदमदस्वप्न कांति गतिषु· अंगिमदिमंदिभ्य आरन्· मंदा आराधारा अस्य सरलत्वादिति वा पारि
णो ब्धे र्जातः तत्तः स्वार्थे कन्· यत्तु पारिजातो जन्यत्वेनास्यास्ति· अर्शआद्यच्· पारिजातः समुद्रः तत्र भव इत्यणि पारिजात इति मुकुटः तन्न· इष्ट्वा च्छस्यापवादस्य सत्वाद् अ
णः प्रसंगात्· वैयर्थ्यात्· जन्यस्यैव नाम निर्वचनासिद्धेश्च॥ सम्यक् तनोति पुष्पाणि· ज्वलितीति सूत्रे तनोतेरुपसंख्यानाण्णः सम्यक् तन्यंते पुष्पाण्यस्मिन्निति अ
धिकरणे हलश्चेति घञ्वा कल्पः संकल्पितोऽर्थः तस्य वृक्षः· जन्यजनकभावसंबंधे षष्ठी· चंदयति· चदि आल्हादने· रयंतः ल्युः हरेः चंदनः हरिचंदनमस्त्रीस्यात्रिदशानां

मंदाकिनी वियद्गंगा स्वर्णदी सुरदीर्घिका मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ५८ पंचैते देवतरवो मंदारः पारिजातकः संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनम् ५९ सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ६० स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमु

महीरुहे नपुंसकं तु गोशीर्षे ज्योत्स्नाकुंकुमयोरपि· पंचानां देववृक्षाणामेकैकं ५९ सनत् नित्यं कुमारः सनत्कुमारोऽपि· यद्वा· हंसगो द्रुहिणः सनदिति ब्रह्मपर्यायो यस्य भस
तस्य कुमारोऽपत्यं· इत्यादिः· विधातुरपत्यं· अण्· वैद्यसंहिताप्रणेतृत्वात्· स्वर्वैद्यपर्यायसंनिधौ कथनं· द्वे ब्रह्मपुत्रस्य· स्वः स्वर्गस्य वैद्यौ अश्विन्याः सुतौ· नसत्यं ययोः सत्यावस
त्यौ न असत्यौ नभ्राराननपादिति नञः प्रकृतिभावः· प्रशस्ता अश्वाः संति ययोः· इनिः· यद्वा· अश्विन्यां जातौ· संधिवेलेत्यण्· नक्षत्रेभ्यो बहुलमिति लुकि लुक्तद्धितलुकीति
ङीपो लुक्· अश्वो सीजनकत्वेन ययोर्वा· इन्· दसतः क्षिपतो रोगान्· दसु उपक्षये· स्फायितंचीति रक्· अश्विन्या अपत्ये स्त्रीभ्यो ढक् कृत्तावुभाविति हित्वा विष्ट्वा देकवच
नाभाव इति स्वामी· अयं च प्रायो वादः· देव्यां तस्यामजायेतां नासत्यो दस्र एव चेति मार्कंडेयान्नासत्याविति दस्राविति चैकवाचकस्योभयोः प्रयोगो गौणः· षट् अश्विनोः ६०
अद्भ्यः सरंति सरतेरसुन् बहुष्विति प्रायोवादः अनचिचेति सूत्रे अप्सरा इति॥ भाष्यप्रयोगात्॥ स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपीति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्णवाच्च॰ अस्य शुभंयाः शब्दवद्रूपमिति मुकुटोक्तं चिंत्यं॰ अप्सरः शब्दस्य सांतत्वात्॰ स्वः स्वर्गस्य वेश्याः उरून् महतोऽश्नुते व्याप्नोति वशीकरोतीति यावत्॰ कर्मण्यण्॰ संज्ञा
पूर्वकस्य विधेरनित्यत्वान्न वृद्धिः मूलविभुजादित्वात्को वा उरूनश्नातीति वा॰ नारायणोरुं निर्भिद्य संभूता वरवर्णिनी। ऐलस्य दयिता देवी योषिद्रत्नं किमुर्वशीति हरिवंशोक्तस्त्वन्य
त्रिपक्षे तु दीर्घादिरित्येके तत्पक्षेपि पृषोदरादित्वाद्ध्रस्वादिरित्येवेत्यन्ये मुखशब्देनाद्यर्थेन रंभामेनकाघृताचीतिलो मादीनां ग्रहणं ~~मुरकंउर्वश्यादेः~~॥ अव्युत्पत्तिपक्षे आतो
धातोरित्यस्याप्राप्तेः ग्रासि हाहान्॰ ओः सुपीत्यस्याप्राप्तेहूहून् इत्यादि यत्तु आतो धातोरिति योगविभागादाकारलोप इति मुकुटेनोक्तं॰ तच्चिंत्यं॰ निर्णीतरूपस्य योगविभा
गेन निर्वाहस्यौचित्यात् अप्रयुक्तस्य तेन साधनस्यानुचितत्वात्॰ हा इति शोकव्यंजकशब्दं जहाति॰ ओहाक् त्यागे विच्॰ ग्रासि हाहः॰ हू इति ह्वयति॰ ह्वेञः क्विप्॰ वचि
स्वपीति संप्रसारणं॰ हल इति दीर्घः वाहुलकाड्डुप्रत्यये तु व्युत्पन्नो अधातुश्च॰ एवं ऊ प्रत्यये हूहूरपि बोद्धव्यः हाहाः सांतोपि॰ गंधर्वो बीति हाहसोरिति॰ संसारावर्तात्॰ गंध
र्वो हाहसि प्रोक्त इति रत्नकोशाच्च॰ भोजस्तु हाहा हू हू शब्दयोर्व्यत्यमाह॰ हहा इत्यादि हस्वः हुहु इत्युभय ह्रस्वश्च हंसो हहा हू हू चहौ इषणश्च श्वतुंबुरुरिति शब्दार्ण

हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौकसाम् ५२ अग्निर्वैश्वानरो वन्हिर्वीतिहोत्रो धनंजयः॥ ८१ वातगीतमाधुर्यसंपन्नो विख्यातो च हहा हूहू इ
ति व्यासोक्तेश्च॰ गंधं सौरभमर्वति॰ अर्वगतौ कर्मण्यण्॰ शकंध्वादिः प्रज्ञाद्यणि॰ दीर्घादिश्चायं॰ अपि गंधर्वगा धर्वदिव्यगायनगातव इति शब्दार्णवात्॰ आद्येन तुंबुरुविश्वा
वसुचित्ररथादीनां ग्रहः देवगायकानामेकम् ५२ अंगति॰ अगि गतौ॰ अंगेर्नलोपश्चेति निर्नलोपश्च॰ विश्वेनराअस्य॰ नरे संज्ञायामिति विश्वशब्दस्य दीर्घः वि
श्वानरस्यापत्यं॰ ऋष्यण्॰ यत्तु विदादित्वादञ्॰ बहुत्वे यञञोश्चेति लुक् विश्वानरा इति मुकुटः तन्न विश्वे वैश्वानरा उतेत्यत्र लुको दर्शनात् वैश्वानरायमीढुषे इ
त्यादावंतोदात्तदर्शनाच्च॰ ऋषिभ्यो गोत्रापत्येऽणो विहितत्वेनानंतरापत्ये प्रसक्त्यभावाच्च॰ एतेन विदादित्वादञिति व इत्यन्यस्यामपि प्रत्युक्तः वहति हव्यं॰ वहिश्रिश्रुयुद्रु
ग्लाहात्वरिभ्यो नित्तिनिः निच्च॰ दीगति प्रजनकांत्यसनखादनेषु॰ कर्मणि क्तिन् वीतिर्भक्ष्यं पुरोडाशादि हूयतेऽस्मिन्॰ हुदानादनयोः हुयामेति त्रन्॰ वीतिरश्नो होत्रं ह
वनमस्येति वा॰ धनंजयति॰ संज्ञायां भृतृ इति खच् कृपीटस्य जलस्य योनिः कृपीटमुदरे जले इति रत्नकोशात् अग्नेरप इति श्रुतेः कृपीटं योनिरस्येति वा॰ अङ्गोऽग्नि
॥ ॥ ॥ र्ह्लातः स्वत्रमिति मनज्वलति जुचंक्रम्येति युच्॰ विद्यते लभ्यते॰ विद्लृ लाभे॰ अप्सु न जातं वेदो धनं यस्मात् जाते जाते विद्यते १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इति वा विद सत्तायां जातं वेत्ति विद्यते वा विदश्चेतनादो असुन् तनुं शरीरं न पातयति · नभ्राण्नपान्नवेदेति निपातितः तनूनपान्तो तनूपात नमसस्य निंसते इति मंत्रः तनूस्वस्य
रूपं न पाति न रक्षति · आशुविनाशित्वात् · इति तनूनपात् शात्रंतः उणादिश्चाभितिनुमि · तनूनपान् तनूनपान्तो तनूनपात् इति वा · तन्वाउनं कृशं पाति · तनूनपं घृतादि
न दृति · अदोऽनन्ने इति विट् · तनूनपादो तनूनपाद् इति वा ५३ बृंहति · बृहि वृद्धौ · बृंहेर्नलोपश्चेति इस् · पुल्लिंगोयं · वर्हिर्हरितो बृहद्भानुरित्यमरमालायां पुंस्कांडे पाठात्
शुक्रो वैश्वानरो वर्हिर्वर्हिः शुष्मा तनूनपादिति शब्दार्णवात् · वर्हिः शुष्मेति व्यस्तसमस्तं नामेति कश्चित् · तत्र समस्तपक्षे वर्हिः कुशाः शुष्मं वलमस्येति विग्रहः · वर्हिः सा
नः वर्हिरिदंतः शुष्मेति नांतः पृथगित्यन्यः शुष्यत्यनेनेति शुष्मा शुष शोषणे अन्येभ्योपीति मनिन् · संज्ञापूर्वकत्वान्न गुणः शुष्यति जलं · शुषेरंतर्भावितण्यर्थाद्
विसिविसिशुषिभ्यः किदिति मनिन्प्रत्यये शुष्मोऽदंतोपि कृष्णो धूमो वर्त्मास्य · नांतः शोचींषि ज्वालाः केशा इवास्य · नित्यसमासेनुत्तरपदस्थस्येति षत्वं · उषः प्रभाते सं

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ५३ वर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः
॥५४॥ रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥ ८ ध्यायामिति विश्वः उषः संध्यायां बुध्यते प्रकाशते · इगुपधत्वात्कः · अहरादीनां पत्यादिषु वा

रेफः स च व्यवस्थितविभाषया इह नित्यं ॥ आश्रयमाधारमश्नाति · कर्मण्यण् · आशपाश इति पाठांतरं · आशेरते त्रेत्याशयः एरच् · तमश्नाति · बृहंतो भानवोस्येति · कृशत
नूकरणे · कृश्यति · कृतन्यंजीत्यादिनुक् · पुनाति · पूञ् पवने · ण्वुल् · अनित्यनेन तृषादित्वात्कलच् · अनलो वसुभेदेऽग्नौ ५४ लोहिता अश्वा यस्य · वरुणस्त्वसिता नश्वान्
कुवेरः कुमुदोपमान् · हुताशनः किंशुकाभानवापुर्वभूत्तथा वृलोदिति शालिहोत्रात् · रोहितो मृगोश्वो वाहनमस्येति वा वायोः सखा राजाहः सखिभ्यष्टच् · वायुः स
खास्येति वा · अस्मिन्पक्षे टजभावादनङ् · सावित्यनङ् · शिखाः संत्यस्य · मतुप् · आशोष्टुमिच्छति · आङ्पूर्वात् शुष्यतेः सन्नंतात् · आङि शुषेः सनश्छंदसीत्यनिः छांदस
नामपि क्वचिद्भाषायां प्रयोगः अध्वर्युक्रतुरिति ज्ञापकात् · आशुशीघ्रं आशुव्रीहिर्वा · शुक्षलोपि · क्षणु हिंसायां इन् · शु इति पूजार्थमव्ययम् · हिरण्यं रेतोस्य · सांतः हिर
ण्यरेताः पुंसि स्याद्दिवाकरहविर्भुजोः · हुतं भुंक्ते · क्विप् · जांतः दहति · सुः हव्यं वाहयति ण्यंतात् हेल्युं

यत्तु स्वामी· हव्यं वा हयतीति विगृह्य हव्यपुरीषपुरीष्येषु ञ्युट् इत्याह· तन्न· उदाहृतपाठस्यानुपलंभात्· कव्यपुरीषपुरीष्येष्विति पाठस्योपलंभात् वहश्चेत्यनुवृत्ते एर्य्यंतादसंभवा
च्च· मुकुटोपि वा हयतीति विगृह्य हव्ये ऽनंतःपादमिति वहेर्ञ्युडित्याह· तदपि न· ञ्युटश्छांदसत्वात् वहश्चेत्यनुवृत्ते एर्य्यंतादसंभवाच्च· ५५ सप्तार्च्चिषो यस्य· काली करा
ली मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिंगिनी विश्वदा साख्याः सप्त वन्हेर्जिन्हाः दमु उपशमे· अंतर्भावितण्यर्थादमेरुनस्· दाम्यति· दमुनाः दमुनसौ दीर्घमध्योपि
दमूनादमुनाः प्राचीनवर्हिः शुचिवर्हिषावितिनामनिधानात्· शोचयति· ऋज्रेंद्रेति निपातितः शुक्रं रेतोस्यास्तीति वा अर्श्रआद्यच्· शुक्लवर्णत्वादिति वा· रलयोरेक
त्वं· चित्रा भानवो रश्मयो ऽस्य· विभा प्रभा वसु धनं यस्य· शुचि पवित्रं करोति शुचयति तत्करोतीति ण्यंतादचइः यद्वा· शोचति· अंतर्भावितण्यर्थाच्छुचेरिगुपधादितीन्· अ
पां पित्तमिव· दाहकत्वात्· ~~चतुस्त्रिंशद्दस्रेः~~ उर्वस्य मुनेरपत्यं· यत्तु विदाद्यञ्· वहुलेयञञोश्चेति लुकि उर्वाः इति मुकुटः तन्न· अनंतरापत्ये ञो ऽसंभवात् तस्मादण्यणा· वड

हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ५५ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ५६ वन्हेर्द्वयो
र्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् त्रिषु स्फुलिंगो ऽग्निकणः संतापः संज्वरः समौ ॥५७॥ ८ वायां भवं तत्र भव इत्यण्· वडवाया अनलः आधारा
धेयभावएव संवंधत्वेन षष्ठ्यर्थः ~~वीरिवाडवाग्नेः~~ ५६ वन्हेरिति प्रायोवादः हेतिः स्यादायुधज्वालासूर्यतेजःसु योषितीति दर्शनात्· ज्वलति· ज्वलितिकसंतेभ्यो णः स्त्रि
यां टाप्· कील वंधे· कीलति· इगुपधेति कः स्त्रियां टाप्· अर्च्यते· अर्च पूजायां· अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः अर्चिः सांतः इति लिंगतोपि· अग्नेर्भ्राजंते अर्चय इति श्रु
तेः स्त्रियामित्यर्चिरादिभिः संवध्यते· तत्रार्चिषो ज्वालाभासोर्नपुंसकमर्चिरिति क्लीवत्वमपि वक्ष्यते हिनोति· हंति वा हिगतौ· ऊतियूतीत्यादिना क्तिन्नंतो निपातितः शेते· शीङः
किद्रस्वश्चेति खः शिखा ज्वाला वर्हि चूडा लांगलक्यग्रमात्रके· ~~पंच~~ ज्वालायाः स्फुट् इत्यनुकरणशब्दः स्फुटाफुत्कारे णलिंगानि· लिगि गतौ· पचाद्यच्· फुलिंगजातावपि अ १५
जादित्वाट्टाप्· अग्नेः कणः द्वे· संतापयति· तप संतापे· ज्वर रोगे· ण्यंतौ संज्वरयति· पचाद्यच्· यत्तु संतापनं संतापः घञ् संज्वरयतीति संज्वरः अजिति मुकुटेनोक्तं तन्न· वै
षम्यप्रमाणाभावात्· भावकर्त्रभिधायिनोः समानार्थकत्वाभावात्· समौ समानार्थौ समलिंगौ द्वे ५७॥

धर्मस्य राजा राजेति टच् · पितॄणां पतिः · समं वर्त्तितुं शीलमस्य सुप्यजातौ णिनिः · परेतेषु मृतेषु राजते · सत्सूद्विषेति क्विप् · जांनः कृतांऽ तो विनाशो येन · यमुनाया भ्राता श्राम्यति · स्युः पमे
नसंयमेन राजते · क्विप् · जांतः यमयति · अच् · यमो दंडधरे ध्वांक्षे संयमे यमजे पि चेति विश्वः ५८ कलयत्यायुः कल संख्याने · पचाद्यजंतात् प्रज्ञाद्यण् · इति मुकुटः तन्न · कलेर्मित्वाभावात्
प्रज्ञाद्यणो रूपद्वयप्रसंगाच्च · एतेन स्वाम्यपि परास्तः तस्मात्कालयतीति विग्रह उचितः कालवर्णत्वाद्वा · दंडस्य धरः श्राद्धस्य देवः अंशभाक्त्वात् · पितृपतित्वाद्वा · विवस्वतोऽपत्यं · तस्यापि
त्यमित्यण् · अंतं करोत्यंतयति · तत्करोतीति ण्यंतात् · ण्वुल् ~~यमस्य चतुर्दश~~ रक्षत्यस्मात् · रक्ष पालने · असुन् · प्रज्ञाद्यणि राक्षसः स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्त्तंतेऽपीति पुं
स्त्वं · कुणपं शवं भक्षयितुं शीलमस्य · शीलमित्यण् · कोणं याति · आतः इति कः कोणपस्य निर्ऋतेरयं कोणपः तस्येदमित्यण् · क्रव्यमाममांसमत्ति · क्रव्ये चेति विट् · अदोऽनन्ने इत्येवा
सिद्धेः एवाधनार्थमिदं तेनाममांसभक्षके क्रव्याद् इति न भवत्येव · कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तं पक्वं च भुंक्त इति क्रव्यादः कृत्तविकृत्तपक्वशब्दस्य पृषोदरादित्वात् क्रव्या

धर्म्मराजः पितृपतिः समवर्त्ती परेतराट् · कृतांतो यमुनाभ्राता शमनो यमराड्यमः ५८ कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः · राक्षसः कौणप
पः क्रव्यात्क्रव्यादोऽस्रप आशरः ५९ रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ६०॥ एदेशः इति काशिकाशब्दा

र्णवे पि कृद ध्याये सद्रान्तादेकणो दैचस्यात् क्रव्याद आममांसभुक् क्रव्यादः कृत्तविकृत्तपक्वमांसभुगुच्यत इत्युक्तेः तस्माद्योगार्थस्य व्यवस्थितत्वेपि गौण्या उभयोः सामान्येन प्रयो
गः अस्रं रक्तं पिबति · आतोनुपेति कः · न तु टक् · पिबतेः सुरासीध्वोरिति वचनात् · दंत्यसवान् · न श्रपयति क्रव्यात्वात् श्रपः पचाद्यच् · तालव्यशवान् · आ शृणाति · शॄ हिंसायां · प
चाद्यच् · आशिर इति पाठे तु अशेर्णिच्चेति किरच् · आशिरो हनुषः शंकुः क्रव्यादोऽस्रप आशर इति संसारावर्त्तः ५८ रात्रौ चरति · चेरष्टः रात्रेः कृतिविभाषेति पक्षे मुम् · क
र्बुरो वर्णेन · यद्वा · कर्वति · कर्व हिंसायां · मद्गुरादयश्चेति कुरच् · कुर्बुर इति पाठांतरं नैर्ऋतः कुर्वरः क्रव्यात् कर्बुरो यातुरक्षसी इति शब्दार्णवः कृ हिंसायां कृणाति · कॄ गॄ शॄ
दॄभ्यश्चेति भ्यः ष्वरच् · निकषाया आत्मजः मूर्द्धन्यः षः पातूनि रक्षांसि दधाति पुष्णाति जाति पोषकत्वात् · धाञो बहुलमन्यत्रापीति युच् · कमित्युट् इति त्युड्वा यातूनि यातुना
धीयंतेऽस्मिन्निति वा · ल्युट् · अन्तस्थादिः जातु कदाचित् · धानं सन्निधानमस्येति चवर्गादिरपि · विरुद्धलक्षणया पुण्यश्चासौ जनश्च निर्ऋतेरपत्यं · पातिकमिमनिजनिग

प्र॰
अ॰ को॰
टी॰ रा॰
२६

प्रचेतयति॰ प्रकृष्टं चेतोऽस्येतिवा॰ चिती संज्ञाने॰ असुन्॰ प्रचेताः पाशिनि पुंसि कृछ्रे च वाच्यवत्॰ व्रियते॰ वृणोतिवा॰ वृञ् वरणे॰ कृवृदारिभ्य उनन्॰ वरुणस्तरुभेदेऽ
प्यप्पती चोपतिसूर्ययोः॰ पुंचिवरुणोपि॰ वरं वृणंतितं देवा वररश्च वरार्थिनां॰ धातुर्वै वरुणो प्रोक्तस्तस्मात्तु वरुणः स्मृत इति सांवपुराणं॰ पाशो स्यास्ति॰ इनिः पाशी पाश
धरेऽप्पत्तावि श्वः॰ यादसांपतिः तत्पुरुषे कृतीत्यलुक् अलुकि तु यादः पतिरपि॰ अपांपतिः लुकि अप्पतिरपि॰ ~~पंचवरुणस्य~~ श्वसित्यनेन॰ श्वस प्राणने॰ ल्युट्॰ स्पृशति॰ स्पृश्य
र्शने॰ बहुलमन्यत्रापीति युच्॰ स्पर्शनो मारुते स्पर्शदानयोः स्पर्शनं मतमिति विश्वः॰ वाति॰ वागतिगंधनयोः कृवापाजी त्युण्॰ आतो युगिति युक्॰ मातरीति सप्तम्यंत प्रतिरूपको
मातरि अंतरिक्षे॰ श्वयति संचरति॰ टुओश्वि गतिवृद्ध्योः॰ यद्वा॰ मातरि जनन्यां श्वयति वर्द्धते॰ सप्तसप्तक रूपत्वात्॰ श्वन्नुक्षन्निति निपातनात्सप्तम्या अलुक्॰ सदाग
तिरस्य॰ ❀ पृषन्॰ मृगभेदोऽश्वो वाहनमस्य॰ पृषत्ताम् उक्षणा नाम श्वरवेतिवा॰ यत्तु पृषंत्यं वुकणा अश्वास्येति मुकुटः तन्न वाह्यवाहकभावस्य विपरीतत्वा
त्॰ वहति॰ पचाद्यच्॰ गंधवहः यत्तु गंधस्य वह इति विगृह्य अकारादनुपपदात्सोपपदो भवतीति प्रतिषेधेनत्यस्य प्रायिकत्वात्पचाद्यजिति मुकुटः तन्न॰ प्राथि

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ❀ पृषदश्वो गंधवहो गंधवाहानिलाशुगाः समीरमारु

कत्वकल्पनायानिर्मूलत्वात्॰ उपपदाविवक्षायामचः सिद्धत्वाच्च॰ गंधं वहति॰ कर्मण्यण्॰ अनंसनेन॰ सलिकल्पनीति इल ९ त मरुज्जगत्प्राणसमीरणाः ❀
च्॰ आशु गच्छति॰ अन्यत्रापीति डः॰ सम्यगीरयति गच्छति ईरयति प्रेरयति वा॰ ईर गतौ॰ अच्॰ पुंचि तु समीरणः म्रियते नेन॰ वृद्धे न विना वा मरुत मृग्रो रुतिः ततः प्रज्ञाद्यण्
मरुत शब्दोपि बोध्यः॰ मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुदिति विक्रमादित्यकोशात्॰ मारुतः श्वसनः प्राणः समीरो मरुतो जगदिति संसारावर्त्ताच्च॰ अत एव जग
त्प्राणोपि पृथगपि॰ जगत्स्यादिष्टपे क्लीवं वायौ ना जंगमे त्रिषु इति रुद्रकोशः॰ जगदाख्यास्मृता वाते पिष्टपे जंगमेपि च जगती भुवने ख्याता छंदोभेदे जनेपि चेति विश्वः तत्र द्यु
तिगमिजुहोतीनां द्वे चेति क्विपि द्वित्वे गमः क्वावितिमलोपे तुकि॰ जगत्॰ जगतो॰ यदा तु वर्त्तमाने पृषद्वृहन्महज्जगच्छतृवच्चेति व्युत्पाद्यते तदा गिरचामिति नुम्॰ जगन् जगं
तौ यत्तु मुकुटः यदा वर्त्तमाने पृषद्वृहन्महज्जगन्नुशतृवदिति तन्नालीसवो चत्॰ तन्न॰ उणादिसूत्रस्यासत्वे मानाभावात्॰ उगित्कार्यार्थत्वाच्च एकत्वे तु जगतो प्राणः ❀

CC-0. In Public Domain. Digitization by eGangotri

नभोस्याश्रयत्वेनास्ति· मतुप्· तसौ मत्वर्थे इति भत्वात् हत्वाभावः· वाति· हसिमृग्रिणिति तन्· क्तिच् क्तौ च संज्ञायामिति क्तिच् वातिरपि· वायुर्मरुत्वान्· श्वसनः पवनो मरुत्तो निलः·
नभस्वान् क्षिपणुर्वातिः शुषिनौ नघटो वह इति साहसांकः पुनाति बहुलमन्यत्रापीति युच्· पवते· पूङ्· पनोः शानन्· आनेमुक्· प्रकर्षेण भनक्ति भञ्जो आमर्दने· युच्· विम
र्गतस्य प्रसरणे नापसरणे न समन्तात् ऊर्ध्वेन व्याप्त्या च· अनित्यनेन· हलश्चेति घञिति मुकुटः अन्ये तु प्राणयति अपानयति समन्तात् आनयति आनयते ईडः अज्वा इत्या
हुः इमे प्राणादयः शरीरस्था वायवः तत्र हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः कंठदेशे स्याद् व्यानः सर्वशरीरगः अन्नप्रवेशनं मूत्राद्युत्सर्गोन्नविपाच
नं भाषणादि निमेषादि तद्व्यापाराः क्रमादमी प्राण इत्यत्रानितेरिति णत्वं प्राणो हृन्मारुते बोले काव्ये जीवेनिले बले· पुल्लिंगः पूरिते वाच्यलिंगः पुंभूम्नि चासुषु र
मंते नेन· रमेर्हुक् चेत्यसुन् हुगागमश्च· रंहत्यनेन वा· रहि गतौ वसुन्· तरंत्यनेन तॄ प्लवनतरणयोः असुन्· रीणात्यनेन रीङ् गतिरेषणयोः एरच्· रयः इति भ
स्वामिमुकुटौ· तन्न करणे ल्युटो बाधकस्य सत्वात् तस्मात्पुंसीति घः रयंत्यनेन वा· रय गतौ पुंसि घः हलश्चेति घञ् तु संज्ञापूर्वकत्वाद्वृद्ध्यभावः स्यन्दतेनेन· स्य

नभस्वद्वातपवनपवमानप्रभंजनाः प्राणोपानः समानश्चोदानव्यानौ च वायवः शरीरस्था इमे रंहस्तरसी तु रयः स्यदः॥

दो जव इति घञन्तो निपातितः जु इति सौत्रो धातुः जवनं जूः दोरप्· चवर्गादिरिति मुकुटः वस्तुतस्तु रंह आदिष्वपि भावव्युत्पत्तिरेव व्याख्या ~~पंचवेगस्य~~· रंह आ
दयः सवेगगतिवचनाः शीघ्रादयस्तु धर्मवचना एव· अत एव शीघ्रं पचतीति प्रयोगो न तु जवं पचतीति वदेति वस्तुतस्तु रंहः प्रभृतयो वेगाख्यगुणपराः शीघ्रादयस्तु
कालाल्पत्वपरा इति· शिंघति व्याप्नोति· शिंघि आघ्राणे· शीघ्रादयश्चेति रगन्तो निपातितः त्वरतेस्म· ञित्वरा संभ्रमे· गत्यर्थाकर्मकेति कर्त्तरि क्तः रुष्यमत्वरसंघुषा
स्वनामिति वेट् इट् भावे तु र्णा· ज्वरत्वरेत्यूठ्· रदाभ्यामिति णत्वं· लघि गतौ· लंघते· लंघिवंह्योर्नलोपश्चेति कुर्नलोपश्च लघि शोषणे इति तु मुकुटस्य प्रमादः
क्षिप प्रेरणे· स्फायीतंचीति रक्· ऋच्छति ईयर्त्ति वा· ऋ गतौ· पचाद्यच्· अरमंगरथांगस्य शीघ्रशीघ्रयोरपीति शाश्वतः अलमित्यव्ययस्य वालमूलेत्यादि
ना रेफपक्षे तु अरमित्यव्ययमपि· अप्· बाहुलकात् क्लीवत्वमिति मुकुटस्य प्रमादः बाहुलकस्यागतिकगतित्वात्· अत्र नूक्षगतेः सत्वात् एतेन स्वामिमुक्तिरपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को· इत्वतिस्सद्रुगतौ गत्यर्थेति कर्तरि क्तः यत्तु भावे क्त इति मुकुटेनोक्तं· तन्न· त्वरितमित्यादावपि तथात्वप्रसंगात्· वैषम्यबीजाभावात्· एतेन लंघ्यत इति कर्मण्युत्पत्तिरपि
टी·रा· परास्ता ६७ सह त्वरया वर्तते· चोपति· चुपमंदायां गतौ· चुपेरच्चोपधाया इति कलप्रत्ययः· विलंबते स्म· लवि अवस्रंसने· अकर्मकत्वात्कर्तरि क्तः· नञ्समासः· भावे क्त
९७ इति मुकुटस्तु पूर्ववत्· अश्नुते अशू व्याप्तौ· कृवापाजीसुण्· आशुस्तु व्रीहिशीघ्रयोः एकाद्याशीघ्रस्य· संतन्यते स्म· तनु विस्तारे· क्तः· अनुदात्तोपदेशेति नलोपः· स
मावाहितननत योरिति वा समो मलोपः पक्षे संततं· आङ्पूर्वो रमिर्विरामे· अविद्यमान आरतं यस्मिन्· श्रमु तपसि खेदे च· भावे क्तः· अनुनासिकस्येति दीर्घः
अविद्यमानं श्रांतमत्र· नास्ति विरतमस्य· निद्राव्यापारराहित्यमुपचारात्· नास्ति निशाऽस्मिन् ६९ नियमेन भवं· त्यप् नेर्ध्रुवे· नास्त्यवरतं यत्र· नजस्यति· ज
सुमोक्षणे· नमिकंपीति रः सततमजस्रशब्दाव्ययावपि नित्यपर्यायौ सतः शाश्वद्भी· सततं नित्यं सदाऽसततमजस्रमिति सामान्ये इत्यव्ययप्रकरणे आपिशलिः नवनिरंतर

जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ६७ सत्वरं चपलं तूर्णमविलंबितमाशु च सततेनारताश्रांतसंतताविरतानिशं ६८ नित्यानवरताजस्रम्
प्यथातिशयो भरः अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ६९ तीव्रैकांतनितांतानि गाढबाढदृढानि च॥ ॥ ॥

स्य· सततं क्रियांतरैरव्यवधानं अतिशायनं स्तु पौनःपुन्यमिति भेदः अतिशेते· पचाद्यच्· यद्वा· अतिशयनं· एरच्· भावे· अतिशेतेऽभिभवत्यनेन· अतिपूर्वात्· शीङः एरच्· इ
ति मुकुटः तन्न· ल्युट्प्रसंगात्· भरः पूर्णतेति स्वव्याख्यानविरोधाच्च· भृभर्त्सने· करणेऽच्· हरप्· इति स्वामिमुकुटौ· तन्न· ल्युटा बाधप्रसंगात्· भरति· भृ भरणे· पचाद्यच्· य
द्वा· भरणं· पुंसीति घोऽ ब्नाना उपसर्गांतरनिवृत्त्यर्थं· निर्भर इत्युक्तः अंतिक्रांतं वेलां मर्यादां· अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः· भृशते· भृशु अधःपतने· अंत ९०
र्भावितण्यर्थादिगुपधेति कः भृशं· अर्थान्निवृत्तिर्विषयो वा तमतिक्रांतमत्यर्थः मात्रा लोकं तामतिक्रांतः गोस्त्रियोरिति ह्रस्वः उद्गाहते स्म गाहू विलोडने· क्तः निःप्रपे
णे भरोऽत्र ६९ तीव्राति· तीव स्थौल्ये· बाहुलकाद्रक्· एकोऽन्तो निश्चयो येनेति· नितान्यति स्म तमु कांक्षायां· अकर्मकत्वात्कर्तरि क्तः अनुनासिकस्येति दीर्घः गाढ मुद्गाढ
वत्· बाहृ प्रयत्ने· क्षुब्धस्वांतेति निपातितं॥

CC-0. In Public Domain. Digitization by eGangotri

दृह दृहि दृंहो· दृढः स्थूल बलयोरिति निपातितं· चतुर्दृढानि शपस्य· शीघ्रादि दृढपर्यंतं क्रियाविशेषणत्वाद् द्रव्ये वर्तमानं क्लीबे स्यात्· यथा शीघ्रं जुहोति सततं भुंक्ते ए
षां मध्ये यत्सत्वगामि द्रव्यगामि तत्त्रिषु· वाच्यलिंगमित्यर्थः शीघ्रा जरा· शीघ्रो मृत्युः शीघ्रं वय इत्यादि· अतिशयभरयोरसत्ववचनत्वेपि पुंस्त्वमेव· पुल्लिंगत्वेनानिर्दे
त्· गाढे क्लीबत्वनिर्देशात् तानि पुमानतिशयो भर इति रभसाच्च· अतिशयं पचतीति प्रयोगस्तु क्रियाविशेषणत्वात् कर्मत्वेन द्वितीया· क्लीबतानुनियतलिंगत्वात् शीघ्रादीनाम नियते
लिंगानां हि क्रियाविशेषणत्वे क्लीबतान् तु नियतलिंगानां क्वचिद् द्रव्यगामीति पाठस्तस्य विशेष्यगामीत्यर्थः ६७ कुत्सितं बेरं शरीरमस्य कुष्ठित्वात्· कुत्सायां क्विति शब्दे
यं शरीरं बेरमुच्यते· कुबेरः कुशरीरत्वान्नाम्ना तेनैव सोंकित इति वायुपुराणं· यद्वा· कुंबति धनं· कुबि छादने कुबेर्नलोपश्चेत्येरक्· त्र्यंबकस्य सखा राजेति टच्· यक्षेषु राज
ते सत्स्विति क्विप्· गुह्यं कायंति· आतोनुपेति कः· गुह्यकानामीश्वरः मनुष्यस्येव धर्म आचारः श्मश्रुलत्वादिर्वास्य· धर्मादनिच् केवलात्· धनं दयते देङ् पालने· आनडिति

क्लीबे शीघ्राद्यसत्वे स्यात्त्रिष्वेषां मेद्यगामि यत् ६७ कुवेरस्त्र्यंबकसखो यक्षराड् गुह्यकेश्वरः मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥
॥ ६८ ॥ किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ॥ यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वराः ६९ ॥ ॥ ॥

कः· राज्ञां यक्षाणां राजा· राजेति टच्· यक्षे चेद्रे च राजः स्यादिति त्रिकाण्डशेषः· धनानामधिपः ६८ किन्नराणामीशः· विश्रवसोपत्यं श्विवादिभ्यु विश्रवसो वि
श्रवणरवणौ वा देशो निपातितौ· अण् च· पुलस्तेर्गोत्रापत्यं· गर्गादिभ्यो यञ्· बहुत्वे पुलस्तयः अपत्यं गोत्रं वेति मुकुटः तन्न· अनंतरापत्ये यञोऽसंभवा
त्· नरो वाहनमस्य· क्षुभ्नादित्वान्नणत्वं· ईल स्मीम स्तोति व्याप्नोति· अशूव्याप्तौ· कर्मण्यण् यक्ष्यते· यक्ष पूजायां· अकर्त्तरीति घञ्· पुंसीति घो वा· यजति
शिवं पूज्यते लोकेन वा वा हुलकात् सो वा सामूर्य गौरीनिरीक्षणे वामेच क्षुविनष्टे रुद्रानुनयात् पिंगतामगात्· अत एकं पिंगमस्य· इडविडोपत्यं· तस्यापत्य
त्यमित्यण्· डलयोरैकत्वस्मरणाद् ऐलविलोपि· इडविला या अपत्यमिति वा विग्रहः तत्राद्द्वाभ्यो नेदीत्यण्· इडविडा असिमातृत्वेनास्यज्योत्स्नादित्वादलि
निवा· श्रियं दयते· ददातिवा पुण्यजनानामीश्वरः सप्तदश कुवेरस्य ७०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को· टी·रा·
१८

उर्वशी यस्मिन् याग्यापण्ये स्तुटः चित्ररथेन निर्वृत्तं तेन निर्वृत्तमित्यण् एकं नलकूबरो युगंधरो यस्य त्रिकांडशेषे तु पुत्रौ तु नलकूबरावित्युक्तं तत्तु नास्त्याविति विशेष
बारिकं बोद्धव्यं नलकूबरमणिग्रीवयोस्तत्पुत्रयोः पुराणप्रसिद्धत्वात् नलकूबरमणिग्रीवाविति ख्यातौ श्रीपान्विता विति भागवतं एकं केजले लसालसनमस्यके
लासः स्फटिकः तस्यायं कैलासः यद्वा केलीनां समूहः कैलम् तस्य समूह इत्यण् तेनास्यते त्र आस उपवेशने हलश्चेति घञ् अलति भूषयति अलभूषणा
दिभ्यः कुन् शिल्पि संज्ञयोरपूर्वस्यापि क्षिपकादित्वान्नेत्वं अलका कुबेरपुर्यामस्त्रियां चूर्णकुंतले एकं पुष्यति पुष्प विकसने कुन् पुष्पमिव वा इवे प्र
तिकृताविति कन् विमानं तु पुष्पकोऽस्त्री नगरी त्वलका प्रभेति तु शब्दार्णवात् पुंस्त्वमपि एकं १० किंचित्कुत्सितो वा नरः किं क्षेप इति समासः एवं किं पु
रुषः कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात् कस्यचिदश्वमुख नरशरीरत्वात् अथ किंपुरुषो लोकभेदः किन्नरयोः पुमान् तुरंगस्येव वदनमस्य मिनोति डुमि

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् १० स्यात्किंनरः किंपुरुषस्तुरङ्गवदनो मयुः नि
धिर्नाशेवधिर्भेदाः पद्मशंखादयो निधेः ११ इति स्वर्गवर्गः॥ द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमंबरं॥ १ नभोऽन्तरिक्षं गगनमनंतं सुरवर्त्म खं

वाहुलकान् कन्यारिकिन्नरस्य नितरां धीयते धात्रः किः नितरां दधाति पोषयत्यनेन निधीयते वा धिधारणे संपदादिः आगमशासनस्यानित्यत्वान्नतु कु
त्रोकल्याणे मा हेवाः शेवधिः तत्पुरुष इत्यलुक् यद्वा शेते नेन शेवं सुखं इण्शीभ्यां वन् शेवं धीयतेऽस्मिन् कर्मण्यधिकरणे चेति किः हुसामान्यनिधेः पद्मा लक्ष्मी
रस्मिन्नस्ति अर्श आद्यच् शाम्यत्यं दुःखं बाध्यते नेन शमेः खः पद्मोऽस्त्रियां महापद्मः शंखो मकरकच्छपौ मुकुंदकुंदनीलाश्च खर्वश्च निधयो नवेति शब्दार्णवः १२
इति स्वर्गवर्गः नविभर्त्ति किंचित् मूलविभुजादित्वात् कः यद्वा आपो न भवंत्यस्मात् अन्येभ्योपीति डः यद्वा अभ्रति स्थैर्यं गच्छति अच् अभ्रं व भ्रममभ्रं चर
गत्यर्थाः यद्वा न भ्राजते भ्राजृ दीप्तौ अन्येभ्योपीति डः अभ्रं मेघे च गगने धातुभेदे च कांचने व्ययति व्येञ् संवरणे नामन् सीमन्नित्यादिना मन्नंतं निपातितं यद्वा
व्यवति विपूर्वादवतेर्मनिन् ज्वरत्वरेत्यूठौ सवर्णदीर्घः सार्वधातुकेति गुणः पुष्यति पुष पुष्टौ पुषः किदिति करच्कित्वं च पुष्करं गगनपद्मवारिषु पुष्कर

अविशब्दे· भावे घञ्· अंवः शब्दः तं राति अंवरं· नह्यन्ते मेघैः णहवं घनेन हेर्दिविभश्चेत्यसुन् नभश्चांतादेशः नवभतीति वा· क्विप्· नभते· नभ हिंसायां असुन्· सांतं· नभः
क्लीवं व्योम्नि पुमान् घने· घ्राणे श्रावणे वर्षा सुबिसतंतौ पतद्ग्रहे· नभो व्योम्नि नभा मेघे श्रावणे च पतद्ग्रहे· घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृत इति विश्वः अन्य
विच मिन्नमीत्यक्षच प्रत्यये तु नभसमदं तमपि· नभसः पुंसी त्युणादिवृत्तौ द्यावापृथिव्योरंतरीक्ष्यते ऽंतरिक्षं ईक्ष दर्शने· कर्मणि घञ्· वेदे तु छांदसं ह्रस्वत्वं अंतः ऋक्षाणि नक्षत्रा
ण्यस्य पृषोदरादित्वादिरित्वं· अस्मिन्नक्षे ह्रस्वमध्यः अधिकरणल्युत्पत्तिस्तु नोचिता ल्युटा घञो बाधप्रसंगात्· गच्छंत्यनेनास्मिन्वा· गमेर्गश्चेति युच् गश्चांता
देशः नास्त्यंतो यस्य· सुराणां वर्त्म· खन्यते· खनु अवदारणे डः· खं खसं विदि व्योमनि इंद्रिये· शून्ये विंदौ सुखे खस्तु सूर्य इति हेमः स्वर्वंत्यस्मिन्वा खर्वं गतौ डः ७२॥
विश्वं तनोति व्याप्नोति· इणः शतृ· वियच्छति न विरमति वा· विपूर्वो यम रत्येभ्योपीति क्विप् क्वौ च गमादीनामिति मलोपे तुक् विष्णोः परमास्पदं स्वरूपं वा· वि
ष्णोः पदं   विक्रमोस्मिन्नेवेति स्वामी· तन्न· व्यधिकरणे बहुव्रीहिप्रसंगात्· आसमंतात्काशंते सूर्यादयोत्र· काशृ दीप्तौ हलश्चेति घञ्· विशेषेण हापयति· गा
नभोंतरिक्षं गगनमनंतं सुरवर्त्म खम् ७२ वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी॥ इति व्योमवर्गः। दिशस्तु ककुभः काष्ठा आ   शाश्च हरि
मयति विमानादीन्· हयगतौ· ण्यंतादसुन्· विजहाति भुवं वा· वहिहाधाञ्भ्यश्छंदसी त्यसुन्· णिदित्यस्यानुवृत्तेर्युक्· विपूर्वाज्जहातेर्वा बहुलकादसुन्णि ((तेश्च ताः।
ति मुकुटः तन्न· असुनो धातुमात्राद्विहितत्वेन बाहुलकस्यानुपयोगात्· यकारस्याश्रवणप्रसंगाच्च· वा तु पुंसीति तुशब्दादुत्तरत्रापि· तेनाकाशः विहायाश्च विहुर्विहा
यसं व्योम पक्षिणि श्च विहायस इति शाश्वतः· विहायाः शकुनौ पुंसि गगने पुन्नपुंसकं॥ इति व्योमवर्गः॥ दिशत्यवकाशं दिश अतिसर्जने क्विन् ऋत्विग्दधृगित्यादिना
निपातनात्· यत्तु मुकुटः कर्मण्येव क्विन् कर्तरि तु क्विवेवेत्याह· तन्निर्मूलमाकरविरुद्धं च· भागुरिमतेन टापि दिशा· दिक् तु स्त्रियां दिशादीनौ ककुद्देवव धूः प्रविरिति
शब्दार्णवः ककते ककलौल्ये· बाहुलकादुभप्रत्ययः यद्वा कं वातं स्कुभ्नाति विस्तारयति· स्कुंभु इति सौत्राद्धातोः क्विप्· पृषोदरादित्वात्सलोपः ककुप् स्त्रियां प्रवेणौ दिक्
शोभासु चंपकस्रजि· केनाह्विसेन जलेन वा कुत्सितानि भानि नक्षत्राण्यत्रेति· टावंतोपीति कश्चित्· तन्न· व्यधिकरणे बहुव्रीहिप्रसंगात्· काशते· हानि कुषीति क्थन्· आ
समंताद् श्नुते व्याप्नोति· अशूव्याप्तौ· अच्· हरंति नयंत्यनया· हृञ्सृतडिरुहियुषिभ्य इतिः हरिर्द्विशि स्त्रियां पुंसि हय वर्णविशेषयोः॥   ॥   ॥

अश्वियांस्यात्तृणेचाथ· नारत्यनेनस्त्रीलंव्यनक्ति·दिशांवहुत्वाद्बहुवचनं।पंचदिशः।प्राथम्येप्रशब्दोत्रप्रांचतिप्राप्नोतिसूर्यंअंचुगतिपूजनयोः ऋत्विगादिनाक्विन्प्रत्ययः प्रांचति
रविरस्यां· वाहुल्कादधिकरणेक्विन्निनिमुकुटः तन्न· वाहुल्कस्यअगतिकगतित्वात्· एवमग्रेपिवोध्यं· अन्होमध्ये· अन्त्यस्यामपाचीअपेत्यव्ययंमध्यार्थेअपदिशंमिति
वत्अपांचतिसूर्यमित्युचितं· कर्त्तरिक्विद्विधानात्· अवाचीत्यपपाठएव· अवपूर्वस्यांचतेरधोमुखीभावेवृत्तेः स्वामीत्ववशब्दस्यमध्यार्थतामाह· प्रतिपश्चाद्दिनांतेंच
तिसूर्यअस्यामितितुदुष्टं· पूर्वदक्षिणेत्यत्रसर्वनाम्नोवृत्तिमात्रेपुंवद्भावः १ उदूर्द्ध्वंतरत्यत्रनृप्लवनतरणयोः ऋदोरप्· उत्तरमंचसर्के· उत्क्रांतंदृष्टिपथमंचतिसूर्यंवा·
अस्यामितितुनयुक्तं· उदईदिशंचतेरतईकारः दिशिभवं· दिगादिभ्योयत्· ईंद्र इतिएवंचप्राच्यादीनामैंद्र्यादिनामानिरिंद्रादीनांचप्राचीपतित्वादीनिनामा
नीतिभावः २ पुंडरीकवर्णयोगात्· अर्थआद्यच्· खर्वत्वाद्वामनः कुमुदंरक्तोत्पलंतत्तुल्यवर्णत्वात्· कुमुदंकैरवंरक्तपद्मंत्रिकंभिकोषधो·गंधार्यापुंसिदिग्गजनागयोः

प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः १ उत्तरादिगुदीचीस्याद्दिश्यंतुत्रिषुदिग्भवे इन्द्रोवह्निःपितृपतिर्नैरृतोवरुणोमरुत् २ कुवेरईशः
पतयःपूर्वादीनांदिशांक्रमात् ऐरावतःपुण्डरीकोवामनःकुमुदोञ्जनः ३ पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः करिण्योऽभ्रमुकपिलापिंग
लानुपमाःक्रमात् ४ ताम्रकर्णीशुभ्रदंतीचांगनाचांजनावती॥ १९ स्वामृगांतरे· कौमोदतेवा· इगुपधेतिकः मुदहर्षे· मूलविभुजेतिकइतिमुकुटः तन्न·
अनुपयोगात्· अंजनवर्णः २ पुष्पमिवदंतायस्य· सर्वस्यांभूमौविदितः तत्रविदितइत्यण्· अनुशतिकादिः शोभनाप्रतीकाअवयवायस्य·सुप्रतीकोदिग्गीशोभे
शोभनावयवेत्रिषु·दिक्षुविख्यातागजाः दिग्गीशागजाइतिवाशाकपार्थिवादिः इंद्रादिगजानामेकैकं अभ्रेआकाशएवमातिमामाने·मित्रय्यादित्वात्कुः नभ्राम्यति·भृतृच
रीसुः वाहुल्काद्भ्रमेरपिमंथरगामिनीत्यर्थइतिवाकपिलपिंगलवर्णत्वात्कपिलापिंगलेअप्रधानास्युपमायस्याः ४ ताम्रोकर्णोयस्याः पाककर्णेतिङीष्· नासिकेतिवा·शुभ्रौ
दंतावस्याः नासिकोदरौष्ठेतिङीष्· शुभ्रौदंतावस्याःशुभ्रदंतीइतिपाठः तत्प्रत्यादेशात्यादिनादत्तृ उगितश्चेतिङीष्· अंगति· अगिगतौयुच्· अञ्जनवर्णत्वादंजनमस्त्यस्याः म
तौवहूचइतिदीर्घः करेणुसावतादीनांहस्तिनीनामेकैकं· क्लीवाव्ययमितिकर्मधारयोऽव्ययीभावत्वसूचनार्थः अव्ययीभावश्चेतिसूत्राभ्यांक्लीवत्वाव्ययत्वयोर्विधानात्·तेन

अपेतिमध्यवाची। शरदादित्वाट्टच्। आवंतेनसमासेतु टज्झाप्। समः दिशोरिदमपदिशं। विभक्त्यर्थे अयीः गावइति स्वामी तन्न। संवंधमात्रस्य विभक्त्यर्थत्वेपि मध्यस्यतदर्थत्वाभा
भावात् दिग्भ्यां विनिर्गता विदिक्। शान्तासैव प्रदिक्। यान्यासामन्तरालानि प्रदिशो विदिशश्च ता इत्यमरमाला ४ अभिगतमंतरं अंतरं लाति। आतोनुपेतिकः अन्येषामपीतिदीर्घः
आङ्प्रश्लेषोवा। मूलविभुजादित्वात्कः हेमध्यमात्रस्य चक्राकारेण वलते। वलसंवरणे। अच्। अन्येषामपीतिदीर्घः यद्वा। भावेघञि वालः चक्रमिव वालोस्य। यद्वा। चक्राकारेण वा उ
नेवाङ्आख्याव्ये अच्। चक्रवाडंडलयोरेकत्वस्मरणाच्चक्रवालं। मंडयति। मडिभूषायां। वृषादित्वात्कलच्। मंडं भूषांलातीति वा। हे मंडलाकारेण परिणतसमूहस्य। अपोदिभर्त्ति मूल
विभुजादित्वात्कः अभ्रति। अभ्रगतौ। अच्। नभ्रश्यंत्यापोस्मात्। भ्रंशु अधःपतने अन्येभ्योपीति ड इति वा। अभ्रं मेघे च गगने धातुभेदे च कांचने मेहति। मिह सेचने। अच्। न्यंक्वा
दित्वात्कुत्वं। मेघोमुस्ताजलदयोः पुमान्। वारिवहति। कर्मण्यण्। स्तनयति। स्तनगदी देवशब्दे चुरादावदंतः स्तनिहृषीतीत्नुच्। अयामन्तेतिणेरय्। वारिवाहकः पृषोदरादिः। व
लाकाभिर्हीयते गम्यते। ओहाङ्गतौ पृषोदरादिः। वलेनहीयते आहापयते वा कुन्‌ ६ धाराणां जलस्य च धरः धाराधरः। असिमेघयोः तडितः संत्यस्मिन्। मतुप्। रूपइति वलं। वा

स्त्रीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ५ अभ्यंतरं त्वंतरालं चक्रवालं तु मंडलं अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः ६ धाराध
रो जलधरस्तडित्वान्वारिदोम्बुभृत् घनजीमूतमुदिरजलमुग्धूमयोनयः ७ कादंबिनी मेघमाला त्रिषु मेघभवेऽभ्रियं॥ ८ ददाति। आतोनुपेति

कः अंबु बिभर्ति। क्विप्। हन्यते वायुना। मूर्तौ घन इत्यप् कुत्वं च। घनं स्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः नामुस्ताब्दे घनाद्येषु विस्तारे लोहमुद्गरे। जीवनं जलं मूतं बद्ध
मनेन। मूङ्बंधने। कर्मणि क्तः पृषोदरादिः ज्यानं जीः ज्या वयोहानौ। संप्रदादित्वात् क्विप्। जियावयोहान्या मूतो बद्ध इति वा। मोदंतेनेन। मुद हर्षे। इषिमदिमुदीति किरच्। मुदिरः
कामुके मेघे। जलं मुंचति। मुचॢ मोक्षणे। क्विप्। धूमो योनिरस्य। यद्यपि शब्दार्णवे मेघास्त्रिविधास्तत्र वन्हिजा धूमयोनयः निःश्वासजास्तु जीमूतास्तेह्याजीवरूपिणः
यज्ञजास्तु घनाघोराः पुष्करावर्तकादय इति विशेषपरत्वमुक्तं। तथाप्यन्यत्रापि वृत्तिर्न विरुद्धा पंचकं मेघस्य ७ कादंबाः कलहंसाः बलाका वा मेघमनुधावंति
तेसंत्यस्याः इनिः यत्तु ज्योत्स्नादित्वादण्। ङीविति मुकुटः तन्न। एवं हि कादंबीति प्रयोगप्रसक्तेः कदंबस्य विकासः कादंबोस्त्यस्याः कार्यत्वेनेति वा। मेघानां माला द्वे

प्र·
अ·को· अक्षेभवं· समुद्राक्का हृ· छांदसं तंप्रायिकं· स्त्रियामभ्निवा· एकं· स्तनगदीरेवशब्देगर्जशब्देः· रसशब्दे· एभ्योभावेक्तः मेघस्यनिर्घोषः आदिनाध्वनितह्रादरसादयः चत्वारि
टी·रा· मेघध्वनेः · भयंकरत्वात् शं सुखं पिबति· आतोनुपेतिकः टाप्· शतंह्रदाअव्यक्ताः शब्दायस्याः पृषोदरादित्वाह्रस्वः शतंह्रदा अर्चीषिअगाधजलह्रदायावासंत्यस्या इति
२० वा· अच्· ह्रादते· आवश्यके णिनिः ह्रादोस्तियस्यावाइनिः ह्रादिनीवज्रेतडितोः इरा आपः संत्यस्य इरावान्मेघः तस्येयं तस्येदमित्यण्· ऐरावतेनेकरदिकूत्तेनेकरिगिरित्य
णिति वा क्षणंप्रभायस्याः ताडयतितड आघाते ताडेर्णिलुक्चेति· डलयोरेकत्वात्तलिदपि· इरेचित्सेतल्लिदिवातिरोचसेइति मंत्रः श्वेतद्विपः सुदामेतित्रिकांडशेषेऐ
रावतपर्यायेतेनेकरिगिरित्यण्· अन्नितिप्रकृतिभावाट्टिलोपाल्लोपोनभवतः सुदाम्नाद्रिणेति वा सुदामानुपुमान्वारिधरपर्वतभेदयोः सुसम्निमेघेभवासौदामिनीत्यपपाठः
सौदामन्यप्सरोभेदेतडितद्भेदयोः स्त्रियांविशेषेणलाघामते· द्युतदीप्तौभ्राजभासेतिक्विप्· चंचुगतौ· घञ्· चंचंलाति· कः चंचलानुतडिल्लक्ष्म्यांश्चंचलाचपलेऽ नल्लेचोपति

स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ॥ ७ ॥ शम्पा शतह्रदा ह्रादिन्यैरावत्यः क्षणप्रभा तडित्सौदामनी विद्युच्चञ्चला चपलापि च ॥ ८ ॥ स्फूर्जथु
र्वज्रनिर्घोषो मेघज्योतिरिरंमदः इंद्रायुधं शक्रधनुस्तदेवऋजुरोहितम् ॥ ९ ॥ वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौसमौ ॥ ॥ ॥

चुपमंदायांगतौ चुपरञ्चोपधायाइतिकलच्· दपलाकमलाविद्युत्सुं श्चलीपिप्पलीषु च· नपुंसकंतुशीघ्रेस्याद्वाच्यवत्तरलेचलेइत्यमरविश्वः ॥ ८ ॥ स्फूर्जनंस्फूर्जथुः टु
ओस्फूर्जावज्रनिर्घोषे द्वितोथुच्· वज्रनिर्घोषोः शनिशब्दः वज्रनिष्पेषइतिपाठे· पिष्लृसंचूर्णने· घञ्· इदुदुपधस्येतिषः निष्पेषशब्दस्तद्धर्मस्पर्शवत्परः संघट्टमा
त्रपरइत्यन्ये एकंवज्रध्वनेः अन्योन्यस्यसंघट्टेनमेघाग्नि· सत्यवृक्षादीज्योतिः पततिसइरंमदः इरयाजलेनमाद्यतिदीप्यते अविंधनत्वात्· उग्रंपश्येरंमदेतिसा
धुः मेघेत्युपलक्षणं· तेनवाडवोपि· अतएवमेघाग्न्यादिरिरंमदइतिशब्दार्णवः ह्नवज्रामेः इन्द्रस्यायुधशक्रस्यधनुः इन्द्रधनुषः तदिंद्रधनुऋत्यानादिनाऋजुअवा २०
क्रंसद्रोहितंस्यात्· रुहेरश्चलोवेतीतः रोहितंरुधिरेप्रोक्तमृजुशक्रशरासने· रोहितोमीनमृगयोर्भेदरोहितकद्रुमेइतिविश्वः यद्वा· रोहणंरोहः संजातोस्येतितारकादि
त्वादितच्· एकं ॥ ९ ॥ वर्षणं· वृषुसेचने· स्त्रियांक्तिन्· अन्विघोभयादीनामुपसंख्यानमित्यचिवर्षं· त्युटिवर्षणमपि· नचाचात्सुदोवाधः वृषभोवर्षणादितिभाष्यप्रयोगा

अथ वृष्टिर्वर्षमस्त्री केचिदिच्छंतिवर्षणमिति शब्दार्णवः वर्षस्तु समाहृतीयां शब्दवृष्टिषु· वर्षधरे वर्षाप्तुप्रावृषीति हैमः हेतुरष्टेः तस्याः वृष्टेर्विघाते द्वौ· अवेग्रहो वर्षप्रतिबंधे इति अ
वपूर्वाद्ग्रहेर्वा घञ्· ग्रहवृदृनिश्चिगमश्चेत्यप् अवग्रहः द्वे वृष्टिविघातस्य धाराणां संपातः संभूयपतनं· पतेर्भावे घञ्· सृगतौ· आसरणं· घञ्· आसारः स्यात्प्रसरणे वेगवर्षे सुहृत्
द्बले इति विश्वः द्वे महावृष्टेः सृता वायुना इतस्ततः प्रेरिता अंबुकणाः शीकराः तालव्यादिः शीं वशीकरणं शूवृदृ इति तालव्यप्रकरणे तुष्मविवेकात्· शीकृ सेचने कृच्छेरन्निति
वाहुलकादरन्· इन्यादिरयमिति धनपालादयः एकं ११ कृलेति· कृत्र् हिंसायां· कृत्रादिभ्यः संज्ञायां वुन्· क्षिपकादित्वादित्वाभावः पुंस्यपि वर्षोपलस्तु करकाकरकोपि च टा।
श्यते· मेघच्छन्ने मेघांधकारितेऽन्हीति रात्रेरप्युपलक्षणं· रात्रावपि दुर्दिनं जलदध्वांतमिति रत्नकोशः दुर्निन्दितं दिनं चार्दलं दुर्दिनं मेघैः इति· एकं· अंतर्धानं व्यवधानं डुधाञ्
अंतःशब्दस्याङ्· किविधिल्लत्वेषूपसर्गत्वात् ततश्चोपसर्गे इत्यङ्· उपसर्गे घोः किरिति किः प्रत्ययेः नर्धिः ह्रञ् आच्छादने· चुरादिः ण्यंतात् भावे ल्युट् १२ वष्टिभागुरिरिति वा ल्लोपः तिरोंतर्धा
वितिगतित्वेकुगतीतिसमासः छद अपवारणे· ण्यंतात् ल्युट्· अण्यंतात् ल्युटि तु छदनं· यत्तु छदनमिति छादेर्घे इति योगविभागात् ह्रस्वत्वमिति मुकुटेनोक्तं तच्चिंत्यं· उक्तरीत्या प्रयो।

धारासंपात आसारः शीकरोम्बुकणाः स्मृताः ११ वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनं अंतर्द्धा व्यवधा पुंसि त्वन्तर्द्धिरपवारणम् १२ अपिधानतिरो
धानपिधानाच्छादनानि च हिमांशुश्चंद्रमाश्चंद्र इंदुः कुमुदबांधवः १३ विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः॥ ११ गह्रूयनिर्वाहे योगविभागस्य निष्प्रयोज

नत्वात्· अप्रावंतर्धानस्य· हिमा अंशवो यस्य चंद्रं कर्पूरं साहश्येन माति तुलयति· चंद्रमा· डिश्चेत्यसुन्· चंद्रमाल्हादं मिमीते निर्मिमीते इति वा· वाहुलकात्केवलादप्यसिः मिमीते आ
नंदमिति माः चंद्रः माः शब्दः केवलोपीह संमतो वहुदृश्वनामि त्सुन्यालिनी· कालं मिमीते· माश्चासौ चंद्रश्च चंद्रमा इति वा· राजदंतादिः चंदति· चदि आल्हादने· स्फायीतंचीत्तिरकु च
द्रेःऽवु काम्ययोः स्वर्णसुधाशशी कर्पूरे कपिल्लेमे च केपि चेति हैमः अचिरे फ शब्दोपि· हिमांशुश्चंद्रमाश्चंद्रः शशी चंद्रो हिमद्युतिरिति शब्दार्णवात् उनत्ति· उंदी क्लेदने· उन्देरि
च्चादेरिन्सुः यत्तु स्वामिमुकुटौ उन्दते उन्दती त्याहतुः तच्चिंत्यं· उंदेः रौधादिकत्वात् कुमुदानां बांधवः १३ विपीयषेण धयंत्येनं सुराः धेट् पाने वाहुलकात्कुः विधुः शशांके कर्पूरे
हृषीकेशे च राक्षसे इति विश्वः सुधायुक्ता अंशवो यस्य· शुभ्रा अंशवो यस्य· ओषधीनामीशः निशायाः पतिः॥

श्र·

अ·को· अब्जोजातःपंचम्यामजातावितिडः अब्जौस्त्रीशंखेनानिचुलेधन्वंतरौचहिमकिरणे· ज्ञौवंपद्मेइतिविश्वः जीवयती· अंतर्भावितण्यर्थः जीवेरित्यनुवृत्तौआतृकन्वृद्धिश्चेतिसाधुः

टी·रा· जैवातृकःपुमान्सोमेकृषकायुष्मतोस्त्रिषुअमृतंसूतेसोमः अर्तिस्तुसुहुस्रादिनामन्· सोमानकारांतोपि· नामन्· सीमन्सोमन्नित्यादिनादशपाद्यांनिपातनात्· यत्तुमुकुटे

२१ नोक्तंसूयतेजायतेनवोनवो भवतिजायमानइति श्रुतिः सूयतेयज्ञांगस्थानंवाकरोतिसूतेऽमृतंवासोमइति· षुञ्अभिषवेषूप्रेरणेवेति· तन्न· सूयतेःसकर्मकत्वेन

जायतइतिप्रतिपत्तेरसंभवात्· श्रुत्युपन्यासोप्यसंबद्धः जायमानइतिजनेरकर्मकस्यग्रहणात् एतेनैवस्वामिमुक्तिरपिप्रत्युक्ता· सूयतइत्यस्ययज्ञांगस्थानंवाकरोतीत्यर्थो

कथनमप्यसंगतं· प्राणिगर्भविमोचनार्थस्यतदसंभवात्· सुनोतेःसुवतेश्चोपन्यासः पूर्वान्वयीस्वतंत्रोवा· नाद्यः षूङ्विगृह्यतदुपन्यासस्यासंगतत्वात्· द्वितीयेपिअनि-

सुइतिह्रस्वस्यग्रहणेसुवतेरुपन्यासोऽसंगतः दीर्घग्रहणेसुनोतेरुपन्यासोसंगतः सोमस्त्वोषधीतद्रसेंदुषु· दिव्यौषध्यांघनसारेसमीरेपितृदैवते· वसुप्रभेदेसलिलेवा-

नरेकिन्नरेइतिहेमः ग्लायति· ग्लैहर्षक्षये· ग्लानुदिभ्यांडौः मृगांकोस्य· कलानिधीयतेत्र· डुधाञ्कर्मण्यधिकरणेचेतिकिः १४ द्विजानांराजा· राजेतिटच्·

अब्जोजैवातृकःसोमोग्लौर्मृगांकःकलानिधिः १४ द्विजराजःशशधरोनक्षत्रेशःक्षपाकरः कलातुषोडशोभागोबिंबोऽस्त्रीमंडलंत्रिषु १५

द्विजराजःशशधरेसोपर्णेनंतभोगिनीतिविश्वः शशस्यधरः नक्षत्राणामीशः क्षपांकरोतिकृञोहेत्वितिटः विं ((भिन्नंशकलखंडेवापुंस्यर्द्धंसमेंशके।।

शातिश्चंद्रस्यषोडशोभागः कलतिकलसंख्यानेपचाद्यच्· कल्यतेवा· पुंसीतिघः कलास्यांदशशिल्पयोरितिहेमः एकं· वेतिशोभते· वीगतौ· उल्बादयश्चेतिवन्नु-

मागमह्रस्वत्वानि· बिंबंतुप्रतिबिंबेस्यान्मण्डलेबिंबिकाफले· इतिहेमः मंडयति· मंड्यतेवामडिभूषायां· वृषादित्वात्कलच्· गौरादित्वात्· ङीष्· मंडली· स्यान्मंड-

लंद्वादशराजकेचदेशेचविंवेचकदंबकेच· कुष्ठप्रभेदेप्युपसूर्यकेपिभुजंगभेदेशुनिमण्डलःस्यात् इतिविश्वः द्वेरविचंद्रमंडलस्य १५ भिद्यतेस्मभिन्नंश-

कलमित्तिनिपातितं· शकोतिशक्यतेवा· शक्लृशक्तौ· शकिशम्योर्नित्इतिकलच्· शकलंत्वचिखंडेचरागवस्तुनिवल्कलेइतिविश्वः खडिभेदने· खंड्यतेकर्म-

णिघञ्· भावेघञितिमुकुटोक्तिरसंगता· खंडनक्रियायाएवग्रहणप्रसंगात् खंड्यमानस्याग्रहप्रसंगात् खनुअवदारणे· अमंताड्डुरितिवा· खंडोऽर्द्धेऐक्षवे· मत्सिदोषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा पुंसीति पूर्वोत्तराभ्यां संबध्यते । ऋधु वृद्धौ । ऋध्नोत्यनेनः हलश्चेति घञ् विशेष्यनिघ्नः चत्वारि खंडमात्रस्य समप्रविभागे अर्द्धशब्दः क्लीबमेव । तुल्यस्य खंडद्वयस्य मध्ये एकखंड
स्येकं चंद्रोऽस्त्यस्याः । ठन् । चंद्रं कायतीति वा इति मुकुटः तन्न । इत्वाभावप्रसंगात् । चंद्रमा चष्टे चंद्रयति । तत्करोतीति ण्यंतात् ण्वुल् स्त्रियां वा चंद्रिका चंद्रिमा चार्वीति शब्दार्णवः कुमुदा
नामियं । तस्येदमित्यण् । ज्योतिरस्त्यस्यां । ज्योत्स्नातमिस्रेति निपात्यते ज्योत्स्ना तंत्रांतरेपि स्याज्ज्योत्स्नायुक्तनिशि स्मृता । त्रीणि । षद्लृ विशरणादौ । भावे घञ् । प्रसादोनुग्रहः स्वा
स्थ्यं प्रसन्नता तु । काव्यगुणे इति हेमः प्रसीदति स्म । गत्यर्थेति क्तः प्रसन्नस्य भावः तल् । द्वयं नैर्मल्यस्य १९ कं ब्रह्माणं लंकयति हीनतां गमयति त्रापयति वा । लकि गतौ । कर्मण्य
ण् । अंक्यतेऽनेन अकि लक्षणे । हलश्चेति घञ् । लछ लाछि लक्षणे । लांछ्यतेऽनेन ल्युट् । लांछनं लक्ष्मचिन्हयोरिति हैमः लक्ष्यतेऽनेनेति विग्रहे ल्युटि लक्षणमपि ज्ञेयं वा
हयति चल्यतेऽनेन वा । चह परिकल्कने । बाहुलकान्नक् उपधाया इत्वं च । चिह्नं लक्ष्म पताकयोरिति हैमः लक्षयति । लक्ष दर्शनांकनयोः मनिन् । ल्युटि लक्षणं । लक्षेरट्
चेति नः मुट् चेति लक्ष्मणमपि । ज्योतिष्मत्यां च सारस्यां स्त्री क्लीबं नाम चिन्हयोः स्याद्यक्षे लक्ष्मणः पुंसि सौमित्रौ श्रीमति त्रिष्विति रभसात् । लक्ष्मीवनितु पामादित्वान्नः लक्ष्म्या अंके

चंद्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता १६ कलंकांकौ लांछनं च चिन्हं लक्ष्म च लक्षणम् सुषमा परमा शोभा शोभा कांतिर्द्युतिश्छविः १७

निगणसूत्रेण लत्वं बोध्यं षट् चिन्हस्य । शोभनं सर्वमनया । सुविनिर्दुर्भ्यः सुपि सूति समा इति षत्वं । एतेन सुखमादित्वात्यत्वमिति स्वामिमुक्तिः परास्ता उक्तरीत्या निर्वा
हे सुषमादित्वकल्पनस्य निर्बीजत्वात् । उत्कृष्टशोभाया एकं । शोभयति । शुभ शुंभ शोभायां । पचाद्यच् । यत्तु मुकुटेनोक्तं शोभतेऽनया । शुभ शुंभ शोभार्थाविति निर्देशात् गुरो
श्च हलः इत्यकार इति । तन्न । अर्थनिर्देशस्यानार्षत्वात् । यदपि गुरोश्च हल इति चकारादप्रत्यय इति तद्वयमिति । तदपि न । आकरे तथानुक्तेः उक्तरीत्या निर्वाहाच्च । शुभयती
ति शुंभापि बोध्या । काम्यतेः क्तिन् । अनुनासिके निदीर्घः इति मुकुटेनोक्तं तन्न । काम्यतरितिनेन विगृहीतत्वात् तत्रांतरंगत्वाणि इ-निमित्तवृद्धेः संभवात् । आयादय इति णि
ङभावे बोध्यं । द्युत दीप्तौ द्योततेऽनया । इगुपधत्वात् किदिति मुकुटः तन्न । इगुपधात्किदित्यनेन इन्विधानात् तस्य कित्वातिदेशात् ओविद्युतीच्च । क्तिनि तु द्युतिः छ्यति छि न
त्यसारमिति वा छ्यो छेदने । छिदिरद्वैधीकरणे । छविच्छविच्छवीति किन्नंतो निपातितः एषु भावे वा प्रत्ययाः शोभेत्यत्र खनो घ चेति घः द्युतिरित्यत्र इकृष्यादिभ्य इति इक् चत्वारि शोभा

मू·
अ·को· अवश्यायते शैत्यमापाद्यते श्यैङ् गतौ श्याद्व्यधेति णः निहूयते ह्नेञ् हरणे घञ् उपसर्गस्य घञीति दीर्घः यत्तु अध्यायन्यायेत्यत्र चकारान् घञिति मुकुटेनोक्तं तन्न अकर्त्तरि चेति क
टी·रा· र्मणि घञः सिद्धत्वात् तोषयति तुषेरंतर्भावितण्यर्थात् कमेः किरच्यनुवर्त्तितुषारादयश्चेत्यारन् किच्चानो हन्ति तुहिद्रु दुहिर् अर्दने वेघिनुल्याई स्वश्चेतीनन् हंति हंतेर्हिं चेति
२२ मकृहिनोति वर्द्धते हि गतौ वृद्धौ च मनिनिवा संज्ञापूर्वकत्वान्न गुणः हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकं शीतले वाच्यलिंगः प्रलीयंते पदार्था अत्रेति हिमाद्रिः प्रलयः त
नआगतं अण् केकयेत्यादिनायादेशः मत्स्यते मह पूजायां कुन्शिल्पिसंज्ञयोः मिहिकेति पाठे मिह सेचने क्वन् धूमिका धूममहिषी च वोध्यास्तहिमस्य हिमानां संहतिः महद्धिमं
हिमारण्ययोर्महत्व इति ङीषानुकौ द्वे हिमसमूहस्य १८ गुणो स्पर्शविशेषः शीतं शीतं हिमं गुणे क्लीबं शीतलालसयोस्त्रिषु वानीरवहुवारेनां श्यैङ् गतौ भावे क्तः द्रवमूर्तिस्पर्शा
योः श्य इति संप्रसारणं द्रवस्पर्श इति पर्युदासान्न निष्ठानत्वे सुषीमादयः समस्तुतह्यान् शीतगुणवान् अर्थो येषां ते तद्वदर्थाः ते च अन्यलिंगकाः विशेष्यलिंगाः सुष्टु सीमा मर्यादा य

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः १८ शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः तुषारः शीतलः
शीतो हिमः सप्तान्यलिंगकाः १९ ध्रुव औत्तानपादिः स्यादगस्त्यः कुंभसंभवः॥ ११ स्य· सुषामादिषु चेति षत्वं स्वामी तु सुष्ठु श्यायते इति विगृह्य तालव्यम

ध्यमाह तत्र वाहुलकान्मकः संप्रसारणं च मुकुटस्तु तदयुक्तं सुषामस्वसुषेणश्च सुगंधिः सर्वपोपि चेति दंत्यमूर्द्धन्य ऊष्मविवेकादित्याह शश प्लुतगतौ अजिरशिशि
रेति किरच् उपधाया इत्वं च निपात्यते शश्वच्छब्दं कश्चिच्छिरएयपि शूकशिंविसाल्वयशब्दपयुताः कथिताः कियंत इति शभेदः जलति घनीभवति जल घातने अच् डलयो
रेकत्वस्मरणाज्जडः शीतं गुणोस्यास्ति सिध्मादित्वाल्लच् शीतं लाति को वा अर्श आद्यच् वि शीतः समस्त शीतलद्रव्यस्य १९ ध्रुवति स्थिरो भवति ध्रुगतिस्थैर्ययोः क् कुटादित्वा
न ङित्वं यत्तु मुकुटेन उकारांतधातुमुपन्यस्य गुपधात्क इत्युक्तं तदसमंजसात् वकारांते धातौ तद्योगः ध्रुवः शंखे हरे विष्णौ वटे चोत्तानपादजे वसुयोगभिदोः पुंसि ध्रुवं खेऽजस्रतर्क
योः स्त्री मूर्वा घोषाल पर्यायौ गीति सुभेदयोस्त्रिषु स्थिरे निश्चिते च ध्रुवं क्लीबे प्रकीर्तितं उत्तानपादस्यापत्यं अत इञ् मुकुटस्तु ऋषित्वाद्यध्यंधकेत्यणि प्राप्ते वाह्वा २२
दित्वादिञित्याह तन्न उत्तानपादस्य ऋषित्वे मानाभावात् दुध्रुवस्य अगं विंध्यं स्त्यायति स्तभ्नोति अत्तोनुपसर्गे कः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अगस्त्यः स्यात्कुम्भयोनौ वंशसेनतरावपि॰ अगमस्यतीत्यगस्तिरपि॰ वसेस्तिर्बाहुलकाद्दस्यतेरपीति मुकुटः वस्तुतस्तु क्तिच्क्तौ चेति क्तिजुचितः बाहुलकाश्रयस्यागतिक गतित्वात् शकंध्वादिः अथागस्त्यः कुंभयोनिरगस्तिः कलशीसुत इति शब्दार्णवः देवताद्वंद्वे चेत्यानङ् ऋषिसमुदायस्यानृषित्वात् अपत्ये तद्धिति मुकुटः तन्न॰ एतयो अनृषित्वेमानाभावात्॰ वारुणिरपि॰ मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणिरिति व्याडिः अणपि दृश्यते॰ और्वशेयागस्त्यमैत्रावरुणस्त्वाग्निमारुता इति नाममनिधाना न्॰ त्रीण्यगस्त्यस्य अस्यैव पत्नी लोपामुद्रा॰ नमुदं राति आतो नुपेतिकः असुद्रा लोपेधर्मलोपे अमुद्रा हर्षं न लभत इत्यर्थः स्वाम्युक्तेः स्यपृषोदरादित्वे फलं चिंत्यं यत्तु लोप पतियोषितांरूपाभिमानं पचाद्यच्॰ टाप्॰ लोपा मुदयति सच्छुः सृष्टिमिति मुद्रा ततः कर्मधारय इति मुकुटेनोक्तं तच्चिंत्यं॰ लोपाशब्दस्यैव भाषितपुंस्कत्वात्॰ पुंवद्भावप्रसंगा त्॰ आङ्प्रश्लेषेण वा तत्समाधेयम् समानो धर्मोस्त्यस्याः इति समानस्येति सः एकम्॰ २० नक्षदते हिनस्ति क्षदेति सौत्रो धातुर्हिंसार्थ आत्मनेपदी ष्ट्रन्॰ नभ्राणनपादिति नञः प्रकृतिभावः यत्तु सदनीति विग्रहप्रदर्शनं मुकुटेन कृतं तच्चिंत्यं यद्वा॰ णक्ष गतौ॰ नक्षति॰ अमिनक्षिकलिभ्यो ऽत्रन् नक्षति गच्छतीति वा॰ क्षणु हिंसायां ष्ट्रन् बाहुलकान्नलो

मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी २० नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्॰ ॥

पः नक्षत्रं वा देवत्वात् क्षत्रभिन्नत्वात्॰ ऋषति॰ ऋषी गतौ॰ स्नुवृश्चिकृत्यृषिभ्यः किदिति सः षढोरिति कः ऋक्षं ऋक्षस्यान्नक्षत्राच्छभल्लपो महीधरविशेषे च शोणके लक्षवेध न इति हैमः भाति अन्येष्वपीति डः भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद्भगुनंदने॰ भ्रमरो भः प्रकीर्तित इत्येकाक्षरः तरंत्यनया भिदादिपाठादङ् गुणः निपातनाद्दीर्घः तारयतेः पचाद्य चि तारापि॰ नक्षत्रे नेत्रमध्ये च तारा स्यात्तार इत्यपीति व्याडिः ण्वुलि तारका तारकाज्योतिषीत्वाभावः अपिशब्दात्तारकापि वा स्त्रियां॰ स्त्रियां स्त्रीत्वाभावे क्लीबत्वमुडु सा हचर्यात्॰ नक्षत्रे चाक्षिमध्ये च तारकं तारकापि चेति शाश्वतः अवतीत्युक्षिप्॰ ज्वरत्वरेत्यूठ् ह्रस्वो नपुंसक इति वा समासोन्तः मिको ह्रस्वोन्य इति वा ह्रस्वः उयतेर्डुः डी ओमि तं ड्वादित्वान्डुः उच तत् डुच इति विग्रहः स्त्रियां तु उडुश्चासौ डुश्चेति त्वे पः उडुः उडु उडु वृत्यादि धेनुवत्॰ यद्वा उसं वुदोरुणोक्तौ च पित्वे वा चीलनव्ययं॰ उ प्रश्ने चेति हैमः उ क्वो घड यते उनावीभुनाडीयते वामितं ड्वादेश्चेति डुः षट्॰ नक्षत्रसामान्यस्य दक्षस्यापत्यानि वा नामधेयस्येति वृद्धसंज्ञायामुदीचां वृद्धादगोत्रादिति फिञ्॰ गोरादित्वात्॰ ङीष्॰ यत्तु आसु

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को·
दा·रा·
२३

संख्यानमित्यत्र केचिद्दासुरिदाक्ष्यो रितिमुकुटआह· तन्न· भाष्ये दाक्षेर दर्शनात्· यदपि गोत्रत्वमुपचर्य गोत्रेकुञ्जादिभ्यश्च्फञिति जाते रस्त्रीविषयादयोपधात् ङीषित्याह· तदपि न·
कुञ्जादिगणेस्यपाठाभावात् उक्तरीत्या उपचारं विना निर्वाहाच्च· यत्तु अत इञ् अनंतरापत्येपि द्वैपायनवत् यत्रिञोश्चेति फगिति स्वाम्याह· तदपि न· अनंतरापत्ये फकोऽदर्शनात् द्वी
पमयनमस्य द्वीपायनः द्वीपायनस्यापत्यं द्वैपायनः ऋष्यणिति द्वैपायनशब्दव्युत्पत्तेर्दृष्टांतासंभवाच्च· यदपि इतो मनुष्यजातेरित्यत्रेञ उपसंख्यानात् ङीष्· कौरव्यमांडू
काभ्यां चेति चकाराद्दासुरायणीवत् ष्फ इति· तदपि न· त्वदुक्तोपसंख्यानाऽप्रसिद्धेः चकारस्यानुक्तसमुच्चयार्थत्वे मानाभावाच्च· यदपि दक्षमयते ल्युः प्रज्ञाद्यणित्याह
मुकुटः तदपि न· प्रज्ञाद्यणत्वदूपद्वयप्रसंगात्· अश्विन्याद्याः सप्तविंशतिनारकादाक्षायण्य उच्यंते· अश्वं युनक्ति रूपेणानुकरोति· सत्सूद्विषेति क्विप्· यत्तु ऋत्विगा
दिनाक्विन्निति मुकुटः तन्न युजेः केवलात् क्विन्विधानात्· अश्वः अश्वरूपमस्त्यस्याः इतिः द्वे २१ राध्नोति कार्यमनया· राध संसिद्धौ· गोरश्च हलइत्यकारः राधयति· अजि

दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी २१ राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया समा धनिष्ठाः स्युः प्रोष्ठपदा भद्रपदाः स्त्रियः २२

तिवा· राधा विद्युद्विशाखयोः विष्णुकांतामलकीश्च गोपीगंधविशेषयोरिति हेमः· विशाखति· शाखृ व्याप्तौ· वि १ मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ॥
शाखायां चकेऽस्कंदे विशाखाभेकठिल्लके इति हेमः· द्वे· पुष्यंति कार्याणि· पुष्यः कलियुगे स्मृतः मासनक्षत्रयोर्भेदे· सिध्यंत्यस्मिन्· पुष्यसिध्यौ नक्षत्रे इति क्यपि निपातितः· तुष्य
न्य त्यस्मिन्· तुषतुष्टौ· सूर्यतिष्येति निपातनाल्लोपः उपधेत्वं च· तिष्यो नक्षत्रभेदेस्यात् कलौ धात्र्यां च योषिति· त्रीणि· श्रवणं श्रवः ऋदोरप्· प्रसिद्धिः श्रवोस्त्यस्याः मतुप्· अतिशयेन
श्रववती रिष्ठन्· विन्मतोर्लुगिति मतुपो लुक्॥ एवं अतिशयेन धनवती सा श्रविष्ठया समेत्यन्वयः द्वे· प्रोष्ठो गौस्तस्येव पादा यासां सुप्रात सुश्वेत्यादिना बहुव्रीहौ वचपद्भा
वश्च निपातितः प्रोष्ठपदयोर्द्वित्वेपि फल्गुनीप्रोष्ठपदानामिति नक्षत्राण्याश्लिकं बहुत्वं भद्रपदं यासां ताः अत्रारोपाद् बहुत्वं· यत्तु सुप्रातेति प्रोष्ठपदा भद्रपदाश्च निपातिता इति मु
कुटः तन्न· भद्रपदाशब्दस्य तत्राग्रहणात्· एतेनार्थग्रहणाद् भद्रपदेति स्वाम्युक्तिरपि परास्ता· द्वे पूर्वभद्रपदोत्तरभद्रपदानाम् २२ आक्रम्यामृगः शीर्षं शिरो यस्य मृगः शि
रोऽस्य रूपभेदात् क्लीवं सौम्या मृगशिरसः मृगशिरा इति वोपालितः स्त्रीत्वमप्याह· मृगोपि· मृगशीर्षे हस्तिजातौ मृगः पशुकुरंगयोरिति व्याडिः अग्रेहायनमस्याः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मार्गशीर्षमारभ्य वर्षप्रवृत्तेः अग्रहायण· पूर्वपदादिति णत्वं· आग्रहायणी पौर्णमासी तद्योगान्नक्षत्रमपि तथा· यत्तु आग्रहायण्यश्वत्थाट्ठगिति निर्देशान्स्वार्थे ण गौरादिङीषू अ
संतादेव ङी सिद्धे गौरादिषु पाठस्य पुंवद्भावनिषेधार्थः तेनाग्रहायणीभार्य इति सिद्धमिति मुकुटः तन्न· अप्रसिद्धत्वात् नहि गौरादित्वं पुंवद्भावप्रतिषेधनार्थं किं तु ङीविधानार्थं
न च पाठसामर्थ्यं तस्य स्वरभेदार्थत्वात् न चोदात्त निवृत्तिस्वरेण तदभावः पाठसामर्थ्याद् उदात्तनिवृत्तिस्वरस्यैव बाधसंभवात्· अस्य गौरादित्वमप्रामाणिकमिति सुवचत्वात् त्रीणि
इन्वंति प्रीणयंति· इन्वि व्याप्तौ प्रीणने च· इदित्वान्नुम्· संज्ञायां कन्· क्षिपकादित्वादित्वाभावः इल्वला इति पाठे तु इल स्वप्ने क्षेपणे च· सा नमि वर्णसीति वलच् गुणाभावश्च निपा
तनात्· मृगशीर्षशिरोदेशस्थानां पंचानां स्वल्पतारकाणामेकं २२ वृहतां पतिः तद्वृहतोरिति सुट् तलोपौ· अलुकि वृहतां पतिरित्यपि· सुराणामाचार्यः गिरां पतिः अहरादीनामिति वा रे
फः पक्षे कस्कादित्वात्स इति केचित् प्रशस्ता धिषणा अस्य· अर्शआद्यच्· यद्वा धृष्णोति· त्रिधृषा प्रागल्भ्ये धृषेर्धिष च इति क्युः गृणाति उपदिशति· गृ शब्दे कृग्रोरुच्चेति कुः उश्वांतादेशः गुरु

इल्वलास्तच्छिरोदेशे तारका निवसंति याः २२ वृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः जीव आंगिरसो वाचस्पतिश्चित्रशिखंडिजः २४
शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः अंगारकः कुजो भौमो लोहितांगो महीसुतः २५॥ १९ र्महत्यां गिरसि पित्रादौ धर्मदेशके अलघौ दुर्जरे चापीति·

हैमः जीवयति: अच्· मृतसंजीवनमंत्रज्ञत्वात्· जीवः स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि इति हैमः अंगिरसो· अंगिरा इत्यसुन्नो निपातितः अंगिरसोपत्यं· ऋष्यंधकेत्य
ण· वहुत्वे अत्रिभृग्विति लुक् आंगिरसः आंगिरसौ अंगिरसः वाचस्पतिरित्यत्र षष्ठ्याः पतिपुत्रेति सत्वविधानात् षष्ठ्या अलुक् लुक्पक्षे वाक्पतिरपि ऋषयः स
प्त धीमद्भिः स्मृताश्चित्रशिखंडिन इति हारावली तदंतर्गतादंगिरसो जातत्वाच्चित्रशिखंडिनो जातः पंचम्यामिति डः २४ २४ माहेश्वरशुक्रद्वारा निर्गतत्वाच्छुक्रः
शोचति· शुच शोके ऋज्रेंद्रेति रगिति वा· दैत्यानां गुरुः कुङ् शब्दे केतुमवश्यमाख्यातुमर्हत्वात् काव्यः ओरावश्यक इति ण्यत् कवेरपत्यं कुर्वादिभ्यो ण्य इति वा· व
शकांतौ· वष्टि वशेः कनसि ग्रह्यादित्वात्संप्रसारणं· ऋदुशनेत्यनङ्· भृगोरपत्यं· ऋष्यण्· वहुत्वे लुक्· भृगवः कवति कु शब्दे अचइः कौतीति वा २५· अंगानी घर्ति पीनत्वात्
कर्मण्यण् संज्ञायां कन् अंगार इव· कन् रक्तवर्णत्वादिति वा अंगति वा अगिगतौ आरन् कौ पृथिव्यां जातः पंचम्यामिति डः भूमेरपत्यं शिवादित्वाद् अण्· भौमो मंगलदैत्ययो

रोहिण्या अपत्यं· स्त्रीभ्यो ढक्· रौहिणेयो भवेद्दत्सेरेवती रमणोबुधे इति विश्वः बुध्यते· बुध अवगमने कः सोम इव सौम्यः वाम्भ्यादिभ्यो यः ततः प्रज्ञाद्यण्·त्री लि सूर्य स्यार्कस्याऽपत्यं
अतस्त्वं तस्य इञ् मित्युल्लिखितसौरोऽपि· शनैश्चरति यं गुत्वात् अचू मानि शौरि शनै· श्चरा इति रभसाच्छनिरपि· शनैश्चरे मंद इति वा चस्पतिः द्रुनाम्यतिनमुग्लानेः असुनः तमुकां क्षायामि
ति मुकुटस्य प्रमादः तम्यतो निति विगृहीतत्वात् तमांसि गृण्णाति मिरसैंहिकेया इति त्रिकाण्डशेषः पचाद्यचि अदंतं पुल्लिंगोपि स्वर्भानुस्तु तमो राहुरिति पुंस्कांण्डेरत्नकोशामरमालयोर्द
र्शनात् रहति गृहीत्वा त्यजति चंद्रार्कौ रह त्यागे भ्वादिः वाहुलकादुण्· रह श्चेत्युणिति मुकुटस्य प्रमादः एतादृशसूत्रादर्शनात् स्वरा काशे दिवं तेन स्वर्णया भाति दाभाभ्यां नुः
स्वभ्वादिः सिंहिकाया अपत्यं· स्त्रीभ्यो ढक् विधुं तुदति विध्व्यरुषोस्तुद इति खश् अरुरिति मुम् पंच राहोः केतुः शिखीति स्वामी २६ सप्त ऋषयश्च· द्विक स्त्वि इति हिगुः
स्वभ्वादिः सिंहिकाया अपत्यं· स्त्रीभ्यो ढक् विधुं तुदतीति विध्वरुषोस्तुद इति खश् अरुरिति मुम् पंच राहोः केतुः शिखीति स्वामी २६ सप्त ऋषयश्च· दिक्स्थे इति द्विगुः
चित्रः शिखण्डः चूडाविशेषो स्त्येषामिति व्युत्पत्त्या प्रत्येकं सप्तापि चित्रशिखंडिनः मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखंडिनः अ

रौहिणेयो बुधः सौम्यः समौ सौरि शनैश्चरौ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ३६ सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखंडिनः राशीनामुद
यो लग्नं ते तु मेषवृषादयः ३७ सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः भास्कराहस्कर ब्रध्नप्रभाकरविभाकराः ३८॥ ११ अवन्ते व्याप्नुवंति अभूव्याप्तौ

अशिपणाय्यो रुडायलुकौ चेति रुडागमः इण् प्रत्ययश्च· लगति फले· लगे संगे· सुब्ध्वस्तां तेति क्तस्येड् भावस्तस्य न श्च निपात्यते यत्तु लगति साध्ये निजे इति विग्रहं प्रद
र्श्य ओलजी ओलस्जी व्रीडने इति धातो रूपन्यसनं मुकुटेन कृतं· तन्न· उक्तधातोर्लगतिरूपाभावात् प्रकृतेर्थासंगतेश्च· अतः श्वीदितो निष्ठायां ओदितश्चेति सूत्रयो रूपन्या
सोऽव्यर्थः लग्नं राश्युदये क्लीवं सक्ताल ज्जितयोस्त्रिषु· एकं ते राशयः मेषवृषौ आदी येषां ते ३७ सुवति प्रेरयति कर्मणि लोकं षूप्रेरणे· सुसूधागृधिभ्यः क्रन् इंस्मादि शवति· शृगतौ
शुसिचिमीनां दीर्घश्चेति क्रन् शूरश्च· शूरश्चारुभटे सूर्ये इति विश्वः सुभटे शूरः सूर्ये च दंत्यापी त्युष्मविवेकः शूरयती ति वा· शूर विक्रांतौ· अचूयत्तु सूतेप्रेरयत्यंधकारं इति वि
ग्रहं प्रदर्श्य षूप्रेरणे इति धातो रूपन्यसनं मुकुटेन कृतं· तन्न· उक्तधातोस्ता दृश रूपाभावात् सरति· सृगतौ सुवति प्रेरयति कर्मणि लोकानिति वा· षूप्रेरणे· राजसूयसूर्येति
निपातितः सूर्यो ऽर्कपर्यो तपने स्त्री तु नार्यो वधी भिदोः इत्यर्त्तिः ष्वन्तुसन्पूषन्निति निपातितः अदितेरपत्यं दित्यदित्येति ण्यः द्वादश आत्मानो मूर्त्तयो यस्य· दिवा दिनं करोति

CC-0. In Public Domain. Digitization by eGangotri

भास्वः संत्यस्यः मतुप्‌· विविधं वस्ते आच्छादयति· वस आच्छादने क्विप्‌· विवो रश्मिः विवो स्यास्ति· मतुप्‌· तसौ मत्वर्थ इति भत्वाद्रुत्वाभावः सप्ताश्वा यस्य· हरितोऽश्वा यस्य उष्णो रश्मयो
यस्य· विकर्षेण कर्त्तनं यस्य विश्वकर्मणा यंत्रोल्लीढत्वात्‌· विकर्त्तयति भक्तरोगानिति वा· कृती छेदने णिजंतान्ल्युट्‌· अर्च्यते· अर्च पूजायां· कर्मणि घञ्‌· चजोरिति कुत्वं यद्वा· कृ
दाधारार्चि कल्गिभ्यः कः चोः कुः यद्वा· अर्क स्तवने चुरादिः अर्क्यते· एरच्‌· एरज्‌ ण्यंता नामिति मते घञ्‌· मृतेऽण्डे भवः शकंध्वादिः पुरा मार्त्तण्डमास्यत्‌· पुनर्मार्त्तण्डमाभरदित्यादि मंत्रा
दीर्घोपि· अथ मार्त्तंडमार्त्तंडाविति नाम विधानाच्छब्दार्णवाच्च मार्त्तंडः क्रोधसूर्ययोः मेहति· मिह सेचने· इषिमदीति किरच्‌· मिहिरः सूर्यवृद्धयोः मेहेः किरचि महिरोपि· महिरमि
हिरणी घाः कालहृत्य च्युपालि रिति त्रिकांडशेषात्‌ अश्नुते· अर्त्तिश्चेत्युनन्‌· पुष्णाति· पूषति वा· पूषन्‌ इत्यौ पुषपुष्टौ वा श्वन्नुक्षन्निति निपातितः २९ दिवो मणिरिव तरं त्यनेन संसारं
तरणिः अर्त्तिसृधृ इत्यादिना तरतेरनिः तरणिस्तु मणौ पुंसि कुमारी नौकयोः स्त्रियां· मेद्यति· ञिमिदा स्नेहने· अमि चिमिदिशसिभ्य इति क्त्रन्‌· चित्रा भानवोऽस्य· चित्रभानुः पुमा
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः विकर्त्तनार्कमार्त्तण्डमिहिरारुणपूषणः २९ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः विभावसुर्ग्र
हपतिस्त्विषांपतिरहर्पतिः ३० भानुर्हंसः सहस्रांशुस्तपनः सविता रविः॥ १९ नृवैश्वानरे चाहस्करेपि च विरोचने· रुच दीप्तौ· अनुदात्तेतश्चेति युच्‌ विरोच
नं प्रल्हादयति तनयेऽर्केग्निचंद्रयोः विभैव वसु यस्य· विभावसुः पुमान्सूर्ये हारभेदे च पावके ग्रहाणां पतिः त्विषांपतिः अलुक्‌· अन्हः पतिः अहर्पतिः ३ भाति दाभाभ्यां नुः हंति·
हृन्तृ वरिहनीति सः हंसः स्यान्मानसौ कसि निर्लोभ नृप विष्ण्वर्कपरमात्मन्यमत्सरे· योगभेदे मंत्रभेदे शारीरमरुदंतरे· तुरंगमप्रभेदे च सहस्रमंशवो यस्य· तपति· ल्युः तपनो रु
ष्करेपि स्याद्भास्करे निरयांतरेतापनोपि· तपनस्तापनो रविरिति संसारावर्त्तात्‌· सुवति प्रेरणे· तृच्‌· यत्तु सूयते सूते इति स्वामिमुकुटाभ्यामुक्तं तन्न स्वरति सूति सूयती तीड्वि
कल्पात्प्रसज्येत इति रूपप्रसंगात्‌· उरू धात्वोरर्थासंगतेश्च· रूयते सूयते रवते वा रविः रु शब्दे रुङ्‌ गतौ वा· अथ त्रः चंडांशुरपि· चंडांशोः पारिपार्श्विका इति वक्ष्यमाणत्वात्‌
सप्ततिं घातुः मन्तुते मठरः स एव माठरः जनेरष्ठ चेत्यनुवर्त्तमाने· वचिमनिभ्यां चिच्चेत्यर प्रत्ययः ठश्चांतादेशः नतः प्रज्ञाद्यण्‌· मठति· मठ मदनिवासयोः बाहुलकादरच्‌·
मठरस्यापत्यमिति वा· ऋष्यण्‌ मठंत्यनेन मठः पुंसीति घः मठं राति· रा दाने· कः मठरस्यापत्यं वा· पिंगलो वर्णोस्यास्ति· अर्श आद्यच्‌॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को· पिंगंवर्णत्वानीनिवाकः दंडोस्यास्ति· अच्· दंडयतीनिवापार्श्वे इतिपरिपार्श्वंविभक्त्यर्थेव्ययीभावः परिपार्श्वंवर्तते इत्यर्थेपरिमुखंचेतिचकारात्ठक् सूर्यपार्श्वस्थानांमाठरादित्र
टी·हा· याणामेकैकं ३१ सूर्यस्यसूतः अरुणोवर्णोस्यास्ति· अच्· गुणेतिमतुपोलुग्वा· अविद्यमानावूरूयस्य कश्यपस्यापत्यं· वाह्वादित्वादिञ् गरुडस्याग्रजः पंचसूर्यसूतस्य परितोविष्य
२५ तेऽनेनविष्णुव्याप्तौ घञ्· परिवेषः स्यात्परिधोपरिवेषणइतिमूर्द्धन्यांते रुद्रः विशप्रवेशनेऽस्मात् घञितुतालव्यांतः वेष्टनेपरिवेशः स्याद्भानोः सविधमंडलेइतितालव्यांते
रभसः परितोधीयतेनेन उपेतिकिः उपगतंसूर्यमुपसूर्य्यं· प्रादिसमासः ततः स्वार्थेकन्· मडिभूषायां· मंडतेइत्यादित्वात्कलच्· मण्डलंपरिवेशश्चपरिधिश्चोपसूर्यक
मितिभागुरिः चत्वारिचंद्रसूर्ययोरुत्पातादिजातमण्डलस्य ३२ कीर्यंते· कॄविक्षेपे· कृपॄवृजीतिक्युः वसंतिरसाअस्मिन्· वसनिवासे· स्फायितंचीतिरक्· यजादित्वात्संप्रसारणेनरप
रेतिनषत्वं मिमीते· माङ्·ऊखोमयूचेत्यूखप्रत्ययोमयादेशश्च एतेनमापयन् प्रमापयन् गगनमोखतिगच्छति· मांमानेउखणखेतिदंडकोक्तोगत्यर्थः अच्· पृषोदरादिरि

माठरः पिंगलोदंडश्चंडांशोः पारिपार्श्विकाः ॥ सूर्यसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः परिवेषस्तुपरिधिरुपसूर्यकमंडले ३२ किरणोऽस्र
॥९ मयूखांशुगभस्तिघृणिपृश्नयः ॥

तिमुकुटः परास्तः धातुसमुदायात्प्रत्ययानामविधानात्· पृषोदरादित्वाश्रयणस्यनिर्मूलत्वाच्च· अंशयति· अंश
अंशविभाजनेचुरादिः मृगय्वादित्वात्कुः अंशुर्लेशेरवौरश्माविति विश्वः अंशुः सूत्रादिसूक्ष्मांशेकिरणेचंडदीधिती· गम्यतेअन्यत्रापीतिडः गोड्यवर्गसंवभस्तिदीपय
तिगभस्तिः भसभर्त्सनदीप्त्योः जुहोत्यादिः क्तिचक्तौचेतिक्तिच्· एवंगगनेभसतिदीप्यते· भसभर्त्सनदीप्त्योः वसेस्तिरितिबाहुलकात्तिप्रत्ययः पृषोदरादित्वाद्गनभाग
लोपइतिमुकुटकृतंक्लिष्टकल्पनमनुपादेयं· भसतीतिविगृह्योक्तधातोरुपन्यसनंप्रामादिकं· जिघर्ति· घृक्षरणदीप्त्योः जुहोत्यादिः छांदसस्यापिभाषायांप्रयोग २५
इतिप्रांचः वस्तुतस्तुघरति· घृसेचनेभ्वादिः घृणिपृश्नीतिनिप्रत्ययोगुणाभावश्चनिपातितः घृष्णोतिञिघृषाप्रागल्भ्ये इषिघृषिभ्यांकिदितिनिः किच्चेतिमुकुटः
तन्न· तादृशसूत्राभावात् अतोबाहुलकान्निर्गुणाभावश्चघृष्णिरितिपाठांतरं· घृषुसेचने· सृघृषिभ्यांकिदितिनिः क्विच्च· पृश्निरल्पकेपेठुः स्पृशस्पर्शने· असस
लोपोगुणाभावश्चघृणिपृश्नीतिनिपातितः पर्शतिपृशुसेचनेवा·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भाति भानुः कीर्यते कृ विक्षेपे ऋदोरप् म्रियन्ते तमोस्मिन् मृकणिभ्यामीचिः स्त्रीपुंसाधिकारे त्रुटिमत्विमरीचय इति लिंगानुशासनं द्वयोर्मरीचिः किरणो भानु
हस्तः करः परमिति शब्दार्णवः मरीचिर्मुनिभेदे नागभस्त्रावनपुंसकं दीधीते दीप्यते दीधीङ् दीप्तिदेवनयोः क्तिच् तितुत्रेती एनिषेधस्तु न अग्रहादीनामिति वार्त्ति
कात् यीवर्णयोरितीकारलोपः अयं स्त्रियामेव दीधितिः स्त्रियामिति लिंगानुशासनात् काकाक्षिन्यायेन दीधितिरित्यत्र स्त्रियामिति संबध्यते उत्तरत्रापि एकादश
किरणानां ३३ प्रभाति आतश्चोपसर्गे इति कः रोचते रुच दीप्तौ क्विप् इगुपधात्किदिति इन् रुचिर्दीप्तौ च शोभायामभिष्वंगाभिलाषयोः त्विषति त्विष दीप्तौ क्वि
प् भा दीप्तौ दृशिग्रहणात् ङः टाप् भाभ्यः लंकृतौ दी दीप्तौ स्त्रियां भाः किरणो द्युतावितिनानार्थरत्नमाला यद्वा क्विप् आवंतत्वाभावान्न सुलोपादि भाः विश्वपावत् भा
सः दीप्तौ क्विप् भाः भासौ छ्यसृतिच्छिनत्ति वा तमः कृवि वृधिच्छ्वीति क्विन् तो निपातितः द्युत दीप्तौ द्योततेऽनया इगुपधात्किदिति इन् दीप्यतेऽनया दीपी दीप्तौ क्ति

भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ३३ स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः
३४ कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ३५ इति दिग्वर्गः ॥ ११ ल्वादिभ्यः रुच दीप्तौ

रोचतेनेन अर्चिशुचीति इस् ईशुचिर् पूतीभावे शुच्यति पूतीभवत्यनेन इस् एकादश प्रभायाः प्रकाश द्योताविति भावे करणे वा घञ् तनोति आतपस्तु पचाद्यच् तनः त्रीण्या
तपस्य ३४ ईषदुष्णं ईषदर्थे चेति कादेशः कवं चोष्णे इति कोः कवादेशश्च कदादेशश्च मंदं च तदुष्णं च एते गुणे क्लीबाः गुणिनि विशेष्यनिघ्नाः चत्वारीषदुष्णस्य ते
जयति तिज निशाने युजिरुचितिजां कुश्चेति मक् कवर्गश्चान्तादेशः तिजेर्दीर्घश्चेति स्लक् प्रत्यये तीक्ष्णं तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके क्लीबं यवाग्रके पुं
सि तिग्मार्थत्यागिनोस्त्रिषु खमिंद्रियं रात्यभिभवति रा दाने कः ॥ खरः स्यात्तीक्ष्णघर्मयोः गर्दभे स्त्री देवताडे तद्गुणे क्लीबं तद्वति त्रिष्वित्यर्थः त्रीण्युष्णस्य तीक्ष्णेसि
त्यादावुपचारात् प्रयोगः मृगाणां तृष्णा तस्यास्मर्थ आद्यच् मरीचिरिव इवे प्रतिकृताविति कन् ३५ इति दिग्वर्गः ॥ ॥ ॥

प्र·

अ·को· कल्प्यते कलसंख्याने शब्दे च कर्मणि घञ् कालयति सर्वमिति वा एयंनात् पचाद्यच् कालो मृत्यौ महाकाले समयेयमकृष्णयोः दिष्टमिति दिश अतिसर्जने क्तिच् क्तौ च संज्ञा
टी·रा· यामिति क्तः दिष्टं दैवपुमान्काले नार्हतिनागच्छतिनाहन्यत इति वा नञ्याहन एह चेत्यसुन् एहादेशश्च सानद्धुशनेत्यनङ् नसानुङ्चीति नुट् सांतः सम्पगेति र
२६ गागतो पचाद्यच् चत्वारि सामान्यकालस्य पक्षस्य मूलं पक्षतिः सर्वतोऽक्तिन्न्यादिति ङीपितु पक्षती पक्षतिस्तु भवेत्पक्षमूले च प्रतिपत्तिथौ प्रतिपद्यते उपक्रम्यते नया
मासादिः प्रतिपत्स्त्रीतिथौ मतो संपदादित्वात्क्विप् दंताद्धे प्रतिपत्तिथिः सा प्रतिपद्द्वायायासांताः अतसातत्यगमने अततन्यंजीति अते रिथिन् पृषोदरादित्वाद्ध्रस्वो
पः द्वयोरित्यत्र श्रुतत्वात्तिथिशब्द एव संबध्यते एकं सामान्येन तिथेः १ घस्रसंधकारं घस्लृ अदने स्फायीतिरक् घस्रस्तु दिवसे हिंस्रे दीयते द्यौ रणं भवति दीङ्
क्षये दिवादिः रुणसिञ्जिदीङ्मिति नक् बाहुलकाद्ध्रस्वः द्यति तमांसि व्यापारस्थितिं चेति वा द्यतेः कि नन् नजहाति नञि जहातेरितिकनिन् रोमसुपीति रः यत्तु अह
न्निति हत्वमिति मुकुटेनोक्तं तन्न रत्वस्य रुत्वापवादत्वात् दीव्यन्त्यत्र दिवादिभ्यः किदित्यसच् वासयति वसतेर्ण्यन्तात् कमिनमीत्यर प्रत्ययः वासरस्तु पुमान्नाग

कालो दिष्टोप्यनेहापि समयो प्यथ पक्षतिः प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः १ घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ प्रत्यूषो हर्मु
खं कल्पमुषः प्रत्युषसी अपि २ प्रभातं च दिनांते तु सायः संध्यापितृप्रसूः॥ १८ प्रभे दृदिनयोरपि पंच दिनस्य प्रत्यूषति रुजति कामुकान् उषरुजायां इगुपधेति

कः प्रत्यूषो हर्मुखे वसो अह्नो मुखं कल्यति चेष्टां अघ्न्यादयश्चेति कलेर्यक् ततः प्रज्ञाद्यणि काल्यमपि कल्यं प्रधाने क्लीबं स्यात्कल्यो वाक्श्रुतिवर्जिते सज्जनीरोगद
क्षेषु कल्याणवचने पि च उपायवचने ऽपि स्यात्त्रिषु मद्ये तु योषिति ओषत्यंधकारं उष दाहे उषः किदित्यसिः अन्योपसर्गनिवृत्त्यर्थं प्रतिः उषः प्रत्युषसि क्लीबं पितृप्रसूं
च योषिति २ भातं प्रवृत्तं प्रभातं आदिकर्मणि क्तः षट् दिनस्यांतः स्यति समापयति दिनं षो अन्तकर्मणि पृथ्याद्यघेति णः सायः कांडे दिनांते च मांतमव्ययं त्वव्ययवर्गे व
क्ष्यति एकं दिनांतस्य सम्यग्ध्यायंत्यस्यां ध्यै चिंतायां आतश्चोपसर्ग इत्यङ् संध्या पितृप्रसूर्नक्तंदिवयोर्युगसंधिषु निर्यकारापि संधीयते अनुसंधीयते स्यां डुधाञ् अङ् संध्या
पितृप्रसूः संधा इति शब्दार्णवः पितॄन्प्रसूते क्विप् द्वे संध्यायाः॥ अहः शब्दस्यावयवे प्रथमं च तदहश्च प्राह्णः राजेति टच् अह्नोऽह्न इत्यह्नादेशः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अन्होदंतादितिणत्वं· अन्हः अपरमपराण्हः पूर्वापरेत्येकदेशिसमासः अन्होमध्यं· संख्याविसायेतिज्ञापकात्समासः रात्रान्हाहाः पुंसि· मध्यं च तत् दहश्चेति वा तिसृणां संध्या
नांसमाहारः आवंतोवेतिपाक्षिकीस्त्री वंता· पक्षे त्रिसंध्यं एकदिनावंतमध्यानां· शृणाति चेष्टाः शृहिंसाया· कृशृगृदृश्चेतिभ्यः श्वरच् षिद्गौरेत्ति ङीष्· शर्वरी यामिनी
स्त्रियोः प्रज्ञाद्यणि शार्वर्यपि· शर्वरी शार्वरी शर्येभिशाल्हार्णवः ३ नितरांश्यति तनूकरोति व्यापारान्· शो तनूकरणे· आतश्चोपसर्गे इति कः· निशा दारुहरिद्रायां स्यात्रि
यामा हरिद्रयोः गुणं संधी पुंसी निद्रा श्यामा तुंगी वमा तमीति नामनिधानात् निष्टृषोदरादित्वात् शोनापि· निशीथो स्त्रस्यां इनिः रातिसुखं राराने· राशदिभ्यां त्रिप्
कृदिकारादिति ङीष् विरात्री इत्यपि रात्री रात्रिसमस्विनीतिशब्दार्णवः त्रयायामायस्याः आद्यंतयोरर्द्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वात्· यद्वा· त्रीन्धर्मादीन्पाप
यतिनिरवकाशीकरोति कामप्रधानत्वात्· अंतर्भावितण्यर्थो यातेरर्तिसुसुइतिमन्· क्षणं उत्सवं निर्व्यापारस्थितिं वा ददाति कः क्षणदा गणके रात्रौ क्षणदा क्षणदं

प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथशर्वरी ३ निशानिशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा विभावरीतमस्विन्यौ रजनीयामिनीतमी ४ तमिस्रा
तामसी रात्रिर्ज्यौत्स्नी चंद्रिकयान्विता आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणी ५॥ १९ जले क्षपयति चेष्टां क्षे क्षये· अस्मात्स्यंतान्मितः पचाद्यच् विभाति·
नक्षत्रादिभिः क्वनिप् वनोरचेति ङीष्ट्रो विभावरी निशा रात्र्योः कुट्टिन्यां च कयोषिति विवादे वक्त्रकुल्यां च तमोस्त्यस्याः अस्मायेतिविनिः रज्यंत्यनुरक्ता भवंति रागिणोऽस्यां क्षिपेः कि
त्वेनि चकारादनिः किच्चान्नलोपः ङीषभावे रजनिरपि रजनी नीलिनी रात्रिहरिद्राजतुकासु च· भीतिहेतुत्वान्निंदिता यामा यस्याः निंद्या यामिनिः तामयंत्यस्यां न मुग्लानौ· इन्· तमिः
पक्षे कृदिकारादिति ङीष् पचाद्यचि तमापि ~~... रात्रेः~~ तमोवहुलमस्त्यस्यां ज्योत्स्ना तमिस्रेति निपातितात् तमिस्रं तिमिरे कोपे पुंसि स्त्री तु तमस्ततो कृष्णपक्षनिशायां च ज्योत्स्नादिभ्य
उपसंख्यानात्मत्वर्थेण्· तामसी निशि दुर्गायां नामभोभुजगे खगे हि अत्यंधकारा रात्रेः ज्योत्स्ना स्त्यस्यां प्रागवदण्· एकं ज्योत्स्नावद्रात्रे आगामिवर्त्तमाने च ते अहनी चेति कर्मधारयेट
च· सरेफपाठे तु समासांतविधेरनित्यताश्रयणीया· आगामिवर्त्तमाने अहनी युक्ते यस्यामिति बहुव्रीहिर्वा· पूर्वापरदिने पक्षाविव स्तो यस्यां अत इनिः निशीत्युपलक्षणं तेन पूर्वा
न्तरात्रियुतं दिनमपि पक्षिणी निहरदत्तादयः पक्षिणी पूर्णिमायां स्याद्भितू एयां शाकिनी भिदि आगामिवर्त्तमानाहर्युक्तरात्रावपि स्त्रियां· एकं ५॥ ॥ ॥

अ
अ·को·
टी·प्र·
२७

गणानां वह्वीनां रात्रीणां समाहारः गणशब्दस्य संख्यात्वात् तद्धितार्थेतिद्विगुः अहः सर्वैकदेशेत्यच् रात्राह्नाहाः पुंसीति पुंस्त्वे तु न संख्यापूर्वं रात्रिरिति लिंगानुशासनसूत्रेण क्लीवत्वविधानात् भवति नपुंसकयोगः संख्यापूर्वस्य रात्रशब्दस्येति वररुचिवचनाच्च रात्रं प्राक्संख्ययान्वितमिति वक्ष्यमाणत्वाच्च एतेन स्वामिमुकुटयो र्नपुंसकत्वसमर्थनसंभ्रमः परास्तः ॥ ऌकम् दुष्यति दुषवैकृत्ये पचाद्यच् टाप् प्रारंभो दोषायाः प्रादिसमासः प्रारब्धा दोषा यस्मिन्निति वा गोस्त्रियोरिति ह्रस्वः दोषेत्यव्ययमप्यस्ति नक्तं दोषा च रजनाविति वक्ष्यते रजन्या मुखमिव ॥ ऌ अर्द्धरात्रे अहः सर्वैकेत्यच् निशीथः शेरतेस्मिन् शीङ् स्वप्ने निशीथगोपीथावगथा इति थक् निशीथस्तु पुमान् ईरात्रे स्यात् त्रिमात्रके द्वाविति समाविन्या कथ्यते ॥ ऌ त्रियाम प्रहरौ यातीति अर्तिस्तुसुइतिमन् यत्तु यातेर्मणिति मुकुटेनोक्तं तन्न उक्तसूत्रस्यापेक्षितत्वेन निर्मूलत्वात् यामस्तु पुंसि प्रहरे संयमेपि प्रकीर्तितः प्रह्रियते ठक्कादिरस्मिन् पुंसि संज्ञामिति घः ॥ ऌ प्रतिपत्पंचदश्योर्यदंतरं सः संधिः स एव पर्वापि प्रतिपत्पंचदश्योस्तु संधिः प

गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखं अर्द्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ॥ ६ स पर्वसंधिः प्रतिपत्पंचदश्योर्यदंतरं पक्षान्तौ पंचदश्यौ द्वे पौर्णमासी तु पूर्णिमा ॥ ७ कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥

र्वप्रदिक्कककुविति दर्गः संधिमभितो पर्वेत्यादौ प्रसिद्धः स एव पर्वक्लीवमहे ग्रंथौ प्रस्तावे लक्षणांतरे दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि पर्वसंधिरित्येकं नामेति प्रांचः ॥ ऌ द्वे पंचदश्यौ पूर्णिमामावास्ये पक्षस्यांतौ ॥ ऌ पूर्णो मासोस्यां बहुव्रीहौ कृते स्वार्थे ण प्रज्ञादेराकृतिगणत्वात् सास्मिन् पौर्णमासीति निर्देशाद् वा मार्श्रूद्रः पूर्णो माः पूर्णमाः तस्येयं यद्वा महाराजप्रोष्ठपदाट्ठञिति सूत्रेन दस्मिन् वक्ष्ये तेरस्यार्थे पूर्णमासादण उपसंख्यानाद् अण् पूरी आप्यायने भावे क्तः पूर्णं चंद्रस्य पूर्णत्वं तेन निर्वृत्ता पूर्णिमा भावप्रत्ययांतात् तेन निर्वृत्तमित्यर्थे इमप् टाप् ॥ ६ ७ सा पूर्णिमा उदयकाले प्रतिपद्योगात्कलाहीने चंद्रे अनुमन्यते अनुमतिः क्तिच् अथानुमतिरूनेंदुपूर्णिमानुज्ञयोरपि ॥ ऌ चंद्रे पूर्णे तु राति शुभं रा दाने कृदाधारेति कः राका न चंद्रे तरेक च्छन्न वजातरजस्त्रियां संपूर्णेन्दु तिथौ ॥ ऌ अमा सह वसतोस्यां चंद्रार्कौ अमावस्यदन्यतरस्यामिति ण्यत् पक्षे वृद्ध्यभावश्च निपात्यते नामैकदेशे नाम ग्रहणाद् मापि वसतेरिन् प्रत्यये तान्तो ङीषि अमावसी इत्रजादिभ्य इतीञि अमावासी मसी परिमाणे दिवादिः अमा चंद्रसूर्यौ सह चर्येण मस्यतः परिछिन्नो स्यां मासं अमामासी इञ् अमामसी इकू द

अथ्यमावस्यमावासीचामामस्यव्यमामसीतिशब्दार्णवः दृश्यन्तेशास्त्रेण· पुंसिसंज्ञायांघः पश्यान्तेन्द्वौ दर्शनेचदर्शः सूर्येन्दुसंगमे· सूर्येन्दू संगच्छेतेअस्मिन्· घः चत्वारि दर्शा
स्य ॰ चतुर्दशीयोगादृष्टचंद्रासतीसा अमासिनीवाली· एनविष्णुना सहवर्त्ततेसालक्ष्मीः नद्योगासिनीचंद्रकला· श्रीत्यादिनादिनिः सिनींवलतिधारयतिकर्मण्यण् यत्तु
स्त्रियाः पुंवदितिनपुंवत्वसंज्ञापूरण्योश्चेतिनिषेधादितिमुकुटः तन्न· सिनीवालीत्यत्रसामानाधिकरण्याभावात्· असंज्ञात्वाद्भावितपुंस्कत्वाच्च· यदपि· सिनीचंद्रक
लासावालाऽस्याऽत्रेतितेनविगृहीतं· तदपि न· वालेत्यस्यविशेषणत्वेनपूर्वनिपातप्रसंगात्· स्वामीतुसिनीसितावालास्त्यस्यामित्याह· तन्न· पुंवद्भावप्रसंगात्· एकं· उ
दयेअमायोगान्नष्टचंद्रकलासाअमाकुहूः कुहयति· कुहविस्मापनेचुरादिः नृतिशृध्योः कूरिति कूप्रत्ययोवाहुलकादिहापि· मृगय्वादित्वाद्ध्रस्वोपीत्यन्ये· घेनूहृ
ज्जुकुहुसरयुतनुकरेणवः स्त्रियामितिविध्यधासी· कुहूः स्त्रीकोकिलालापेनष्टेन्दुकलदर्शयोः एकं उपरज्यतेनेन· रंजरागे· हलश्चेतिघञ्· घञिचभावकरणयोः

अमावास्यात्वमावस्यादर्शः सूर्येन्दुसंगमः ॰ सादृष्टेन्दुः सिनीवालीसानष्टेन्दुकलाकुहूः उपरागोग्रहोराहुग्रस्तेत्विन्दौचपूष्णिच ८ सो
पप्लवोपरक्तौद्वावग्न्युत्पातउपाहितः ॥ एकयोक्त्यापुष्पवन्तौदिवाकरनिशाकरौ ९ अष्टादशनिमेषास्तुकाष्ठात्रिंशत्तुताः कला ० ॥

रितिनलोपः भावेवाघञ्· उपरागस्तुपुंसिस्याद्राहुग्रासेऽर्कचंद्रयोः दुर्नयेग्रहकल्लोलेव्यसनेऽपिनिगद्यते· ग्रहणंग्रहः ग्रहवृदृनिश्चिगमश्चेत्यप्· प्रहीनिग्रहनिर्बंधग्रहणोपरागे
घमे· सूर्यादौ एतन्नाद्देश्चसैंहिकेयोपरागयोः हेमचन्द्रस्तु ५ उपप्लवः सैंहिकेयेविप्लवोत्पातयोरपि· सहोपद्रवेनवोपसर्जनस्यातिसभाव्यःउपरज्यतेस्मकर्मणिक्तः उ
परक्तौव्यसनार्त्तौराहुग्रस्तेंदुसूर्ययोः द्वौ हि इति राहुणाग्रस्तेचंद्रेसूर्येच· अग्न्युत्पातनमुत्पातोवैकृतं उप· आसन्नमाहितंफलंयस्यउपाहितो ॰ ऽनलेव्यात्तेपुमानारोपितेत्रिषु· ६
आकाशादिस्थाग्निविकारस्यपुष्पविकसनेभावेघञ्· पुष्पोविकाशः प्रकाशश्च· तद्वन्तौ· मतुप्· साधारणवचनेन· प्रत्येकंपुष्पवानितिनप्रयोक्तव्यमितिभावः अकारांतो
पिपुष्पवंतः शब्दः अवरक्षणेजृविशिभ्यांझजितिवाहुलकादवतेरपिझच्· मोन्तःपुष्पस्यावन्तावितिविग्रहेशकंध्वादिःरविशशिनौपुष्पवंतावाख्यावितिनाममाला· पुष्पवं
ताभ्यां· पुष्पवंतयोरित्यादिः एकम् १० क्षणाद्धयंलवः प्रोक्तोनिमेषस्तुलवद्वयमित्यादिशास्त्रसिद्धानिमेषाः तेषांदशकाष्ठा· काशते· हनिकुषीत्विश्रम्नक्काष्ठा दारुहरिद्रायांकालमानप्रकर्षयोः॥

प्र.
अ.को. स्तादिरिहस्त्रा नमात्रे च काष्ठमाख्यातमिंद्रियेइति विश्वः एकं कलयति कलसंख्यानेऽप चाघञ् एकं ताः कलाः क्षणोति क्षणुहिंसायां अच् क्षणः पर्वोत्सवेऽपि स्यात् व्या
टी.ए मानेऽप्यनेहसः एकं ते तु क्षणाः हुर्च्छा कौटिल्ये वाहुलकाद्रंजि घृसीतिक्तः मुहूर्तमश्च रा ल्लोपः इति छ्लोपः हलि चेति दीर्घः लिङ्चोर्ध्वमौहूर्तिके इति निर्देशाद्वा मुहू
२९ र्तः ११ अहश्च रात्रिश्च तयोः समाहारः रात्राह्नाहाः पुंसि यत्तु अह्नासहिता रात्रिरिति विग्रहं प्रदर्श्याहोरात्र इत्युपन्यस्तं मुकुटेन तन्न तथा सत्यजभावप्रसंगात् अहः पूर्वाद्रात्रि
शब्दात् टु टू एवाच्विधानात् रात्रात्रेव दर्जितिद्दृष्टान्तोऽप्यसंगतः चकारात्संख्याव्ययादेरप्यच्विधानात् अत्र तु तदादित्वाभावात् यद्यपि समाहारे क्लीबमप्यहोरात्रमित्यु
क्तं तदपि न समाहारे पि रात्राह्नाहाः पुंसीत्यनेन परत्वात्पुंस्त्वविधानात् यदपि वामनलिंगानुशासने द्विगुरपि पात्राद्यदंतः इति नपुंसकत्वेनाहोरात्रं द्विरात्रमित्युदाहृतमि
ति संमतिप्रदर्शनं कृतं तदपि न रात्रं प्राक् संख्ययान्वितमिति द्विरात्रस्य नपुंसकत्वेऽपि अहोरात्रस्य तदयोगात् एकं ते ऽहोरात्राः पक्ष्यते पक्षपरिग्रहे कर्मणि घञ् पक्षो मासा

ः तास्तु त्रिंशत्तु क्षणास्ते तु मुहूर्तो द्वादशास्त्रियाम् ११ ते तु त्रिंशदहोरात्रः पक्षस्ते दशपंच च पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ १२ द्वौ द्वौ माघा
दिमासौ स्यादृतुस्तैरयनं त्रिभिः अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः १३ समरात्रिंदिवे काले विषुवद्विषुवं च तत् ॥ ११ ईकेगेहपार्श्वसाधुवितिरो

पयोः केशादेः परतो द्वन्द्वे खलेसखिसहाययोः चुल्लिरं धेपतत्रेचराजकुंजरपार्श्वयोः ।। एकान् शुक्लपक्षः पूर्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः एकं तो पक्षौ मस्यते परिमीयते
यमनेन वा मसी परिणामे कर्मणि घञ् हलश्चेति वा एकं १२ इयर्ति ऋच्छति वा अर्त्तेश्चेति तु चात्किलं मार्गादीनां युगे हेमन्तादीनृतून्वक्ष्यति तदेकदेशमयनपरिच्छेदार्थ
मनुवदति द्वौ द्वाविति एकम् ।। तैर्ऋतुभिः अयतेऽनेन नलुट् यत्तु अयतेऽनेनेति विगृह्य ल्युट् णत्वागतौ विनिधानात्तो रूपन्यस्तं मुकुटेन कृतं तदसंगतमिति स्पष्टमेव अयनं पथि
भानोरप्युदग्दक्षिणतो गते एकं अयने तु द्वे अर्कस्योत्तरागतिर्दक्षिणा च उत्तरदक्षिणस्थे द्वे अयने ते तु वत्सर इति वक्ष्यमाणेऽर्कस्येति ग्रहणं चांद्रत्वव्यावृत्त्यर्थं प
क्षादिकं चांद्रमुक्तं तत्तु न चांद्रं किंतु सौरमेव अयनद्वयस्यैकैकं वसंत्यस्मिन् वसेश्चेति सरप्रत्ययः सःस्यार्द्धधातुक इति सस्य तः १३ रात्रिश्च दिवा च रात्रिंदिवं
अचतुरेत्यादिना साधु तत्समं यस्मिन्तादृशे काले तुल्यमेषावच्छिन्ने विषुसाम्ये व्यये ततो मतुप् संज्ञायामिति वत्वं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वप्रकरणे अन्यत्रापीत्युक्तेर्वः तेन विषुवं विषुवान् समरात्रिवासर इति पुंस्कांडे वोपालितः विषुणोपि विषुनानारूपं गमनं विष्वक् तदस्यास्तीति विग्रहे विष्वगित्युत्तरपदलोप
श्चाकृतसंज्ञेरिति पामादेर्नगणेसूत्रेण नप्रत्ययः णत्वं ३ मृगशिरसा युक्ता पौर्णमासी नक्षत्रेण युक्तः कालः इत्यण् अचि शीर्षः मार्गशीर्षी पौर्णमास्यस्मिन् मासे सास्मिन्पौर्णमासीस
ण् एतेन पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे इति क्वचित्पठ्यमानं व्याख्यातं सहते असुन् सांतः पचाद्यच् यद्वा सहः मार्गसहः
सहा इति शब्दार्णवः एकदेशप्रयोगात् मृगोपि मृगशिरा मृग इति रूढकोषः तद्युक्ता पौर्णमासी मार्गी सास्मिन्नस्ति आग्रहायण्या युक्ता पौर्णमास्यस्मिन् आग्रहायण्यश्व
त्यावुक् ज्योत्स्नादित्वादणि आग्रहायणोपीति पुरुषोत्तमः चत्वारि ४ पुष्येणेति ष्येण च युक्ता पौर्णमास्यस्मिन् नक्षत्रेणेत्यण् तिष्यपुष्ययोर्नक्षत्राणि यलोपः ङीप् त
तः सास्मिन्नित्यण् सहसिबलेसाधुः तत्रसाधुरितियत् त्रीणि तपंत्यस्मिन् असुन् सांतः तपोलोकांतरेपिच चांद्रायणादौ धर्मे च पुमान् शिशिरमाघयोः मघया युक्ता पौर्ण

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ४ पौषे तैषसहस्यौ द्वौ तपा माघेथ फाल्गुने स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ४ वैशाखे

मास्यस्मिन् ३ फलति निष्पादयति फलनिष्पत्तौ फलेर्गुक्चेत्युनन् गुगागमश्च फल्गुनस्त्वर्जुने मासे नक्षत्रे फल्गुनी स्मृतेति (माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम्
गोवर्द्धनानंदः प्रज्ञाद्यणि वृद्धिः फाल्गुनस्त्वर्जुने मासे फाल्गुनी चास्य पूर्णिमेति धरणिः फल्गुनीभिर्युक्ता पौर्णमासी सास्मिन्नस्ति फाल्गुनः फाल्गुनिकश्च फाल्गुनस्तु गुडाकेशेन
दीनार्जुनभूरुहे ॥ तपस्य संज्ञ मासे तत्पूर्णिमायां तु फाल्गुनी विभाषा फाल्गुनी श्रवणा कार्तिकी चैत्रीभ्य इति ठक् तपसि साधुः तत्र साधुरिति यत् त्रीणि चित्रया युक्ता पौर्णमा
स्यस्मिन् अण्ठकौ मन्यते एतं मधुः मनज्ञाने फलिपाठीत्युः धश्चांतादेशः मधु पुष्परसे सोत्र मद्ये नातु मधु द्रुमे वसंतदैत्यभिच्चैत्रे स्याज्जीवंत्यां तु योषिति त्रीणि ४ विशा
खया युक्ता पौर्णमास्यस्मिन्नस्ति मधु मकरंदः सोस्मिन्नस्ति मधोर्ञ्चेति त्रः राधा विशाखा तद्युक्ता पौर्णमासी राधी सास्मिन्नस्ति त्रीणि पूर्ववदण् द्वयेन ज्येष्ठः संज्ञापूर्वक
स्याविधेरनित्यत्वाद्वृद्ध्यभावे ज्येष्ठोपि ज्येष्ठो मासि च वृद्धे च ज्येष्ठा च गृहगोधिकेति त्रिकांडशेषः विरहिणः शोचंत्यस्मिन् शुच शोके ऋज्रेन्द्रेति रक् चकारस्य ककारश्च

शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् रेतोक्षिरुग्भिदोः क्लीबे ३ ॥

अयमितिशब्दः पुंस्त्वाभिव्यक्त्यर्थः शोचंतिनिरहितोस्मिन् इगुपधादित्तीन् किच्च॥ अषाढयायुक्तापौर्णमास्यस्मिन् आषाढो नृतिनं रडे मासेमलयपर्वते· स्त्री पूर्णिमायां अषा
ढाभिराख्यात इति विग्रहे तु अषाढकोपि आख्यानत्यंताकुनशिलिसंज्ञयो स्यादाषाढेत्वषाढक इति   शब्दार्णवः ३· स्त्रीपुंसयोर्नृक्षभेदे श्रवणं श्रुतिकर्णयोरिति रभसः
श्रवणेन युक्तापौर्णमासी· श्रवणा· लुबविशेष इति प्राप्तो लुप् यद्यपि पौर्णमास्यां नेष्यते इत्युत्सर्गः विभाषाफाल्गुनीतिलिंगात् तथापि श्रवणशब्दाद्दिष्यत एव· नवै
वसूत्रे श्रवणेतिनिर्देशात् अबाधकान्यपिनिपातनानीति श्रावणीत्यपि ततः सास्मिन्निन्यणि श्रावणः श्रावणो मासि पाखण्डेरध्याल्यां श्रावणमनाइति हेमः विर
हिणां नभ्यति नश्यतिनभतेवानभाः नभहिंसायां असुन् स्वामीतु नभासते मेघाछन्नत्वादित्याह· तन्न· नभासौ नभासः नभोभ्यां· नभोभिः नभोसु इत्यादिरूपप्रसंगात् नभः
खंश्रावणे नभाइत्यनुपपत्तेश्च ह्रस्वदीर्घोपधयोः शब्दभेदात् भासत इत्यर्थकथनमात्रमित्यभिप्रेत्य भसदीप्तावितिजुहोत्यादेर्नवंभतीति युसन्ताश्रयणेन् असंतस्येतिदी

आषाढेश्रावणेतु स्यान्नभाः श्रावणिकश्चसः १६ स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः स्यादाश्विनइषोप्याश्वयुजोपि स्यात्तु कार्त्तिके १७ बाहुलो
र्घोनस्यात् धनुर्धरेत्रिषु नभः क्लीवंव्योम्नि पुमान् घने घ्राणे श्रावणवर्षासु विसतंतौ पतद्गृहे· विभाषाफाल्गुनीति ठ १८ र्जोकार्त्तिकिको हेमंतः शिशिरोस्त्रियाम्·॥
कि श्रावणिकः १६ नभा अथंनत्रसाधुः नभस्यः प्रोष्ठपदाभिर्युक्ता प्रोष्ठपदी· भद्राभद्रपदानाभिर्युक्ता भाद्री भाद्रपदी च पौर्णमासी· ततः सास्मिन्नित्यण् चत्वारि· अश्विन्यायुक्ता
पौर्णमास्यस्मिन्नस्ति· इषगतौ· एषणमिष्टयात्राक्षिप् सास्मिन्मासे जिगीषूणामस्ति· अर्श आद्यच्· अश्वयुजायुक्तापौर्णमास्यस्मिन्· अणद्वयं· संज्ञापूर्वकत्वाद्वृद्ध्यभावे अ
श्वयुजोपि· आश्विनोश्वयुजश्चेष इत्यमरमालात्रीणि· कृत्तिकाभिर्युक्तापौर्णमास्यस्मिन् १७ बहुलकृत्तिका· अणद्वयं· उर्जयति उत्साहयति जिगीषून् उर्ज बलप्राणनयोः एयं
तान् पचाद्यच् उर्जः कार्त्तिकेबले इति हेमः विभाषाफाल्गुनीति ठकि कार्त्तिकिकः चत्वारि हंति· हंतेर्मुट् च हिचेति मच् हिरादेशो मुडागमो गुणः हेमापि· सर्वत्राणचेति सूत्रेय
द्भाष्यं हेमंतस्य तत्लोपवचनानर्थकं हेम्नः प्रकृत्यंतरस्य सत्वादिति हिनोति वर्द्धयति बलं· हिगतौ वृद्धौ च· अंतर्भावितण्यर्थादस्येभ्योपीतिमनिन्· मार्गपौषाभ्यांनिष्पन्न
सत्कांतोरेकं· शशश्लुतगतौ अजिरशिशिरे निकिरजं नोनिपातितः शशांति धावंतियस्मिन् पथिकाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिशिरः स्यादृतो भेदे तुषारे शीतलेऽन्यवदिति विश्वः एकं माघफाल्गुनाभ्यामृतोः ॥ वसंत्यत्र मदनोत्सवाः तृभूवहिवसीति झच् पुष्पाणां समयः सुष्ठु रमंतेऽस्मिन् सयुक्तामवं त्यत्र रमराक्ष
से इन् सुरभिर्हेम्नि चंपके जातीफलेमातृभेदे स्यु चैत्रवसंतयोः सुगंधौ गविशल्लक्यां इति हेमः त्रीणि चैत्रवैशाखाभ्यामृतोः ग्रसतेरसान् ग्रसु अदने अतोम कुधातोः ग्रीभावः गुणा
गमश्च ग्रीष्म इत्युणादिसूत्रेण निपातितः ग्रीष्म उष्मर्तुभेदयोः उषति रुजति उष रुजायां अन्येभ्य इति मनिन् यावादित्वात्कन् मकिअरतोपि उष्मो घर्मेऽग्राणि तथाज्येष्ठउ
ष्मा स्त्री लिंगीति वोपालितः नितरां दह्यतेऽत्र दह भस्मीकरणे हलश्चेति घञ् न्यंकादित्वात्कुत्वं निदाघो ग्रीष्मकाले स्यादुष्णस्वेदांबुनोरपि उष्णमुपगममत्र ओषति उष दाहे इ
णसिजिदीङ्व्यविभ्यो नक् उष्मो ग्रीष्मे पुमान् स्यादाघीतयोरन्यलिंगकः उष रुजायां मनिन् आगच्छति पचाद्यच् उष्मा तापः आगमोत्र उष्मापि उष्मा तपनिदाघयोरिति
नांतो वोपालितः तपति पचाद्यच् सप्त वर्षणि इत् वृषु सेचने संपदादित्वात् क्विप् प्रकृष्टा वृडत्र नहिवृतीति दीर्घः वर्षं वर्षणमत्राणि अर्श आद्यच् टाप् भूम्निबहु

वसंते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः १८ निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम् १९
त्वे तेन नित्यं बहुवचनांतः ॥ वर्षर्तोर्द्वे शीर्यंते सस्यानि पाकेनौषधयः शृ हिंसायां शृदृभसोऽदिः भागुरिमते दापि २० षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ॥
शरदा च शरद्वेद्वत्सरे स्यात् शारट् शारदवयास हेत्ति विश्वः एकमाश्विनकार्तिकाभ्यामृतोः १९ अमी हेमंतादयः ऋगतौ अर्तेश्चेति तुः चाल्कितु यन्तु मुकुटेनोक्तं केत्वादयइ
तित्तुन्निति तन्न गुणप्रसंगात् अपाणिनीयत्वाच्च हेमंतादीनां षण्णामेकं संवसंत्यृतवोत्र वसेश्च सपूर्वाच्चिदिति सरप्रत्ययः स स्यार्द्धधातुक इति तः एवं वत्सरोपि आप्यते
आप्लृ व्याप्तौ अब्दादयश्चेति दन् ह्रस्वत्वं च अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान् भावान् जहाति जिहीते वा हश्च व्रीहिकालयोरिति ल्युट् हायनः स्त्रीत्वपाठे शार
दासंवधः हायनो नस्त्रियां वर्षे पुंस्यर्चिव्रीहिभेदयोः शृणाति शृ हिंसायां शृदृभसोऽदिरित्यदिः प्रज्ञाद्यणि शारदोपि समा याप्यति शारद इति रत्नकोशः षमस्थमवैक्लव्ये
समंति विक्लवं कुर्वंति सर्वे पचाद्यचि टाप् बहुवचननिर्देशात् प्रायेण यं बहुवचनांत इति ध्वनयति क्वचिद्वचनांतरमपि समां समां विजायत इति सूत्रात् ॥ ॥

Digitization by eGangotri

प्र·
अ·को· समायांसमायामितितत्रभाष्यात्त्व· समांतिसहवर्त्तन्तेऋतवोस्यामिति वा· मामाने· आतश्चोपसर्गे इत्यङ्· समांसमामिति निर्द्देशान्मत्लापः समासंवत्सरे स्त्रियां· सर्वसाधुसमा
टी·रा· नेषुसमंस्यादभिधेयवत् ॥ १९ नृणांमासेन· पितृणामयंपैत्रोऽहोरात्रः नृणां वर्षेणदेवानामयंदैवोहोरात्रः कृष्णपक्षः पितृणांदिनं· शुक्लपक्षोरात्रिः उत्तरायणंदेवानांदिनं·
३० दक्षिणायनंरात्रिः देवानांयुगसहस्रद्वयेन· ब्रह्मणोयं· ब्राह्मोजातो· ब्राह्मोहोरात्रः दैवैः षष्ठ्यधिकैस्त्रिभिरहोरात्रशतैर्दिव्यंवर्षं· तैर्द्वादशभिः सहस्रैर्मानुषंचतुर्युगंतच्च
देवानामेकंयुगंतत्सहस्रंब्रह्मणोदिनं· भूतानांस्थितिकालः· तावत्येवरात्रिः प्रलयकालः येदैवेयुगसहस्रेणे· कल्पयतः स्थितिंप्रलयंच· कृपूसामर्थ्ये· एयंतात् पचाद्यच्·
कल्पः शास्त्रेविधौन्यायेसंवर्तेब्रह्मणोदिने २० मनोरंतरमवकाशइतिविग्रहः एकाधिकासप्ततिः साचकिंचिदधिकेतिबोध्यं· संवर्ततेजगदत्र· हलश्चेतिघञ् संवर्त्तः प्रल
यसुद्दइतिहेमः प्रलीयतेऽत्र· लीङ्श्लेषणे एरच्· प्रलयोमृतौ· संहारेनष्टचेष्टत्वेइतिहेमः कृपूसामर्थ्येकल्पंतेविकृ इलक्षणंयाक्षीयंतेत्र· पुंसीतिघः। कल्पोविकल्पेक

संवत्सरोवत्सरोब्दोहायनोऽस्त्रीशरत्समाः १९ मासेनस्यादहोरात्रःपैत्रोवर्षेणदैवतः दैवेयुगसहस्रेद्वेब्राह्मः कल्पौतुतौनृणाम् २० मन्वंतरंतुदि
व्यानांयुगानामेकसप्ततिः संवर्त्तः प्रलयःकल्पःक्षयःकल्पांतइत्यपि २१ अस्त्रीपंकंपुमान्पाप्मापापंकिल्बिषकल्मषं ॥ ११ त्यद्रौसंवर्तेब्रह्मवासरेप्रलम

स्त्रेन्यायेविधावितिहेमचंद्रः क्षीयंतेप्राणिनोत्र· क्षिक्षये· एरच्· पुंसीतिघोवा· क्षयोगेहेकल्पान्तेऽपचयेरुजीतिहेमः कल्पस्यांतोऽवधिः कल्पः शास्त्रेविधौन्यायेसंव
र्तेब्रह्मणोदिनइतिशाश्वतः पंचप्रलयस्य २३ पचतेडुः खमनेन· पचिव्यक्तीकरणे· विस्तारेवा· करणेघञ् कुत्वं· यद्वापचनंपंकोव्यक्तीकरणंविस्तारोवा· तंकरोति तत्करोतीति
णिच् ततः पचाद्यच्· पंकोऽघेकर्दमेइतिहेमः आप्नोति लोकान्· आप्लृव्याप्तौ· नामन्सीमन्निति सूत्रेणनिपातितः पात्यस्मादात्मानं· पारक्षणेपानीविविभ्यःपः भीमादि
त्वादपादाने· यद्वापि बतिभक्षयतिकर्तारंपापाने· केलयति· कील्डयतीविषयेषु किलश्वैत्यक्रीडनयोः किलर्बुक्चेति टिषच् बुगागमश्च· शुभंकर्मस्यतिसमाप्तंकरोति
षोऽन्तकर्मणि· आतोनुपेतिकः पृषोदरादित्वात्सत्वम्· कल्मषंकिल्बिषेक्लीबंपुंसिस्यान्नरकांतरे कलयतिवशीकरोति· कलसंख्याने· एनहिकलिभ्युउपच्· कलु
षंत्वाविलेपापेकिल्बिषंपापरोगयोः वृज्यते· वृजीवर्जने· वृजेः किच्चेतिइनच् वृजिनंकल्मषेक्लीबंकेशेनाकुटिलेत्रिषु· ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंसघोनेन·एतिगच्छतिप्रायश्चित्तेनेतिवा·इण्गतौ·इणआगसीत्यसुन्नुडागमश्च·अंघतेगच्छतिदानादिना·अघिगतौपचाद्यच्·आगमशास्त्रस्यानित्यत्वान्ननुम्·अघं
दुःखव्यसनेनसोः इतिहैमः·अमतिगच्छति·अमगत्यादिषु·अमेर्हुक्चेत्यसुन्हुगागमश्च·यद्वा·अंहति·अहिगतौ·असुन्·अंघते·अंघइतिकेचित्पठन्ति·तत्र·अघिग
तौधातुर्बोध्यः·इणोभावेक्तः·दुष्टमितं·गमनमनेनादुष्टं·कृतं·करणमनेन·इदुदुपधस्येतिषः [illegible] २२ धरति विश्वं धृञ्धारणे·अर्त्तिस्तुसुइत्यादिनामन्·धर्मो
ऽस्त्री पुण्यआचारेस्वभावोपमयोःक्रतौ·अहिंसोपनिषन्न्यायेनाघनुर्यमसोमयेः·पुनाति·पूञोयण्णुक्ह्रस्वश्चेतियत्·णुक्ह्रस्वश्च·यद्वा·पुणति·पुणकर्मणिशुभे
इगुपधेतिकः·पुण्यमर्हतितत्रसाधुर्वायत्·अतिशयेनप्रशस्तं·द्विवचनेतीयसुन्·प्रशस्यस्यश्रः·श्रेयोमुक्तौशुभेधर्मेऽतिप्रशस्तेचवाच्यवत्·सुष्ठुकृतं·प्रादिसमासः·वर्षतिफ
लं·वृषुसेचने·इगुपधलक्षणः·कः·वृषोगव्याखुधर्मयोः·पुंराशिभेदयोः·शृंग्यांवासकेशुक्रलेपिच·श्रेष्ठेस्यादुत्तरस्थेतिहेमः·[illegible]मोदनं·मुत्·मुदहर्षे·संपदादिः·प्रीञ्तर्प

कलुषंवृजिनैनोघमंहोदुरितदुष्कृतम् २३ स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषः·मुत्प्रीतिःप्रमदोहर्षप्रमोदामोदसंमदाः २४ स्यादानंदथुरानंदःशर्मशातसुखानिच· ॥

णे·भावेक्तिन्·मदीहर्षे·प्रमदसम्मदौहर्षेइत्यप्·प्रमदः·सम्मदःप्रमत्तेस्त्रियामुन्मदयोःक्षिति·इतिमेदिनी·हृषतुष्टौ·घञ्·प्रमोदा
मोदौघञन्तौ·आमोदोगंधहर्षयोः २४ टुनदिसमृद्धौ·द्वितोऽथुच्·आनंदोघञन्तः·शृणोत्यशुभम्·शॄहिंसायां·सर्वधातुभ्योमनिन्·भावेवा·श्यतिदुःखंशोतनूकरणेवाहुलका
त्तन्·भावेवा·यत्तुश्यतेःसौत्रादितुक्तंमुकुटेन·तन्न·तस्यगणपठितत्वात्सौत्रस्यतस्यादर्शनात्·अनुपसर्गाल्लिंपेतिसूत्रपठितात्सातेःपचाद्यच्·अचिसातेरित्यादिः·यत्तुसिते
त्यशुभंसातंसेद्धयेइत्युक्तंमुकुटेन·तन्न·षिञ्नीत्रीतिविगृह्योक्तधातूपन्यासस्यविरुद्धत्वात्·यदपिस्यतिदुःखंसातं·षो·अंतकर्मणीतिस्वामिनोक्तं·तदपिनस्यतेः·क्तेवतिस्य
तीत्वप्रसंगात्·ननत्वविधानान्तवाहुलकस्यलगतिकगतित्वात्·अत्रनूक्तगतेःसत्वात्·शोभनानिखान्यनेन·सुखदुःखतत्क्रियायां·भावेऽज्वा [illegible] आगामिश्रे
योत्र·श्वः·श्रेयसं·श्वसोवसीयः·श्रेयसइत्यसमासांतः·श्वोवसीयसमपिवोध्यं·शातेनेनपिवं·शीङ्स्वप्ने·सर्वनिघृष्वेतिवन्ह्रस्वश्चनिपातितः·शिवंतुमोक्षेक्षेमेसुखेनप
ले·शिवायोगांतरेवेदेगुग्गुलौवालुकेहरे·पुंडरीकद्रुमेकीले·भंदतेभद्रिकल्याणे·ऋज्रेंद्रितिरन्निपातनेभद्रः·शिवेखंजरीटेवृषभेचकंदवके॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को· करिजातिविशेषनाम्नीवंमंगलमुस्तयोः कांचनेचस्त्रियांरास्नाकस्नाव्योमनदीषु च· तिथिभेदेप्रसारिण्यांकचूफलानंतयोरपि· त्रिषुश्रेष्ठेचसाधौचनपुंसिकरणांतरे· पचा
टी·रा· द्यचिभद्रं· मं रंभद्रंशिवंतथेतित्रिकांडशेषः कल्यंनीरुजलमाणयति· कर्मण्यण्· कल्येप्रातःकालेअण्यते· अणशब्दे· अकर्तरीतिघञ्वा कल्याणंहेम्निमंगले· मंगिसर्प
३९ ण· मंगतिमंग्यतेनेवा मंगेरलच्· मंगलंपुनः कल्याणेमंगलोभौमेमंगल्याश्वेतदूर्विका· शोभनं· शुभशोभायां· इगुपधेतिकः शुपूजितंभाति· आतइतिकोवा· अन्येभ्योपीतिडो·
वाशुभोयोगोशुभंमद्रे २४ भवनशीलं· भूप्रासोत्स्यपतपदेत्यकञ्· भवोमद्धाविसत्रयोरित्सजयः भवोभद्रा क्षिरवासि· अतइनिठनौभवति· भव्यगेयेतिसाधुः कुत्सितंश
लतिसंवृणोति· शलचलनेसंवरणेच· पचाद्यच्· कुशलंक्षेममपुण्ययोः पर्याप्तौकुशलोऽभिज्ञे क्षयत्यशुभंक्षिक्षये· मन् अस्त्रियामितिक्षेममात्रान्त्वपि· यतुक्षितिणोत्यसु
भमितिविगृत्वक्षिक्षयेइतिधातोरुपन्यसनंमुकुटेनकृतंतदसंगतं· क्षेमस्तुमंगले लब्धसंरक्षणेमोक्षेक्षेमोमाधनहार्यपि· शंसस्तुतौ· शस्यतेभावेक्तइतिमुकुटः शस्तः

श्वःश्रेयसंशिवभद्रंकल्याणंमंगलंशुभं २५ भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियांशस्तंचाथत्रिषुद्रव्येपापंपुण्यंसुखादिच २६ मत
ल्लिकामचर्चिकाप्रकांडमुद्धतल्लजौ प्रशस्तवाचकान्यमून्ययःशुभावहोविधिः २७॥ ११ क्षेमेप्रशस्तेच ~~[illegible]~~ पापपुण्यशब्दौसुखा
दिचशस्तांतंशब्दजातंद्रव्येवर्तमानंत्रिषुबोध्यं· तत्रस्त्रियांकल्याणीअन्येटाबंताः २८ मतल्लिकादयोनियतलिंगाः नतुविशेष्यनिघ्नाः अव्युत्पन्नाश्चेतिप्रांचः व्युत्पत्तिरपिसंभव
मतं· मतिमलति· अलभूषादौ· ण्वुल्कृत्वा· पृषोदरादित्वात्स्यलः· मं शं भुं चर्चेति· चर्चअध्ययने· ण्वुलकृत्वामः पुनः शुभावितिहेमः प्रकृष्टंकांडमवसरोरसोवाऽस्य· प्रगतः
कांडोधर्मोऽस्मादितिवा· प्रकांडोविटपेप्रशस्तमूलस्कंधांतरेतरोः इतिहेमः· उद्घशब्दस्तुसंघोद्युगणप्रशंसयोरितिनिपातितः उत्पूर्वाद्धंतेरप्टिलोपःघत्वंचनिपात्यते· उद्घो
हस्तुपुटेवन्हौश्लाघायांदेहजानिलेइतिहेमः प्रशस्तःपुरुषःपुरुषमतल्लिकाः ब्राह्मणमचर्चिकाः गोप्रकांडः मनुष्योद्घः तल्लजः तल्लिजःतल्लजकांतौ· पचाद्यच्· तद्तल्लजः ३९
तल्लजःकुमारीतल्लजःप्रकांडःपुंस्यपि· अस्त्रीप्रकांडोविटपेतरुस्कंधप्रशस्तयोः मतल्लिकादीनांरूढिशब्दत्वात्प्रशंसावचनैश्चेतिसमासः कृष्णसर्पवाय्यश्वा देवदत्तेतिनित्य
समासाः उद्घस्तुसमस्तोपीतिस्वाम्यादयः ~~पंचप्रशस्तस्य~~ एण्येनेतसुखं इणगतौ· पुंसिसंज्ञायामितिघः एकं २९॥

देवादागतं तेन आगतः इत्यण् दिश्यते उपदिश्यते स्म दिष्टम् अतिसर्जने क्तः भाग्यैकदेशयोर्भाग इति रुद्रः भाग एव भागरूपनामभ्यो धेयः भज्यते भज सेवायां ऋहलोर्ण्यत्
चजोः कुघिण्ण्यतोरिति कुत्वं भागाद्यच्चेति स्वामी भाग्यं कर्म शुभाशुभं नियम्यते अनया क्तिन् नियच्छति क्तिच् क्तौ चेति क्तिच् वा अत एव स्त्रीति विधानं सार्थकं नियतिर्नियमे दैवे इति विश्वः
विधीयते अनेन डुधाञ् उपसर्गे घोः किः निधिर्ब्रह्मविधानयोः विधिर्वाक्ये च दैवे च प्रकारे कालकल्पयोः षट् प्राक्तनशुभाशुभकर्मणः हिनोति व्याप्नोति कार्यं हि गतौ कमिमनी
जनिभ्यस्तुन् कार्यं जन्यतेऽनेन णिजन्तात् ल्युट् करोतीति ल्युट् चेति चकारात् ल्युट् इति मुकुटस्तु संगतः कारणं घातनेऽनेहेतौ करणे कारणे पुनर्यातनाकर्मणोः मंत्रादियोगे कर्मकारके इति हे
मः विशेषेण जायते अनेन उपसर्गे च संज्ञायामिति डः अन्येषामपीति दीर्घः यद्वा वीयते व्येञ् संवरणे संप्रसादिरिक्किः पूर्वं यं संवृतं जायते जनयति अंतर्भावितण्यर्थः अन्येष्वपीति डः
विशेषेण नाशः कामादिना वा ज्ञायते विध्यिष्टाद्येलक्ष्मी गीयते स्म आदिर्वा वजनिकार्यं गच्छति वज गतौ अच् पृषोदरादित्वात् दीर्घत्वं बवयोरभेदाद्वीजं बीजं तु रेतसि स्यादाधाने च
तत्वे च हेमांकुरकारणे इति हेमः नीयते निरतिशयं दीयते साधारणतया जन्यते अनेन डुदाञ् करणे ल्युट् निदानं कारणे शुद्धौ तपसः फलयाचने वत्सदाम्न्यवसाने च आदि
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् २८ क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ॥
मुख्यं कारणं हेमुख्यकारणस्य २८ क्षीयते इति क्षेत्रं शरीरं तज्जानाति ज्ञा अवबोधने आतोऽनुपसर्गे कः यत्तु क्षेत्रे जानातीति मुकुटः तन्न एतयोर्वेत्तीति प्रागुपन्यस्तगीताविरोधात् क्षेत्रज्ञो वात्मनि निपुणे इति हेमः अनति अत सातत्यगमने सातिभ्यां मनिन् मनिणौ वितिमनिण् पुराति पुर अग्रगमने पुरः कुषन् अन्येषामपीति दीर्घत्वे पूरुषोऽपि
पूरयति वा पूरी आप्यायने बाहुलकात् कुषन् पुरुषस्त्वात्मनि नरे पुन्नागे चेति हेमः क्लीवेऽयात्मनः प्रधन्नेऽसर्वम ल्युट् प्रधत्ते सर्वं मात्मनीति वा अन्यत्रापीति युच् प्रकृष्टं धान
मनेन वा प्रधानं प्रकृतौ बुद्धौ बुत्तमे परमात्मनि महामात्रे इति हेमः प्रकृष्टा कृतिः कार्यं यस्याः प्रकरोतीति वा क्तिच् प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः योनौ लिं
गे पौरवर्गे हि कालकृतो धर्मो यौवनादिर्विशेषो वस्था कालेन निर्वृत्तः निर्वृत्ते स्त्रचूनादिभ्य इति ठक् अवपूर्वात्तिष्ठतेरङ् व्यवस्थापामिति ज्ञापकात् एकं सतो भावः सत्वं
सीदंत्यस्मिन् गुणा दय इति वा सदेस्त्वन् सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः ॥

Domain. Digitization by eGangotri

अ·को· पिशाचादावात्मभावेबलेप्राणेष्वजंतुषुरंजयति· भूरंजिभ्यां किदित्यसुन्· तामप्यनेन· नमुग्लानौ· असुन्· कप्रत्ययेस्जतमावद्त्तपुल्लिंगावपि· पुष्पेवेशेगुणेचैवरजोयंरज
टी·४· सासहेत्युत्पलिनी· रजोयंरजसासाहूंस्त्रीपुष्पगुणधूलिष्वित्यजयः २८ जननं· जनीप्रादुर्भावेजनेरुसिः स्युटिजननं· यत्तुजनजननेइति मुकुटेनोक्तं· तन्न· तस्यच्छां
३२ दसत्वात्· मनिनितुजन्म इ्वियुधीतिमकिजन्मशब्दः दंतः पुंल्लिंगःक्लीबोपीत्युज्वलदत्तः जनिवसिभ्यामिण्· जनिवध्योश्चेतिवृद्धिनिषेधः उत्पत्तिसाहचर्यात्
जनेःस्त्रीत्वंउत्पदनं· पदगतौक्तिन्· उद्भवनं· ऋदोरप्· षट्प्राणाःसत्वस्यअतइनिः चेतयतेचेततिवा· नंद्यादिजन्मोस्यास्तिअतइनिः नांतात्तुङीप्स्यादित्यात्· जा
यतेकमिगमिजनीतितुन्· यजिमनीतियुच्जन्यः शरीरमस्यास्तिइनिःषट् ३० जायतेजनीप्रादुर्भावे क्तिच्क्तौचेतिक्तिचजननेसन्नेत्यात्वंतितुत्रेतिनेट्जातिः
सामान्यगोत्रयोःमालत्यामामलक्यांचचुल्लांकंपिल्लजन्मनोःजातीफलेच्छंदसिचेतिहैमः क्ते जातं· जातंव्यक्तोघजन्मसुक्लीबंत्रिलिंगमुत्पन्नेसमानानांभावःगुण

विशेषः कालिकोवस्थागुणाः सत्वंरजस्तमः २९ जनुर्जननजन्मानिजनिरुत्पत्तिरुद्भवः प्राणीतुचेतनोजन्मीजंतुजन्युशरीरिणः ३० जातिर्जा
तंचसामान्यंव्यक्तिस्तुपृथगात्मता चित्तंतुचेतोहृदयंस्वांतंहृन्मानसंमनः ३१ कालधर्मः॥ बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतीः ॥

वचनेतिप्यञ्· त्रीणि· व्यज्यतेऽनया· अंजूव्यक्तादौस्त्रियांक्तिन्· व्यनक्तिवा· क्तिच्· पृथगात्मायस्यतस्यभावःतलहेः· चितीसंज्ञाने· भावेक्तः· धीदित्तइतीण्निषेधः।
असुनिचेतः ह्रियतेविषयैः वृह्रोःषुग्दुकौचेतिकयन्दुगागमश्च· हृदयं· हरतिआहरतिविषयानितिवा· स्वनशब्दे· स्वन्यतेस्म· क्षुब्धस्वांतेतिमनस्त्विनिपातितं· हृदयस्य
पदृन्नइतिहृदादेशः प्रभृतिग्रहणात्सप्रकारार्थत्वात्कचित्स्वादावपि· हरतेः क्विप्तुक्· व्यत्ययेननतस्यदइत्यन्ये· मन्यतेनेन· असुन्· प्रज्ञादित्वाणिमानसं· तदभावेमनः
अर्हूचादिरयमित्येके ३१ बुध्यतेनयाबोधनंवाक्तिन्· ईषगतिहिंसादानेषु गुरोश्चहलइत्यप्रत्ययःमनसईषा· शकंध्वादित्वादृः पररूपं· धृष्णुवंत्यनया· त्रिध
षाप्रागल्भ्ये· धृषेर्धिषच्चसंज्ञायामितियुच्· ध्यायत्यनयाध्यानंवा· ध्यायतेःसंप्रसारणंचेतिक्विप्· हलश्चेतिदीर्घः प्रज्ञायतेऽनयाप्रज्ञानंवा· ज्ञाअवबोधने· प्र
आतश्चोपसर्गइत्यङ्· श्रद्धापिप्रज्ञाश्रद्धाधराज्ञप्तिःपंडासंवेदनंविदितिशाश्वतार्णवात्· शीने· शेःविच्· मोहः तंमुष्णातिशेमुषी· मुषस्तेये· मूलविभुजादित्वात्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्यते नया मननं वा मन ज्ञाने क्तिन् प्रज्ञाष्टमी स्मरणं अन्यथा गुरोश्चेत्यः टाप् प्रेक्षा धीरीक्षणं नृत्तमिति हैमः उपलंभनं उपलभ्यते नया वा डुलभष् प्राप्तौ षित्वात् इङि प्राप्ते आबादित्वात् हलकाहल्क्तिन् चिती संज्ञाने संपदादित्वात् क्विप् चित् तां ता संवेदनं विद ज्ञाने प्रतिपदनं पद गतौ संपदादित्वात् क्विप् करणे वा ज्ञपमिच्च चुरादिः ण्यंतत्वात् घुचिष्प्रासे आबादित्वात् हलकाहल्क्तिन् यद्वा तु चुरादीनां णिजभावे सामान्यापेक्षं ज्ञापकं न दात्क्तिन्न्याप्यएव तितुत्रेतिनेट् चित संचेतने चुरादिः ण्यासश्रंथेतियुच् चेतनासंविदित्रियां वाच्यप्रमाणेस्वर्गेचतुर्दश बुद्धेः १ धारणाशक्तियुक्ता धीः मेधृ संगमे मेधते संगच्छते सर्वमस्यां गुरोश्चेति अकारः एकं इदमहं कुर्यामिति मनसो व्यापारः कर्म संकल्पनं कृपू सामर्थ्ये भावे घञ् एकं चित्तस्य मनस आभोगस्तरेक प्रवणता पूर्णता वा आभोगो वरुणच्छत्रे पूर्णता यत्नयोरपि भुजपालनाभ्यवहारयोः भावे घञ् मनसः कारो व्यापारविशेषः डुकृञ् भावे घञ् अतः कृकमीति सत्वं हेमनसः सुखादैन्तत्परत्वस्य चर्च अध्ययने चुरादिः ण्यंतान्नाङ्गावे चिंतिपूजीत्यङ् संख्यानं चक्षिङः ख्यात्र् आतश्चेत्य

मेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः १ धीर्धारणावती मेधा संकल्पः कर्म मानसं चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा २ अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ३ मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिंतनं ॥ ९ ङ। संख्येकार्थे विचा

रेच चर असंशये चुरादिः ण्यासेति युच् त्रीणि विचारणायाः २ अध्याहरणं अध्याङ् पूर्वो घञ् अपूर्वोत्प्रेक्षणं तर्कणं तर्क भाषार्थे चुरादौ पठ्यते इति दंडकेपठितः भावे घञ् ऊहतिः ऊह्यते वा अजघञौ पृषोदरादित्वात् हूर्णे विपर्ययः तर्को वितर्के कांक्षायामूहवर्म विशेषयोरिति हैमः ऊहनं ऊह वितर्के भावे घञ् त्रीणि कितसंशये गुप्तिज्किद्भ्यः सन् अप्रत्ययात् विचिकित्सा शीङ् एरच् संशयः दिह उपचये संदेहनं घञ् द्वौ परौ प्रकारौ यस्य सर्वनामसंख्ययोरिति द्विशब्दस्य पूर्वनिपातः पृषोदरादित्वात् दात्वं चत्वारि एकधर्मिणि विरुद्धानेककोटिकावगाहि ज्ञानस्य णीञ् प्रापणे निर्णयनं एरच् उपसर्गादसमासेपीति णत्वं चिञ् चयने निश्चयनं ग्रहवृदृ इत्यप् द्वे ३। मिथ्या अपथ्यवेतद्विषयिणी दृष्टिः नास्ति परलोक इति मतिरस्य अस्ति नास्ति दिष्टं मतिरिति ठक् तस्य भावे नास्तिकता द्वे परलोको नास्तीत्यादिबुद्धेः पद गतौ व्याङ् पूर्वः व्यापादनं ण्यन्तात् घञ् द्रोहस्य चिंतनं लुङ् वाहुलकात् ल्युडिति मुकुटः तन्न स्त्रीत्वविशिष्टे भावे ङो विहितत्वेन नपुंसकत्वविशिष्टे भावे ल्युटो निरपवादत्वात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

हुद्रोहर्श्चिंतनस्य· सिद्धान्तो निश्चयो सिन्· हेमः मुचल्लने· भावे क्तिन्· अनुनासिकस्येति दीर्घः· भ्रांतिरनवस्थितौ मिथ्यामतौ च भ्रमणे· मिथ्येत्यव्ययं· तेन कर्मधारयः भावे घञि भ्रमः नोदात्तोपदेशेति न वृद्धिः भ्रमे तु निर्गमे भ्रान्तौ कुं रभ्रमणयोरपि· त्री एयत्सिंसंज्ञानस्य ४ संवेदनं· विद् ज्ञाने संपदादित्वात् क्विप्· आगमनमागूः गमेरित्यनुवर्त्तमाने भ्रमेश्च डूः डित्वाट्टिलोपः वधूशब्दवत्· यद्वा क्विपि गमः क्वावित्यंतलोपे ऊङ्· चगमादीनामित्यूकारादेशस्तदाओः सुपीति यणि अ भिधा सि च आगं आग्व इति विशेषः गुरौ उद्यमने· स्मान्तक्ति पितु आगूः आगुरो आगुर इति धूर्वत्· जानातेर्ल्युट्· यमः समुपनिविषु चेत्यप्· नियमो यंत्र याणं च प्रतिज्ञानिश्चये व्रते· आङ्पूर्वात् शृणातेः श्रृदोरित्यप् आश्रवोंगीकृतौ क्लेशे नान्यवद्वचनस्थिते· एवं संश्रव प्रतिश्रवौ· अंगीतिच्वि अंतमव्ययं तत्पूर्वात् कृञो भावे घञ्· अभ्युपेत्युपसर्गद्वयपूर्वाद्गमेर्ग्रहवृदृद्इत्यप्· अभ्युपगमस्तु पुंसि स्वीकारे निकटगमने च· समाङ्पूर्वाद्धाञो भावे किः समाधिर्ना समर्थने ध्याने वैरस्य नियमे काव्यस्य च गुणान्तरे द इत्यङ्गीकारस्य ५ मोक्षफलिका धीर्ज्ञानं· अन्य

समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ४ संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः अंगीकाराभ्युपगमप्रतिश्रवसमाधयः ५ मोक्षे
धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ६ मोक्षोपवर्गोथाज्ञानमविद्याहंमतिः स्त्रियां ॥

फलिका शिल्पशास्त्रे च या धीः सा विज्ञानं· विज्ञानं कार्मणे ज्ञाने इति हेमः मुक्त स्तु मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते· अन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति व्याख्यातं तन्न· शिल्पज्ञानस्य मोक्षेनुपयोगात् मोचनं· मुच्लृ मोक्षणे क्तिन्· मुक्तिर्मोचनमोक्षयोरिति हेमः बंधविरहात्केवलस्य भावः गुणवचनेति ष्यञ् निर्वाति अत्र भावे वा· क्तोधिकरणे चेति नपुंसके भाव इति वा क्तः निर्वाणोऽवात इति निष्ठानत्वं· यद्वा· अधिकरणे भावे वा ल्युट् बंधान्निर्गमनमित्यर्थः निर्वाणं मोक्ष निर्वृत्यौ विधाने करिमज्जने इति हेमः अतिशयेन प्रशस्यं श्रेयः श्रेयो मुक्तौ शुभे धर्मे इति प्रशस्ते तु वाच्यवत्· नितरां श्रेयो निःश्रेयसं· अचतुरेति निपातितं· निःश्रेयसं तु कल्याणे मोक्षयोः शंकरे पुमान्· अविद्यमानं मृतं मरणमत्र· अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते· अयाचिते च मोक्षे च ना धन्वंतरि देवयोः ६ मोक्ष अवसाने अवसानं क्षेपः चुरादिः एरच् घञ् वा मोक्षो निःश्रेयसे वृक्षविशेषे मोचने मृतौ इति हेमः अपवर्जनं वृजी वर्जने· घञ् अपवर्गस्त्यागमोक्षयोः क्रियावसाने साक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अष्टौ॰ ज्ञानविरुद्धज्ञाननिवर्त्यत्वात्॰ विदज्ञाने॰ वेदनं संज्ञायां समजेति क्युप्॰ अविद्याविद्याविरुद्धा॰ अहमिति विभक्तिप्रतिरूपकमव्ययं॰ अहंकारार्थे अहंप्रधाना मतिः॰ त्रीणि
रोपयति विमोहयति॰ रूपविमोहने अच्॰ अन्येषामपीति दीर्घः॰ यद्वा रूपरूपकारणे इति चौरादिकस्यायमप्यर्थः॰ यद्वा रूयते रूयते॰ रुशब्दे खष्पशिल्पेति पप्रत्ययो दीर्घश्च
निपातितः॰ रूपं तु श्लोकशब्दयोः पशावाकारे सौंदर्ये नाणके नाटकादिकै॰ ग्रंथावृत्तौ स्वभावे चेति हैमः॰ शप्यते आक्रुश्यते॰ शप आक्रोशे॰ शाशपिभ्यां ददनाविति दन्॰ शब्दो
स्मरे यशोगीत्यार्वाकोदेश्रवणे ध्वनौ इति हैमः॰ गंध अर्दने॰ अच्॰ गंधः संबंधलेशयोः॰ गंधकामोदगर्वेष्विति हैमः॰ रस्यते॰ रस आस्वादने चुरादिः॰ एरच्॰ घञ्वा॰ रसो गंधरसे ज
ले शृंगारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः॰ देहधातुप्रभेदे च पारदस्वादयोः पुमान् इति हैमः॰ स्पृश संस्पर्शने॰ अकर्त्तरि चेति घञ्॰ स्पर्शो वर्गाक्षरे दाने स्पर्शने स्पर्शके रुजी
त्ति हैमः॰ विसिन्वंति निबध्नंतीन्द्रियाणि॰ षिञ् बंधने पचाद्यच्॰ परिनिवीति षत्वं॰ विषयो यस्य यो ज्ञातस्तत्र गोचरदेशयोः॰ शब्दादौ जनपदे चेति हैमः॰ ७ गाव इंद्रियाणि चरं

रूपं शब्दो गंधरसस्पर्शाश्च विषया अमी ७ गोचरा इंद्रियार्थाश्च हृषीकं विषयींद्रियम्॰ कर्मेंद्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियं ८ तुवरस्तु कषायो
स्त्री मधुरो लवणः कटुः॥

त्यस्मिन्॰ करणाधिकरणयोश्चेत्यधिकारे गोचरसंचरेति निपातितः॰ इंद्रियैरर्थ्यंते॰ अर्थयाच्ञायां॰ कर्मणि घञ्॰ पंचानामपि प्रत्येकं त्रीणि॰
हृष्यत्यनेन हृषु अलीके॰ अलिकहृषिभ्यां किदिति करणे ईकन्॰ विषयोस्यास्ति॰ इनिः॰ इंद्रस्यात्मनो लिंगं इंद्रियमिंद्रलिंगमित्यादिना घञा निपातितः॰ इंद्रियं तु चक्षुरादिषु रे
तसि इति हैमः॰ त्रीणींद्रियाणां॰ कर्मसाधकमिंद्रियं कर्मेंद्रियमुच्यते॰ पाययति शोषयति तैलमिति पायुः॰ पैशोषणे॰ कृवापाजीत्युण्॰ आतो युक्॰ पायूपस्थं पाणि
पादौ वाक्चेतींद्रियसंग्रहः॰ उत्सर्गानंदादानगत्यालापाश्च तत्क्रिया इति कामंदकीये॰ एकं गुह्यादीन्द्रियस्य धीसाधनमिंद्रियं धींद्रियं॰ मनः कर्णौ तथा नेत्रं रसना च त्वचा
सह॰ नासिका चेति षडेतानि धींद्रियाणि प्रचक्षते एकं ८ तुः सौत्रो धातुः॰ तवीति हिनस्ति रोगान्॰ छित्वरछत्वरइत्यादिना ष्वरच्॰ दीर्घादिरपि॰ नरेऽप्रमशृणिशृंगाभ्यां रहि
तेग वितूवरः॰ काले प्राप्ते कषाये च रासे पुंव्यंजने स्मृते इत्युत्पलिनी॰ नापिकषायस्तुवर इति वोपालितः॰ पुंसि कषायस्तुवरमिति क्लीवकांडे रत्नकोषः॰ कषति कंठं॰ कषहिं
सायां॰ बाहुलकादायः॰ कषायः सुरभौ रसे॰ रागवस्तुनिर्यासे क्रोधादिषु विलेपने वर्णे इति हैमः॰ अस्त्री तु भयान्वयि॰ उक्तकोशाभ्यां तुवरस्तु कषायोस्त्रीत्येके पठंति॰ हेकषायर

Digitization by eGangotri

श्री·
अ·को· तुवरस्तुषीतिरः मधुरस्तुप्रियेस्वादौरसेचासवत्यपि मधुरामधुरापुष्पायष्टीभेदामधूलिषु· मधुकुक्कुटिकायांचमिश्रेयाशानपुष्पयोरितिहैमः एकं· लुनातिजाड्यं· लुञ्छेदने·।
टी·रा· नंद्यादित्वात्ल्युः लवणाल्लुगितिलिंगाणत्वं· लवणोराक्षसेरसेअब्धिभेदेलवणाविडितिहैमः एकं·कटत्याहृणोतितीक्ष्णतयामुखं·कटेवर्षावरणयोः कटिवटिभ्यां
३४ चेत्युः कटुकार्येमत्सरेचदूषणेचकटूरसेतिक्तेप्रियंगुसुरभिकटुंकाराजिकाखपीतिहैमः एकम् तेजयतिस्म· तिजनिशाने सामान्यापेक्षज्ञापकाच्चुरादीनांणिज्भावे
गत्यर्थाकर्मकेतिक्तः पक्षांतरेतुसंज्ञापूर्वत्वाद्गुणाभावः तिक्तस्तुसुरभौरसे· तिक्तातुकटुरोहिण्यांतिक्तंपर्प्पटकोषधेइतिहैमः एकं· अंच्यतेश्लाघ्यतेभोक्तृभिः अविश
ब्दे· मूषकाविभ्यः क्तः। अंम्ल अमरोगे· अमतिरुजत्यरुचिंवा हुलकाह्लेअम्लोपि· अम्लोरसेः ह्लवेतसेइतिहैमः एकं· रसआस्वादने· रस्यतेः रस्यंतेआस्वाद्यंते· एरचघुञ्वा
तुवरादयः षट्रसशब्दवाच्याः तत्रतुवरकषाययोः स्त्रीत्वस्योक्तत्वादितरेषांलिंगनिर्णयमाह पुंसीतिगुणमात्रेवर्त्तमानामधुरादयः पंचपुंसीत्यर्थः अमीषट्रूवणां

तिक्तोम्लश्चरसाः पुंसितद्वत्सुषडमीत्रिषु ९ विमर्द्दोत्थेपरिमलोगंधेजनमनोहरे आमोदःसोतिनिर्हारी वाच्यलिंगत्वमागुणात् १० स
माकर्षीतुनिर्हारीसुरभिर्घ्राणतर्पणः इष्टगंधः सुगंधिःस्यादामोदीमुखवासनः ११॥ ९ वाचकास्तुवरादयः सप्तापिगुणिनित्रिलिंगाइत्यर्थः

कटुश्चस्त्रियांवातोगुणेतिवाङीष् १० सुरतादिविमर्द्दोत्थेमाल्यादिगंधेघर्षणसमुद्भवेचंदनादिगंधेचजनानांमनोहरेपरिमलः मलधारणेमल्यते· कर्मणिघञ्संज्ञापू
र्वकत्वाद्वृद्ध्यभावः खनोघचेतिघोवा· घिल्करणइत्येष्योपीत्यपुगमात् यद्वा· मलतेधारयतिजनमनांसि· पचाद्यच् स्यात्परिमलोविमर्द्देतिमनोहरगंधयोश्चापि· सुर
तोपमर्द्दविकसच्छरीरसंगादिसौरभेपुंसि· एकं सपरिमलोऽतिनिर्हारी अत्यंतमनोहरश्चेद्वासमंतान्मोदयतीत्यामोदः मुदहर्षणेण्यंतः अच्· आमोदोगंधहर्षयोः एकं· आ
गुणात् गुणेशुक्लादयः पुंसीत्यतःप्रागतःपरंवाच्यलिंगतेत्यधिक्रियते ११ समाकर्षत्यवश्यंमनःआवश्यकेतिणिनिः यद्वा· समाकर्षणशीलः सुप्यजातावितिणिनिः एवंनि
र्हारी· हृञ्हरणमिगंधस्य· सुष्ठुरमतेत्रसुरभिः इन· घ्राणंतर्पयति· नंद्यादित्वात्ल्युः इष्टोगंधोस्य इष्टगंधः सुगंधोस्यास्त्रिषुक्लीवंतुजालुके गंधस्येदितिसमासांतइकारः सुगंधिःस्यादि ३४
ष्टगंधेत्रिषुस्त्रीरनपुंसकं चत्वारीष्टगंधस्यआमोदयति· सुप्यजातावितिणिनिः मुखंवासयति· नंद्यादित्वात्ल्युः हेमुखवासनवीटिकादेः ११ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूयी विशरणे दुर्गंधे च· पूयते पूतिः क्तिन्· पूतिर्दुष्टो गंधो स्य· गंधस्येदिती कारः दुर्गंधेत्वि कारो नेति विशेषः दुर्दुर्गंधस्य विस्यति· विसप्रेरणे· स्फायीति वा हुलकाद्रक्· विस
उत्सर्ग इति भद्रः· विस्रंसते इति वा· अन्येभ्योपीति डः· वबयोरभेदः आमोपक्कोमलः तस्येव गंधोस्य· उपमानाच्चेति समासांत इत्· द्वे अपक्वमांसादिगंधे· शब्दार्णे
वे तु कस्तूरिकायामामोदः कर्पूरे मुखवासनः बहुलेस्यानुपरिमलश्चंपके सुरभिस्तथेति· शोकतिमनोस्मिन्· शुक्रगतौ· ऋज्रेंद्रेति निपातितः शुक्लोयोगांतरे
सिते· नपुंसकं तु रजते शोभते· शुभदीप्तौ शोभायां वा· स्फायीतिरक्· शुभ्रं दीप्तेः भ्रके सिते इति हेमः शुचदीप्तौ· इक्· त्रिष्विनावर्णाभ्यादिः श्वेतनं घञ्· श्वेताद्वौ
पादिभेदयोः श्वेतावराटिका काष्ठपाटला शंखिनी सुच· स्त्री बरूपे· विशीयते· शद्लृ शातने· अच्· विशदः पांडरे व्यक्ते इति हेमः श्यायते· श्यैङ् गतौ· दश्याभ्यामि
तन्· पंडते मनोस्मिन् पडि गतौ· बाहुलकाद्रो दीर्घश्च १२ अवदायते स्म दैप् शोधने कर्मणि क्तः अवदातं तु विमले मनोज्ञे सितपीतयोरिति हेमः सिनोति

पूतिगंधिस्तु दुर्गंधो विस्रं स्यादामगंधि यत् शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडराः १२ अवदातः सितो गौरो वलक्षो धवलोर्ज्जुनः

मनः षिञ् बंधने· अंजि घृ सिभ्यः क्तः सितस्त्ववसिते बद्धे· सिता तु शर्करा इति हेमः गुरते उद्युंक्ते मनोस्मिन्· गुरी उद्यमने ऋज्रेंद्रेति निपातितः गौरः श्वेतः
हलोपीते विशुद्धे चंद्रमस्यपि· विशदे गौरं तु श्वेतसर्षपपद्मकेसरे इति हेमः यत्तु गौरते इति स्वामी· गौरतीति मुकुटश्च· तन्न· गुरी उद्यमने इति धातुमुपन्यस्योक्तरूपाय
न्यासस्यासंभवात्· अवलक्ष्यते· घञ्· वष्टि भागुरिरित्यल्लोपः यद्वा· वलति· वल चलने· क्विप्· वल अक्षं यस्मात् अक्षू व्याप्तौ संघाते च· घञ् वलचासौ अक्षश्च यद्वा·
वलं क्षायति क्षै क्षये आतोनुपेति कः धावति मनोत्र धावु गतिशुद्ध्योः वृषादित्वात्कलच्· बाहुलकाद्ध्रस्वः यद्वा धवनं धवः धूञ् कंपने· ऋदोरप्· धवं लाति· ला दाने·
आतोनुपेति कः अथ धवलो महोक्षे सुंदरे सिते· धवलो गौर इति हैमः अर्ज्यते· अर्ज अर्जने· अर्जेर्णिलुक्चेत्युनन्· अर्जुनः ककुभे पार्थे कार्तवीर्य मयूरयोः मातुरेक
सुतेपि स्याद्धवले पुनरन्यवत्· नपुंसके तृणे नेत्ररोगे स्यादर्जुनी गवि त्रयोदश· शब्दार्णवे तु श्वेतस्तु समपीतो सौरक्तेतरजपारुचिः वलक्षस्तु सितप्रयावः कदली
कुसुमोपमः अर्जनस्तु सितः कस्त्वलेशवान् कुमुदच्छविरित्युक्तम् शुद्धशब्दोप्यत्र तथा च धरणिः शुद्धः शुक्ले च पूते च केवले च प्रयुज्यते इति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हरतिमनः श्यामस्यात्हत्नविभ्यइनच् हरिणोपांडुसारंगो हरिणी चारुयोषिति· सुवर्णप्रतिमायांच हरिता हत्नभेदयोरिति हेमः· पांडुत्वमस्यास्तिनगपांसुपांडुभ्योरः· पांडुरोवर्णे
तद्वतोः पांडुरंतुमरुबके इति हेमः· पंड्यते ज्ञायते· पडिगतौ· मृगय्वादित्वात्कुः पृषोदरादित्वाद्दीर्घः पांडुस्तुपीतभागार्धः केतकी धूलिसंनिभ इति शब्दार्णवः· पांडुः कुंती
पतौ सिते इति हेमः· त्रीणिपीतसंवलितशुक्लस्य· धूनोति चेतः धूविधूनने कधूमरिभ्यः क्सरः वा हुलकादषत्वं· यद्वा· धूसनं· धूसकांतौ चुरादिः एरच् धूसंराति·रा·
दाने· आतोनुपेति कः· धूसरी किन्नरीभेदे नाखरे त्रिषुपांडुरे· धूसरस्तु सिते· पीतलेशवाच कुलच्छु विरिति शब्दार्णवः एकं १४ कर्बतिमनः कषवर्ण इति नक् कृष्णः
काके पिके वर्णविशेषे व्यासेऽर्जुने कलौ· कृष्णातुनील्यांद्रौपद्यांपिप्पलीद्राक्षयोरपि· कृष्णंतुमरिचेलोहे इति हेमः नीलस्तु नीलवर्णे· इगुपधेति कः· नीलोवर्णेमणौ शैलेनि
धिवानरभेदयोः नीलावध्यांलांछनेचेति हेमः· सितविरुद्धोऽसितः श्यायतेमनोऽस्मात्· श्यैङ्गतौ· इषियुधीधीतिमकू श्यामोऽम्बुदे पिके· हरितेप्रयागवटे कोकिलेवृद्धदा
रके श्यामं सैंधवे मरिचे श्यामासोमलताप्रिशोः इति हेमः· कलयतेकालः कलसंख्याने· घञ्· कालः पादे कृष्णवर्णे महाकालकृतांतयोः मरणेनेहसोः काली कालिकाक्षीरा·

हरिणः पांडुरः पांडुरीषत्पांडुस्तुधूसरः १३ कृष्णेनीलासितश्यामकालश्यामलमेचकाः पीतोगौरोहरिद्राभः पालाशोहरितोहरित् १५॥

कीटयोः मानुषे दोमयोर्नव्यमेचयोः कालाकृष्णतृवृत्ताल्यांजुंग्यां इति हेमः· श्यामलत्वमस्यास्तीति· सिध्मादित्वाल्लच्· श्यामलः पिप्पले श्यामे इति हेमः· मचतिमि श्रीभवति
वर्णांतरेण· मचमुचि कल्कने· कृत्रादिभ्यः संज्ञायांवुन्प चिमच्योरित्वोपधाया इतीत्वे लघूपधगुणः· मेचकः श्यामले कृष्णेतिमिरे वर्हिचंद्रके इति हेमः सप्तकृष्णस्य शब्दार्ण
वे तु मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभ इत्युक्तम्· पीयते पिबति वर्णांतरं· ओणृदिकः क्तः पितंपाने हरिद्रायां स्त्रियां गौरमभिधेयवत्प्रत्युर्पायतेवर्णानर्पातेर्वाहुल कादंजिघ
षिभ्यः रुः घुमास्थागेत्यादिनाइत्वमिति मुकुटेनोक्तं· तदसंबद्धमिति स्फुटमेव· हरिद्रेवाभादीप्तिरस्य· त्रीणि· पत्रस्य पलाशस्यायं· तस्येदमित्यण्· पत्रं पलाशं नारक्षः शटी हरिता·
किंशुकइति रुद्रात्तु हस्वादिरपि तत्र संज्ञापूर्वकत्वाद्वृद्ध्यभावः यद्वा· पलं अश्नाति· अशभोजने· कर्मण्यण् ततः प्रज्ञाद्यण्· पलाशः किंशुके गुणाख्यां हरिद्वर्णेराक्षसेच्छदप
लाशंछदनेस्मृतमिति हेमः शेषइत्यस्यविधित्वांगीकारादणिण्यालुः तन्न· तस्येदमिति सिद्धे शेषत्वाभावात्· हरति· दृश्याभ्यामितन्· दृसरुहियुषिभ्यइति हरितः हरितास्त्री

रोहति रुहजन्मनि प्रादुर्भावे रुहेरश्च लो वेतीतन् लोहितो मंगले नदे वर्णभेदे लोहितं तु कुंकुमे रक्तचंदने गोशीर्षे रुधिरे युद्धे इति हैमः रजति स्म रंज रागे क्तः यद्वा रज्यते स्म
रञ्ज प्रतियत्ने अनिदितामिति नाश्रुदाद्यय इति लिज भावे क्तः अनो लोपः चोः कुः रक्तं नील्यादिरंजिते कुंकुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे इति हैमः त्रीणि शोणायति
शोणृ वर्णे पचाद्यच् शोणः कृशानौ श्योनाके लोहिताश्वे नदे पुमान् त्रिषु कोकनदच्छाये कोकनदं रक्तोत्पलमिव छविर्यस्य सः अव्यक्तः रागो यस्य किंचिल्लोहितः
ऋच्छति ऋ गतौ अर्तेरुनन् अरुणः कृष्णलोहित इत्यमरमाला अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु अरुणा
तिविषा श्यामा मंजिष्ठा त्रिवृता सु च हे पाटयति पट गतौ एयंतात् वृषादित्वात्कलच् पाटलाकुसुमाभः पाटलः पाटलं तु कुसुमं श्वेतरक्तयोः पाटलः स्यादाशुव्रीहौ
पाटला पाटलिद्रुमे इति हैमः श्यैङ् गतौ श्यायते बाहुलकात् कन् सृगृदृभ्यो वः कपिर्वर्णविशेषः सोऽस्यास्ति लोमादित्वात् शः कपिर्मर्कटः तद्वर्णत्वादिति वा कपिशः

रोहितो लोहितो रक्तः शोणः कोकनदच्छविः॥ अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः १५ श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते कडारः

स्त्रियां धूम्या मे स्त्री माधव्यां सिल्हके पुमान् कृष्णपीतस्य हे धूमं राति कः पृषोदरादिः धूमं लाति रा ला आदाने कः ((कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ १६ ॥
कृष्णमिश्रो लोहितः त्रीणि गड इति मड सेचने गडेः कडश्चेत्यारन् यद्वा कडनं कडः स्वनो घञेति घः कडमृच्छति ऋ गतौ कर्मण्यण् कवृ वर्णे कवेः पश्चेति इलच् प्र
त्ययः पकारश्चान्तादेशः कपिं वर्णं लातीति वा पुंडरीकं करिण्यां तु शिंशपा गो विशेषयोः स्त्री रेणुकायां कपिलं वर्णे नाकुकुरमुनौ अनले वासुदेवे च कपिलः परिकीर्तितः
पिंजति पिजि वर्णे अचूनुं कादिः पिंगा गोरोचना हिंगुनाडिका चंडिका सु च पिंगी शम्यां पिशंगो नाराले केतु नपुंसकं पेशति पिश अवयवे विंडादिभ्यः किदित्यंगच् कं दति कादि
आह्वाने रोदने च मृगय्वादित्वात्साधुः कद्रुस्त्रिषु स्वर्णपिंगे नागानां मातरि स्त्रियां पिंजति पिजि वर्णे वृषादित्वात्कलच् न्यंकादीनां चेति कुत्वं पिंगं लातीति वा पिंगलः कपि
ले वह्नौ रुद्रेऽर्कपारिपार्श्वके कपौ मुनौ निधिभेदे पिंगला कुमुदस्त्रियां षट् कपिलस्य शाब्द्याः वर्णे वे तु क्षितनपीत हरिद्रक्तः कडारस्तृणवह्निवत् अयं तु रिक्तपीतांगः कपि
लो गोविभूषणः हरितां शाधिके सोऽतु पिशंगः पद्मधूलिवत् पिशंगस्त्वासितमाव शात् पिंगो दीपशिखादिषु पिंगलस्तु परच्छायः पिंगश्शूलांगखंडवदिति १६ ॥

Digitization by eGangotri

चीयते चित्रं चयने· अमि चिमीनिकः· चित्तं त्रायते वा· त्रैङ् पालने· कः· चित्रं किर्मीरो नेः समासमकलापृथग्रूपभेदप्रदर्शनं गुणे शुक्लादयः पुंसीत्यस्य बाधनार्थं चित्राख्य
पण्यगो डुंवासुमद्गादंतिका सुच· मायायां सर्पनक्षत्रनदीभेदेषु चस्त्रियां तिलकालेख्ययोः क्लीबं कर्वुरा‍द्भुतयोरपि· नद्युक्तयोस्त्वन्यलिंगं· नामानुशासने तु नानार्थपुंस्का
डेयं पठितः· तदनुरोधेनेहापि चित्रकिर्मीरेतिसमस्तं केचित्तु पठंति· कीर्यते· कृविक्षेपे· गंभीरादयश्चेति किरते रीरन्· मुडागमः· किर्मीरोनानागरंगे कलयति· किं
प्· कल· माषयत्यभिभवति वर्णान् माषः मषहिंसायां· हंत्यर्थाश्चेति चुरादौ पाठान्णिच्· कलचासौ माषश्च· कल्माषः· कर्वुरे कृष्णे इति मूर्द्धन्यांतेरभसः कल्माषो रा
क्षसे कृष्णे शबलेपीतिहेमः· शपत्याक्रोशति वर्णान्· शपआक्रोशे· घापेर्वश्चेति कलः· वलंच· एति वर्णान्· एते वर्ण्... कर्वुर आगते कर्वहिंसायां· मद्गुरादयश्चेतिनि
पातनात् कुरच् वबयोरभेदात् कर्वुरः कर्वुरं सलिले हेम्नि कर्वुरः पापरक्षसोः· कर्वुरा कृष्णवृंतायां शबले पुनरन्यवत्· बहूनानावर्णस्य गुणोद्भूतिः· यद्यपि शुक्लं रूपमित्यादौ

चित्रकिर्मीरकल्माषशबलैताश्च कर्वुरे गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति ७ इति धीवर्गः· ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती
व्याहार उक्तिर्लपितं भाषितं वचनं वचः १॥

विशेष्यनिघ्नते वेष्यते· तथापि विशेष्यानुपादाने भ्रमस्य सामान्येन पुंसकमित्यस्यापवादोयं पटस्य शुक्लत्वमित्यादि
वाच्यं· अपवादांतरमाह गुणीति· विशेष्यस्यानुपादाने यदेवयल्लिंगं प्रतिपिपादयिषितं तल्लिंगा इत्यर्थः· यथा शुक्लं शुक्लः· शुक्लेत्यादि ७ इति धीवर्गः ब्रह्मण इयं ब्राह्मीऽजा
नाविति टिलोपे टिड्ढेति ङीप्· ब्राह्मी तु भारती शाकभेदः पंकगंडीहंतिका सोमवल्ल्यपि· ब्रह्मशक्तिरिति हेमः· विभर्ति· भृभृदृशीत्यतच्· ततः प्रज्ञादित्वादण्· ङीष्· भरतस्येयमिति वा
अथ भारती· वचने च सरस्वत्यां पक्षिवृत्तिप्रभेदयोः भावव्यक्तायां वाचि गुरोश्चेत्यप्रत्ययः गृणात्येनां गृ शब्दे संपदादित्वात् क्विप्· भागुरिमते गिरापि· ब्राह्मणी वचने वाचाजा१
ल्पितं गदितं गिरेति शब्दार्णवः· उच्यते वाक्· वचभाषणे· क्विब्वचीत्यादिना क्विप्दीर्घौ संप्रसारणं च· वण्यते· वणशब्दे· इञ्· कृदिकारादिति ङीष्· गौरादित्वाद्वा· सरोस्त्यस्याः
मतुप्· सरस्वती सरिद्भिद्दिवाच्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपीति हेमः· समाधिष्ठातृदेवता या॥ व्याहरणं· व्याङ्पूर्वो हृञ्भावे घञ्· वचभाषणे· क्तिन्· संप्रसारणं·
लपव्यक्तायां वाचि· भावे क्तः भाषव्यक्तायां वाचि भाषणं भाषितं· भावे क्तः· वचेर्भावे ल्युट् असुनि वचः· षट् भाषणस्य· केचित्तु ब्राह्म्याद्यास्त्रयोदशपर्याया इत्याहुः १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संस्कृतादपभ्रंश्यति भ्रंशु अधःपतने पचाद्यच् अपभ्रंशः शब्दोऽपशब्दः हे । शास्त्रे व्याकरणादौ यो वाचकः साधुः स शब्दः स एव निरूपपदे न शब्देन व्यवह्रियते तिङन्ता
नां चयः पचति पठ्य पचति भवति पाको भवतीत्यर्थः सुबन्तानां चयः प्रकृतिसिद्धमिदं हि महात्मनामित्यादि भवतीत्यध्याहारस्य भाष्यकृतो मते आवश्यकत्वाभावात् सवा
क्यं क्रियेत्यादि वाशब्दः समुच्चये कारकान्वितक्रियाबोधकं घटमानयेत्यादि तिङ्सुप्चयात्मकमपि वाक्यमित्यर्थः केचित्तु भाष्यकारमतेन प्रथमपक्षः एकतिङ्
वाक्यमिति वार्त्तिकाभिप्रायेणापर इत्याहुः यत्तु पूर्वं शब्दात्मकवाक्यस्य लक्षणं क्रियेत्यादि तु अर्थात्मकस्येत्याहुः तन्न वचोऽशब्द संज्ञायामिति कुत्वनिषेधकसूत्रस्या
ननुगुणं उच्यत इति वाक्यं वचेर्ण्यत् चजोरिति कुत्वं शब्दसंज्ञायाम् अन्यत्र तु वाच्यम् २ श्रूयते श्रु श्रवणे कर्मणि क्तिन् श्रूयते धर्मो न येति वा श्रुअजिस्तिभ्यः करणे इति क्ति
न् श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्त्तयोः स्त्रियां विदन्त्यनेन धर्मं विद् ज्ञाने हलश्चेति घञ् वेदः श्रुतौ च वित्तौ च आम्नायतेऽभ्यस्यते म्ना अभ्यासे कर्मणि घञ् आमनन्ति उप
दिशन्ति धर्मान् इति वाथ्याद्यधेति णः आम्नायः कुलआगमे उपदेशे चेति हेमः त्रीणि वेदस्य त्रय्या धर्मः त्रयी धर्मः तया त्रय्या विधीयमानो यज्ञादिस्तद्विधिः विधानम् ।

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः । तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥ श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः

ऋग्यजुःसाम्नां त्रयी धर्मविदुर्बुधाः एकमिति मुकुटस्तन्न तानि धर्माणि धर्मेणापापमपनुदति वेदोऽखिलो धर्ममूलं धर्ममूलमिदं स्मृतं अथातो धर्मजिज्ञासा चोदनालक्ष
णो धर्मः श्रेयान् स्वधर्मो विगुणः धर्मक्षेत्रे कुरुक्षेत्रे धर्मः प्रोज्झितकैतवः धर्मस्य ह्यापवर्ग्यस्य धनं च धर्मैकफलं धर्मार्थश्च कामादिर्धर्मो रक्षति रक्षितः धर्माधर्मौ तद्वि
पाका धर्मजिज्ञासमानेन इत्यादिषु बहुषु ग्रंथेषु धर्मशब्दस्यैव प्रायो दर्शनात् देवदत्तो दत्त इतिवत् एते प्रयोगाः सन्तीति चेन्न वैषम्यात् देवदत्तशब्दस्यानेकस्थ
ले प्रयोगो दृष्टः क्वचिद्दत्तशब्दस्यापि प्रयोगे दृष्टे पूर्वपदस्य लोपादिकं कल्प्यते प्रकृते तु धर्मशब्दस्यैव प्रयोगे दृष्टे एवं त्रयीधर्ममित्यादौ च क्वचित् त्रयीधर्मशब्दस्यापि
प्रयोगे लब्धे षष्ठीसमासः कल्प्यते प्रतिपाद्यप्रतिपादकभावः संबन्धः षष्ठ्यर्थः तान्त्रिकसौगतादिधर्मव्यावृत्त्यर्थमिदं धर्मस्य विशेषणं संगच्छते धर्मस्य चतुर्दशेति निय
मात् अतस्त्रय्यन्तानि चत्वारि वेदस्य नामानि न च वेदास्त्रयस्त्रयीत्यनेन योनरूढत्वं शंक्यं सामान्यविशेषरूपेणोभयसंभवात् ब्राह्मणक्षत्रियवैश्याः द्विजाः विप्रोपि द्विजः

यदपि समासे गुणीभूतस्यापि त्रयीशब्दस्य बहुविवक्षावशात्तच्छब्देन परामर्शः इत्युक्तं तदपि न तन्मते त्रयीधर्मशब्दस्य विधेयत्वात् तदेकदेशस्य त्रयीशब्दस्यानुवाद्य त्वासंभवात् वेदस्यैव तच्छब्देन परामर्शसंभवाच्च यदपि यथाशब्दानुशासनमिति दृष्टान्तप्रदर्शनं तदपि एतेन प्रत्युक्तं वेदस्यैव परामर्शः संभवति तेन वेदेन विधीयते य ज्ञादिः एतेन वेदविहितत्वं धर्मत्वं वेदश्च धर्मे प्रमाणमित्युक्तं धरति लोकान् ध्रियते वा जनैरिति धर्मः अर्तिस्तुसु इत्यादिना प्रत्ययो मन् ऋच्यन्ते स्तूयन्ते देवा अनया ऋच स्तुतौ १ क्विप् स्यति पापं षो अन्तकर्मणि मनिन् सामञ्जी वमुपायस्य भेदे वेदान्तरेऽपि च इज्यन्तेऽनेन अर्तिपृवपीत्युसः वेदानां प्रत्येकमेकैकं इत्येते त्रयो वेदास्त्रयी त्रयोऽवयवा यस्याः सा संहतिः त्रिशब्दात् संख्याया अवयवे तयप् द्वित्रिभ्यां तयस्यायज्वेत्ययच् टिड्ढाणञिति ङीप् त्रयी त्रिवेद्यां त्रितये पुरंध्र्यां सुमनावपि इति हैमः वेदत्रयसंघातस्यैकं २ श्रुतेर्वेदस्य शिक्षेत्याद्यं मः शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते शिक्ष्यते स्थानादिकमनया शिक्ष विद्योपादाने गुरोश्चेत्यः अङ्ग्यते ज्ञायतेऽने-

स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ३ शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ४ आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ॥

न अगि गतौ घञ् एकं वेदाङ्गस्य अवति अवतेष्टिलोपश्चेति मन् प्रत्ययस्यैव टिलोपः ज्वरत्वरेत्यूठ् गुणः वषट्कार इति लिङ्गा त्समुदायादपि कारप्रत्ययः प्रणूयते स्तूयतेऽनेन णु स्तुतौ ऋदोरप् उपसर्गादिति णत्वं द्वे इति हेति पारंपर्योपदेशोऽव्ययं तदास्तेऽस्मिन् आस उपवेशने हलश्चेति घञ् पुरावृत्त माचष्टे पुरावृत्तं आख्यानत्वेनात् पचाद्यच् पूर्वाचरितप्रतिपादकस्य ग्रन्थस्य द्वे उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः चतुर्थः प्रचितो नाट्ये यतोऽसौ छान्दसः स्मृतः स्वरन्ति शब्दायन्ते स्वृ शब्दोपतापयोः पचाद्यच् यद्वा स्वर्यन्ते अर्था एभिः पुंसीति घः यद्वा स्वेन राजन्ते राजृ दीप्तौ अन्येभ्योपीति डः स्वरा अचः तद्धर्मत्वादुदात्तादयोऽपि स्वरा नासास मीरस्यान्मध्यमादित्रिकस्वरे उदात्तादावकारादौ षड्जादौ च ध्वनौ पुमान् इति विश्वमेदिन्यौ उत् उच्चैरादीयते उच्चार्यते स्म क्तः अच उपसर्गात्तः उदात्तो दातृमहतोस्त्व द्ये च स्वरभिद्यपीति हेमचन्द्रः ॥ एकमू ४ अनुश्रवणोत्तरमीक्षणं परीक्षणमन्वीक्षा सा प्रयोजनमस्याः प्रयोजनमिति ठक् दम्यतेऽनेन दमु उपशमे ञमन्ताड्डः दण्डो नीयते बोध्यतेऽनया दण्डनीतिः क्तिन् यद्वा दण्डं नयति दण्डान् प्रतिप्रापयति क्तिच् आन्वीक्षिकीसाहचर्यात्स्त्रीत्वं एते द्वे क्रमात्तर्कविद्यायां न्यायरूपायामर्थशास्त्रे च वर्तेते अर्यते गम्यतेऽर्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षिङः ख्याञ् ण्वुल् उपलब्धो ज्ञातोर्थो यस्याः सा एकं ज्ञातसत्यार्थभूतायाः कथायाः पुराभवं सायंचिरमिति ट्युट्युलौ पूर्वकाले केति सूत्रे निपातनात्तुडभावः यद्वा पुरापि नवं पुराणं पुराणप्रोक्तेष्विति सूत्रे निपातितं यद्वा पुरा अतीतानागतानर्थान् वदति अणशब्दे पचाद्यच् पुराणं पंचलक्षणम् पञ्च सर्गप्रतिसर्गादीनि लक्षणानि यस्य सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च भूम्यादेश्च संस्थानं पुराणं पञ्चलक्षणं क्वचिदिह वंश्यानुचरितं चैवेति तृतीयपादे पाठान्तरं हे ५ प्रबंधस्य कल्पना रचना सा कसन्या कथयावा कप्रबंधे चिंतिपूजिकथीत्यङ् कथा कादंबर्यादिः हे प्रवल्हते आच्छादयति वि र्हं वल्ह परिभाषणहिंसाच्छादनेषु इंन्योक्ष्यादिहंति कुनशिल्पिसंज्ञयोः ण्वुल् प्रहेलयति अभिप्रायं सूचयति हिलभावकरणे ण्वुल् व्यक्तीकृतकमप्यर्थं स्वरूपार्थस्य गोपनात् यत्र वाच्यार्थसंबद्धं कथ्यते सा प्रहेलिका यद्वा प्रवल्हते रिनि प्रवल्हिस्ततः कृदिकारादिति ङीष् उभाभ्यां स्वार्थे कन् प्रहेलिका प्रवल्ही च प्रश्नदूती विपादिकेत्यनुपलिनी हे द्वे दुर्विज्ञानार्थस्य प्रश्नस्य वेदार्थस्मरणपूर्वकं रचितत्वात्स्मृतिः स्मृति धर्मशास्त्रस्मरणा

आख्यायिकोपलब्धार्था पुराणं पंचलक्षणं ५ प्रबंधकल्पना कथा प्रवल्हिका प्रहेलिका स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ६ समस्या तु समासार्था किंवदंती जनश्रुतिः।

द्याः स्त्रियां धर्मबोधार्थं रचिता संहिता संपूर्वाद्दधातेः कर्मणि क्तः दधातेर्हिः हे मन्वादिस्मृतेः समाहरणं ग्रहहृद्दृशस्यप् विस्तरेण ११ उपदिष्टानामर्थानां सूत्रभाष्ययोः निबंधो यः समासेन संग्रहं तं विदुर्बुधाः संग्रहो ग्रहदृग्गमुष्टिसंक्षेपयोरप् इति हैमः हे ६ समसनं असु क्षेपणे ण्यत् संज्ञापूर्वकत्वाद्वृद्ध्यभावः यद्वा समं कृत्स्नं तद्धिरुपिणी इच्छा समस्या ततश्चो ज्वलाच्छ्वेपि सासमशब्दात् क्यचि सर्वप्रातिपदिकेभ्य इति सुगागमे अ प्रत्ययादिस्यः टाप् समसनं समासः घञ् समासो र्थो यस्याः पूरणसाकांक्षा कविशक्तिपरीक्षार्थं सपूर्णा तथैव पठ्यमाना यथा शतचन्द्रं नभस्तलमिति तत्र दामोदरकराघातविह्वली कृतचेतसा दृष्टं चाणूरमल्लेनेत्यादिना सा पूर्यते असमासार्थेति पाठे तु अपरिपूरणार्थेत्यर्थः हे कोपि वादः किं पूर्वा इदेः तृभूद्वहिवसिवदीति झच् कित् गौरादित्वान् ङीष् यद्वा किंवदन्तीत्याख्यायमाना अनुकरणशब्दात् ख्यातएयं तादचरः कृदिकारादिति ङीष् जनेभ्यः श्रूयते क्तिन् हे लोकप्रवादस्य च तिर्लोकश्रुतं त इत्यस्यां इतीश्चेति वार्तिके नणः प्रत्ययप्रज्ञाश्रद्धेत्यादिना णाद्रूति मुकुटेनोक्तं तन्न तत्र वृत्तिशब्दस्य पाठाऽभावात् कारकस्य वार्तिकेनैव ज्ञापितत्वात् वार्तात्वर्त्तने वानिक्रुणोक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्तिच प्रवृत्तिर्वृत्तं वृत्तांतप्रवाहेषु प्रवर्त्तत इति हैमः वृत्तान्तोनुवर्त्तनीयो गदेषणीयेः ऽन्तः समाप्तिर्यस्य वृत्तान्तस्तु प्रकरणे कार्त्स्न्ये वार्त्ता प्रकारयोरिति हैमः उद्गतोंऽतो यस्य उ
दंतः साधुवार्त्तयोः चत्वारि आव्हयं नाम ह्वः आतश्चोपसर्ग इति के प्राप्ते प्रसारणिभ्यो डो वक्तव्य इति ङ लैर्यायते प्राप्यते या प्रापणे घञर्थे कः अन्यत्रापीति डो वा यद्वा
आह्वानमाहूः संपदादिः तस्याः अयः ७ आख्यानं आतश्चोपसर्गे इत्यङ् एवमाह्वा अभिधीयते कर्मणि ल्युट् म्नायते म्ना अभ्यासे यद्वा नम्यते भिधीयते अर्थोनेन
णामप्रह्वत्वे शब्दे च नामन्सीमन्निति निपातितः भागरूपनामभ्यो धेय इति स्वार्थे वा धेयः बहूह्वानं ह्वेञः क्तिन् आकारणं कृञो ण्यंता ल्युच् ल्युटि आह्वानं त्रीणि
बहुकर्तृका चेत्संहृतिः एकं ८ विरुद्धो वादः विनानार्थे व संदे... हरणं हार उच्यते नानासंदेहहरणाद्व्यवहार इति स्मृतः कात्यायनः व्यवहारस्थितो पणे व्यवा
हारेपि इति हैमः ह्वृ ऋणादिन्यायस्य उपन्यसनं असुक्षेपणे ... वाचो मुखमिव मुखं उपक्रमः ह्वे वचने नौ पंक्रमे भस्य उपसमीपे उहनं ज्ञापनं भावे घञ् उदाह

वार्त्ताप्रवृत्तिर्वृत्तांत उदंतः स्यादथाह्वयः ७ आख्याह्वे अभिधानं च नामधेयं च नाम च हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ८ विवादो व्यव
हारः स्यादुपन्यासस्तु वाङ्मुखं उपोद्घात उदाहारः शपनं शपथः पुमान् ९ प्रश्नोनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे मिथ्याभियोगोऽभ्याख्या
नमथ मिथ्याभिशंसनं १० अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः॥ ११ रणं घञ् ह्वे वध्यमानोपयोग्यर्थं वर्त्तनस्य प्रकृतोपपादकस्य दृष्टांतादेरि

त्यन्ये शप आक्रोशे ल्युट् शीङ् शपेत्यथः शपथः कार आक्रोशे शपने च शुक्तादिभिरिति हैमः ह्वे ८ प्रच्छनं यजयाचेति नङ् प्रश्ने चेति लिंगात्न संप्रसारणं अनुयोजनं
युजेर्घञ् प्रच्छनं ग्रहेश्च हल इत्यङ् संप्रसारणं त्रीणि प्रश्नस्य प्रतिवचनं एयत् उत्तरणं ऋदोरप् ह्वे उत्तरस्य मिथ्या चासावभियोगश्च वक्षिडोऽभि आङ् पूर्वाद्
वि ल्युट् ह्वे शतं मे धारयसीत्यादि मिथ्याविवादस्य अभिशंसे भावे ल्युट् १० अभिशपनं घञ् ह्वे मिथ्यारोपस्य सुरापानादिविषयस्य प्रणदनं घञ् प्रणादस्तु पुमां
स्तारशब्दे च श्रवणामये अनुरागकृते शब्दे प्रणादः सीत्कृतं नृणामिति शाब्दार्णवः एकं प्रीतिविशेषजनितस्य मुखकण्ठादिशब्दस्य अश्रुते व्याप्नोति अशूव्याप्तौ अ
षादेर्वनेयुद्धेत्यस्तुन् कीर्त्यते कृतसंशब्दने ऊतियूतीति निपातितः कीर्त्तिः प्रसादयशसोर्विस्तारे कर्द्दमेपि च समेः सर्वैर्ज्ञायते। ज्ञा अवबोधने घञर्थे कः समाज्ञेति स

CC-0. In Public Domain. Digitization by eGangotri

क्वापि प्रतिषेध इति नवीनत्वं त्रीणि · स्तूयतेनेन · स्तुधातोरप् · दाम्नीतिष्ट्रनि स्तोत्रं क्तिनि स्तुतिः · णु स्तुतौ · नुतिः चत्वारि ११ आम्रेड्यते आधिक्येनोच्यते स्म · म्रेडृ उन्मादे क्तः यथा सर्पः स
र्प इति · एकं · उच्चैर्घुष्यते स्म घुषिर् शब्दे क्तः घुषिरविशब्दने इतीण्निषेधः विशब्दनं स्वाभिप्रायप्रकाशनं तच्च प्रकृते नाभिप्रेतं · ण्यासेति युच् उच्चैः शब्दनस्य द्वे आघि
नाकामक्रोधादेर्ग्रहः ककयति ककल्लोल्लोपन्नापयोः वाहुलकाद्दुल् · एकम् १२ यथा अवर्णो द्वयोर्निंदायां तत्र उपक्रोशा इत्योपी स्यर्थः वर्ण्यते वर्णवर्णने · घञ् · वर्णः प्रशं
सा तद्धि रूढोऽवर्णः वर्णो द्विजादिशुक्लादियशोगुणकथासु च · सुगौनानास्त्रियांमे दहत्पा स्मरविघोषणे · क्षिप प्रेरणे · घञ् · आक्षेपो भर्त्सना ऋष्टिकार्यालंकृतिषु स्मृतः नि
रादिपूर्वाद्वदेर्घञ् · निर्वादः स्याल्लोकवादः परिनिष्ठितवादयोः उपसर्गस्य घञ्यमनुष्ये बहुलमिति दीर्घः परिवादोपवादस्याद्दोषोणावादनवस्तुनोः अपवादस्तु निंदायामाज्ञाविश्रंभयोरपि · क्रुश
आह्वाने · घञ् · गुप गोपनकुत्सनयोः गुपेर्निंदायां सन् · अप्रत्ययात् · कुत्स अवक्षेपणे ण्यन्तादि कुत्सायां गुरोश्च हलः · निंदा स्यादपवादेपि कुत्सायामपि योषिति · गर्ह गल्ह

यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ११ आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणं काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः १२ अवर्णा
क्षेपनिर्वादपरिवादापवादवत् उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे १३ पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः यः सनिंद उपालंभस्तत्र स्यात्प ति
रिभाषणं १४ तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः १५॥

१९ कुत्सायां ल्युट् शपने दापाः १३ परुषो निष्ठु
रभाषी तस्य भावः पारुष्यं · ब्राह्मणादित्वात् ष्यञ् · पारुष्यं परुषत्वे च दुर्वाक्ये पुंसि गीष्पतौ · अतिक्रम्य उक्तिः अतिवादः द्वे अप्रियवचसः अपकारार्था गीः भर्त्स तर्ज संतर्जने · ल्यु
ट् · द्वे चौरोसि त्वां घातयिष्यामीत्याद्यपकारार्थवचनस्य · उपालंभो द्वेधा गुणाविष्करणपूर्वको निंदापूर्वकश्च · आद्यो यथा महाकुलीनस्य तव किमुचितमिदं · द्वितीयस्तु वंध
कीसुतस्य तवोचितमेवेदमिति · तत्र यो द्वितीयः स परिभाषणं · भाष व्यक्तायां वाचि ल्युट् · अप्रत्यये परिभाषापि · परिभाषाश्च ततो भविष्यंतीति हेतुमति चेति सूत्रे भाष्या
त् · परिभाषणं सनिंदोपालंभे नियमेपि च एकं १४ क्षर संचलने प्रयोजकण्यन्तात् युच् · ल्युटि आक्षारणमपि · क्षारणाक्षारणाक्रोशाः साभिशापाभिमैथुनाः स्त्रीवम
पि · नीवमाक्षारणं यं आक्रोशो मैथुनं प्रतीति शब्दार्णवः परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं स्त्रियाश्चाक्रोशनस्यैकं · आभाषे ल्युट् लप व्यक्तायां वाचि · घञ् संभाषण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ· को·
टी· रा·
३९

मुहुः पुनः पुनर्भाषणं· अनुलपनं· घञ्· द्वे वारंवारंभाषणस्य· विलपनं· घञ्· परिदेवनं दिवु परिदेवने· चुरादिः ल्युट् पुरिवियपरिदेवनापि· द्वे अनुशोचनोक्तेः विरुद्धः प्रलापः विप्र
लापो विरुद्धो क्ता व नर्थकवचस्यपीति हेमः विरोधस्य उक्तिः द्वे अन्योन्यविरुद्धवचनस्य· संलपनं· घञ्· मिथोन्योन्यं प्रतिभाषणं· आलापस्तु एकेनापि क्रियते एकम् १६ सुष्ठु प्रलु
प्तलपनं· घञ्· द्वे शोभनवचनस्य अपलपनं· घञ्· अपलापः प्रेमण्यपन्हवे निन्हवनं न्हुङ्· अपनयने ऋदोरप्· द्वे धार्यमाणेन धारयामीत्याद्युक्तेः संदिश्यते· घञ् संदेशार्थः तस्य
वाक् संदिष्टार्थाययोच्यते सा· वाचिकं· वाचो व्याहृतार्थायामिति ठक्· द्वे संदेशवचनस्य· उत्तरे वक्ष्यमाणा वाग्भेदा रुशत्याद्यः संम्यगंताः १७ रुशाहिंसायां तालव्यांतसौदादिकः श
तृंतात्· ङीप्· आच्छीनद्योरितिनुम् विकल्पः रुशती हिंस्रा· रुशान् शब्दः रुशाद्वचनं· मुकुटस्तु उषदाहे इत्यस्य शत्रंतस्य उशतीति रूपमाह· तन्न· तस्मा च्छपिपुर्गतेति गुण
स्य प्राप्तस्य नोर्नित्यमिति नुमश्च प्रसंगात्· एकं· कल्यास्तु साधुः तत्र साधुरिति यत्· कल्यापीति स्वामी एकं सांत्वयति सांत्वसामप्रयोगे· चुरादिः पचाद्यच्· एकं संगच्छते स्म· गत्य

अनुलापो मुहुर्भाषा विलापः परिदेवनं विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः १६ सुप्रलापः सुवचनमपलापस्तु निन्हवः संदेशवाग्वा
चिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे १७ रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका अत्यर्थमधुरं सांत्वं संगतं हृदयंगमम् १८ निष्ठुरं परुषं ग्राम्यमश्लीलं
सूनृतं प्रिये सत्येथ संकुलक्लिष्टे परस्परपराहते १९॥ १८ र्थेतिकर्तरिक्तः हृदयं गच्छति· गमश्चेति खच्· द्वे युक्तामिलितस्य वचनस्य १८ नितिष्ठति· मद्गु
रादयश्चेति कुरच्· उपसर्गात्सुनोतीति षत्वं· पिपर्त्तिपूरयति अलं वृद्धिं करोति पृपालनपूरणयोः ऋतहीत्युषच्· परुषं कठिने रूक्षे स्यान्निष्ठुरवचस्यपीति हेमः द्वे कर्क
शवचनस्य· ग्रामे भवं ग्रामाद्यखञाविति यञ्· ग्राम्यं स्त्रीकरणोक्ती वेऽश्लीलप्राकृतयोस्त्रिषु श्लियं लाति· आतोनुपेति कः तद्भिन्नं· कपिलकादित्वाल्लत्वं द्वे भंडादिवच
नस्य श्रीलाति· श्रीञ्तर्पणे इगुपधेति कः॥ सत्सु साधु यत् प्रियं यत्सत्यं· तस्मिन्· सुष्ठु नृत्यत्यनेन· घञर्थे कः· यद्वा हलश्चेति घञ्संज्ञापूर्वकत्वाद्गुणाभावः अन्येषामपी
ति दीर्घः यत्तु मूलविभुजादित्वात्क इति मुकुटेनोक्तं तन्न· तस्य कर्तरि विधानात् सूनृतं मंगलेपि स्यात्प्रियसत्ये वचस्यपि एकं· संकुलति· कुलसंस्त्याने· कः संकु
लं त्रिषु विस्पष्टं वाचि व्यामेक्लिश्यते स्म क्लिशूविबाधने क्तः यस्य विभाषेति नेड्भावः इति मुकुटः वस्तुतस्तु क्लिशः क्त्वानिष्ठयोरिति वेट्· पराघातिहंतेः कर्मणि क्तः य

लुप्तोवर्णः पदंवा यत्रवाक्ये पदेवा·ग्रस्यतेस्म·ग्रसु अदने क्तः ग्रस्तं ग्रासीकृतेपिस्यात् लुप्तवर्णपदोदिते· अशक्त्यादिनाऽसंपूर्णोच्चारितस्य द्रुतं त्वरितमुदितं·निरस्यते स्म·असु क्षेपणे· क्तः निरस्तः· ग्रथितशारे संन्यस्ते त्वरितोदिते· निष्ठ्यूते प्रतिहते चेति हेमः· द्रुतमुच्चारितस्य वचसः निष्ठेवनं ष्ठिवु निरसने· घञ् लघूपधगुणः सनिष्ठीवमिति पाठे तु पृषोदरादित्वा दीकारः सहनिष्ठेवेन श्लेष्मकणादिनिर्गमेनेति सनिष्ठेवं· अंबु शब्द उपचारात् तद्वति अनंबु अंबु अकारि च्विः च्वौ चेति दीर्घः क्तः एकं श्लेष्मनिर्गमसहितवचसः नवध्यते स्म वंध बंधने क्तः न अर्थो यस्य· अर्थान्नञः इसुस्प्रभृतिषु पाठान्नित्यं कप्समासांतः अनर्थकं जरद्गवादिवाक्यं अवध्यं स्यादिति पाठ इति तु कौमुदी· अवध्यमवधा र्हस्या दनर्थकवचसः पीति दर्शनात्· इसमुदायार्थशून्यवचनस्य· १० नप्रशस्तानि अक्षराणि यस्मिन्· अक्षराणामप्राशस्त्यं चार्थद्वारकं नवचनार्हम् एषां तु वचोऽशब्दसंज्ञा यामिति न कुत्वं ~~इतिशेषः वचनस्य~~· आहन्यते स्म क्तः आहतं गुणिते च ताडिते च मृषार्थके· स्यात् गुणित नवस्त्रेपि न वचस्त्रे विना न के· मृषार्थो यस्य·वं ध्यासुतो यानीत्यादि

लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितं अम्बूकृतं सनिष्ठेवमवद्धं स्यादनर्थकम् २० अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् अथ म्लिष्टमविस्प ष्टं वितथं त्वनृतं वचः २१ सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति शब्दे निनादनिनदध्वनिध्वानरवस्वनाः २२॥

१९ वचनस्यैकं·सोल्लुंठनं तु सोत्प्रासं मणितं रतिकूजितमिति क्वचित् पठ्यते· लुठि आलस्ये प्रतीघाते च लुट् उल्लुंठनेन सहितं· उत्प्रासनं· असु क्षेपणे· घञ् उत्प्रासः उपहासः तत्सहितं द्वे· मण कूजने भावे क्तः रतौ कूजितं द्वे म्लेच्छ्यते स्म· म्लेच्छ अव्यक्ते शब्दे· क्षुब्धस्वान्तेति निपातितं· म्लिष्टं त्रिषु अव्यक्तवाचि· नविस्पष्ट्यते स्म· स्पश बाधनस्पर्शनयोः कर्मणि क्तः अविस्पष्टेति निर्देशादिडभावः द्वे अ प्रकटवचनस्य वितनं तथा सत्यं यस्मात् हितं थं· अजिति योगविभागात् समासांतोऽच् यद्वा· वितन्यते वा हुल्कान् कथन् अनुदात्तेति नलोपः नऋतं· अनृतं कृष्णावसत्ये· द्वे असत्यवचसः २१ सति साधु सत्यं· सत्यं कृते च शपथे तथ्ये च त्रिषु तद्वति· तथा सत्ये साधु तथ्यं· अर्यते सा ऋ गतौ क्तः समं चति संगच्छते· अंचु गतौ क्विन् सम्यक् सम्यङ् पुंसि· स्त्रियां समीची· अमूनि उपचारात् तद्वति वर्तमानानि त्रिषु· त्रीसूत्तरदन्येन तवांगविशेषपराणां त्रिलिंगत्वमुक्तं अनेन तु वक्तृपराणामिति विशेषः शब्दनं शब्द करणे ए
रच्· घञ् वा·णद अद अव्यक्ते शब्दे नोगदनदेत्यप्· पक्षे घञ्· ध्वन शब्दे खनिकषीति इः घञि ध्वानः रवणं रु शब्दे ऋदोरप्· स्वनहसोर्वेति अप् वा घञ् ते २२ ॥

मु.
अ.को. घुषघुष्टो· ह्राद अव्यक्ते शब्दे घञ् विभाषाडि रुशुवो रिति घञ्· पक्षे अप्· उपसर्गे रुव इति घञ्· सप्तदशशब्दस्य· वस्त्राणां पर्णानां च स्वनितेमर्मरः शब्दानुकरणमितिस्वा
टी.रा. मीमृङ्· प्राणत्यागे· कृदरादयश्चेत्यरन्· मृगागमो गुणश्चेत्यन्ये मर्मरातिवा· कः मर्मरो वस्त्रभेदे च शुष्कपर्णध्वनौ तथा· पुंसि स्त्रियां पुनः प्रोक्ता मर्मरी पीतदारुणि २३ भूषणानां
४० ध्वनौ शिंजि अव्यक्ते शब्दे· तालव्यादिः· भावे क्तः· गुरोश्चेत्यप्रत्यये शिंजापि· नावितिअनुपसर्ग इति चानुवर्तमाने क्वणो वीणायां चेत्यप्· पक्षे घञ्· लुट्· पंचवीणाया अन्य
स्य च किन्नरादेः क्वणने इति मुकुटः तन्न· अपि शब्देन पूर्वान्वयस्य वोधनात्· अतः षडपि भूषणध्वने २४ प्रादेरित्युपसर्गात्· वीणायां चेत्यंशेन सोपसर्गादपिविधानात्·
आदिशब्दात् उपक्वणादयः कुलसंस्त्याने· कोलनं कोलः एकीभावस्तमाहलति· हलविलेखने· अचकोवा· कलशब्दे· घुञ्· संज्ञापूर्वकत्वाद्वृद्ध्यभावः कलादपि कलः कोलां
लात्मूकरानाह्वृते त्रासयतीति स्वाम्याह तन्न· आङो यमहन इत्सकर्मकात्स्वांगकर्मकाच्च हंतेरात्मनेपद विधानं· यदृच्छ्याभोहर्णयद्विर्भाव इति· तदपिन· तस्य तिङव्यय
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः आरवारावसंरावविरावाअथमर्मरः २३ स्वनितेवस्त्रपर्णानां भूषणानांतुशिंजितं निक्वाणोनिक्वणः
क्वाणः क्वणः क्वणनमित्यपि २४ वीणायाः क्वणिते प्रादेः प्रक्वाणः प्रक्वणादयः कोलाहलः कलकलस्तिरश्चां वाशितं रुतं २५ स्त्रीप्रतिश्रुत्प्रतिध्वाने
गीतंगानमिमेसमे॥ इतिशब्दादिवर्गः॥ निषादर्षभगांधारषड्जमध्यमधैवताः॥ १९ तन्मात्रविषयत्वात्· कलकल उक्तः कोलाहलेन तथा सर्जनियांसेहेंति
रों चंतिते तिर्यचस्तेषां यद्रुतं तद्वाशितं· वाशृशब्दे· तालव्यांत· भावे क्तः वाशितकरिणीनार्योर्वाशितं भावितेरुते· एकम्· २५ श्रुश्रवणे संपदादित्वात् क्विप्· प्रतिप्रथम
शब्दं लक्षीकृत्य श्रूयते प्रतिश्रुत्· द्वे प्रतिध्वनेः गायतेर्भावे क्त ल्युटौ गीतं शब्दितगानयोरितिहैमः॥ इतिशब्दादिवर्गः॥ निषीदतिमनोस्मिन्· षद्लृविशरणगत्यवसादनेषु
हलश्चेतिघञ्· सदिरप्रतेरितिषत्वं· निषादः स्वरभेदेपि चंडालेधीवरांतरे· ऋषति वलीवर्दहंतस्वरसादृश्यं गच्छति· ऋषीगतौ· ऋषिवृषिभ्यां किदित्यभच्· ऋषभस्त्वौ
षधांतरे· स्वरभिद्वृषभयोः कर्णरंध्रकुंभारपुच्छयोः उत्तरस्थः स्मृतः श्रेष्ठस्त्रीनराकारयोषिति· शूकशिंव्यांशिरालायां विधवायां क्वचिन्मता· गंधारदेशेभवः अण्· गांधारोरागा
सिंदूरस्वरेषुनीवृदंतरे इतिहैमः षड्भ्योजातः पंचम्यामितिडः नासाकंठमुरस्तालुजिव्हादंतांश्च संस्पृशन्· षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इतिस्मृतः मध्ये भवः॥ ॥ ४०

मध्यान्मः तद्वद्देहे स्थितो वायुरुरःकंठसमाहतः नाभिं प्राप्तो महानादो मध्यस्थस्तेन मध्यमः मध्यमो मध्यजस्वरे देहमध्ये मध्यदेशे इति हैमः मध्यमो मध्यजेऽन्यवत् पुमान्स्वरे मध्यदेशेप्यवलग्नेतु न स्त्रियां स्त्रियां रजोनार्यां कर्णिकांगुलिभेदयोः अक्षरे च्छंदसि तथा धीमतामयं धैवतः पृषोदरादिः संज्ञायामिति वा वत्वं वायुः समुद्गतो नाभेरुरोहृत्कंठमूर्द्धसु विचरन् पंचमस्थानप्राप्त्या पंचम उच्यते तज्जन्यत्वात्स्वरः पंचमः पंचानां पूरणः तस्य पूरणे इति डट् नांतादिति मट् पंचमो रागभेदे स्यात्स्वरभेदे थ पंचमी पांडवानां च पत्न्यां स्त्री पंचानां पूरणे त्रिषु अमी सप्त स्वराः तंत्रीतः कंठाच्चोच्चरंति दारवी गात्रवीणा च द्वे वीणे स्वरधारिके इति वचनात् वंशमुरजादयस्तु अत्र कारणमात्रोपयोगिन इति भावः नारदः षड्जं रौति मयूरस्तु गावो नर्दंति चर्षभं अजाविकौ च गांधारं क्रौंचो नदति मध्यमं पुष्पसाधारणे काले कोकिलो रौति पंचमं अश्वस्तु धैवतं रौति निषादं रौति कुंजर इति। स्वराणां पृथक् पृथक् एकैकं १ ईषत्कलः काकली ईषदर्थे चेति कोः कादेशः गौरादित्वात् ङीष् अन्ये तु कलेरिन् कलिः ततः कृदिकारादिति ङीष् अत एव सा

पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः १ काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे कलो मंद्रस्तु गंभीरे तारोत्युच्चैस्त्रयस्त्रिषु २ समन्वितल
यस्त्वेकतालो वीणा तु वल्लकी विपंची सा तु तंत्रीभिः सप्तभिः परिवादिनी ३॥

९ धूर्तैस्तं काकलिभिः कुलीना इत्यभिनंदप्रयोगः संगच्छत इत्याहुः एकं मधुरः श्रुतिसुखः स चासावस्फुटोऽव्यक्ताक्षरश्च तादृशे ध्वनौ कलः कडमदे इति माघत्यनेन हलश्चेति घञ् संज्ञापूर्वकत्वाद्वृद्ध्यभावः डलयोरेकत्वस्मरणं पद्मा कलनं कल संख्याने स्वने घच्चेति घः यद्वा कलते पचाद्यच् कलास्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके षोडशांशे च चंद्रस्य कलनाकालमानयोः कलं श्रुतेस्त्रिषु जीर्णे चाव्यक्तमधुरध्वनौ एकं गंभीरे मेघादिध्वनौ मंदते मदिस्तुत्यादिषु स्फायीतिरक् एकं तारयति अतिक्रामत्यन्यान् शब्दान् बहुलमेतन्निदर्शनमिति चुरादिगणसूत्रात्स्वार्थे णिच् पचाद्यच् एकं त्रयः कलमंद्रताराः २ सम्यगन्वितो लयो नृत्यगीतवाद्यानां साम्यं यत्र सः एकः समस्तालो मानमस्यैकतालः एकं वेति जायते स्वरोस्यां वी गत्यादिषु रास्नासास्नेत्यादिना नप्रत्ययो णत्वं गुणाभावश्च निपातितः वीणा विद्युति वल्लक्यां वल्लते वल्ल संवरणे क्वुन् गौरादित्वान्ङीष् विपंचयति विस्तारयति शब्दं पचि विस्तारे एयंतादच् गौरादिः विपंची केलिवीणयोः त्रीणि सैव सप्तभिस्तंत्रीभिरुपलक्षिता परिवदति स्वरान् सुपीति णिनिः एकम् ३ ॥

प्र· अ·को टीका ५१

वीणादियद्वाद्यं वादनीयं ततं ततं· आदिना सारंगी रावणहस्तकिन्नरादिः तन्यते· तनि मृङ्भ्यां किच्चेति तत्· ततं व्यासे विस्तृते च त्रिलिंगं क्लीबं वीणादिनाद्ये। स्यात्पुल्लिंगमुसदापानौ एकं आनह्यते स्म मुखे चर्मणा बध्यते· णह बंधने क्तः· नह्यो धः· आदिपदात्पटहादि आनद्धं मुरजादौ च क्लीबं स्यात्सदिते त्रिषु एकं· वंशो वेणुः आदिपदात्काहलादिः सुषिच्छिद्रमस्यास्ति· ऊषसुषीति रः सुषिरं वंशादिवाद्ये विवरेपि नपुंसकं· सुषिरो नस्त्रियां गर्ते वन्हौ रंध्रान्विते त्रिषु एकं· सूर्म्यं सुषिरामिवेति प्रयोगाद्द्व्यादिः प्राच्यास्तु तालव्यादपीत्याहुः· कांस्यमयस्तालः कांस्यतालः आदिना घंटादि· घनं निबिडत्वात्· हन्यते· हन् हिंसागत्योः· मूर्तौ घनः इत्यप्· घनादेशश्च· घनः सांद्रे दृढे दार्ढ्ये क्लिरमुद्गरे ऽबुदे संघे मुस्ते घनं मध्यं नृत्यवाद्यप्रभेदयोरिति हेमः ४ इदं ततादि चतुर्विधं वाद्यादित्रिकनामकं वाद्यते ध्वन्यते· वदेर्ण्यंतात् रक्षोयत्· भूवादिग्भ्यो णित्रन्· आसमंतात्तुद्यतेताड्यते· तुद व्यथने ण्यत् मृदंगे· मृद् क्षोदे विडादिभ्यः कित् इत्यंगच् मृत् अंगमस्येति वा· मृदंगो घोषवाद्ययोरिति हेमः· मुरात् वेष्टनात् जातः मुरसंवेष्टने तुदादिः पंचम्यामि

ततं वीणादिकं वाद्यमानद्धं मुरजादिकं वंशादिकं तु सुषिरं कांस्यतालादिकं घनं ४ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं मृदंगा मुरजा भेदा
स्त्वंक्यालिंग्योर्ध्वकास्त्रयः ५ स्याद्यशःपटहो ढक्का भेर्यामानकदुंदुभी॥

१ जनेर्डः मुरं वेष्टनं जातमस्येति वा· हेः तेषां भेदास्त्रयः अंके उत्संगे भवः शरीरावयवाद्यत्· आलिंग्यते· लिगि गतौ· ण्यत्· ऊर्ध्वः कायति शब्दायते· कै शब्दे· सुपीति कः तदुक्तं हरीतक्यकृतिस्त्वंक्यो यवमध्यस्तथोर्ध्वकः· आलिंग्यश्चैव गोपुच्छो मध्यदक्षिणवामगा इति· ऊर्ध्वशब्दं निर्विकारमपि केचित्पठंति ५ यशोर्थः पटहः· शाकपार्थिवादिः ढगिति कायति कै शब्दे· आतोनुपेति सुपीति वा कः· हेः बिभेत्यस्माद्वात् त्रिभीभय कृत्ये रीतिरन्· गौरादित्वात् ङीष् एवं क्यादयश्चेति रिप्रत्यये भेरिरपि· आनियते नेन वादितेन· कुन् आनयति प्राणयति सोत्साहान्करोतीति योधान् एवुल्· आनकः पटहे भेर्यां मृदंगे ध्वनदंबुदे· दुं दु इति शब्देन भाति· बाहुलकात् किः १ यद्वा· द्यामुभति शब्देन उभ पूरणे पृषोदरादिः यत्नौणादिक इरिति कौमुदीति· तन्न· आतो लोपस्याप्रसंगात्· स्वामी तु भेरी स्त्री दुंदुभिः पुमानिति पठति हेः पटेन हन्यते ऽडः पटेति शब्दं जहाति आतोनुपेति क इति वा पटहो ना समारंभे आनके पुंनपुंसकम्· हेः अस्त्री निपूर्वादपि उपवा संगृहे दृहंलो हंपटहमित्यपीति पुंनपुंसकाधिकारे चंद्रगोमुक्तेः· वीणादिवाद्यते येन धनुराद्याकृतिना स कोणः कुण्यते ऽनेन कुण शब्दोपकरणयोः हलश्चेति

कोणोवाद्यप्रभेदेस्याद्वीणादीनांचवादने·एकदेशेगृहादीनामस्त्रौचलगुडेपिचेतिमेदिनी·कोणोवीणादिवादनेलगुडेस्त्रीलोहितांगेइतिहेमः·एकम् ६ वीणायाःदंडःप्रकृष्टो
णवल्यतेसंध्रियते· वलसंवरणे घञ्·प्रवालो विद्रुमेवीणादंडेऽभिनवपल्लवेइतिहेमः·द्वे·कं वातंस्कुंभातिस्कुभेःसौत्रान्मूलविभुजादित्वात्कः·पृषोदरादित्वात्सलोपः·यद्वा·
कश्चकुश्चककू तेभाति·भादीप्तौ·अंतर्भावितण्यर्थः·आतोनुपेतिकः·ककुभोरागभेदेपिवीणांकेर्जुनपादपे·प्रसेव्यतेषेहसेवने·कुन्·द्वेवीणादंडाधःस्थितशब्दगांभी
र्यार्थंचर्मावनद्धंदारुमयभांडस्य·वीणाप्रांतस्थवक्रकाष्ठविशेषस्येत्यन्ये·अस्यावीणायाःकायः·अलावुदंडककुभसमुदायस्तंत्रीहीनः·कुलसंस्त्याने·वाहुलकाद्
वच्·ततःकन्·यद्वा·कुलेर्विच्·अंबतेअंब्यतेवा·अविशब्देण्वुल्·कृत्वा·कोल्वासावंकश्च·एकं·उपनह्यतेनेनास्मिन्वानहबंधनहलश्चेतिघञ्·उपनाहो·व्रणालेपपिंडेवीणा
निबंधनेनिबध्यतेनेनास्मिन्वा·बंधबंधने·करणाधिकरणयोश्चेतिल्युट्·द्वेयत्रतंत्र्योनिबध्यंतेतस्योर्द्ध्वभागस्य ७ डमुरितिशब्दमियर्ति·मृगय्वादित्वादर्त्तेःकुः·गणपा

आनकःपटहोस्त्रीस्यात्कोणोवीणादिवादनम् ६ वीणादंडःप्रवालःस्यात्ककुभस्तुप्रसेवकः कोलंवकस्तुकायोस्याउपनाहोनिबंधनम् ७ वाद्यप्र
भेदाडमरुमड्डुडिंडिमझर्झराः मर्दलःपणवोन्येचनर्त्तकीलासिकेसमे ८ विलंबितंद्रुतंमध्यंतत्त्वमोघोघनंक्रमात्॥ ११ तदेवगुणःसएवमहान्मड्डुः·द्रुमस्त्रो
शन्द्रोभूमृशीत्यादिनाडः·पृषोदरादित्वाज्जस्यडः·डिंडीतिशब्दंमिनोतिप्रकाशयति·डः·झर्झशब्दंराति·आतइतिकः·यद्वा·झर्झशब्दे·अरन्·झर्झरःस्यात्कलियुगेवाद्य
भांडेनदांतरेझल्लरीझर्झरीचढक्केशचक्रेचवाद्यके·मर्दमुपमर्दंलाति·आतइतिकः·पणंव्यवहारंवातिगच्छतिकः·अन्येगोमुखहुडुक्कादयःवाद्यविशेषाणांपृथक्
पृथक्एकैकं·नृत्यतिनृतीगात्रविक्षेपे·शिल्पिनिष्वुन्·षित्वान्ङीष्·नर्तकंकेवलेपोटगलचारणयोर्नटेनर्तकीलासिकायांचकरेणावपियोषितिलसति·लसश्ले
षणक्रीडनयोः·ण्वुल्·अनयोःक्रियोपाधिकतयावाच्यलिंगत्वात्पुंस्त्वनिर्देशस्योत्सर्गिकत्वान्नर्तकीलासकःसमावितिवक्तव्येस्त्रीनिर्देशोङीषूटापोर्विवेकार्थः।
लासकोकेकिनर्त्तकौइतिहेमः·द्वे ८ विलंबंतेकरचरणादयोत्र·लविअवस्रंसने·द्रवंतिशीघ्रंगच्छंत्यत्र·द्रुगतौ·उभयत्रापिक्तोधिकरणेचेतिक्तः·यत्तुभावेक्तइति
मुकुटस्तन्न·अन्यपदार्थस्यनृत्यस्यालाभप्रसंगात्·द्रुतंत्रिषुशीघ्रेविलीनेविद्रुतेति·तयोर्मध्यभवत्वान्मध्यं·असांप्रतिकेइत्यः·मध्यंविलंबेनस्त्रीस्यान्न्याय्येऽन्तरेधमात्रि

नसौमत्वर्थं इति मत्वाल्लजश्चं तत्त्वंपरात्मनि· वाद्यभेदे स्वरूपे चेति हेमः· ओ· चनं उ· क्षुसमवाये घञ्· पृषोदरादित्वात्· घः ओघो वेगे जलस्य च· द्वंद्वे परंपरायां च द्रुतनृत्योपदे
शयोः· हननं हन्नहिंसागत्योः मूर्तौ घन दृत्यप घनादेशः श्चसंघे मुस्ते घनं मध्यनृत्यवाद्यभेदयोरिति हेमः· विलंबित द्रुतमध्यानां नृत्यगीतवाद्यानां तत्वादिक्रमेणैकैकं ततलनं
ततलप्रतिष्ठाकरणयोः घञ्· तालः करतलेऽङ्गुष्ठमध्यमायां च संमिते· गीतकालक्रियामाने करस्फालद्रुमांतरे· वाद्यभांडे च कांस्यस्य त्सरौ तालीजटोषधो· क्लीवं तु हरिताले
स्यादिति विश्वमेदिन्यौ कालस्य क्रियया आवापनिष्क्रमादिक्रियया मानं परिच्छेदनं· एकं गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यं लयः लपनं लीङ्· श्लेषणे· ए
रच्· पक्तुलयगतौ· एरजिति मुकुटेनोक्तं तन्न लयधातोरिकारांतत्वाभावात् लयस्तूर्यत्रयीसाम्ये संश्लेषणविनाशयोरिति हेमः ६ अस्त्रियां तांडवमित्यन्वयः तंडुना प्रोक्तं तांड
वं तेन प्रोक्तमित्यण्· तांडवं तृणभिन्नात्युभेदयोरिति हेम मेदिन्यौ नट अवस्कंदने लुट्· नटस्य कर्मष्यञ्· नटे एयं हूनात्व्यं तौर्यत्रिके लास्ये· लस श्लेषणक्रीडनयोः ण्यत्·

तालः कालक्रियामानं लयः साम्यमथास्त्रियां ६ तांडवं नटनं नाट्यं लास्यं नृत्यं च नर्त्तने तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् १० भ्रकुंस
श्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्त्तकः स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ११॥ १० लास्यं तौर्यत्रिकं मतं· नृत्ये चेति विश्वः नृती· गात्रविक्षेपे· क्य

प्· भावे क्ते नृत्तमपि· ल्युटि नर्तनं· नृत्यं स्यात्ततवेऽपि च· शास्त्रेऽत्रिषु· षट् नृत्यस्य· नृत्तगीतवाद्यं तौर्यत्रिकं तुरी त्वरायां ऋहलोर्ण्यत्· गुणं बाधित्वा बाहुलकाद्गुलि चेति दीर्घः
तूर्यं मुरजादि· तत्र भवं तौर्यं शब्दः त्रयोंऽशा यस्य त्रिकं· संख्याया अतिशदंतायाः कन् संख्यायाः संघेति वा तौर्योपलक्षितं त्रिकमिति विग्रहः इदमेव नृत्यादित्रयं नाट्यमपि नट
स्येदं· छंदोगौक्थिकेति ज्यः द्वे १० यः पुरुषः स्त्रीवेषधारी नृत्यति तस्मिन्· भ्रकुंसादित्रयं पटपुटेति इंडकोक्तं कुसि धातोः श्रुतादिण्यं ताहेरच· भ्रुवोर्भुवा वा कुंसो भाषणमस्य· भ्रुवा कुं
स्यति वा अच्· इको ह्रस्वोऽङ्यो गालवस्येति सूत्रे इयङ्वङ्भाविनामिति निषेधो तत्रं पठितस्य भ्रुकुंसादीनामिति वार्त्तिकस्य अकारादेशपरतया ह्रस्वनिषेधपर्युदासपरतया ४२
च व्याख्यानद्वयाद्रूपत्रयं· पृषोदरादित्वादवर्णो वा नपि भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्च भ्रृकुंसवदिति शब्दार्णवः नाट्योक्तावित्यधिकारः प्रागंगहारात् गणिका अज्जुका द्वे
यागणिका पृथ्वी वेश्या भीतकी रीपुनाजुदेवद्ने अजे अर्जने· समिकसेरिति वा हुलकादुकन्· रस्य जः एकम् ११॥

आपनसाप· संपरादिक्षिप· आयमुन्नतोति· अन्येभ्योपीतिडः आवुत्तः भगिन्याः पतिः एकं· भावयति परिभावयति· पचाद्यच्· भावः सन्नास्वभावाऽभिप्रायचेष्टात्मजन्मसु क्रियालीला
पदार्थेषु वुधजंतुविभूतिषु रथ्यादौ च· एकं अवति· अवरहालो· वाहुलकादुकण्· लित्वादुपधावृद्धिः जनकः पितृभूपयोः एकं· युवा चासौ राजा च राजेतिटच्· कुमारयति· कुमार
क्रीडायां अच् कुमारो श्वानुचारके युवराजे शिशौ स्कंदे शुके वरुणपादपे· कुमारं जात्यकनके कुमारी त्वपराजिता· नदीभिद्दामतरुणीकन्यकानवमालिकामाजंवूद्वीपविभाग
श्वेतिहैमः· ट्रियते· दृङ् आदरे· तृदादिः· एवुल्· भर्त्तुः राज्ञो दारकः हे १२ भटति· भटपरिभाषणे· क्विप्· भट् चासौ तारवाश्च पृषोदरादित्वात् षुत्वनिषेधो नयद्वादलतिदलविज्ञवे
ण्वुल्· रलयोरेकत्वस्मरणम् भट् चासौ दारकश्च भटदृरस्वामित्वमृच्छति वा· ऋच्छगतौ कर्मण्यण्· ततः स्वार्थे कः मतो भट्टारको नृपेनाद्यवाचां देव तपोधने इति हैमः· दीव्यति अ
च् देवं तस्थी के देवस्तु नृपतौ तोयदे सुरे देवी कृताभिषेकायां तेजनीस्पृक्कयोरपीति हेमचंद्रः हे· भर्त्तुः राज्ञो दारिका· एकं वहूपट्टापारा स्वा एकं· भटे सतिनिभद्दः सोलम्यास्याः पति

भगिनीपतिरावुत्तो भावो विद्वानथावुकः जनको युवराजस्तु कुमारो भर्तृदारकः १२ राजा भट्टारको देवस्तत्सुता भर्तृदारिका देवी कृताभिषेकाया
मितरासु तु भट्टिनी १३ अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः अम्बा माताथ वाला स्याद्वासूरार्यस्तु मारिषः १४॥ १ लेमभट्टिनी· इतिः भट्टिनी हि

जभार्यायां नास्यो क्त्यां राजपत्नीति· एकं· अत्र विशेषः शब्दार्णवे· गणिकानुचरैः अज्जुकेतिनाम्ना नृपेण सा· युवराजस्तु सर्वैर्वा कुमारो भर्तृदारकः· भट्टारको वा देवो वा व्योम
त्यजनेन सः ब्राह्मणेनं तु नाम्नैव राजन्निति ऋषिभिः स च वयस्य राजन्निति वा विदूषकः इत्यं वदेत्· अभिषिक्ता तु या ज्ञा सो देवीत्यन्यास्तु भोगिनी भट्टिनीत्यपरैः न्यानीचैर्गोस्वामिनीति
क्षेति १२ वधं नार्हतीत्युक्तौ· ब्रह्मणि साधुस्तत्र साधुरिति यत् ब्रह्मण्यं स्याद् ब्रह्मसाधु ब्रह्मदारुष्ठानेश्वरे ततो नञ्समासः अवध्यात्रा वामित्येके एकं राष्ट्रेऽधिकृतः राष्ट्रावारपाराद्घ
खावितिघः एकं अंव्यते ऽव्यते अवि शब्दे· गुरोश्च हलः इत्यः नाद्योक्ता विति अधिकारस्य आपिकत्वात् देवादीनां केषांचिदन्यत्रापि प्रयोगः वाला कुमारी वासूः वासयते स्वगृहे वसेर्ण्यं
ताद्वृहुलकादूः एकं अर्त्तुं योग्यः ऋगतौ ऋहलोर्ण्यत्· कर्तव्यमाचरन् कामम् कर्तव्यमनाचरन् तिष्ठति प्रकृताचारे स तु आर्य इति स्मृत इति वसिष्ठः मर्षत्यां सह नाम्ना रिषः
पृषोदरादिः हिंसानिवारकत्वाद्वा रिष हिंसायां· इगुपधेति कः प्रतिषेधार्थकमाङ्योगेन समासः मारिषः शाकभिद्यार्थेना द्योक्तौ पुंसि भाषित इति मूर्द्धन्यांतेरभसः मार्षश्च आ

कमारिषमाह्वंकाभितिसब्धर्याचवातृः मारिषः षाक्तलिका
क्षेत्रा श्रो माधाप्रभोत्रित्रिस्कौमाधाष्ठांकरक्रमृकन्या १४॥

अत्तीमातासेव संज्ञायांकन् अत्तिकाचांतिकानयेतिद्विरूपकोण्णरंतिकापि·अंतिकं निकटेवाच्यलिंगंस्त्रीशोभनोपधे चुल्ल्यांज्येष्ठभगिन्यांचनाद्योक्तांकीर्त्यतेऽत्तिका·एकं·नि
यतंस्थानंनिष्ठा·आतश्चोपसर्गेइत्यङ् उपसर्गात्सुनोतीतिषः·निष्ठात्कर्षव्यवस्थयोः क्लेशेनिष्पत्तौनाशेंतेनिर्वाहेयाचनेव्रते·निर्वाहोनिर्वहणं·मुखप्रतिमुखगर्भावमर्श
निर्वहणाख्याः पंचनाटकेसंधयः तत्रपंचमस्यसंधेर्हि·प्रस्तुतकथासमापनस्येत्यन्ये·निर्वहणंतुनिष्ठास्त्रीसंहारश्चसमापनइतिशब्दार्णवः·समेइतिसमानार्थेनतुसमा
नलिंगो·शब्दार्णवेलिंगभेददर्शनात्·निष्ठानिर्वहणेवर्ततेइतियोजना·नीचांप्रत्याह्वानंहंडेचेटीप्रतिहंजे·सखींप्रतिहला·नीच्यव्यपानिहिंडतेहिंडिगत्यनादरयोः·वा
हुलकादेप्रत्ययः इतोऽकारश्चहञ्जेइत्यत्रडस्यजोपि·हलति·हलविलेखने·वाहुलकाद्दाप्रत्ययः हलाशब्दष्टावंतोपिसखीपर्यायः तत्रपचाद्यच्·वालावासः·सखी
हलेतिस्त्रीकांडेवोपालितात् ११ अंगस्यस्थानात्स्थानांतरेनयनमंगहारः·अंगस्यहरणं·हृञ्हरणेघञ्·अंगुल्यादिविन्यासः·अंगानांविक्षेपः·क्षिपप्रेरणे·घञ्·अंगहा

अत्तिकाभगिनीज्येष्ठानिष्ठानिर्वहणेसमे हंडेहञ्जेहलाह्वानेनीचांचेटींसखींप्रति १४ अंगहारोंगविक्षेपोव्यंजकाभिनयौसमौ निर्वृत्तेत्वंग
सत्वाभ्यांद्वेत्रिधांगिकसात्विके १५ शृंगारवीरकरुणाद्भुतहास्यभयानकाः बीभत्सरौद्रौचरसाः शृंगारःशुचिरुज्वलः॥१७॥ ११ रस्त्वंगहारादि

मांबिकांबिकाइतिशब्दार्णवः·द्वे·व्यनक्ति·अञ्जूव्यक्त्यादौ·ण्वुल्·अभिनयत्यर्थं·पचाद्यच्·वाचिकांगिकाहार्यसात्विकभेदाच्चतुर्विधः·हेमनोगतभावाभिव्यंजकस्य·अंगेन
निर्वृत्तंभ्रूविक्षेपादि·सत्वेनमनोवृत्त्यानिर्वृत्तंस्तंभादिनिर्वृत्तेक्षद्यूतादिभ्यइतिप्राग्वहतीयष्ठक्·स्तंभस्वेदोथरोमांचःस्वरभंगोथवेपथुः·वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकागु
णाः·क्रमेणैकैकं १६ शृंगारादयोष्टौरसाः·चशब्दाच्छांतोपिनवमः·वात्सल्यंदशमः·रस्यंते·रसआस्वादने·चुराद्यदंतः·कर्मणिघञ्·रसोगंधरसेजले·शृंगारादौविषे
वीर्यतिक्तादौद्रवरागयोः·देहधातुप्रभेदेचपारदस्वादयोःपुमान्·स्त्रियांतुरसनापाठापाश्वकाकंगुभूमिषुइतिमेदिन्यौ·शृंगंप्राधान्यंइयर्तिकर्मण्यण्·शृंगा
रोगजमंडने·सुरतेरसभेदेचशृंगारंनागसंभवेइतिहेमः·उत्तमयुवप्रकृतिकत्वेनजुगुप्सारहितत्वाच्छुचिः·शोचत्यनेनवाइगुपधात्किदितीन्·शुचिःशुद्धेसि
तेऽनले·ग्रीष्माषाढानुपहतेषूपधाशुद्धमंत्रिणि·शृंगारेचेतिहेमचंद्रः·उज्ज्वलतिप्रकाशते·अच्·नतुज्वलितीतिणः·तत्रानुपसर्गादित्यनुवृत्तेः·उज्ज्वलस्तुवि

कामिनि·शृंगारविरुद्धवीभत्सहेमः·इति॥१॥

उत्साहेन वर्द्धते वृधु वृद्धौ· युच्· उत्साहं वर्द्धयतीति वा· ल्युः· वीरयति शूरवीरविक्रान्तौ· चुरादिः· पचाद्यच्· यद्वा· विशेषेणेर्त्ते ईरयति वा· ईरगतौ कोऽज्वा अजति वा रक्· वीरो जिनेभटे श्रे
ष्ठे वीरं शृंग्यां नलेपि च· वीरा गंभारिकारंभा आमलक्येलवालुषु मदिरा क्षीरकाकोली काष्ठोदुंवरिकासु च· पतिपुत्रवती स्त्री रविदारी दुग्धिकास्वपीति हेमचंद्रः· द्वे वीररसस्य· करणः
करुणा वान् तस्य भावः ब्राह्मणादित्वात् ष्यञ्· करुणः कृद्दारिभ्य उनन्· करुणा तु कृपायां स्यात् करुणो रसवृक्षयोरिति हेमः· घ्रियंतेऽनया· घृसेचने बाहुलकान्नक्· घृणा तु स्या
ज्जुगुप्सायां करुणायामिति हेमः· कृपणं· कृपकृपायां· कृपेः संप्रसारणं चेति भिदादिपाठादङ्· कृपो द्रोणश्यालके स्याद्द्रोणपत्न्यां कृपी स्मृता· कृपा दयायां· दयते रक्षत्यनया·
दयदानगतिहिंसारक्षणेषु भिदाद्यङ्· अनुकंपनं· कपि किंचिच्चलने· गुरोश्चेत्यः· अनुक्रोशनं· अनेन क्रुश आह्वाने रोदने च· हलश्चेति घञ्· सप्त करुणारसस्य· हसनं· हसहसने· स्वनह
सोर्वेत्यप्· हसः ९८ घञि हासः· ण्यन्ति हास्यं· धात्वर्थनिर्देशे ण्वुलि हासिकापि· अत्र हासो हसो हास्यं च घर्षं हासिका स्त्रियामिति शब्दार्णवः· त्रीणि वध्वे निंदायां मत्नूभावे घञ्· यद्वा·।

उत्साहवर्द्धनो वीरः कारुण्यं करुणा घृणा कृपा दयानुकंपा स्यादनुक्रोशोऽप्यथो हसः ९८ हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयं विस्मयोऽद्भुतमाश्च
र्यं चित्रमप्यथ भैरवम् ९९ दारुणं भीषणं भीष्मं भीमं घोरं भयानकं॥ १९ अपत्रपया न्· बीभत्सास्पत्र अर्शआद्यच्· बीभत्सो नार्जुने क्रूरे घृणात्मविकृते त्रिषु
विकरणं विकृतं जुगुप्साप्रभवत्वात् निष्ठा कामज उद्वेगी क्षोभणो रुधिरादिजः बीभत्सो विविधः बीभत्सादिद्वयं तद्वति त्रिलिंगं· पक्षाद्यणि वैकृतोपि· विकृतो वैकृतोप्याग्र
हायण्यामग्रहायणमिति शब्दार्णवात् विकृतं त्रिषु बीभत्सरोगितेऽसंस्कृतेपि चेति विश्वः· द्वे· विस्मयनं· स्मिङ्· ईषद्धसने· एरच्· विस्मयोऽद्भुतदर्पयोरिति हेमः· अत् आश्च
र्ये थेऽव्ययं· तस्य भवनं अदिभुवो डुतच्· आङ्पूर्वो चरतिर्गतौ अभिनीयते· आश्चर्यमनित्ये इति साधुः· चित्रयति· चित्र चित्रकरणे· ण्यन्तात् पचाद्यच्· चित्रा त्वाखुपर्ण्यां सुभद्र
योर्गोडुंबाप्सरसोर्दन्त्यां नक्षत्रोरगभेदयोरिति हेमचंद्रः· चत्वारि· भीरोरिदं· तस्येदमित्यण्· दूर्वायां भैरवः पुंसि शंकरे भीषणे त्रिषु ९९ दारयति चित्तं द्रभये· कृद्दारिभ्य उनन्
न्· मुञ्चा· भीषणं रसे शल्लक्यां नागादि दारुणे त्रिषु· भीषयते ल्युः दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे इति विश्वमेदिन्यौ· विभेत्यस्मात्· भियः षुग्वेति मक्· षुगागमश्च· भी
ष्मो रुद्रे च गांगेये राक्षसे च भयंकरे इति हेमः· भीमा दयोपादाने मक्· षुगभावे· भीमो वृकोदरे घोरे शंकरेप्यम्लवेतसे इति हेमः॥ ॥

In Public Domain. Digitization by eGangotri

प्र.
अ.को. घोरयति· घुर भीमार्थशब्दयोः एयंतात्पचाद्यच् हंति· हंतेर्घुरचेतिवा घोरो हरे दारुणेचेति हैमः विभेत्यस्मात् आनकः भीङ्·भिय· भयानकः स्मृतो व्याघ्ररसे रौद्रो भयंकरो भयंक
टी.रा. रोतिमेघर्तिभयेषु कृञ इति खच्· प्रतिगतं भयेन· प्रादिसमासः प्रतिगतं भयं यस्मिन्· प्रादिभ्यो धातुजस्येतिवा· प्रतिभयं भयेभीष्म इति हैमः नवरसस्य भेदेन कीर्तनं त्वेषां धर्म
४४ मात्रपरत्वात् भेदाद्यस्तु धर्मे धर्मिणि चवर्तनेन इतिभेदः रुद्रस्येदं अण्· यत्तु रुद्रो देवतास्येति मुकुटेनोक्तं· तन्न· मंत्रहविः स्वामिन्या एव देवतात्वात्· रौद्रो भीष्मरसे भीत्रैरौद्रागो
र्व्योमितिहैमः उच समवाये· ऋज्रेंद्रे· तिरन् उग्रः शूद्रासुते क्षत्राद्रुद्रेयुं सि त्रिषूल्कटे· स्त्रीवचा ह्रस्वद्वयोः श्रोत्राहि उग्ररसस्य महतः क्रोधस्येति मुकुटः तन्न रसप्रकरणात् क्रो
धस्य वस्तुमात्रत्वाच्च· अमी अद्भुताद्याश्चतुर्दश नव इति त्रिषु· स्त्रियां रौद्री भैरवी २० दीर्यत्यस्मात्· दृभये· अप· दरः स्याद्भयगर्तयोः दरीतु कंदरे इति हैमः त्रसी उद्वेगे घञ् त्रा
सो भये मणिदोषे इति हैमः ञिभी भये· क्तिन्· भीतं भये भीतिः युक्तं त्रिषु संपदादि क्विपि भीः साधूनस्यति· असितिमुकुटः तन्न अणः प्रसंगात्· तस्मात्साधूनां असं अस्त्रिधो

भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु २० चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयं विकारो मानसो भावोऽनुभावो भावबोधकः २१ गर्वोऽभिमानो
हंकारो मानश्चित्तसमुन्नतिः अनादरः परिभवः परीभावस्तिरस्क्रिया २२ रीढावमाननावज्ञावहेलनमसूक्षणं॥ ११ भयादीनामुपसंख्यानं वाहुल्यकाद

ङ· भिया· स्यादर्तनमृतीयाचगर्हा चाथ भयंभिया इति शब्दार्णवात् भयं भीतो भयंकरे कृञ् कप्युष्म्ये इति हैमः षड्डु यस्यमनोविकारो रत्यादिर्भवः भावयति करोति रसानिति भावोः
भिप्रायवस्तुनोः इति हैमः एकं मनोविकारस्य भावस्य सूचको गुणक्रियादिस्त्वनुभावयतीत्यनुभावः अनुभावः प्रभावे स्यान्निश्चये भावसूचने इति हैमः एकं २१ गर्वमाने घञ् अ
भिसर्वतोमानः अभिमानोर्थादिदर्पे ज्ञाने प्रणयहिंसयोः अहमिति करणमहंकारः ञीतिमननं मनु अववोधने घञ् मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे इति हैमः चि
त्तस्य सम्यगुन्नतिः द्वे गर्वादयः पंचापि पर्यायाः इति तु युक्तं न आदरः परीभुव इति घञ् वैकल्पिकत्व द्दीर्घ उपसर्गस्य घञि ति दीर्घः तिरस्करणं कृञः शचेति शः तिरसोन्यतर
स्यामितिसत्वं २२ रेहणे· रिहवधे· औणादिकः क्तः स्त्रीलेलोकात्· अवमाननं मने एर्यंतात्युच· अवज्ञानं आतश्चोपसर्गे इत्यङ् अवहेलनं हेड अनादरे घञ् लडयोरेकत्वं· घ ४५
त्तंतः पुंसि त्वस्य वाधनात् क्लीवत्वं सूक्ष आदरे· सेरफः नञ् सूक्षतं· नञत्तन्न सूक्ष्यमिति दर्शनात्· तस्माल्युट् नञ्समासः अत्र मुकुटस्य तृष्याक्षेपः उपेक्षणीयः नवपरिभवस्य॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंदमक्षवाणयत्र· ह्रीलज्जायां· संपदादिक्विप्· त्रपूष्लज्जायां· षित्वादङ्· त्रपा लज्जाकुलटयोरिति हैमः· व्रीड लज्जायां· गुरोश्चेत्यकारे व्रीडा घञि व्रीडोपि गौडः· षु गर्ज
भुजजागरहारकीलज्वालाम्रदारम्भसवर्तकगर्दभशृंगाः· व्रीडादयश्च वरटश्च वराटकश्च उत्कंठवाणकरकाश्च समामयाश्चेति स्त्रीपुंलिंगकथने रभसः· लज्जनं· ओ
लस्जी व्रीडे· अध्यत्ययः· म्रस्लाज भ्रस्जि· पंचसालज्जान्यतश्चेत्साऽपत्रपा· अयं ह्रीमात्रेपि· ह्रीर्लज्जापत्रपा व्रीडेति रत्नकोशात् एकं २२ क्षमणं क्षमूष् सहने दिवादिः स्या
षित्वाक्तिन्· अनुनासिकस्य क्वौ झलि दीर्घः· भ्वादेस्तु षित्वादङ् न दुर्जनं· अषितः क्षम्यते· क्षांतिः· षितस्तु क्षमते· क्षमेति· तिजेः क्षमायां सन्नन्तदेताद प्रत्यये टाप्· हेऽअ
भिध्यानं ध्यै आध्याने· आतश्चोपसर्गे· अङ्· परस्वविषये चौर्यादिना स्पृहा परस्वे विषयस्पृहेति पाठे परस्वविषये या चौर्यादिना लिप्सेति मुकुटः· वस्तुतस्तु· परस्वविषयविषयिणी
यिच्छेत्यर्थः एकं· नक्षमणं· क्षाम्यतेः क्तिनि नञ्समासः· ईर्ष्यणं· ईर्ष्य ईर्ष्यायां· गुरोश्चेत्यः· हूपरोत्कर्षासहिष्णुत्वस्य· असूयनं· असूयायां कंड्वादित्वाद्यकि अप्रत्ययादि

मं दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपान्यतः २३ क्षांतिस्तितिक्षाभिध्या तु परस्वविषये स्पृहा अक्षांतिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि २४ वैरं वि
रोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि २५ कोपक्रोधामर्षरोषप्रतिघारुड्क्रुधौ स्त्रियौ शुचौ तु च
रित्रे शीलमुन्मादश्चित्तविभ्रमः २६

न्यः· असूयात्वम् असूया चेति शब्दार्णवः· अर्थदानादिगुणेषु दंभकत्वादिरूपदोषारोपणस्येकम् २५ वीरस्य कर्म वैरं मैथुनिकयोरि
तिनिर्दृशान् युवादित्वादण्· विरोधनं विद्वेषणं· रुधिर आवरणे द्विष अप्रीतौ· घञ्· व्रीलि· मननं मनि ज्ञाने मनिजनिदसिभ्यो युः मन्युर्दैन्ये क्रतौ क्रुधीति हैमः· शुच शोके· घञ्सं
पदादित्वात्क्विप्· व्रीलि· शोकस्य· पश्चात्तपनं अनुतपनं· तप संतापे· घञ्· विप्रतिसरणं सृ गतौ घञ्· उपसर्गस्य घञीति वा दीर्घः· विप्रतिसार उद्दिष्टः कौकृत्यं धूमयोरपि
व्रीलि २५ कुप क्रोधे क्रुध कोपे· घञ् भावे मृष तितिक्षायां· घञ्· नञ्समासः रुष हिंसायां· घञ्· प्रतिहननं· अन्यत्रापीति डित्वं क्वादित्वात्कुत्वं· प्रतिघो रुट् प्रतिघातावि
ति हैमः रुट् क्रुधौ संपदादी· टापि· क्रोधो भामः क्रुधा रुषेति शब्दार्णवः· समक्षं शुचावितिभाषितपुंस्कत्वात् पुंवद्भावः शीलसमाधाने· एयंन्तान घञ् यद्वा· शीङ्धुग
लगवलजवालनवाल त्ररूतिलकु अष्टु चादिः· शील स्वभावे स द्वृत्ते इति विश्वः· चरित्रमात्रेपि शीलं निष्ठा च शीलं चारित्रं चरित्रं तथेति रत्नकोशः· एकम् उन्मदनं·

अम० टी० कां० १ नाट्यवर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को· ॥ प्रीणातिप्रियः इगुपधेतिकः तस्यभावः पृथ्वादिभ्य इमनिच्च· प्रियस्थिरेति प्रादेशः प्रेमाऽस्त्रीस्नेहमर्मणोः तत्प्रियता· हृदयस्यकर्म· युवादित्वादण्·हृदयस्यहृल्लेखेति
टी·रा· हृदादेशः प्रयलं· प्रीङ् तर्पणेमनिन्·प्रेमनांतत्क्लीवंस्नेहनंस्निह्यतीति· घञ्·स्नेहः प्रम्णिघृतादिकेपंचस्नेहस्य· दोहमाकर्षंदयतिआतोनुपेतिकः अयमिच्छामा
४५ त्रवाच्यपिविशेषेणगर्भिण्यीच्छायांप्रयुज्यतेदोहदंगर्भलक्षणे· अभिलाषेतथागर्भे इतिहेमः एषणमिच्छा· इच्छेतिसूत्रेणइषेः शप्रत्ययेनिपातितः कांक्षिवांक्षिइ
च्छायां·गुरोश्चेत्यः स्पृहईप्सायां·भिदादेराकृतिगणत्वादङ्· ईहचेष्टायांगुरोश्चेत्यः तर्षणं·त्रितृषपिपासायां·संपदादिक्विप्· लभः सन्नन्तादः मनएवरथोत्रमनसो
रथइववा २६ कामनंकमुकांतौ· घञ्· कामःस्मरेच्छयोःपुमान्·रेतस्यपिनिकामेचकाम्येपिस्यान्नपुंसकं· लषणंलषकांतौ· घञ्· द्वादशासतर्षः महाश्वेत्·ललम
ईप्सायां· औणादिकोऽसणूयङ्लुक्चालसकालोभृशंलसनमित्यर्थेयङ्·तादः टाप्· घञितुलालसः स्त्रीनिर्देशआवंतता सूचनार्थः लालसोत्सुकयतृष्णातिरेकयाञ्चा

प्रेमानाप्रियताहार्दंप्रेमस्नेहोथदोहदं इच्छाकांक्षास्पृहेहातृड्वांछालिप्सामनोरथः २७ कामोभिलाषस्तर्षश्चसोत्यर्थंलालसाद्वयोः
उपाधिर्नाधर्मचिन्तापुंस्याधिर्मानसीव्यथा २८ स्याच्चिन्तास्मृतिराध्यानमुत्कंठोत्कलिकेसमे उत्साहोध्यवसायःस्यात्सवीर्यमतिशक्तिभाक् २९

सुचद्वयोरितिविश्वमेदिन्यौ· एकं·समीपआधेरुपपन्नआधिर्वा·उपाधिस्तुधर्मध्यानेविशेषणे· कुटुंबव्यापृतेछद्मनीतिहेमः धर्मस्यचिंता· द्वधर्मविचारस्यआधीय
तेदुःखमनेन· डुधाञ्·उपसर्गेघोःकिःएकंमनःपीडायाः २८ चिन्तनंचितिस्मृत्यांचिंतिपूजीत्यङ्· यत्तुअप्रत्ययेकार्येचिंतिपूजीत्यङ्विधानंगुणाभावार्थंतत्सामर्थ्याण्णि
लोपाभावोपोतिचितियाइत्यधीतिमुकुटेनोक्तं तन्न· भिदन्यादेङि·तस्यचरितार्थत्वेनव्यवधेयत्वात्तेलोपार्थत्वेनोत्तरार्थत्वेनसामर्थ्याविरहात्· स्मरणं·स्मृआध्या
नं·क्तिन्·स्मृतिःस्मरणधीच्छासुप्रशास्त्रेइतिहेमः ध्यैचिंतायां· ल्युट्त्रीणिस्मरणस्यकठिशोके· उत्कंठनं·गुरोश्चेत्यः उत्कलेः कृत्रादिभ्योवुन्· कृत्वा· स्त्रीत्वनापिसाम्यं
द्वेकामादिजस्मृतेः चिंतानुस्मृतिराध्यानेस्मरणं· सस्पृहेपुनः उत्कंठोत्कलिकेतस्मिन्नभिध्यानुमयोरपीतिशाब्दार्णवः उत्सहनंषहमर्षणे· घञ्·अध्यवसनंषो
अन्तकर्मणि घञ्· अध्यवसानं· आतोयुक्· द्वे·सउत्साहः अतिशक्तिभाक्· वीरेसाधुः तत्रसाधुरितियत्· अतिशयशक्तिवीर्यादीनित्वमरमालायांस्त्रीत्वं·एकमतिश

CC-0. In Public Domain. Digitization by eGangotri

केमूर्द्धिपटइवाच्छादकः यद्वा पठतीति पटः पटगतौ पचाद्यच् कस्य ब्रह्मणोपि पटः व्यापकः व्यजनि क्षिपंत्यनेन अजगतिक्षेपणयोः हलश्चेति घञ् निष्ठायां सेट् । लान्न कुत्वं व्याजः शाठ्येऽपदेशे चेति विश्वः दभ्यतेनेन दंभुदंभने घञ् दंभः कल्के कैतवे चेति हेमचंद्रः उपधीयते आरोप्यतेऽनेन उपसर्गे घोः किः उपधिर्व्याजवक्रयोः छाद्यतेनेन छद अपवारणे मनिन् इस्मन्त्रन्क्विषु चेति ह्रस्वः कितवस्य कर्म युवादित्वादण् कैतवं द्यूतदम्भयोः कैतवः कितवे शठे इति हेमः कुत्सिता सृतिः सृगतौ क्तिन् कुगतीति समासे निकृष्टा कृतिः क्रिया यापरप्रतारणारूपा यद्वा पराभीष्टस्य निकर्त्तनं कृती छेदने इक्कृष्यादिभ्य इतीक् निकृतिर्भर्त्सने क्षेपे शाठ्ये शाठ्येपि च स्त्रियामिति विश्वमेदिन्यो शठति शठ कैतवे पचाद्यच् शठस्य कर्म ब्राह्मणादित्वात् ष्यञ् यद्वा शठनं स्मृहलोर्ण्यत् नवकपटस्य मदीहर्षे भावे घञ् प्रमादः सम्मदे मत्ते स्त्रियामुन्मदयोरिति नअवधानमस्य तस्य भावः हे अविमृष्टकार्यस्य २ कुतूश्चर्मनिर्मितस्नेहपात्रं हलति हल विलेखने मूलविभुजादित्वात्कः यद्वा हलति पचाद्यच् कुत्वाः हलं प्रज्ञाद्यण् कौतूहलं कुतूहलं कौतुके स्यात् प्रशस्तेपि च दृश्यते कुतूं कायति कै शब्दे आतोनुपेति कः उपपदसमासः इको ह्रस्वोऽड्य इति ह्रस्वः प्रज्ञाद्यण् वा यद्वा कुत्वं भवं

कपटोऽस्त्री व्याजदंभोपधयश्छद्मकैतवे कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ३० कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ॥

अध्यात्मादित्वात् ठञ् इसुसुगिति कः केऽण इति ह्रस्वः संज्ञापूर्वकत्वात्पक्षे वृद्ध्यभावः यत्तु तुजहिंसायां कुं तुजति मूलविभुजेति कः न्यंकादित्वात्कुत्वमिति मुकुटेनोक्तं तन्न कुत्वे आंतरतम्यात् जस्य गत्वप्रसंगात् चत्वारि शृंगारात्तरुण्यादेः भावान्मनोविकाराच्च जाताः क्रियाश्चेष्टा अलंकाराख्या विलासादिका हावशब्द वाच्याः हवनं हुदानादनयोः क्वचिदपवादविषये ण्युत्सर्गोभिनिविशते इत्यविषये घञ् यत्तु मुकुट आह शृंगारभावो रतिः तज्जा इति तन्न शृंगारभाव इति समुदायस्य रतिवाचकत्वाभावात् यदपि हूहवने इत्युक्तं तदपि न एतादृशस्य धातोरभावात् यदप्युक्तार्थे भरतस्य संमतिरुपन्यस्ता अलंकाराश्च नाद्यस्त्रैर्याभावरसाश्रयाः यौवनेभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजा इति तत्रापि भावरसाश्रया इत्यनेनास्मदुक्त एवार्थो लभ्यते न भवदुक्तः यत्तु हूयंत्यनेनेति हाव इति स्वामिनोक्तम् तन्न ह्वेञो घञि संप्रसारणाविधानात् विलसनं लसश्लेषणे घञ् विलासो गे विश्वो यः प्रियाप्तावासनादिषु विलासो हारभेदेस्यात् लीलायामपि पुंस्ययं वीतंसो वंधनोपाये मृगाणामपि पक्षिणां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेषामेव चाविश्वासहेतोः प्रावरणेपि च· विवानं वा गतो विवुर्गतिविशेषः अपष्ठारस्य इति कुरिति मुकुटः तन्न· ना द्दशसूत्रादर्शनात्· मृगय्यादयश्चेति तूचितं उच्यते समवैत्यत्र उच्चसम
वायेहलश्चेति घञ्· यद्वा· घञर्थे कः ओक उच् के इति निपातः विवोकः स्थानं विव्वोको भिमतप्राप्तावपि गर्वादनादरः विभ्रमणं भ्रमु अनवस्थाने घञ् नोदात्तोपदेशेति न वृद्धिः चि
त्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमो मतः अथ विभ्रमः शोभायां संशये भावे इति हैमः विभ्रमो भ्रांतिहारयोः विदुमोरत्नवृक्षेपि प्रवालेपि पुमानयम्। ललईप्सायां लड विलासे वाड
लयोरभेदः भावे क्तः अनाचार्योयदिष्टस्याल्ललितं रति चेष्टितम् ३१ हिल भावकरणे हेङ् अनादरे वा भावे घञ्· स्याद्भावसूचको हावो हेलाऽस्यैवानुभावनं प्रोदेच्छा
सुरते हेलेति वा· लयनं लीः लीङ् श्लेषणे· संपदादित्वात् क्विप्· लियं लाति· ला आदाने· आतोनुपसर्गे कः प्रियस्यानुकृतिर्लीला श्लिष्टा वाग्वेषचेष्टितः लीलाकेलिर्विलासश्च शृं
गारभावजक्रिया· इति शब्दार्णवात् प्रकारार्थादन्येपि ज्ञेयाः लीला विलासो विच्छित्तिर्विभ्रमः किलकिंचितं· मोट्टायितं कुट्टमितं विव्वोको ललितं तथा· विहृतं चेति मंतव्या
दशस्त्रीणां स्वभावजा इति नाटकरत्नकोशः विच्छेदनं छिदिर् द्वैधीकरणे क्तिन् मंडनानादरन्यासो विच्छित्ती रूपदर्पतः किलकिंचितमत्र· हर्षाद्रुदितगीतादिव्या

स्त्रीणां विलासविव्वोकविभ्रमा ललितं तथा ३१ हेला लीलेत्यमी हावाः क्रियाः शृंगारभावजाः द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ३२॥

मिश्रं किलकिंचितं· स्वामी तु किलिकिंचितमिति पाठं मन्यते। यदाह किलीति कंठकूजितं वा यथा किलिकिलारावः इति मोटनं मुट प्रमर्दने· घञ्· वाहुलकाद्धुत्रस्तुट्· भूषणादि
काङ्· ताद्भावे क्तः· मोट्टायितं स्मृत्वा संगमं गं विजृंभणं· यत्तु मोट्टनं मोट्ट इति मुकुटः तन्न मोट्ट धातोरदर्शनात्· यदपि लोहितादिक्यषं ताद्भावे क्त इति तदपि न लोहितडाज्भ्यः
क्यष्वचनं भृशादिष्विति राणीति वार्त्तिकाविरोधात्· कुट्टनं कुट्ट छेदनादौ· घञ्· कुट्टेन निर्वृत्तं· भावप्रत्ययांतादिमप्· ततो ण्यंतात् क्तः· तारकादित्वादितच् वा· दुःखोपचा
रः सौख्येपि हर्षात् कुट्टमितं मतं· विहरणं भावे क्तः वक्तव्याभाषणं व्याजाद्विहृतम्· द्रवणं· द्रु गतौ ऋदोरप्· द्रवो विद्रवनर्मणोः आसवे रसगत्योश्चेति हैमः केलनं· किल क्रीडा ५६
या· केल चलने वा इन्· परिहसनं· हसे हसने· घञ्· उपसर्गस्य घञीति दीर्घः क्रीडनं क्रीडृ विहारे· गुरोश्चेत्यः क्रीडा केलिप्रकारे स्यात् वेलाज्ञानकयोरपि· खेलनं· खेल
चलने· गुरोश्चेत्यः मुकुटस्तु· खेलेत्यस्य स्थाने लीलेति पठति· नरणं· नृ नये मनिन्· षट् क्रीडायाः ३२॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपदेशनं दिश अतिसर्जने घञ् लक्षणं लक्ष आलोचने ण्यत् लक्ष्यं स्यादपदेशेपि शरव्येपि नपुंसकं घर्मोपि संख्यार्थो च ननालक्षक्लीवं व्याजशरव्ययोरिति मूर्द्ध
न्यांतरभसात् त्रीणि स्वरूपाच्छादनस्य खेलनं गुरोश्चेत्यः कुर्द क्रीडायां ल्युट् र्वोरुपधाया इति दीर्घः यत्तु स्फुर्जेति लिंगात् कुर्द दीनां न दीर्घः र्वोरिति विधेरनित्यत्वं चेति कश्चिद
ह तन्न स्फुर्जेति स्वरूपनिर्देशार्थे दीर्घानुच्चारणात् दीर्घविधेः सत्वाच्च यदि विधिशासं कृत्वैव निर्देष्टव्यमिति नियमः स्वीक्रियते तदा गिरिरिचोरेत्वाभावस्यापि ज्ञापक
त्वस्यादित्वस्य लक्षणप्रमत्वात् अत एव दीर्घाभावं समुचिंत्य इति स्वामिग्रंथोपि संगच्छते त्रीणि कंदुकादिक्रीडनस्य जिघर्त्यंगमनेन घृक्षरणदीप्त्योः घर्म इति नि
पातितः यत्तु घरतीति विग्रह दर्शनेमुकुटेन कृतं तन्नु घृक्षरणेति धातूपन्यासनेन विरुध्यते घरत्यंगमनेन वा घृत्येकेनिरस्यते तेन हलश्चेति घञ् न्यंक्वादिः स्विद्यत्यनेनां
गं घञ् स्वेदो घर्मस्वेदने चत्रिहेमः त्रीणि प्रस्वेद हेतोस्तापस्य अंगजलस्येति तु मुकुटः तन्न स्वकृतकरणविग्रहविरोधात् नहि जलेन प्रस्विद्यते वस्तुतस्तु भावकर्मव्युत्पत्त्या

व्याजोपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनं घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ३३ अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ स्यादा
च्छुरितकं हासः सोत्प्रासः स मनाकुस्मितं ३४ मध्यमः स्याद्विहसितं रोमांचो रोमहर्षणं॥

११ साप्यर्थः प्रलयनं लीङ् एरच् प्रलयो मृत्युकल्पांतमूर्छापायेषु पुंस्य
यं नष्टा चेष्टा यस्य तस्य भावः तल् द्वे सात्विकभावस्य मूर्छापरपर्यायस्य हर्षशोकादिभिः सकलचेष्टानाशस्येत्यर्थः॥३३॥ अवहिः स्थितिरवहित्था सुपिस्थ इत्यत्र स्थ इति योगविभा
गात्कः पृषोदरादिः आकारस्य शोकादिजनितमुखम्लान्यादेर्गोपनं क्तिन् द्वे संवेजनं संचलनं ओविजी भयचलनयोः घञ् संभ्रमणं घञ् संभ्रमः साध्वसेपि स्यात्संवेगादर
योरपि द्वे हर्षादिना कर्मसु त्वरणस्य उत्प्रासनं असुक्षेपणे असगतिदीप्त्यादानेषु वा घञ् उत्प्रासेनाधिक्षेपेण वा सहितः सोत्प्रासः आच्छुरणं परच्छेदनं छु
रच्छेदने भावे क्तः स्वार्थे कः स्यादाच्छुरितकं हासनखराघातभेदयोः एकं परस्यामर्षजनकहासस्य सः हासो मनागल्पः ष्मिङ् ईषद्धसने भावे क्तः ईषद्विकसितैर्दंतैः कटा
क्षैः सौष्ठवान्वितं अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत् एकं ३४ स हासो मध्यमः महत्वाल्पत्वहीनः हसे हसने भावे क्तः आकुंचितकपोलाक्षं सस्वनं निस्वनं तथा प्रस्ता
वोत्थं सानुरागमाहुर्विहसितं बुधाः एकं रोम्णामंचनं पूजनं घञ् चजोरिति सूत्रे निष्ठायामनिट इति पूरितत्वादस्मात्तु अंचेः पूजायामिति क्त्वानिष्ठयोरिड्विधानान्न कुत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्तु नक्तादेरिति योगविभागान्नकुत्वमिति भाषावृत्त्युपन्यसनं मुकुटस्य· तन्न· न्यासवार्तिककृतामप्रत्याख्यानात् यथोत्तरं मुनीनां प्रामाण्यात्· रोम्णां हर्षणं· पुलककंटकरोमविक्रिया
रोमोद्गमाश्चात्रैव हृष्टरोमा च सः॥ क्रंदितरोदने क्रुः· क्रंदितमाह्वाने रुदिते च नपुंसकं· रुदिर् अश्रुविमोचने क्रुश रोदने· भावे क्तः· त्रीणि रोदनस्य· जृंभि गात्रविनामे· घञ्· गुरोश्चेसः· जृंभा
विकाशः जृंभणयोस्त्रिषु· घञंतस्य क्लीवत्वमपि· लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति वक्ष्यमाणत्वात्· यत्तु जंभत्वन्विधोभयादिपाठात् इति मुकुटेनोक्तं तन्न· अज्विधा
वित्युक्तत्वेन क्लीवत्वस्याविधानात् भावे ल्युटि जृंभणं द्वे मुखादिविकासस्य ३५ विप्रलंभं डुलभष् प्राप्तौ विरुद्धं सम्प्रवदनं· घञ्· द्वे अंगीकृतासंपादनस्य रिगिगतौ
स्खलसंचलने· भावे ल्युट्· रिखिगतावित्येके· द्वे धर्मादिस्खलनस्येति स्वामी· बालानां हस्तपादानामनस्यत्यन्यपिच्छिलादौ पतनस्येत्यपरे निद्राणं द्राकुत्सायां गतौ आतश्चोपसर्गे निंदने
निंद्यतेऽनयेति वा निर्देर्नलोपश्चेति रगितिवा· शीङ् स्वप्ने· भावे ल्युट्· शयनं सुरते निद्राशयनयोश्च नपुंसकं त्रिषु पशये· घञ्· स्वापः शये न निद्र्योः स्पर्शाज्ञतायामज्ञाने· स्वयोनन्

क्रंदितं रुदितं क्रुष्टं जृंभस्तु त्रिषु जृंभणं ३५ विप्रलंभो विसंवादो रिङ्गणं स्खलनं समे स्यान्निद्राशयनं स्वापः स्वप्नः संवेश इत्यपि ३६ तंद्री प्र
मीला भ्रुकुटिर्भ्रूकुटिर्भ्रुकुटिस्त्रियः अदृष्टिः स्यादसौम्ये दृष्टिः संसिद्धि प्रकृती त्विमे ३७॥ ३९ स्वप्नः स्वापप्रसुप्तस्य विज्ञाने दर्शने पुमान्· संवेशनं विशप्रवेश

ने· घञ्· संवेशः स्वापस्त्री रतबंधयोः सुप्तिरप्यत्र यत्न ३६ ततनपूर्वात् द्रुतेः स्पृहि गृही त्यादिना तन्द्रेति निपातनेन तन्द्रायाः करणं तत्करोतीति ण्यंतात् रवइः तन्द्रिः कृदिकारादिति
ङीषवा लिजभावे तन्द्र्यपि· मुकुटस्तु इंद्रियाणां तननं द्रा त्यस्यां तंद्रधातोः सौत्रान्मूर्छार्थात् तंद्रेरिदीनावितिह्रस्वेकारप्रत्यये तन्द्रिः ङीषि तंद्री· दीर्घकारप्रत्यये लक्ष्मीशब्दवच्चे
त्यादि· तन्न· द्रातिना विग्रहस्य सौत्रधातोरुपन्यासस्य विरुद्धत्वात्· तन्द्रेः सौत्रस्यादर्शनात् दोनां तत्वनिपातनाभ्युपगमविरोधनात्· तन्द्रेरिदीनावितिसूत्रस्यादर्शनाच्च ईप्रत्यय
विधायकाभावाच्च तंद्रिसंद्री संद्रेति द्विरूपकोशाच्चेत्युक्तं· तदपि न दीर्घविसर्गांतेप्रमाणाभावात्· प्रमीलनं· मीलनिमेषणे गुरोश्चेत्यः द्वे अलसत्वं श्रमादिना सर्वेंद्रियासा
मर्थ्यस्य· कुटकौटिल्ये· इगुपधात्किरितीन्· भ्रुवोः कुटिः भृकुंस वत्रैरूप्यं· पृषोदरादित्वादकारे भृकुटीत्यपि त्रीणि क्रोधादिना ललाटसंकोचनस्य· विरुद्धा दृष्टिः
असौम्ये असुंदरे· एकं क्रूरायादृष्टेः संसेधनं। षिध संराद्धौ· प्रकरणं डुकृञ् क्तिन्· इमे इति द्वयोः स्त्रीत्वबोधनार्थमुक्तं ३७॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वंरूपं स्वोभावः निसर्जनं सृजविसर्गे निसर्गः सृष्टो स्वभावे चेति हेमः पंचस्वभावस्य वेपनं टुवेपृ कंपने द्वितोथुच् कपि किंचिच्चलने घञ् हेः ष्टलोति दुःखं ष्टणु हिंसायां प
चाद्यच् ष्टणः कालविशेषे स्यात्पर्वण्युत्सवे मदे व्यापारे विकलत्वे च परतंत्रत्वमध्ययोरिति हेमः उद्धर्षयति हृषु अलीके णिजंतः उद्धत्तो हर्षो त्रेति वा महनं मह पूजायां
घञ् संज्ञापूर्वकत्वाद्वृद्ध्यभावः घो वा यद्वा महति अच् महीनद्यंतरे भूमौ मह उत्सवतेजसोः मत्वाने नेन पुंसीति घ इति मुकुटः तन्न हलश्चेति घञ् प्रसंगात् उद्धनोति दुःखं
धूञ् कंपने अच् उद्धवो वा यादवभिदि मह्हे च क्रतु पावके उत्सुवति षूप्रेरणे अच् उत्सवो महदुत्से के इच्छाप्रसरकोपयोः पंचसर्गप्रधानो वर्गः एतत्पर्यन्तं स्वर्गसंगत
निरूपणात् २८ इति नाट्यवर्गः॥ अधश्च तद्भुवनं च अधोपि अधीत्ययं स्यात् पातालइति त्रिकांडशेषात् पतंत्यत्र पापात् पतिचंडिभ्यामालञ् पातालं वडवानले
रसातले चेति हेमः वलेः सद्म रसायास्तलमधः नागानां लोकः। अधोलोकफणिभुवनाद्योप्यत्र पंच कुहरति हरतेरनुद्यमने च यद्वा कुहविस्मापने इगुपधत्वा

स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः कंपोथ क्षण उद्धर्षो मह उद्धव उत्सवः २८ इति नाट्यवर्गः॥ अधोभुवनपातालं वलिसद्मरसातलं
लं नागलोकोथ कुहरं शुषिरं विवरं विलम् १ छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं वपा शुषिः॥ ११ त्कः कुहं राति रा अने आतोनुपेति कः कुहरं गह्वरे छि
द्रे क्लीवं नागांतरे पुमान् शोषणं शुष शोषणे इगुपधात्किः शुषिरस्यास्ति उष शुषीतिरः शुषिरं वंशादिवाद्ये विवरेपि नपुंसकं शुषिरो नस्त्रियां गर्ते वन्हौ रंध्रान्विते
त्रिषु विवृणोति वृञ् वरणे पचाद्यच् यद्वा विव्रियते ग्रहवृ दृ निश्चिगमश्चेत्यप् विगतो वरो स्माद्वा वीनां पक्षिणां वरं वा विवरं दूषणे गर्ते विलति भिनति विल भेदने इगुपधे
तिकः विल्यते वा कृत्यल्युटो बहुलमिति इगुपधेति कः घञर्थे को वा खनो घंचेति घे संज्ञापूर्वकत्वाद्गुणाभावो वा विलं छिद्रं गुहायां च पुमान् उच्चैः श्रवो हये १ छिद्यते छिदृ भेदने घञ्य
द्वा छिद्यते छिदिर द्वैधीकरणे स्फायीतिरक् छिद्रं विवरं रंध्रवत् गर्ते दोषे इति हेमः व्यथ भयचलनयोः भावे ल्युट् निश्चयेन व्यथनं भयं चलनं वा यत्र यत्तु अधिकरणे ल्युडिति
मुकुट आह तन्न व्यथनमिति भावप्रत्यये बहुव्रीहिणा गतार्थत्वात् रोचते त्र रुच दीप्तौ हलश्चेति घञ् निष्ठायां सेट्त्वान्न्यंक्वादित्वात्कुत्वं यत्तु मुकुटः रोचते प्रकाशते घइत्या
ह तन्न कर्तरि घस्याविधानात् रोकं क्रयणभेदे नाविवरे चरे रोकाः शोण इति हेमचंद्रः रमणं संपदादिः संज्ञापूर्वकत्वान्न दीर्घः रमंत्रीडां धरति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री
अ·को·
टी·रा·
५८

मूलविमुञ्जादिः रंधयति· रधा हिंसासंराद्ध्योः बाहुलकाद्रकुवा रध्रंतु भूषणेछिद्रे इतिविश्वमे दिन्यो·श्वभ्रयति·श्वभ्रगतौ· एयंतात् पचाद्यच्·शुभ्रोभनं· अभ्रंव्योमात्रवातालव्यादि·
उष्यतेत्र· डुवपबिशादिः शुष्यत्यत्र शुषशोषणे इगुपधात्किः सुष्ठुस्यति·षोअंतकर्मणि·बाहुलकान्किः· विवराभिधायिनिशुषिरा देशास्त्रेषु दंत्यतालव्यावित्यूष्मविवेकः· एकादशविं
लस्य गिरति· गृनिगरणे· हलिमृगृदृइतितन्· स्त्रियांटाप्· शटरुसरगर्त्तभृंगाइतिस्त्रीपुंसप्रकरणे प्रमसात्· गर्त्तोऽवटेकुकुंदरे·त्रिगर्त्तभेदइतिहेमः अवत्यस्मात्· अवरक्षणादौ·
शकादिभ्योऽटन्· इदंत्तोपि· दर्भेपिपवित्रमवटिखटेपीतिहलायुधः अवटः कूपविलयोर्गर्त्ते कुहकजीविनीतिहेमः द्वेभूरंध्रस्य· शुषिरमस्ति· उषसुषीतिरः एकम् २ अंध
दृष्टधुपघाते· चुरादिः अधनं घञ्· अंधंकरोतिकर्मण्यण् ध्वन्यते ध्वनशब्दे क्षुब्धस्वांतेतिनिपातितं· तमोस्त्यत्र· भावप्रधानोनिर्देशः ज्योत्स्नातमिस्त्रेतिसाधुः तमिस्राखात्र
यत्वेतमास्येतिवा· अर्शआद्यच्· स्यपेति मस्त्रेतिमिरे कोपेस्त्रीतुतमसत्तौ· कृष्णपक्षनिशायांचेतिविश्वमेदिन्यो· तिम्यति· तिमआर्द्रीभावेकिरच्·तिमिरंध्वांते नेत्रामयांतरे·

गर्त्तावटौभुविश्वभ्रेसरंध्रेशुषिरंत्रिषु २ अंधकारोऽस्त्रियांध्वांतंतमिस्रंतिमिरंतमः ध्वांतेगाढेधनतमसंक्षीणेवतमसंतमः ३ विष्वक्संतमसं
नागाः काद्रवेयास्तदीश्वरः शेषोनंतोवासुकिस्तुसर्पराजोथगोनसे॥ ७॥ ९ ताम्यत्यनेन· तमुग्लानौ· असुन्· तमसमपि· तमसंतुनिशाचर्मेतित्रिकांडशे

षात्· यंचअंधयति· अंधंचतत्तमश्च· अवसमंधेभ्यस्तमसइत्यच्· एकंघनांधकारस्य· क्षीणेतुध्वांतेअवहीनंतमः अच्· एकं ३ विष्वक्सर्वतस्तमः समंतात्तमः अच् एकं· नगे
भवाः तत्रभवइत्यण्· यद्वा· नगच्छंत्यगाः नअगाः सुप्सुपेतिसमासः अनञ्वान्नलोपः नागोरंगेसीसपत्रेस्त्रीवंधेकरणांतरे इतिहेमः कद्रुअपत्यानिस्त्रीभ्योढक्· ढेलोपो
कद्र्वाः यत्तुस्वामीशुभ्रादित्वाड्ढक्· नतुस्त्रीभ्योढक्· कद्रुकमंडल्वोश्छंदसीतिढुञ्विधेरित्याह· तन्नसंज्ञायामितिलोकेप्युड्विधानात् सर्पेभ्योन्येदेवयोनयोपीह· तेषामीश्वरः शिष्य
त·शिष्लृविशेषणे· घञ्·शेषोऽनंतेवधेसीरिण्युपयुक्तेतरेऽपिच· शेषानिर्माल्यदानेस्यादितिहेमः नअंतोस्य· अनन्तः केशवेशेषपुमान्निरवधौत्रिषु· हेवसुरत्नंकेमूर्द्धि
यस्यवसुकायतिवा· कैशब्दे कः वसुकः तस्यापत्यं· अतइञ् सर्पाणांराजाराजेतिटच् हेः गौरिवनासिकायस्य· अञ्नासिकेत्यच् नसादेशः गोनासोप्यत्र गोनासगोन ५८

तिलति· तिलगतौ· भ्वादिः· तिलति· तिल स्नेहने· तुदादिः· तिलेरिकुचेति स इडागमश्चेति मुकुटः· तन्न· उज्ज्वलदत्तादिषूक्तसूत्राभावात्· तैलनं तिलः· संपदादिक्विप्· तिलमेति· इण् गतौ·
क्विप् तुक्· तिलित्· तिलितं स्यति· षो अन्तकर्मणि· कः· यद्वा· तैलनं तिलिः· कृष्यादित्वादिक्· तिलिं गतिं त्सरति· त्सर छद्मगतौ· अन्येभ्योपीति डः· गोनसी मंडली वोड इति तु विक्र
मादित्यः· द्वे सर्पविशेषस्य· गिरति· गॄ निगरणे· पचाद्यच्· अजस्य गरः· अजो नित्यो गरो विषं यस्येति वा· यत्तु अजं छागमपि गिरति· पचाद्यजिति मुकुटः· तन्न· कर्मण्यण्· प्रसं
गात्· अजगरः स्मृतः सर्पभेदे पिकवच्च बुधैः· शेते· शीङ् स्वप्ने· भृमृशीङ् उः· वहति· वहियुभ्यां णिदित्यसच्· णित्वाद्वृद्धिः· वाहं गतिं स्यतीति वा· आतोनुपेति कः· वाहसः स्यादं
जगरे ३ तु निर्यालानि विषसर्पयोरिति हैमः· त्रीणि· लगति· लगे संगे· क्विप्· अर्दयति· अचूलकृचाद्यर्दश्च· लग्नः सन् पीडक इत्यर्थः· निर्विषत्वात्· तद्भिन्नोः लगर्दः· यद्वा· अल
ति· अच्· अलगत्यादौ· गर्दति गर्द शब्दे· अच्· अलश्चासौ गर्दश्च· अलगर्द इति तु मुकुटः· अलं गृह्णाति· गृधु अभिकांक्षायां पृषोदरादिः· पचाद्यच्· जलस्थो व्यालः· द्वे·
राजिः रेखास्यास्ति· सिध्मादित्वाल्लच्· यद्वा· राजिं लाति· ला आदाने· आतोनुपेति कः· डुंडु इत्यनुकरणशब्दः· तं भणतीति न भातीति वा· अन्येभ्योपीति डः· लंड्यते· ओल

तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ अलगर्दो जलव्यालः समौ राजिलडुंडुभौ ५ मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकंचुकः॥

डि उत्क्षेपे· घञ्· डलयोरेकत्वं· उभ नि उभ पूरणे· इगुपधेति कः· डुंडुश्चासावुभश्च· पृषोदरादिः· यत्तु डुडि तु हि निमज्जने· घञ्· डुंडे न भाति आतोनुपेति कः· कुनीकरणे कने
ति समासः पृषोदरादिः तवर्गतृतीयादिरपि· दोडो दोलश्चेति नरसिंहः· दंदुभाषणे· दंदुभ इत्येके इति मुकुटः· तन्न· उक्तधातूनामदर्शनात्· आतोनुपेति कस्य कर्मण्युपप
दे विधानात्· परत्वादुपपदसमासस्यन्याय्यत्वाच्च· द्वे निर्विषस्य द्विमुखस्य सर्पस्य· मालु रोषधो तत्र धानमस्य मालुधानश्चित्रसर्पे महापद्मे च दृश्यत इत्युत्पलिनी· मालु
धानो मातुलाहौ मालुधानी लतांतरे इति विश्वः· मां तुलयति· कः· मूलविभुजादिः· मातुलश्चासावहिश्च· द्वे चित्रसर्पस्य· आमोचि मुक्तः· कंचुकः नास्ति मुक्तोस्य· निर्निश्चय
निषेधयोः· निर्मुक्तस्त्यक्तसंगे स्यान्मुक्तकंचुकभोगिनि· मुक्तः· कंचुको येन· द्वे मुक्तत्वचः सर्पस्य· सर्पति· सृप्लृ गतौ· अच्· स्त्रियां जातित्वान्ङीष्· पर्दते· पर्द कुत्सिते श
ब्दे· पर्देर्नित्संप्रसारणमल्लोपश्चेति काकुप्रत्ययः· पिपर्ति स्वं· पिपर्तेर्दीर्घ इत्कुह्रस्वश्चेति वा· पृदाकुर्वृश्चिके व्याघ्रे सर्पे चित्रकयोः पुमान्॥ ॥ ॥

प्र·
अ·को·
टी·रा·
४८

भुजो कौटिल्ये· इगुपधात्कः भुजः सन् गच्छति अन्यत्रापीति डः भुजेन कौटिल्येन गच्छति वा खच्चिडिल्लोपे भुजगः भुजंगः सर्पस्त्रिंगयोरिति हैमः आहंति आङि श्रिहनिभ्यां ह्रस्व
श्चेति नडित् अहिर्वृत्रासुरे सर्पे पुंसि· खच्चडिल्वे भुजंगमः ६ आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति· तत्र विषमस्य· पृषोदरादिः केचित्त्वीकारांतमाशीशब्दमाहुः आशी
मिव कलामिंदोरिति राजशेखरः· विषस्य धरः चक्रमस्यास्ति· अतइनिः चक्री कोकः कुलालेऽहौ वै कुंठे चक्रवर्त्तिनि इति हैमः व्याडति अड उद्यमे व्याङ्पूर्वः अच् डलयो
रेकत्वस्मरणान् व्यालोपि· व्यालो दुष्टगजे सर्पे खले श्वापदसिंहयोरिति विश्वमेदिन्यौ कुटिलं सर्पति· नित्यं कौटिल्ये गतौ विति यङ्· पचाद्यच्· यङो चिच संसारसारस
सरीसृपसस्यसाख्या इति हि दंसे उष्मः विवेकः कुंडलं कुंडलाकारतास्यास्ति· इनिः यत्तु मुकुटः वयं तु कुंडलमनुकरोतीति कुंडलशब्दान्नत आतिपदिकाद्वृत्वर्थे णिजंताद्धन
र्थे के कुंडलं कुंडलने कुंडलानुकरणं तद्योगादिनि कुंडलीति ब्रूमहे इत्याह· तन्न परिगणनात्काभावात् प्राचामेव फलितार्थस्य लाभान् कुंडलं कर्णभूषायां पाशेपि व

सर्प्पः पृदाकुर्भुजगो भुजंगोहिर्भुजंगमः ६ आशीविषो विषधरश्चक्री व्यालः सरीसृपः कुंडली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ७ दर्वीक
रो दीर्घपृष्ठो दंदशूको विलेशयः उरगः पन्नगो भोगी जिह्मगः पवनाशनः ८॥ ११ लपेपिच· कीचनदुगुडुच्चोः स्त्री केवलः कुहनेपिच· गूढाः पादा अस्य पृषो
दरादिः पादानामपि विज्ञेये द्वे शते द्वे च विंशती इत्यागमः यद्वा गूढं पादयति· पदगतौ· एयं तान्तक्विप्· चक्षुः श्रवः कर्णोस्य सांतः अत एव गोकर्णोपि· काकस्येव उदरं
स्य· यद्वा· ईषदर्थे कति· अककुटिलायां गतौ ईषदर्थे चेति कोः कादेशः काकमीषत् कुटिलगतिमद् उदरमस्य· फणास्यास्ति· व्रीह्यादिः ७ दर्व्याकारः फण एव करो यस्य प्रहा
रसाधनत्वात्· दर्वीं फणं करोतीति वा· कृञो हेत्विति टः दीर्घं पृष्ठमस्य· गर्हितं दशति· लुपसदेति यङ्· यजजपेत्यूकः जपजभेत्यनुस्वारः दंदशूकस्तु पुंल्लिंगोस्त्रीस्त्रीसे च सरीसृ
पि· विलेशेते· अधिकरणेशेतेरित्यच्· शयवासेत्यलुक्· विलेशयो मूषिकेऽहौ इति हैमः उरसा गच्छति उरसोलोपश्चेति डः पन्नं पतितं यथा तथा गच्छति· सर्वत्र पन्नयोरि ४८
ति डः। पन्नगश्चौषधीभेदे तथैव पवनाशिनि॥ भोगः फणो वक्रगतिर्वास्यास्ति· इनिः॥ भोगी भुजंगमे पि स्याद् ग्रामपात्रे नृपेपुमान् विहाय महिषीमन्यराजयोषिति भोगिनी जि
ह्मं कुटिलं गच्छति· अन्येभ्योपीति डः जिह्मगो ह्रीचमंदो इति विश्वः पवनो शनं यस्य पंचविंशतिः ८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहीभवं हन्ति कुष्णातीति ढन् स्त्रियां टिड्ढेति ङीप् आदिना कंचुकादि· एकं स्फटति स्फटविकसने चौरादिकः णिजभावे पचाद्यच्· फटेत्यपि क्वचित्पाठः पृषोदरादिः फणाति फणागतौ अच्· द्वयोरित्यनेन स्फटापि संबध्यते इति स्वामी· द्वेकं च ते कचिदीक्षितं बंधनयोः वा हुल्लकाटुकनः कंचुको वारवाणे स्यान्निर्मोके कवचेऽपि च वर्द्धापक गृहीतांगस्थितवस्त्रे च चोलके· कंचुकोषधिभेदे च इति विश्वमेदिन्यौ निश्चयेन मुच्यते कर्मणि घञ् निर्मोको मोचने व्योम्नि सन्नाहे सर्पकंचुके द्वे सर्पत्वचः क्ष्वेडते मोहयति अच् क्ष्विदं त्यनेन वा ञिक्ष्विदा स्नेहनमोचनयोः मोहनयोरित्येके हलश्चेति घञ् पृषोदरादिः क्ष्वेडो ध्वनौ कर्णामये विषे· क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति· लोहितार्कपर्णफले घोषपुष्पे नपुंसकम्· दुरासदे च कुटिले वाच्यलिंगः प्रकीर्त्तितः गिरति जीवं गॄ निगरणे अच् गारं लाति· लादाने कः भावप्रत्वगारणा द्वस्व· गिरतेर्वा कुलकादल च्वा· गरलं पन्नगविषे तृणे फलकमानयोरिति हेमः· वेवेष्टि कायं विष्लृ व्याप्तौ विषविप्रयोगे वा· इगुपधेति कः गरले विषमं भसि च स्त्रियामति विषायः

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः समौ कंचुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ८ पुंसि क्लीबे च काकोलकालकूटहलाहलाः सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ९ दारदो वत्सनाभश्च विषभेदा अमी नव॥

८ भित्सूक्ष्मविवेकात्मूर्द्धन्यान्तः पुंसि क्लीबे [illegible]ति विषेणापि संबध्यत इत्येके चित् स्त्रीणि ८ ईषत्कोलति कुलसंस्त्याने· ईषदर्थे च निकोः कादेशः काकोलो नरकांतरे· काकुले द्रोणकाके च विषभेदे च न स्त्रियां· कालमपि कूटयति कूट परिदाहे· चुरादिः कर्मण्यण्· कालस्य कर्मणो मृत्योर्वा कूटो राशिरिवेति वा· हलति जठरं· हल विलेखने हलति आहलति वा· अच्· अहलं आहलं वा ततः कर्मधारयः हालेव हलमीति वा· हलमिव हलति· अच्· प्रज्ञाद्यण्· हालाहलं हालहलं वदं त्यपि हलाहलमिति द्विरूपकोशः· गोनासगोनसौ हालाहलं हालं हलं विषमिति त्रिकाण्डशेषः· हालाहलस्तु हयलालेरगे विषे· ज्येष्ठ्यां चेति हैमः एते त्रयः क्लीबपुंसोः· सौराष्ट्रदेशभेदे भवः अध्यात्मादित्वात् ठञ् सौराष्ट्रिक इति पाठ इति मुकुटः सुराष्ट्रे भव इति तु स्वामी· शुक्लिके देशे भवः द्रतिकुक्षीति योगविभागात् ठञ्· ब्रह्मणः पुत्रः प्रदीपयति· णिच्· नंद्यादि ल्युः ९ दरदि देशे भवः दारदो विषभेदे स्यात्पारदे हिंगुले पुमान्· वत्सान् नभाति· णभ हिंसायां कर्मण्यण्· वत्सस्य नाभिरिव नाभिरस्येति वा· अच् प्रत्यन्ववपूर्वादिति योगविभागादच्· स्थावरविषभेदा नाम प्रत्येकं· विषाम धीते वेत्ति वा॥ ॥ ॥

प्र·
अ·को· तदधीते तद्वेदेत्यण्। विषस्य वैद्यः जांगुलीं विषविद्यामधीते वेद वा वसंतादित्वात् ठक्। परीक्षितं समश्नीयाज्जांगुलीभिर्भिषग्वरः। जांगुल्या दीव्यतीति वा। तेन दीव्यतीति ठक्। द्वे
टी·रा· गारुडिकस्य व्यालं गृह्णातीति नंद्यादिग्रहीति णिनिः अहेस्तुंडं मुखं तेन दीव्यति। ठक्। संज्ञापूर्वकत्वाद्वृद्ध्यभावे अहितुंडिकोपि। व्यालग्राहोऽहितुंडिक इत्यमरमाला। द्वे सर्पग्रा
५० हिणः ११ नरति नृणाति वा। न्रनये। ऋत्रादिभ्यः संज्ञायां वुन्। नरकः पुंसि निरये देवारातिप्रभेदयोरिति विश्वमेदिन्यौ। प्रज्ञाद्यणि नारकः। यत्तु अन्येषामपि दीर्घत्वमिति स्वा
मिमुकुटौ। तन्न। अणि वृद्धिसंभवात्। उत्तरपदपरत्वाभावाच्च। यदपि नराः कायंत्यत्र मूलविभुजादित्वात्केन नरक इति तु स्वामीति मुकुटः। तन्न। अधिकरणे उक्तत्वात्। नि
काप्रवृत्तेः कर्त्तरि कः। रिति वा घातु। निर्गतोऽयात्। दुष्टा गतिः दुर्गतिः। द्वारि क्लेशे नरके चापीति हेमः। चत्वारि। तस्य नरकस्य भेदाः तपति। ल्युः तपनोऽरुष्करेऽपि स्याद्भास्करनि
रयांतरे। वीचिः स्वल्पतरंगे स्यादवकाशे सुखेपि चेति विश्वः। नास्ति वीचिः सुखमत्र। अवीचिस्तु तरंगे नरकांतरे इति हेमः। रुरुर्नाम[illegible]शेषः तस्यायं। तस्येदमित्यण्। म

विषवैद्यो जांगुलिको व्यालग्राह्यहितुंडिकः ११ इति पातालभोगिवर्गः॥ स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियां तद्भेदास्तपनावीचिमहारौरव
रौरवाः १ संहारः कालसूत्रं चेत्याद्याः सत्वास्तु नारकाः प्रेता वैतरणी सिंधुः स्यादलक्ष्मीस्तु निर्ऋतिः २ विष्टिराजूः कारणा तु यातना तीव्रवेदना॥

हतो रुरोरयं रौरवो नरके घोरे इति हेमः १ हरणं हारः घञ्। सम्यक् हारोऽत्र। सम्यक् घातोऽत्रेत्येके। कालान्यपि भयानि सूत्राण्यत्र। आद्यशब्देन तामिस्रांधतामिस्रासि
पत्रवनाद्यः नरकभेदानां पृथक्। नरकस्थाः सत्वाः जंतवः नरके भवाः तत्र भव इत्यण्। प्रागुः इण् गतौ। गत्यर्थेति क्तः प्रेतो भूतांतरे पुंसि मृते स्याद्वाच्यलिंगकः द्वे नरकस्थ
प्राणिनां। नारकी नदी। विगतस्तरणिर्यत्र तत्र भवः अण्। विगतात्तरणेर्यत्र वा प्रज्ञाद्यण्। वितरणेन दानेन लंघ्यते इति वा। शेषे इत्यण्। नारका जंतवः प्रेता नदी वै
तरणी स्मृतेति त्रिकांडशेषः वैतरणी नद्यां प्रेतानां यातुमातरि। एकं। लक्ष्मीविरुद्धा नियता ऋतिर्घृणा यस्याः ऋतिर्गतौ घृणायां च स्पर्द्धायां च शुभेपि चेति रभसः निर्गता ऋ ५०
तेः शुभादिति वा। निर्ऋतिः स्यादलक्ष्मीः स्त्री दिक्पालांतरे पुमान्। द्वे। २ विशति क्लेशं। विश प्रवेशने क्तिच्। यद्वा। विष्लाति विषविप्रयोगे। क्तिच्क्तौ चेति क्तिच्। यद्वा। वि
ष्यते कर्मणि क्तिन्। यत्तु वेतनेन विमुच्यते नेन विष्ल विप्रयोगे करणे क्तिन्निति मुकुटो व्याख्यत्। तन्न। विग्रहादिप्रदर्शनस्य परस्परविरुद्धत्वात्॥ ॥ ॥

स्युटाक्तिनोवाधप्रसंगाच्च· विष्टिः कर्मकरे मूल्ये भद्राजूम्भरणेषु चेति हेमः आजवति· जुगतो· क्विचविप्रच्छीति क्विन्दीर्घौ आअज्यते वेति स्वामी· आजूवेतनयोर्विष्टिः कर्मकृत्क
र्मणोरपीति शाश्वतः यत्तु आजूरेफान्तापीति पंजिकास्वामी चेति मुकुटः तन्न· पूर्वप्रदर्शितस्वामुक्तविग्रहद्वयेनापि रेफान्ततायाअलाभात्· ह्वेस्त्रियो· ह्वनिर्मूल्य
कर्मकरणे इति मुकुटः नरके हठान्महापस्येति स्वामी· भद्राख्यकरणस्येयम्पेक्तन्त्र हिंसायां· यतनिकारोपस्कारयोः आभ्यां णिच्· एयास श्रंथेति युच्· कारणं करणे हेतुव
धयोश्च नपुंसकं· स्त्रीयातनायां च· विरवेदनाख्यानानिवासेषु· णिच्· युच्· तीव्रा चासौ वेदना च· त्रीणि तीव्रदुःखस्य न रकरुज इति स्वामी· पीड अवगाहने· चौरादिकः
भिदाद्यङ्· पीडार्तिर्मर्दनोत्तंसकृपासु सरलद्रुमे इति हेमः बाधृ विलोडने· गुरोश्च हलः इत्यः बाधा दुःखनिषेधे चेति हेमः आबाधेति वाच्छेदः आबाधा वेदना दुःखमि
ति हलायुधः व्यथभयसंचलनयोः घटादयः षित इति षित्वात् भिदादङ् दुष्टानि खान्यस्मिन्· यद्वा· दुर्निंदितं खनति· अन्येभ्योपीति डः यद्वा· दुःखयति· सुखदुःखत
क्रियायां· चुरादिः पचाद्यच्· मानसे साधुः तत्र साधुरिति यत्· मानस्याद्विन्ने· प्रसूतिजम मानस्यं कृच्छ्रं कष्टं कलाकुलमिति वाचस्पतिः अमनसो भाव आमनस्यं·।

पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ३ स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् इति नरकवर्गः समुद्रोऽब्धिरकूपारः पारावारः सरि
त्पतिः॥
ब्राह्मणादित्वात् ष्यञ् इति स्वामी· प्रसूतेर्जातं· पंचम्यामिति डः हेवै मनस्य इति स्वामी· षडपि मनः पीडार्था इति सभ्याः दु[illegible]सू[illegible]जत्नीवे पीडा
बाधा च वेदनेति माला ३ कषयति· कष हिंसायां· क्तः कृच्छ्रगहनयोः कष इति इडभावः कष्टं तु गहने कृच्छ्रे· कृन्तति· कृती छेदे· कृते श्छ्रश्चेति रक्·छश्च· कृच्छ्र
मंभसि कष्टे सांतपने इति हेमः आसमंतात् भियं लाति· आभीलं भीषणे कृच्छ्रे ऽपीति हेमः त्रीणि शारीरपीडायाः न वापि दुःखस्य· के· एषां मध्ये यद्भेद्यगामि द्रव्य
गामि तत् त्रिषु· दुःखा सेवा· दुःखः सुतो निर्गुणः सर्वदुःखं विवेकिनः इति नरकवर्गविवरणं समुनत्ति· उंदी क्लेदने· स्फायीतिरक्· समीचीना उद्रा जलचरविशेषा य
स्मिन्निति वा· सह मुद्रया मर्यादया वर्त्तत इति वा· आपो धीयंतेऽत्र· कर्मण्यधिकरणे चेति धात्रः किः कुं पृथ्वीं पिपर्ति· पृ पालनपूरणयोः कर्मण्यण्· अन्येषामपीति दी
र्घः नञ्समासः यद्वा· न कूपमृच्छति· ऋ गतौ अगाधत्वात् खनितुमशक्यः कुश्च उश्च कौ· पिपर्ति· पृ कर्मण्यण् तद्भिन्नं पारमावृणोति· वृञ् वरणे· कर्मण्यण्·॥ ॥

प्र·
अ·को·
टी·रा·
५२

पारावारावस्यस्त इति वा अर्णः आद्यच् · पारावारः पयोराशौ पारावारं तटद्वये · पारमपारमस्येति पवर्गादिमध्य इति कश्चित् · सरितांपतिः उदकानि संत्यत्र · उदन्वानुदधौ चेति
मत्वं नो निपातितः उदकानि धीयंते ऽत्र कर्मण्यधिकरणे चेति किः · पेषंवासवाहनधिषु चेत्युदः · उदकस्येति वा · स्यंदंते आपो ऽत्र · स्यंदेः संप्रसारणं धश्चेत्युः · सिंधु
र्वेमथुर्देशाब्धिनदे नासरिति स्त्रियामिति विश्वमेदिन्यौ · सरो नीरे तडागे चेति रुद्रः · सरो नीरं गतिर्वास्त्यस्मिन् · मतुप् · तसौ मत्वर्थे इति भत्वं · सरस्वान् सुनदे वाद्धौ नान्यवद्रूसिभे
के स्त्रियां · वारुणीस्त्री रत्नवाग्देवी मो नदीषु नदि भिदि मनुपत्न्यामपि · सगरस्य राज्ञो ऽयं तस्येदमित्यण् · नगरो येनामृतेन · मणिना वा सह[illegible]न वा · अर्णास्यत्र संति अर्णसो लो
पश्चेति वः सलोपश्च १ रत्नानामाकरः जलानि निधीयंते ऽत्र · कर्मण्यधिकरणे चेति किः जलानां निधिरिति वा · यादसां जलजंतूनां पतिः अपांपतिः पंचदश क्षीरमुद
कमस्य · उत्तरपदस्य चेत्युदः एवं लवणोदः इक्षुरसोदः सुरोदः दधिमंडोदः स्वादूदः घृतोदः समुद्रविशेषाणां पृथक् पृथ[illegible]कम् आप्नुवंति आप्यंते वा · आप्लृव्या

उदन्वानुदधिः सिंधुः सरस्वान्सागरोऽर्णवः १ रत्नाकरो जलनिधिर्यादःपतिरपांपतिः तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे २ आपः स्त्री भू
१ म्नि वार्वारि सलिलं कमलं जलं ॥

प्नो · आप्नोतेर्ह्रस्वश्चेति क्विप् ह्रस्वत्वं च · असुनि आपः सांतं क्लीबं च · कबंधमुदकमापो नीरवार्वारि नारं क्लीबमपीति संसा
रावर्णात् · वारयति · वृञो ण्यंतात् क्विप् · वारुली वे उक्त संसारावर्णात् · वसिवपि[illegible]जि वारि च · सलति · सलगतौ · सलिकलीति लच् · रलयोरेकत्वं · सरिलं सलिरं सलिलमि
ति वाचस्पतिः कम्यते कमु कांतौ · वृषादित्वात्कलच् · कमला श्रीर्जले पद्मे कमलं कमलो मृग इति धरणिः दर्शनात्कमलमिस्येकं नाम कमलं व्योम्नि भेषजे · पंकजे सलिले ता
म्रे कमलस्तु मृगांतरे · कमला श्रीवरस्त्रियोरिति हेमचंद्रः · जलति · जल अपवारणे · पचाद्यच् · जलं गोकललेजड · ह्रीबेरेप्यन्यवज्जले इति हेमः · पयते पीयते वा पयगतौ
पीङ् पाने वा · असुन् · पयः क्षीरे च नीरे च प्रसूरश्वा जनन्यपीति हेमः · कीलां ज्वालामलति वारयति · अलं भूषणादौ कर्मण्यण् · औणादिकः कीलां लाति वा · कीलालं रुधिरे
तोये इति हेमः · न मृतं मरणमस्त्यस्मिन् · प्राणस्यापोमयत्वात् · अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते · अयाचिते च मोक्षे च ना धन्वंतरि देवयोः अमृता मागधी पथ्या ५१
गुडूच्यामलकीषु च जीव्यते ऽनेन जीव प्राणधारणे ल्युट् · जीवनं वर्तने नीरप्राणधारणयोरपि · जीवनी जीवना चापि जीवंतीमंद्योः क्रमात् · भूयते · भूप्राप्तौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूसूधूभ्रस्जिभ्यश्छंदसीति क्युन् यद्वा भवंत्यस्मिन्ननेन करणेति ल्युट् संज्ञापूर्वकत्वाद्गुणाभावः भुवनं विष्टपेपि स्यात्सलिले गगने जने वन्यते संभज्यते सेव्यते वान्व
नसंभक्तौ वनुयाचने वा कर्मणि घञ् संज्ञापूर्वकत्वाद्वृद्ध्यभावः यत्तु भुवनवद्बाहुलकात् क्युनि अनुदात्तोपदेशेत्यादिना नलोपे वनमित्युज्ज्वलदत्त इति मुकुटः तन्न
अनुदात्तोपदेशेत्यनुनासिकलोपस्य क्ङिति हलि विधानात् क्युनि तदप्रसंगात् अन्यथा वन्यत इत्यादावपि प्रसंगात् वनं प्रस्रवणे गेहे प्रवाहेंऽभसि कानने इति हैमः
३ कं मुखं वध्नाति वंध वंधने कर्मण्यण् कवंधं सलिले तुंडे इति शाश्वतादिदमेकं नाम कवंधो स्त्री क्रियायुक्तमपमूर्द्धकलेवरं क्लीवे जले पुंस्युदरे राहुरक्षोविशेषयोः
केचित्तु कमंधमिति पठित्वा हेनाममनीरसाहुः उनत्ति उंदी क्लेदने उदकमित्युणादिसूत्रेण साधु यन्नून्दतीति विगृहीतवन्तौ स्वामिमुकुटौ तच्चिंत्यं उंदेरोधादिकत्वान्नप
रस्मले उदके शुद्धेत्यसुन् शुट् यत्तु पीयत इति विग्रहप्रदर्शनं स्वामिमुकुटाभ्यां कृतं तन्न पातेर्वलिजुडित्यनुवृत्तिविरोधात् तत्र पातेर्ग्रहणं न पिबतेः पुष्णाति पुष

पयः कीलालममृतं जीवनं भुवनं वनम् ३ कवंधमुदकं पाथः पुष्करं सर्वतोमुखम् अंभोर्णस्तोयपानीयनीरक्षीरांबुशंवरम् ४

पुष्टौ पुषः किदिति करन् पुष्करं पंकजे व्योम्नि पयः करिकराग्रयोः ओषधिद्वीपविहगतीर्थरागोरगांतरे पुष्करं तूर्यवक्त्रे [illegible] कांडे खड्गफलेपि च सर्वतोमुखान्यस्य
सर्वदिगामनात् सर्वतोमुखउग्रे च क्लीवे त्वब्रह्मणोः पुमान् नपुंसके तु पानीये स्वर्गेप्यपि स्मृतं आप्नोति आप्यते वा आप्लृ व्याप्तौ उदके नुभौ चेति ह्रस्वो भांतादेशो नु
मागमश्च अंभते वा अभि शब्दे असुन् यत्तु अमतीति विग्रहप्रदर्शनं स्वामिमुकुटाभ्यां कृतं यच्च अमेर्भुक्चेति सूत्रोपन्यसनं मुकुटेन कृतं तन्न तदुक्तसूत्रस्योज्ज्वलद
त्तादावनुपलंभात् अस्मदुपन्यस्तस्योपलंभाच्च ऋच्छति ऋगतौ उदके नुट् चेत्यसुन् नुडागमश्च यत्तु अर्णतीति विगृहीतं स्वामिना तन्न अर्त्तिह्चेत्यतोऽर्त्तेरित्यनुवृत्तेः स्वा
दिसत्राग्रहणात् तौति तुं सौत्रः आवरणार्थः औणादिको यः पीयते पा पाने अनीयर् पाययते वा पै शोषणे पानीयं पेयजलयोरिति हैमः नीयते नीञ् प्रापणे स्फायीतिर
क् निर्गतं राद्रग्नेर्वा निरादय इति समासः अग्नेराप इति श्रुतेः प्रादिभ्यो धातुजस्येति वहुव्रीहिः अद्भ्योऽग्निरिति स्मृतेः यत्तु दुलोप इति दीर्घ णो नीरमिति तु स्वामी नि मुकुटः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri

तन्नयति नीरमिति स्वामिग्रंथाद्युक्तार्थानवगमात्· निश्चयेन राति सुखं· रा दाने· आतश्चोपसर्गे इति कोवा क्षियति· क्षि निवासगत्योः शुचिक्ष्मिभीनां दीर्घश्चेति क्रन् दी
र्घत्वं च· यद्वा· घस्यतेः घसेः किच्चेती रन्· गमहनजनेत्युपधालोपः यत्तु स्नयतीति विग्रहमुदर्शनं मुकुटेन कृतं· तन्न· उपन्यस्तधातोस्ताद्दृशरूपाभावात् क्षीरं पानीय
दुग्धयोरिति हेमः· अंबते· अवि शब्दे· बाहुलकादुः यत्तु अंबतीति स्वामिना विगृहितं· तच्चिंत्यं· अस्यात्मनेपदित्वात्· शं वृणोति· वृञ् वरणे· पचाद्यच्· शंवं संवरणं रा
तीति वा· संवयति· षंव संबंधने शंवं च· बाहुलकादरन्निति वा· दंत्यादिस्तालव्यादिश्च· शंवरं सलिले पुंसि मृगदैत्यविशेषयोः शंवरी चाखुपर्ण्यां स्यादिति विश्वः॥८॥
मेघस्य पुष्पमिव· मेघपुष्पं पिंडाभ्रांबुनारेये नाहरे हये· घनस्य रसः पुंल्लिंगः स्यात् घनरस· सांद्रनिर्यासनीरयोरिति मेदः नारं घनरसः ऋमानिति शब्दार्णवः अप्स्वपि
शंवरपिप्पलकुशकमलकांडविषवनपयांसि घनरसमंबु क्षीरं घृतममृतं जीवनं भुवनमिति रत्नकोशात्· क्लीवमपि· दकशब्दोऽप्यत्र· प्रोक्तं शाक्तैर्भुवनममृतं जीवनं
नीयं दकं चेति हलायुधात्· सप्तविंशतिर्जलस्य अपां विकारः तस्य विकार इत्यणं ताच्चतुर्वर्णादित्वात्स्वार्थे ष्यञ्· स्त्रियामाप्या आप्यं· ख्विचतन्मध्ये तद्भवे च स्त्रियां
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु १ महत्सूल्लोलकल्लोलौ स्यादावर्तोम्भसां भ्रमः
स्थितौ इत्यादानेध्वनेर्वायां संगमेऽस्त्री गुरौ त्रिषु· एकाचो नित्यमिति मयट्· स्त्रियामम्मयी द्वे जलविकारस्य भज्यते· भंजो आमर्दने· कर्मणि घञ्· भंगस्तरंगभेदे च रुग्विशे
षपराजये· कौटिल्ये भयविच्छित्त्योरिति हेमः तरति· तॄ प्लवनतरणयोः तरत्यादिभ्यश्चेत्यंगच्· ऋच्छति· ऋ गतौ· अर्त्तेरुच्चेति मिः अर्त्तेरुदादेशः वा स्त्रियामिति काकाक्षि
न्यायेनोर्मिवीचिभ्यां संबध्यते· पुंल्लिंगस्त्रीलिंगयोर्वीचिमणियष्टिमुष्टयोऽ स्यानिरुटिशमिपाटलिशाल्मलि तरणि श्रेण्यूर्मयो वल्लिश्चेति वामनः ऊर्मिः पीडाजवोत्कं
ठाले खा प्रकाशवीचिषु· वस्त्रसंकोचले खायामिति हेमः वयति ऊयते वा· वेञ् तंतुसंताने· वेञोडिच्चेती चिः यत्तु वाति· वा गतिगंधनयोः वातेः किदिति मुकुटः तन्न·
तथासति विरिति रूपप्रसंगात्· वातेर्डिच्चेति सूत्रे जनिघसिभ्यामिणिति सूत्रादिणित्यनुवृत्तेः वीचिर्नित्यं स्त्रीति स्वामी· वीचिः स्वल्पतरंगे स्यादवकाशसुखेद्वयोः चलादि
५ उत्लोडयति लोड्ट उन्मादे णिच्· पचाद्यच्· डलयोरेकत्वं· यत्तु लोलयतीति लोलः पचाद्यच्· उद्गतश्चासौ लोलश्चेति उल्लोल इति स्वामी तन्मुकुटः तन्न· उद्ईल्लोल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वकृतनिर्वचनाविशेषाच्च· कंजलंतस्यलोलउन्मादः। वापदांतस्येत्यनुस्वारस्यलकारः कल्लंतेनेननद्यः कल्ल अव्यक्ते शब्दे वा हुलकादोलजितिवा· द्वैमहातरंगस्य· आ
वर्त्तनं· वृतुवर्तने· भावेघञ्· आवर्त्तश्चिंतनेवारिभ्रमे चावर्त्तेपुमान्· जलानांभ्रमणस्यैकं· पर्षेति· पृषुसेचने· पृषद्बृहन्महदितिसाधुः· बहुवचनमतंत्रं· एषनत्रयोपुमानवि
दोनहूयोः पृषतोपिना· अनयोश्चत्रिषुश्वेतविंदुयुक्तेप्युभाविमौविंदति· विदिअवयवे· बाहुलकादुः· विंदुरंतस्यांतरे· भ्रुवोर्मध्येरूपकाव्यक्ततो चपृषतेपुमानखेदिनर्यन्यालिं
गः स्यात्· पर्षेति· पृषिरंजिभ्यांकिदित्यतच्· पृषतस्तुमृगोविंदौस्वरोहितेश्वेतविंदुयुतेपिस्यादितिहैमः· प्रुषुप्लुषुदाहे· संपदादित्वाक्किप्· विगतारुड्वाप्रुट्‌ यस्याः स्मात्· चक्रा
दिजलकणस्य ६ वंचति· वञ्चुगतौ· स्फायितंचीतिरक्· न्यंक्वादीनांचेतिकुत्वं· वक्रंपुटभेदे· वक्रः कुटिलेक्रूरभौमयोरितिहैमः· वक्रःशनैश्चरेपुंसिपुटभेदेनपुंसकं· त्रिषुक्रूरेवकु
टिले· स्वामीतुचक्राकारेणयांत्यधइतिविगृह्यनन्ववर्गादित्वमस्यते· चक्रः कोकेपुमानक्लीवंव्रजेसैन्यरथांगयोः राष्ट्रदंभांतरेकुंभकारोपकरणास्त्रयोः जलावर्त्तेपीतिवाराहेमेदिनी·

पृषंतिविंदुपृषताः पुमांसोविप्रुषः स्त्रियः ६ चक्राणिपुटभेदाः स्युर्भ्रमाश्चजलनिर्गमाः कूलंरोधश्चतीरंचप्रतीरंचतटंत्रिषु ७ पारावारेपरार्वाचीतीरेपात्रंतदं

पुटक्लिष्टंभिदंतिभिदिरविदारणे· कर्मण्यण्· पुटभेदस्तुनगरांतोयपोस्तटिनीमुखेइतिहैमः· द्वेचक्राकारेणजलानामधोयानस्य भ्रमंतिजलान्यनेन· हलश्चेतिघ ९ तरं॥
न्· भ्रमौतुनिर्गमेभ्रांतौकुंदभ्रमणयोरपिनिर्गमनानि· गम्लृगतौ ग्रहवृदृनिश्चिगमश्चेत्यप्· करणेवा· स्वनोघचेतिघः जलानांनिर्गमोः जलनिस्सरणंजालकस्य· नद्यादौ
अधः स्थजलस्योर्द्ध्वनिस्सरणस्येत्यन्ये· स्वामीतुचत्वार्येकार्थानीत्याह। कूलयति· कूलआवरणे· पचाद्यच्· कूलंनटेस्येन्यपृष्ठेतडागस्तूपयोरपीतिहैमः· रुणद्धि· रुधिरआवरणे
असुन्· अदंतोपिरोधः प्रोक्तः श्वरोधसीतिसंसारावर्त्तात्· तत्राच्· तीरयति· पारतीरकर्मसमाप्तौ· पचाद्यच्· यत्तुमुकुटः तीर्यतेतरणकर्मसमाप्यतेऽनेनात्रवातुरादित्वंतादे
रजित्याह· तन्न· अजबधामितिलुट्प्रसंगात्· पुंसिसंज्ञायामितिघप्रसंगाच्च· एवंपारंतीरेवंगे· तीरंत्रनस्तटेइतिहैम एवंपारं· प्रतीरमित्युपसर्गांतरविरुद्धमर्थं· तटति· तट
उच्छ्राये· पचाद्यच्· स्त्रियांतटी· जातेरस्त्रीविषयादितिङीष्· पंच ७ परंतीरं पारंपारंप्रांतेपरतटेइतिहैमः· अर्वाक्तीरमवारं· अवअर्यते· ऋगतौ· कर्मणिघञ्· नवारस्यचेतिवा· अर्वा
आद्यच्· परतीरावरतीरयोरेकैकं॥

Digitization by eGangotri

न्तयोः पारावारयोरंतरं मध्यं· पिबंत्यत्रपं त्यस्माद्वा· पिवन्तेः यातेर्वाष्ट्रन्· पात्रं तु कूलयोर्मध्ये पर्णेनृपतिमंत्रिणि योग्यभाजनयार्य त्त्रमांडेमा धात्तु कर्त्रंरीतिहेमः एकं· द्विर्गताअं
न्तर्गतावायोन्न· ऋकपूरित्यः समासांतः द्यंतरुपसर्गेभ्योपईत्· काकाक्षिवद्स्त्रियामित्युभाभ्यां संवध्यते द्वे जलमध्यस्थस्थानस्य· ८ पुलति· पुलमहत्वे· तलिपुलिभ्यां चेतीनन्
त्रिकांडशेषेतु पुलिनं द्वीपमुच्यत इत्यभिहितं· एकं जलाद्चिरनिर्गतत्तटस्य सिकताः संत्यस्मिन्· सिकताशर्कराभ्यां चेतिमत्वर्थेण्· सिकतानांविकारः मयड्वैतयोरिति
मयट्· द्वे वालुकामयतटस्य· निषीदंत्यत्र शाङ्र्ङ्गविधारणागत्य वसादनेषु नोसदेरितिषत्वं· सदिरप्रतेरितिषत्वं· यद्वा निषदनं संपदादित्वात्क्विप्· निषद्आसनस्यवरः आ
वारकः वृञ्आवरणे· आधृषीयः पचाद्यच्· निषद्वरः स्मरे पङ्के· निशायां तु निषद्वरा इति विश्वः जमति जमु अदने· वाहुलकाद्वालच्· यद्वा· जंवे अदने इति धातुं भावेघञ्
जंवमालाति· ला आदाने आतोनुपेतिकः जंवालः शेवलेपंके जंगले मदनद्रुमे· मेद्केविष्टमदे च पुंसि धूर्तेऽभिधेयवत्· पच्यते पचि विस्तारे कर्मणि घञ्· हलश्चेतिकर
णे वा· पंकोस्त्री कर्दमे पापे इति हेमः शीयंते स्मिन्ननेन वा· शद्लृ शातने· घञ्· यद्वा शीयते नश्यति ज्वलितिकसंतेभ्योणः यद्वा· शूयति· शीज्ञनूकरणे· शाशपिभ्यां दत्वावि

द्वीपो स्त्रियामंतरीपं यदंतर्वारिणस्तटं ८ तोयोत्थितं तत्पुलिनं सैकतं सिकतामयं निषद्वरस्तु जंबालः पंकोस्त्री शाद कर्दमो ९ जलोच्छ्वासाः

ति दः शादः कर्दमशाष्पयोरिति हेमः कर्दति· कर्द कुत्सिते शब्दे· कलिकर्योरमः पंच ९ जलानि उच्छ्वसंत्येभिः परिवहंत्येभिः श्वस १० परीवाहाः कूपकास्तु विदारकाः
प्राणने वह प्रापणे हलश्चेतिघञ्· उपसर्गस्य घञ्यमनुष्ये बहुलमिति वा दीर्घः यद्वा जलानामुच्छ्वसनं· परिवहनं च· भावेघञ्· परीवाहो जलोच्छ्वासमहीमृद्योग्यवस्तुनि द्वे प्रवृद्धजलस्य निर्गम
मार्गस्य· समधिकजलस्य सर्वतो वहनस्य वा· कुत्सिताः कूपाः कुत्सितेदृतिकः कूपस्य प्रतिकृतिरितिवा इवे प्रतिकृता विति कन्· कूपकोगुणवृक्षस्यान्तैलपात्रे कुकुंदरे उदपा
ने चितायां च विदार्यते दविदारणेणिच्· वाहुलकात्कर्मणिण्वुल्· यद्वा विदार्य्यते· कर्मणि घञ्· कुत्सिता विदाराः कुत्सायां कः द्वे शुष्कनद्यादौ कृतगर्तस्य॥ नावातार्यनौव ५३
याधर्मेतियत्· वांतोयीत्यवादेशः एकं नौतरणयोग्यजलस्य तु यत्ने· णुद प्रेरणे· ग्लानुदिभ्यांडो· यद्वा· नयति· णीञ् प्रापणे· अन्येभ्योपीतिडः नं अवति· क्विप्· ज्वरत्वरेत्यूठ्
वृद्धिः तरंत्यनया तृप्लवनतरणयोः अर्तिसृधृधम्यश्य·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वितृभ्यो निः तरणिस्तरणेर्कः श्रौकुमार्यौषधिनौकयोः यष्टां व ध्वावितिहेमः अ चरुः कृदिकारादक्तिनिति ङीषू वा तरणी तरी तरिर्द्रोण्यां वेडायां वस्त्रादीनां च पेटके इति हेमः
त्रीणि १० उडु नो जलात् पाति पारक्षालो सुपिस्थ इत्यत्र सुपीति योगविभागात्कः उडुनो व पातीति वा उडुप श्चंद्रभेलयोरिति धरणिः प्लवते प्लुङ् गतौ पचाद्यच् प्लवः प्लक्ष
प्लुतौ कर्पोशब्दे कारंडवे म्लेच्छजातौ भेलकमेकयोः क्रमनिम्नमहीभागे कुलके जलवायसे जलांतरे प्लवंगे च तृणोमुस्तकभिद्यपीति हेमः कोलति कुल संस्त्याने ज्वलि
तीति णः यानप्लवकयोः कोलः कोलं तु बदरीफलमिति शाश्वतः कोलो भेलक उत्संगेऽ कपाल्यां चित्रकेकिरौ कोलं तु बदरे कोलापिप्पल्यां चव्यभेषजे इति हेमः त्रीणि त
णादिनिर्मितनरणसाधनस्य स्रवति स्रु गतौ स्रुरीभ्यां तुट् च इत्यसुन् तुडागमः स्रोतो इत्यादिः स्रोतः सद्यः सकलसलिलमिति इत्यादिषु ष्वविवेकात् स्रोतो वुवेगइंद्रिये एकं
अकृत्रिमजलवहनस्य आतरन्त्यनेन पुंसि संज्ञायामिति घः यत्तु कृदोरविति मुकुटः तन्न परत्वाल्ल्युटः प्रसंगात् आतरस्तरपण्यं स्यादनुतरमिति वा पालितः तरणं कृ

नाव्यं त्रिलिंगं नौतार्ये स्त्रियां नौस्तरणिस्तरिः १० उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः आतरस्तरपण्यं स्याद्द्रोणी काष्ठां
बुवाहिनी ११ सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः नियामकाः पोतवाहाः कूपको गुणवृक्षकः १२ ॥

सेरप् तरस्य पण्यं द्रुनद्यादितरणे देयमूल्यस्य द्रवति द्रु गतौ वहित्रीतिनिः कृदिकारादक्तिन इति ङीष् द्रोणिः काष्ठांबुसेचनी द्रुणी इति रूपरत्नाकरात् द्रुणिरपि द्रुण
हिंसागत्योः इगुपधात् किः द्रोणिः काष्ठांबुवाहिन्यां गवादन्यामपीष्यते पुनः पुनरंबु वहति बहुलमाभीक्ष्ण्य इति णिनिः द्वे काष्ठपात्रस्य नौकाकारांबुसेचन्याः ११ स
मुदितानां गमनं द्वीपांतरगमनं वा संयात्रा सा प्रयोजनमस्य तदस्य प्रयोजनमिति ठञ् पोतेन पलक्षितो वणिक् द्वे वहित्रगामिनो वणिजः कर्णः श्रोत्रमरित्रं चेति द्वयं
तं धरति धृ धारणे कर्मण्यण् नावा तरति नौद्व्यचष्ठन् द्वे नाविकस्य नौपृष्ठदंडधारकस्येत्यन्ये नियच्छंति पोतं यमनियमने ण्वुल् नियामकः पोतवाहे कर्णधारे
नियंतरि पोतं वहति कर्मण्यण् द्वे वहित्रवाहकस्य कूपे कायति कै शब्दे सुपीति कः गुणानां रज्जूनां वृक्षः संज्ञायां कन् द्वे नौमध्यस्थ रज्जुबंधनकाष्ठस्य नौबंधनकील

टी॰ ॥ दि॰ वर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को·
टी·रा·
५४

नौकायां दंडः क्षिप्यते अनयेति वा क्षिपेः किच्चेत्युनिः वा कुलकाद्गुणे क्षेपणिरपि क्षेपणं प्रेरणं नौकादंडजालमित्येके स्त्रियां द्वे नौकापार्श्वे दृढबद्धचालनकाष्ठस्य अ-
च्छत्यनेन ऋगतौ अर्त्तिलूधूसूखनिसहचर इत्रः केजले निपातोस्य हलदंतादिति अलुक् घोषादिति कप् संज्ञायां कन् वा द्वे नौपृष्ठस्थचालनकाष्ठस्य अभ्रति अभ्रगतौ इन्
कुं मुद्दालयति दलविशरणे कर्मण्यण् शकंध्वादिः काष्ठस्य कुद्दालः द्रुपोतादेर्मलापनयनार्थं काष्ठादिरचितकुद्दालस्य सेकपात्रं सिच्यतेनेन करणेति ल्यु-
ट् सेचने रक्षणे सेके नौकायाः सेकभाजने इति विश्वमेदिन्यौ द्वे नौस्थजलनिस्सारणपात्रस्य १३ नावोर्द्धं अर्द्धं नपुंसकमिति तत्पुरुषः नावो द्विगोः अर्द्धाच्चेति टच् एकं
अतीता नौर्येन उरःप्रभृतीति कप् नावमतिक्रान्तः अत्यादय इति तत्पुरुषः अतिनौः पुमान् स्त्री वा अगाधमभिव्याप्य त्रिषु प्रसदने षद्लृ विशरणगत्यादो गत्यर्थेति क्तः प्र-
सन्ना स्त्री सुरायां स्यादच्छसंतुष्टयोस्त्रिषु छो छेदने न छ्यति दृष्टिं सुपीति कः न छाद्यते वा अन्येष्वपीति डः अच्छो भल्लूके स्फाटिकेऽमलेऽच्छाभिमुखेऽव्ययमि

नौकादंडः क्षेपणी स्यादरित्रं केनिपातकः अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् १३ क्लीवेऽर्द्धनावं नावोऽर्द्धेऽतीतनौकेऽतिनु त्रि-
षु त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः १४ निम्नं गभीरं गंभीरमुत्तानं तद्विपर्यये अगाधमतलस्पर्शे कैवर्त्ते दाशधीवरौ १५ ॥

ति हैमः द्रुलुषति लुषहिंसायां इगुपधेति कः कस्य जलस्य लुषो घातकः कलुषं त्वाविलेपापे इति विश्वः भिन्नोच्छात् नञ्तत्पुरुषः नलोपो नञः तस्मान्नुडचि आ-
विलति विलभेदने इगुपधेति कः त्रीणि मलिनजलस्य १४ निमनति म्ना अभ्यासे आतश्चेति कः गाते जलजंतवोत्र गच्छंति वा गाङ् गतौ गम्लृ गतौ गभीरादा-
यश्चेति गभीरगंभीरावितिवा निपातितौ त्रीणि उद्गतस्तानो विस्तारोऽस्मात् तस्य गंभीरस्य विपर्यये उत्तानमगंभीरे स्यादूर्ध्वास्यप्रथिते त्रिषु एकं नास्ति गाधः स्थिति-
रत्र नञोस्त्यर्थानामिति बहुव्रीहिः तलस्याधोभागस्य स्पर्शः न सोत्र द्वे अतिनिम्नस्य के जले वर्त्तते वृतु वर्त्तने पचाद्यच् केवर्त्तो नाम मत्स्यानामयं घातकः तस्येदमि-
त्यण् दशति मत्स्यान् दंश दशने दंशोपदनोन आच् यद्वा दाश्यते मूल्यमस्मै दाशृ दाने घञ् शालोमत्स्ये धीवरे एव दाश इति शुभे दासाल्यांतः कैवर्तभृत्ययोर्दासो
दासी वाणा च चेटिके इति रुद्रः तु दस्यंतः दासो भृत्ये च शूद्रे च ज्ञानेः धियं निचधीवरे दधाति मत्स्यान् छित्वरछत्वरेति निपातितः त्रीणि १५ ॥ ॥

नयनं णीञ् प्रापणे श्रिणीभुव इति घञ् · आसमन्तान्नीयतेऽनेन · आनयन्ति मत्स्याननेन जालमानाय इति घञन्तो निपातितो वा · जले क्षिप्यते क्षेपे इत्यण् · जलति · घनीभवति · जल
घातने ज्वलतीति णः · जालं द्वयं रङ्गवाह्ययोः क्षारकानायरं भेगुनीपे नास्त्री तु घोषक इति रभसः · द्वे · शणति · शण गतौ पचाद्यच् · शणस्य सूत्रं · पवित्रमुपवीतं तद्वदिव इवे प्र
तिकृतौ ताविति कन् · द्वे शणसूत्रस्य जालस्य · मत्स्या आधीयन्तेऽत्र · डुधाञ् धारणपोषणयोः · करणाधिकरणयोरिति ल्युट् · कुत्सितं वेणन्ते स्यां मत्स्याः · वेणृ गतौ · हलश्चेति घञ् · गौ
रादित्वान्ङीष् · द्वे मत्स्यस्थापनपात्रस्य · बलिनो मत्स्यान् ध्यन्ति · षोऽन्तकर्मणि · आतोऽनुपेति कः · डलयोरैक्याद्बडिशमपि · स्त्रियां बडिशा · अपचये तु बडिशी विध्यतेऽनेन वि
धविधाने करणे ल्युट् · मत्स्यानां वेधनं द्वे · १६ पृथूनि रोमाण्यस्य · रोमपक्षात्त्रेति स्वामी वल्कलमिति सर्वधरः · झषति · झष हिंसार्थः पचाद्यच् · यद्वा झष्यते खनो घ चेति घः · मुकु
टस्तु पुंसीति घ इत्याह · तन्न · हलश्चेति घञस्तदपवादत्वात् · करणाधिकरणयोरित्यनुवर्तनाच्च · झषा नागबलायां स्त्री तापमत्स्याटवीषु ना · माद्यति · मदी हर्षे · ऋतन्यं

आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकं मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनं १६ पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः विसारः
शकली चाथ गडकः शकुलार्भकः १७ सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ॥

१८ जीतिस्यः मत्स्यो मीनः ष्यपं भूम्नि द्वे · मीनाति मीयते वा · मीञ् हिं
सायां · फेनमीनाविति निपातितः · विविधं सरति · सृ गतौ · ग्रह्यादित्वात् णिनिः · विसारी · विसारिणो मत्स्य इति स्वार्थेऽण् · अण्डाज्जायते · जनी प्रादुर्भावे · पञ्चम्यामजातौ वि
ति डः · अण्डजो मृगनाभौ स्यात्खरटे हो खगे झषे इति विश्वमेदिन्यौ · विशेषेण सरति · सृ गतौ · व्याधिमत्स्यबलेष्विति घञ् · शकलमस्यास्ति · अत इनिः · शकलं वल्कले द्वे चेति ना
लव्यादावजयः अष्टौ गडसेचने कुन् शिल्पिसंज्ञयोः · शकुलोऽत्र मत्स्यमात्र इति स्वामी तस्यार्भकः द्वे · १७ सहस्रं दंष्ट्रा यस्य · पाठि पृष्ठं नमयति · णम प्रह्वत्वे · णिच् · अन्येभ्यो
पीति डः · अन्येषामपीति दीर्घः · अवश्यं पठति पठ व्यक्तायां वाचि आवश्यके णिनिः · पाठी द्विजः तस्येन इवापेक्षितः हव्यकव्ययोः प्रशस्तत्वात् पाठीनो गुग्गुलद्रुमे पाठ
के मीनभेदे चेति हैमः · द्वे · उ विस्मयजनकं रूपमस्यास्ति · अत इनिः · रलयोरैक्यं · ओः शोभो रूपं · उरूपमस्यास्तीति वा · शिशुः शिशुमारः तस्य प्रतिकृतिरिव इवे प्रतिकृतावि
ति कन् · शिशुकः · शिशुमारे स्याद्बालके लपिनो रपि · द्वे · शांशु इति ख्यातमत्स्यविशेषस्य नलवनस्या मीनः नडाभो मीन इति वा नलमीन इति केचित्पठन्ति · चिलविलस ने द्वे

मिमीते· माङ्· माने आत्तोनुपेतिकः त्रीकारो दंतः नलमीनश्चिलिचिमो वृहन्मीनोऽब्धिजस्तिमिरितिरत्नमाला· लक्ष्मणासारसीक्रौंचीनलमीनश्चिलीचिमिरितिवोपालिता
ताच्चतुरिकारवान्मध्यदीर्घइदंतोपि· द्वे· नलवनचारिलोमत्स्यविशेषस्य प्रकृष्ट ओष्ठोस्याः ओत्वोष्ठयोर्वानासिकोदरोष्ठजिजातेरितिवाङीष्· इयोरित्यनेनसंवंधात्प्रो
ष्ठोपिशफंराति· रा दाने· आत्तोनुपेतिकः जातेरितिङीष्· पुंसिशफरः द्वे ९ क्षुद्रा दंडाख्याता मत्स्याः क्षुद्रांडमत्स्याः तेषां संघातः पोतैः वहित्रैराधीयते धात्रः कर्मणि ल्युट्
यद्वा· पोतोऽर्भक आधीयतेऽत्र अधिकरणे ल्युट्· द्वे· अथो मत्स्यविशेषा उच्यंते· रोहति· रुह बीजजन्मनि प्रादुर्भावे च रुहेरश्वलोवेगीतच· रोहणं· घञ्· रोहो जातोस्य तारका
दित्वादितज्वा· रोहितं कुंकुमे रक्ते ऋजुशक्रशरासने· पुंसि स्यान्मीनमृगयोर्भेदे लोहितकद्रुमे· मज्जति· टुमस्जो शुद्धौ मद्गुराद्यश्चेति निपातितः शाड्यते· शाडृ श्ला
घायां· कर्मणि घञ्· डलयोरैक्यं· शालो झषे धीवर एव दासइत्युष्मे दगालव्यादिः शालं पुष्पं क्लीवं वृक्षे तु पुमान् पुंसि भूरुहे मत्स्येपि· सालो वरुणस्सर्जयोरितिरभसेन

नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ९ क्षुद्रांडमत्स्यसंघातः पोताधानमथो झषाः रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ९ तिमिंगि-
लादयश्चाथ यादांसि जलजंतवः

दंत्यादिः शालो हाले मत्स्यभेदे शालो कसालस्य दृष्टयोरिति हेमः राजी रेखास्यास्ति अन्यत्रापि दृश्यत इति वः राजीवो मीनसारंगभे
दयोः राजीवमब्जे इति हेमः शक्नोति गंतुं वेगेन· शक्नो बाहुलकादुलच्· ताम्यति· तमु ग्लानौ क्रमितमिशूतिसंभामत इत्वेतिदृग्नु ९ तिमिंगिरतिगृणाति गरणे· मूलविभुजे॥
तिकः अचिविभाषेति लः गिलेगिलस्येति मुम्· आदिशब्दात्तिमिंगिलगिलनंदावर्तादयः मत्स्यविशेषाणां पृथगेकैकं यांति वेगेन· या प्रापणे असुन्· बाहुलकात् दुक्
यद्वा यातेः क्विप्· यामत्ति अद भक्षणे असुन्· यांदस्यति वा दसु उपक्षये· क्विप्· साहचर्यस्य सर्वत्रानियामकत्वात्सांतेति दीर्घः जलानां जंतवः द्वे तेषां जलजंतूनां भेदा उ ५५
च्यंते· शिशून्मारयति· मृङ् प्राणत्यागे णिच्· कर्मण्यण्· शिशुमारोऽतु संभूतजंतोतारात्मकाच्युत इति विश्वमेदिन्यो· उनत्ति उंदी क्लेदने स्फायीतिरक्· पृंकते स्मात· शकि
शंकायां· खरुशंकुपीयु इति निपातितः शंकुः यत्र शिराजाले संख्याकीलकशंभुषु· पादोस्रभेदयोर्मदृ इति हेमः कृणाति· कृञ् हिंसायां· पचाद्यच्· मनुष्याणां करः पृषो
दरादिः यद्वा· मंकते· मकि भूषायां· अच्· आगमशास्त्रस्यानित्यत्वान्न॥

CC-0. In Public Domain. Digitization by eGangotri

नुमः मकं राति । रा दाने । कः मकरो निधौ । नक्रे राशिविशेषे चेति हैमः । आदिना ग्राहकुंभीरादयः जलजंतुविशेषाणां पृथक् पृथक् २० कुलति । कुल संस्त्याने । गंभीरस्य श्वे
तीर नकोलीयते । लीङ् श्लेषणे । बाहुलकान्नरकूयद्वा । कुलमस्यास्ति । अत इनिः । तमीरयति । कर्मण्यण् । जनकभक्षकत्वात् लयनं लीः संपदादिः कुत्सिता लीः तां राति वा । कुला
ति कृ हिंसायां । अन्येभ्योपीति विच् । कटति कटे वर्षावरणयोः । पचाद्यच् । कूरश्चासौ कटश्च । अहरादीनां पत्यादिषु वा रेफः ततः स्वार्थे कन् । कर्क इति सौत्रो धातुः शकादि
भ्योऽटन् वा कर्कश्चेन वर्णं टलति । टल गतौ । डो वा । कर्कटः कुलीरे करणे स्त्री णां राशौ खगे इति हैमः । द्वे । कुत्सितः कौ वा उर्मिर्वेगोस्य । अचूमत्यन्वेवेन्यत्रापि इति योगविभागात्स्वस
मासान्तः उर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभंगयोरिति रभसः काम्यते । कमु कान्तौ । कमेरठः के जले मठतीति वा । मठ मदनिवासयोः । पचाद्यच् कमठः कच्छपे पुंसि भांडभेदे न
पुंसकं कच्छेन पिबति । पा पाने । सुपीति योगविभागात्कः । कच्छपी वल्लकीभेदे डुलौ स्त्रुद्रगदान्तरे पुंसि निध्यन्तरे कूर्मे मल्लबंधान्तरेपि चेति विश्वमेदिन्यौ त्रीणि ॥ गृह्णा

तन्द्रे दाः शिशुमारो दृष्टांकचो मकरादयः २० स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ग्राहोवहारो नक्रस्तु कुंभीरोथ महीलता २१ गण्डूपदः कि
ञ्चुलको निहाका गोधिका समे रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः २२॥ ति ग्रह उपादाने विभाषा ग्रह इति णः ग्राहो ग्रहे जलचरे इति हैमः । अवहरति

अवपूर्वोत् हृञ् । श्याद्व्यधेति णः अवहारस्तु युद्धादि विश्रान्तौ ग्राहचौरयोः निमंत्रणोपनेतव्ये इति हैमः । द्वे । नक्रामति । दूरस्थलं क्रमु पादविक्षेपे । अन्यत्रापीति डः । नभ्राडिति
नलोपो न । नक्रं नासाग्रदारुणोः नक्रो यादसीति हैमः । नक्रः कुंभीरके पुंसि नक्रं तु नकनीरयोः । कुंभिनं हस्तिनमीरयति । कर्मण्यण् । द्वे । महत्यालतेव । ह्रस्वत्वदीर्घत्वाभ्याम्
२१ गंडूमग्रे । गम्यः परान्यस्य किंचिच्चुलुंपति कास्यनेकाजग्रहणं चुलुंपाद्यर्थमिति वार्तिकनिर्दिष्टः चुलुंप धातुः अन्येभ्योपीति डः टेरिति उकारमकारपकाराणां लोपः ततः
संज्ञायां कन् त्रीणि । किंचुवा इति ख्यातस्य नियतं जहाति भुवं नोहश्चेति हाकः कन्बाहुलकान्न ह्रस्वः गुध्यति गुध परिवेष्टने ण्वुल् । द्वे । गोह इति ख्यातायाः रक्तं पिबति आ
तोनुपतिकः रक्तपा स्याज्जलौकायां डाकिन्यां नाभुराक्षसे जलमोको स्याः ओक उचः क इति निपातितोऽदन्त ओकशब्दः सान्तोपि जलोरगी जलौका तु जलौका च जलौक
सौ इति संसारावर्ते द्वे ह्रु वचनं प्रायिकं जलौकापि जलौका स्याज्जलूका जलजन्तुके इति तारपालः त्रीणि २२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री
अ·को·
टी·रा·
५६

मुक्ताः स्फुटं त्यत्र स्फुट विकसने हलश्चेति घञ् शुच्यति शोचति शोकति वा शुच्य अभिषवे शुच शोके शुक गतौ वा क्तिच् शुक्तिः कपाल शकलं शंखे शंखन खेपि च नरव्यस्याः वर्तते दुर्वा
मम मुक्ता स्फोटः शुक्तिश्च स्त्रियां द्वे· शंखनति जनयति खन अवदारणे· अन्येभ्योपीति डः शंखं अस्येति वा शम्यत्यमलं हमी वा शमु उपशमे ऽन्तर्भावितण्यर्थः शमेः खः शंखः कं वोनयो
भिन्नाभाला स्थिनिधि भिन्नखेकाम्यते कमु कान्तौ जम्बादयश्चेति निपातितः कंबुर्वलयशंखयोः गजे शंबूके कूर्चूरे ग्रीवायामलिके पिचेति हेमः एतौ पुन्नपुंसके द्वे· ६ क्षुद्राश्च ते शंख्या
श्च· शं कंते· शकि शंकायां· कर्त्तरि अनुदात्तेतश्च हलादेरिति युच्· संज्ञायां कन्· शंखस्य नख इव तिनुमुकुटः शंखनंति· बहुलमन्यत्रापीति युच् ल्युड्वा· स्वार्थिकः इत्यन्ये द्वे·
शाम्यति· शमु उपशमे उलूकादयश्चेति निपातितः शंबूकपिण्याकमधूकफेन इत्यमरमालायां पुल्लिंगः शम्बूकानन नपुंसके इति मेदिनी हेलिगतः शंबूकः शंबुकश्चेत पूर्वः कांतं
स्तु सर्वदा· ककारेण विनाशेषोदृश्यते गंधविस्तर इत्युत्पलिनी· जलजाः शुक्तयः द्वे· २३ बिभेति त्रिभीभये रणभीकेति कन् भेको मंडूकमेघयोः मंडयति जलाशयं मडि तेवा

मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कंबुरस्त्रियां क्षुद्रशंखाः शंखनखाः शंबूका जलशुक्तयः २३ भेके मंडूकवर्षाभूशालूरप्लवदर्दुराः शि
१९ लीगं डूपदी भेकी वर्षाभ्वा कमठी दुलिः २४

मडि भूषायां शालि मंडिभ्यामूकण्· मंडूकी मंडूकपर्णी मंडूको भेकशालाको इति हेमः वर्षासु भवति भुवः संज्ञान्तरयोरि
तिक्किप् वर्षाभूः स्त्री च शलाघ श्लाघायां भूलनाज्ञ चयोः पुमानिति विश्वमेदिन्यौ शाडते शाडृगतौ खर्जपिंजादिभ्य उराल चाविन्मूरः उलयोरैक्यं शालते वा शालकसानेपरिसरत्क कलास खेरस्माल्
र इत्यूष्म विवेकादृत्यादिरपिप्लव ते प्लुङ्गतौ अच् प्लवः प्लक्षप्लुतो कपो शब्दे कारवे म्लेच्छ जातो भेककतैलयोः क्रमनिम्नमही भाग कुलके जलवायसे केवर्तो मुसलके गंधतृणे
पिस्यान्नपुंसकं दृणाति शब्देः कर्णौ दृ विदारणे मकुरदर्दुरा विनिपातितः दर्दुरः पर्वते पुंसि त्रिषो वडू वमभाजने दुर्दुर स्नाय दे भेके वाद्यभांडादि मेदयोः दर्दुरा चंडिकायां स्या
न्पाम जाले नपुंसकं षट् शिल तिशिल उंच्छे इगुपधेति कः जातेरस्त्रीति ङीष् द्वे· किं चुलक भार्या इति स्वामी ह्रस्व इ किंचुलुक जातेः वर्षाभ्वीत्यसाधु ङीविधायकाभावात् लि
यामपि वर्षाभूरित्येव भेकी पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति यादवः अन्यत्तु गौरादित्वात् ङीषमिच्छन्ति अतएव भागुर्यमरमालयोर्वर्षाभ्वीति दृश्यते· द्वे मंडूक्याः ।
क्षुद्रमंडूकस्य त्यन्ये जानेरिति पुंयोगेति वा ङीष् कमठोऽलति दुल उत्क्षेपे आधृषीयः इगुपधादिति किः दुलिः स्त्रियां कमठ्यां कोऽटने· द्वे कच्छप्याः २४॥

५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मद्गुरो मत्स्यभेदः योग्यतया सा दृश्या द्वास्तस्यप्रियास्त्री · शृणाति · शृ हिंसायां · शृणातेर्ह्रस्वश्चेति गन् ह्रस्वत्वं कित्त्वं नुडागमश्च पुंयोगेति जातेरिति वा ङीष् · मद्गुरीत्यपि · भार्याभेक
स्य वर्षाभ्वी शृङ्गी स्यान्मद्गुरस्य तु शिली गंडूपदस्यापि दुलिः स्यात्कमठस्य तु लिस्य मरमाला · एकं · दुर्निंदितं नामास्याः अनो बहुव्रीहेरिति ङीप् डाबुभाभ्यां · अन उपधेति वा ङीप्
दुर्नाम्नी · क्षुभ्नादित्वान्नणत्वं · दीर्घः कोशोयस्याः जातेरिति ङीष् · संज्ञायां कन् · केण इति ह्रस्वः तालव्या मूर्द्धन्याश्चैते शटी च परिवेशः विश्वकुसेनोभे शः प्रतिष्कशः कोशविश
दो चे त्यूष्मविवेकः द्वे भिन्नापि इति ख्याताया: जलमाशेरोत्र्दयमस्य जलमाशेते तेति षुत्यत्रेति वा · पुंसीति घः जलाशयो जलाधारे स्यादुभौ रेऽन्यलिंगकं · आध्रियतेत्र · धृञ्
अवस्थाने · अध्यायन्यायेति घञ् · जलस्याधारः द्वे · तत्रतेषु मध्ये · अगाधं जलं यत्र स जलाशयः ह्रादते · ह्राद अव्यक्ते शब्दे · पचाद्यच् · पृषोदरादित्वाद्ध्रस्वः एकं २५ आहूयंतेत्र द्वे
त्रस्पर्द्धायां शब्देच · निपानमाहावः नियतं पिवंत्यस्मिन् · करणेति ल्युट् · द्वे कूपसमीपरचितजलाधारस्य अभ्यते · अमगत्यादौ · अर्जिदृशिकम्यमीति कुः धुक् च · यद्वा · अं

मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका जलाशयो जलाधारस्तत्रागाधजलो ह्रदः २५ आहावस्तु निपानं स्यादुपकूपजलाशये पुंस्येवांधुः प्र
हिः कूप उदपानं तु पुंसि वा २६ नेमिस्त्रिकास्य वीनाहो मुखबंधनमस्य यत् पुष्करिण्यां तु खातं स्यादखातं देवखातके २७ ॥ धयति · अंधदृष्टयुपघाते ·
मृगय्वादित्वात् कुः प्रह्रियते · प्रेहरतेः कूपे इति इडिच्च · कौति कुशब्दे · कुयुभ्यां चेति पः दीर्घश्च · कुत्सिता ईषद्वा आपो त्रास्य कूपः · ऋक्पूरित्यः उदनोरित्यत्र दीर्घनिर्देशादन्यत्रापि पूरि
ति वा · कूपः कूपक मृन्मानगर्त्तौ तु गुण वृक्षयोः उदकं पिबंत्यस्मिन् · अधिकरणे ल्युट् · उदकस्योदः तु स्थाने च उचितः चत्वारि २६ अंस्य कूपस्य नयं त्यनयानियोमिः नेमिर्नी
तिनिः कूपत्रिका चक्रांतयोः स्त्रियां ति स्तोऽस्त्रयोऽस्याः संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति कन् त्रिका कूपस्य नेमौ स्यात्त्रिकं पृष्ठाधरे स्त्रियामिति विश्वमेदिन्यौ · द्वे · कूपस्यांतेर
ज्वादिधारणार्थे दारुपंत्रस्य · विनह्यते नेन · नह बंधने हलश्चेति घञ् · उपसर्गस्य घञीति दीर्घः कूपमुखेष्टकादिभिर्बद्धस्यैकं · पुष्कराणि संत्यस्यां पुष्करादिभ्यो देशे इतीनिः पुष्करिणी
नद्यां सरोजिन्यां जलाशये · अखानि · खनु अवदारणे क्तः जनसनखनामित्यात्वं · द्वे · समचतुरस्रखातस्य · खाताद्भिन्नं देवेन खातं · अखातो देवखातक इति पुंस्कांडे भर
दत्तात् · पुंस्यपि · द्वे · अकृत्रिमजलाशयस्य · देवद्वारस्य जलाशयस्येत्यन्ये २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·
अ·को·
टी·रा·
४७

पद्मानामाकरः तड्यते तड आघाते तडागः इत्यश्चेति निपातितः तडागस्तु जलाधारविशेषे यंत्र कूपके इति विश्वः पिनाकादित्वात्तडाग इति कश्चित् तटमकति अगिनि वा अकअ
गकुटिलायां गतौ कर्मण्यणित्येके ह्रसपद्मागाधजलाशयस्य कासते कासृ शब्दे तुषारादयश्चेत्यारन् यद्वा ईषत् सारोस्य ईषदर्थे निकोः कादेशः कासोस्यास्तीति वा अर्श आद्य
च् कासमृच्छति ऋ गतौ कर्मण्यणिति वा स्त्रियते सृ गतौ कर्मण्यसुन् तत एव महत्वे गौरादित्वात् ङीष् त्रीणि कृत्रिमपद्माकरस्य पंचापि सरोमात्रस्येत्यन्ये विशंत्यत्र भेका
दयः विशप्रवेशने जृविशिभ्यां झच् पलति पल्यते वा पल गतौ सानसिपर्णसीति वलच् वेशन्तः पल्वलोऽस्त्रीति वाचस्पतिः अल्पं च तत्सरश्च त्रीणि उप्यंते पद्मादयस्यां डुवप्
बीजतंतुसंताने वसिवपियजिराजीति इञ् कृदिकारादिति वा ङीष् वाप्यां वापिरपिस्मृतेति द्विरूपकोशः दीर्घैव संज्ञायां कन् द्वे ~ खन्यते खनु अवदारणे ई च खन इति
यत् परितः खन्यत इति अन्येभ्योपीति ङः द्वे दुर्गादिपरितः खातस्य आध्रियते जलमस्मिन् अध्यायन्यायेति घञ् आधारश्चाधिकरणेप्यालवालेः वु धारणे एकं बंध

पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ~ खेयं तु परिखाधारस्त्वंभसां यत्र धारणं स्यादालवालमा
वालमावापोऽथ नदी सरित् ~ तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनी स्रोतस्वती द्वीपवती स्रवंती निम्नगाऽपगा ३०॥ ॥ ॥

इतिख्यातस्य आसमंतात् जलस्य लवमालाति ला आदाने मूलविभुजादिकः लवमालातीति तद्भिन्नं न समासे ह्रस्वादीत्यन्ये आवलते भ्रमोनेन वल संवरणे हलश्चे
ति घञ् आ ईषत् वालाः वृक्षा अत्र वा आवपंति जलमत्र डुवप् बीजतंतुसंताने हलश्चेति घञ् आवापो भांडवपनेपरिक्षेपालवालयोः त्रीणि वृक्षमूलजलाधारस्य नदति
णदु अव्यक्ते शब्दे पचादिषु नद डिति टित्वनिपातनात् टिड्ढेति ङीप् सरति सृ गतौ सरितेरिति ~ तरंगाः संत्यस्यां अत इनिः शैवलमस्त्यस्याः तटमस्त्यस्याः ह्रदाः सं
त्यस्यां ह्रादिनीत्यन्ये धुनोति वेतसादीन् क्विप् पृषोदरादित्वात् नुक् नांतत्वात् ङीप् स्रोतांसि संत्यस्यां मतुप् अस्मायेति विनो तु स्रोतस्विनीत्यपि द्वीपमस्त्यस्यां मतुप् स्र
वति लटः शतृ उगितश्चेति ङीप् शपश्यनोर्नित्यं नुम् निम्नं गच्छति गम्लृ गतौ अन्येभ्योपीति डः अपां समूह आपः तेन गच्छतीति डः अपगच्छतीति डः ह्रस्वादिरेपि विद्या
दगारमागारमपगामापगामपीति द्विरूपकोशः द्वादश ॥ ३०॥

CC-0. In Public Domain. Digitization by eGangotri

गच्छतिगनृगम्यद्योः विष्णुःपदंस्थानंयस्याः गौरादिः विष्णुपदंनभो ऽङ्घ्रयोः विष्णुपदस्तु क्षीरोदे विष्णुपदी सुरापगेति हैमः जन्होराजर्षेस्तनया सुरालनिम्नगा सुरआ
दिः भगीरथस्येयं तस्येदमित्यण् त्रीन्पथोगच्छति डः यद्वा त्रयाणां पथां समाहारः त्रिपथं तेन गच्छति डः त्रीणि स्रोतांसि यस्याः भीष्मसूतपूः भालिप्रसवेक्षिपू अष्टौ ३७
कलिंदस्येयं तस्येदमित्यण् सूर्यस्यतनया यच्छति यम उपरमे अर्जियमिशीङ् भ्य श्वेत्युननुप्रामनेस्वसा चत्वारि रेवते रेवृ प्लवगतौ पचाद्यच् नर्मरदाति द्यतिवाड् दा
नदाने दो अवखंडनेवा आतोनुपेतिकः नर्मदः केलिसचिवे नर्मदा सरिदंतरे इति विश्वमेदिन्यौ सोमात् सोमवंशजात् पुरूरवस उद्भवति तेनावतारितत्वात् यद्वा सो
मोमृतमुद्भवत्यस्याः स्वर्गप्रदत्वात् अप् सोमाद्भुद्भवति पचाद्यच् मेकलस्यकन्यापरे द्वे वा कन्यका चत्वारि ३८ करस्पतोयं तद् अत्रास्ति अर्शआद्यच् गौरीविवाहे
शंकरहस्तच्युतं सदानीरं यस्याः प्रथमंकर्कटे देवी त्र्यहं गंगा रजस्वला सर्वा रक्तवहा नद्यः करतोयांबुवाहिनीति स्मृतेः द्वे बाहुं छिन्नं दत्तवः तौ लिखितस्य ऋषेः

गंगाविष्णुपदीजन्हुतनयासुरनिम्नगा भागीरथीत्रिपथगात्रिस्रोताभीष्मसूरपि ३७ कालिंदीसूर्यतनयायमुनाशमनस्वसा रेवातुनर्मदासो
मोद्भवामेकलकन्यका ३८ करतोयासदानीरा बाहुदासैतवाहिनी शतद्रुस्तुशुतुद्रिः स्याद्विपाशातुविपाट्स्त्रियाम् ३९ शोणोहिरण्यवाहःस्या

द्रुदाम्नआतोनुपेतिकः यद्वा बहुदस्य कार्तवीर्यस्येयं तेनावतारितत्वात्तस्येदमित्यण् अजादित्वाट्टाप् सितानिवाहनानि यस्यार्जुनस्य तत् ९ कुल्याल्पाकृत्रिमासरित्
स्येयं यद्वा सितस्यार्जुनस्येयं सैतीचासौवाहिनी नदीच द्वे शतधा द्रवति द्रुगतौ हरिमितयोर्द्रुवः शतेचेत्युर्डित् पूजितं तु दंतितु दव्यथने दुः गुपधात्कि दिती नः वाहु
लकाद्रुः कृ इमंमेगंगेयमुनेसरस्वतिशुतुद्रीति हि श्रुतिः यत्तु मुकुटः शतद्रुरेव पृषोदरादित्वात् शतद्रोर्वर्णविकारः शुतुद्रिरिति स्वामी शितं तीक्ष्णं तुदति शितुद्रुरिति कौ
मुदीत्याह तन्न एतद्बुध्यमानाः शितद्रुः सितद्रुर्वेत्याहुरित्यनेन तेनास्यार्थस्य दूषितत्वात् व्युत्पत्त्यंतरस्य कृतत्वाच्च द्वे पाशं विमोचयति सत्या पयाशात्मादिना
पाशाद्विमोचनदतिलिच् पचाद्यच् तस्या देवर्षिवशेतिक्ष्वि पिविपाट् द्वे ३९ शोणति शोणवर्णगत्योः पचाद्यच् शोणः कृशानौ स्योनाके लोहिताश्वे नदे पुमानति
षुकोकनदच्छाये हिरण्यं वाहावस्य हिरण्यं वहति कर्मण्यण् द्वे ततः द्वे कुले आलिगले कुदुंवेदां पन्ये वा साधुः तत्र साधुरिति यत् कुल्यानदी कुल्यमस्थिकुल्या वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Domain. Digitization by eGangotri

प्र·
अ·को·
टी·रा·
५८

शरादीनां चेति दीर्घः· वेत्रमस्त्यस्यां· मतुप्· चंद्रभागयोः पर्वतयोरियं· तत्प्रभवत्वात्· तस्येदमित्यण्· टिड्ढेति ङीप् प्राप्तः· चंद्रभागाह्यनद्यामिति वह्वादिगणसूत्रान्नभ
वति स्वरस्तूपयोर्विशेषात्· नाम्यां तु तत्प्रनीसेन्या चांद्रभागी तु चंद्रिका· चांद्रभागा शारदा तु कश्मीरे तु सरस्वतीति शब्दार्णवः· संज्ञापूर्वकत्वाद्वृद्ध्यभावः· चंद्रभागा चांद्र
भागा चांद्रभागी च समा मता· चंद्रभागी च सैवोक्तेति द्विरूपकोशः· सरांसि संत्यस्यां· मतुप्· सरस्वांस्तु नदे वार्द्धौ नाऽन्यवद्रसिके त्रिषु· या वाली स्त्री रत्नवाग्देवी गोनदीषु नदी
भिदि मनुपन्यामपि ३५ कस्य जलस्य वेरं शरीरं· तस्येयं· ई ष हेरमस्या वा· कावेरी स्यात्सरिद्भेदे पण्यनारीहरिद्रयोः· अन्याः कौशिकी गंडकी चर्मण्वती गोदावर्या
दयः· संभिद्यंते मिलंत्यत्र· भिदिर् विदारणे· हलश्चेति घञ्· संभेदः· स्फुटने संगे· सिंधोः संगमः· नल्यते· णल बंधने· कर्मणि घञ्· उपसर्गादिति णत्वं· गौरादिङी
ष्· कृत्रिमे जलनिस्सरणमार्गे स्त्रैकं ३६ दिव्यति दिवु क्रीडादौ· एवुल्· देविकायां नद्यां· सरति· सर्तेरप्युः· अयूरिन्ये के· सरय्वां भवे· तत्र भव इत्यण्· देविकाशिंशपेत्यचामादे

शरावती वेत्रवती चंद्रभागा सरस्वती ३४ कावेरी सरितोन्याश्च संभेदः सिंधुसंगमः द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरे ३५ देविकायां
सरय्वां च भवे दाविकसारवौ सौगंधिकं तु कल्हारं हल्लकं रक्तसंध्यकं ३६ स्यादुत्पलं कुवलयमथ नीलांबुजन्म च ॥ (द्वारत्वे· दाडिनायनेति लोपः स्त्रियां टि

ड्ढेति ङीप्· क्रमेणैकैकं ॥ सुगंध्येव स्वार्थे विनयादिभ्यष्ठक्· शोभनो गंधः प्रयोजनमस्यां प्रयोजनमिति ठगिति वा· सौगंधिकं तु कल्हारे पद्मरागे च कत्तृणे· कस्य जला
स्य हार इव केल्हादते वा· अच्· पृषोदरादिः· द्वे शुक्लकल्हारस्य· मुंडीति ख्यातस्येत्यन्ये· हल्लति· हल्ल विकसने· ण्वुल्· यद्वा· हलनं· संपदादिः हल्लेलाति· ला दाने· आतो
नुपेति कः· संज्ञायां कन्· रक्तं संध्येव· इवार्थे कन्· केणः रक्ता संधीनकति· अक कुटिलायां गतौ मूलविभुजादिरिति वा· द्वे रक्तकल्हारस्य द्वे रक्तं वर्णत्रिकालविकासि पुष्प्या
स्य वा ३६ उत्पलति· पल गतौ· पचाद्यच्· कोर्वलयमिव शोभाकरत्वात्· कुवलं तूत्पलं कुवमिति त्रिकांडशेषः· तत्र कौ वलते· वल संवरणे· पचाद्यच्· अन्येष्वपीति ड कु त्व यद्वा
कुवते· कूङ् शब्दे· कुटादिः· पचाद्यचि उवङ्· द्वे कमलकुमुदादीनां सामान्ये नः· अत एव इंदीवरे मांसशून्ये उत्पलं कुष्ठभूरुहे इति रभसः· श्यामशितिकंठनीलं कुवलयमिंदी ५८
वरं च नीलाभ्रमिति नाममालाच· नीलं च तदंबुजन्म च· इंदति· इदि परमैश्वर्ये· इन्· कृदिकारादिति ङीष्· इंदीलक्ष्मीः तस्या वरमिष्टं· इंदीवरं कुवलये प्रतावर्यां च योषिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुवलयं स्यादिंदीवरमित्यपीति व्याडिरिंदीवारमपि· द्वे नीलोत्पलस्य· कौ मोदते· मुद हर्षे· मूलविभुजादिः कुमुदं कैरवे रक्तपद्मे स्त्री कुम्भिकौषधौ· गंभार्यां पुंसि दिग्ग
गे नागशाखामृगांतरे के जले रौति· रुशब्दे· पचाद्यच्· तत्पुरुषे कृतीत्यलुक्· कैरवस्य हंसस्येदं प्रियं· कैरवं गंधकांतं च गर्दभं कुमुदं कुमुदिनि माधवः द्वे शुक्लोत्पलस्य
३७ एषां सौगंधिकादीनां कंदो मूलं· शाल्यते शालति वा· शाल चलनसंवरणयोः· शालिमंडिभ्यामूकण् वृद्धिश्च एकं· वारिणि पर्णान्यस्याः पाककर्णेति· ङीष्· यद्वा· वारि
पिपर्ति· पॄ पालनपूरणयोः· धापॄवस्यज्यतिभ्यो नः· जातेरिति ङीष्· अतएव कुंभीकी वारपर्णः स्यादित्येके पठंति· कुंभोस्त्यस्याः ठन्· द्वे· जलं नीलयति· नीलवर्णे णिच्·
कर्मण्यण्· जले शेते तिष्ठति· शीङो वलच्· वलच वालनः शेवालश्च शैवालः शेवलो जलनीलिका· त्रीणि कुमुदान्यत्र देशे संति· कुमुदनड्वेतसेभ्यो ड्मतुप्· ऋय
इति वत्वं ३८ पुष्करादिभ्य इतीनौ कुमुदिनी· द्वे कुमुदयुक्तदेशस्य· कुमुदलतायाः इत्यन्ये· नडाः संत्यत्र· पुष्करादिभ्य इतीनिः· डलयोरैक्यं· यद्वा नलमत्रास्ति·।,

इंदीवरं च नीलेस्मिन् सिते कुमुदकैरवे ३७ शालूकमेषां कंदः स्याद्वारिपर्णी तु कुंभिका जलनीली तु शैवालं शैवालोथ कुमुद्वती ३८ कुमु
दिन्यां नलिन्यां तु बिसिनी पद्मिनी मुखाः वा पुंसि पद्मं नलिनमरविंदं महोत्पलम् ३९ सहस्रपत्रं कमलं शतपत्रं कुशेशयं॥ ॥

खलादिभ्य इतीनिः नलीमनः शिलायां तु नलिनेपि नलं मतमिति विश्वः नलिनं नलिका तायां वुजेषु नलिनी पुनः पद्माकरे गंगाद्रियोरिति हेमः· बिसमस्त्यस्याः पू
र्ववदिनिः एवं पद्मिनी· मुखशब्दाद्दाद्यर्थान्मृणालिनी कमलिनी स्याद् यः पद्मिनी पद्मसंघाते स्त्री विशेषसरोंबुज इति मेदिनी पद्मिनी योषिदंतरे· अब्जिनी सरस्वं
चेति हेमः· पद्यते· पद्गतौ· अर्तिसुखितिमन्· पद्मो स्त्री पद्मके व्यूहनिधिसंख्यांतरे बुजे· नानागे स्त्री पंकजिका श्रीचार्वी दीपन्नगीषु च नलति· णल गंधे रनन· अरं
शीघ्रं लिप्सां विंदति· गवादिष्वरविंदरितिशः शमुचादीनामिति नुम् अराकारालिपत्राणि विंदति वा महच्च तदुत्पलं च· उत्पलं कुष्ठभूरुहे इंदीवरे मांसशून्ये इति हेमः ३८
सहस्रं पत्राण्यस्य· कं जलमलति अलं भूषणे दी· मूलविभुजादित्वात्कः· यद्वा काम्यते· कमुकांतौ· वृषादिभ्य इति कलच्· कमलं व्योम्नि भेषजे· पंकजे सलिले ताम्रेक
मलस्तु मृगांतरे· कमला श्री वरनार्योरिति हेमः· शतं पत्राण्यस्य· शतपत्रः शिखंडिनि दार्वाघाटे सारसे च कमले तु नपुंसकमिति विश्वमेदिन्यौ· कुशे जले शेते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·

अ·को अधिकरणेघञेतेरित्यच· शयवासेत्यलुक्· पंकेरोहति· रुहप्रादुर्भावे· इगुपधेतिकः तत्पुरुषेकृतीत्यलुक्· तामरंघृतमर्णश्चेतिरुद्रः तत्रसलिलेसरस्वप्रेअन्येभ्योपीतिडः

टी·रा· पद्मं· तम्यते· तमुकांक्षायां· घञ्नोदात्तोपदेशस्येतिनिषेधस्यानित्यत्वान्नवृद्धिनिषेधः रस्यतेरसआस्वादने·चुरादावदंतः एरच· तामंचतद्रसंच· तामरसंपद्मेताम्र

५८ कांचनयोरपि· सरसिभवं· तत्रभवइत्यण्· सारसंसरसीरुहे· सारसःपुष्कराख्येस्यादितिहेमः सरस्यांरोहति· इगुपधेतिकः ४०विसस्यप्रसूनं· केसरस्यराज्यस्या

स्ति· अन्येभ्योपिदृश्यतइतिवः राजीवंनलिनेनातुभेदेहरिणमीनयोः पुष्णाति· पुषपुष्टौ· पुषःकिदितिकरन्· पुष्करंद्वीपतीर्थाहिखगरागौषधांतरे· तूर्यास्य

ग्रसिफलेकांडेशुंडाग्रेखजलेंबुजेइतिहेमः अंभसिरोहति· षोडश· पुंडयति· मडिभूषायां· पुडिच· कर्करीकादयश्चेत्यरीकन्· पुंडरीकंसितांभोजसितच्छ

त्रेचभेषजे· पुंसिव्याघ्रेग्निदिग्नागेकोशकारांतरेपिच· सितंशुक्लंचतत्अंभोजंच· द्वे· रक्तंचतत्सरोरुहंच ४१ रक्तंचतदुत्पलंचकोकाश्चक्रानन्दतिःएरदअच्

पंकेरुहंतामरसंसारसंसरसीरुहम् ४० विसप्रसूनराजीवपुष्करांभोरुहाणिच पुंडरीकंसिताम्भोजम् ॥

थरक्तसरोरुहे ४१ रक्तोत्पलंकोकनदंनालोनालमथास्त्रियां मृणालंविसमब्जादिकदंवेषंडमस्त्रियां ४२॥

क्तेशब्दे· अंतर्भावितण्यर्थः मूलविभुजादिः अथकोकनदंरक्तकुमुदेरक्तपंकजेइतिविश्वः त्रीणि· नलति· णलबंधे· ज्वलितीतिणः नालंनालीपद्मदंडेनालीशा

कफलेंवकेहेउत्पलादिदंडस्यमृण्यते· मृणहिंसायां· तमिविशिविडिमृडीतिकालन्· अपचयविवक्षायांगौरादित्वान्· ङीषिमृणालीत्यपि· मृणालंनलदेक्ली

वंपुंनपुंसकयोर्बिसइतिविश्वः बिसति· बिसप्रेरणे· इगुपधेतिकः मृणालेतुबिशंबिसमितिद्विरूपकोशः द्वेअब्जादीनांमूलस्य सनोति· षणुदाने· त्रमंः

ताडुः वाहुलकात्सत्वाभावः षंडः स्मृतोबलीबर्देषंडंतुकाननेभवेदितिमूर्द्धन्यादावजयः शडिरुजायांसंघातेच· घञ्· तालव्यामूर्द्धन्योः अब्जादिकदंवेषंडशाम

शाब्दोयं· मूर्द्धन्यएववृषभेपूर्वाचार्येर्विनिर्दिष्टइत्यूष्मविवेकः मकरमुकुरोदर्पणेषंडः समूहेदारदोबुधाविति सारस्वतकोशः एकमब्जादीनांसमूहस्य ४३॥ ५८

CC-0. In Public Domain. Digitization by eGangotri

करं हाटयति हटदीप्तौ। ण्यंतः कर्मण्यण्। कं जलं रहति त्यजति करहं पद्मं। ततो हटति वहिर्गच्छति इति मुकुटः तन्न। करहहाट इति प्रसंगात्। इत्थं प्रसंगाच्च।
करहाटः पद्मकंदे पुष्पद्रुमविशेषयोरिति हैमः। शिफा मूलं तत्सम्बन्धो हस्तस्तत्सहितः कंदो मूलं। शिफेति च कंदमिति च पृथक् नामनी इत्यन्ये। द्वे पद्मकंदस्य। किंचि
ज्जलति। जल अपवारणे वा हुलच्छ्का लकः। के जले सरति। सृ गतौ पचाद्यच्। हलदंतादिति लुक्। इत्यसः। केशरोप्ययं तत्रशृ हिंसायाम् अस्मादरप्रत्यये तालव्यः शः। केसरं हि
गुनिल्लीवं किंजल्के न स्त्रियां पुमानसिंहच्छटायां पुन्नागवकुले नागकेसरे द्वे। संवर्त्तते। वृतु वर्त्तने। इगुपधज्ञाप्रीकिरः कः इति। विदिच्छिदिकीर्तिभ्य अधेतीरन। संवर्त्ति

करहाटः शिफाकंदः किंजल्कः केसरोऽस्त्रियाम् संवर्त्तिका नवदलं वीजकोशो वराटकः ४३ इति
वारिवर्गः उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकं पातालभोगिनरकं वारि चैषां च संगतम्॥
॥ ४४ ॥ इत्यमरसिंहकृतौ नामलिङ्गानुशासने स्वरादिकांडः प्रथमः सांग एव समर्थितः ४५ ॥

र्नवपत्त्रिकेति वोपालितः ततः स्वार्थे कन्। नवं च तद्दलं च। द्वे पद्मादीनां नवपत्त्रस्य बीजस्य कोशः पात्रमाधारः तालव्यांतोपि। त्रियते। दलैः वृञ् आवरणे। अ
न्येभ्योपीति आटच्। ततः स्वार्थे कः यद्वा। वरं दलवरणमटति। अट गतौ। कर्मण्यण्। ततः स्वार्थे कन्। वराटकः पद्मबीजकोषः ज्ञो कपर्दके ४३ इति वारि
वर्गः॥ उक्तान्वर्गान्संगृह्णाति। उक्तमिति। अत्रैकादश वर्गाः ४४ ४५ इति श्रीवघेलवंशोद्भवश्रीमहीपुरविषयाधिपश्रीकीर्तिसिंहदेवाज्ञया श्रीभट्टोजि
दीक्षितात्मजश्रीभानुदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां प्रथमकाण्डः संपूर्णतामगात्॥ मी। कार्तिक शुक्ल। ३ शुक्रवार॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥इतिप्रथमकाण्डसमाप्तम्॥

CC-0. In Public Domain. Digitization by eGangotri

॥सटीकामरकोशस्यद्वितीयकाण्डःप्रारम्भः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·को· ॥श्रीगणेशाय नमः॥ इह द्वितीयकाण्डे वर्गा उक्तावदिनुमारब्धाः आदि कर्मणि क्तः कर्त्तरि च की दृशाः सांगोपांगैः पृथ्व्यादिभिरुपलक्षिताः तत्रांगानि मृदादीनि उपांगानि खिम
टी·रा· लादीनि·आपणादीनि·विपण्यादीनि·शिलादीनि·वृक्षादीनि·पुष्पादीनि·मृगशब्दोऽरण्ये पशुमात्र परः आरण्याः पशवो मृगा इति स्मृतेः आदिशब्देन पक्षिकीटादी
द्वी·कां· नां ग्रहणं तस्य चांगोपांगानि पक्षिपक्षादीनि यद्वा मृगान्तं शीलं यस्य स मृगादी सिंहः १ भवति कर्त्तरि क्विप् भूः स्थानमात्रे कथिता धरण्यामपि योषिति·यत्तु भ
१ वन्त्यस्यां सर्वमिति भूः बहुलवचनादधिकरणे क्विति स्वामि मुकुटः तन्न·उक्तरीत्या निर्वाहात्·अद्ध्यः पृथिवीति श्रुतिविरोधाच्च भवति·भुवः किदिति भिः भुवः किन्नि
निमुकुटः तन्न·तादृशसूत्रादर्शनात् कृदिकारादिति ङीष्वा·भूमिः स्थितौ स्थानमात्रे इति हेमः न चलति·चल कंपने·पचाद्यच् अचला·संस्यस्यां वा अच·अचलस्तु गिरि
कीलयोः अचला भुवीति हेमः नास्यं तोस्याः यद्वा·अनंतोऽस्मासिधारको अस्याः अनंतः केशवे शेषे पुमान्निरवधौ त्रिषु·अनेनाचविशल्यायां शारिवादूर्वयोरपि·

श्रीगणेशाय नमः॥ वर्गाः पृथ्वी पुर क्ष्माभृद्वनौषधिमृगादिभिः नृब्रह्मक्षत्रविट्शूद्रैः सांगोपांगैरिहोदिताः १ भूर्भूमिरचलानन्तारसावि
श्वंभरा स्थिरा धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः २॥ ११ कणादुरालभा पथ्या पार्वत्यामलकी शुक्ले·विश्वंभरा गुडूच्योः स्याद्रनंतं सुरवर्त्म

नि रसोस्यामस्ति अर्श आद्यच्·रस्यते वा रस आस्वादने·चुरादावदंतः घञ्·अज्वायत्तु घञर्थे क इति मुकुटः तन्न·परिगणनात्·अचः सत्वाच्च विश्वं विभर्त्ति डुभृञ्·संज्ञा
यांभृत्वृजीति खच्·विश्वंभरो च्युते शक्रे पुंसि विश्वंभरा भुवि तिष्ठति·अजिरादित्वान्न कि र च·स्थिरा भूः शालपर्ण्यां ना शृनो मोक्षे वलेत्रिषु·धरति विश्वं धृञ् धारणे·धराः सं
त्यस्यां वा·यद्वा ध्रियते धृङ् अवस्थाने·पचाद्यच् धरः कूर्मे धिपे गिरौ·कर्पास मूलेऽथ धरा मेदो भूमि जरायुषु इति हेमः अभित्रादिभ्य इत्रौ·गौरादि ङीष्·अर्तिसृ
ध्रियनिः कृदिकारादिति ङीष्·गौरादित्वात् ङीषिति मुकुटस्य प्रमादः धरणं धारणो मानविशेषे धरणी भुवीति हेमः क्षौति·टुक्षु शब्दे·बाहुलकान्निः जिनाति·ज्या राम·
वयोहानौ·अघ्न्यादित्वाद्यदंतो निपातः ज्यामौर्वी ज्या वसुंधरेति शाश्वतः कश्यपस्येयम्·काश्यप उक्तो मुनिमृगयोर्भेदे च काश्यपी क्ष्मायां इति विश्वः क्षियति·क्षि १
निवासगत्योः क्तिच् क्तौ चेति क्तिच्·यत्तु क्षियंत्यत्रेति मुकुटः तन्न·अजब्धामिति ल्युटा बाधनात्·क्षितिर्गेहे भुवि क्षये इति हेमः २॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं सहते · षह मर्षणे · पूः सर्वयोरिति खच् · वसु धनमस्त्यस्यां · मतुप् · वसु दधाति · आतोनुपेति कः · ऊर्णोति ऊर्णूयते वा · ऊर्णूञ् आच्छादने · महति ह्रस्वश्चेत्युः · नुलोपो ह्रस्वश्च · वोतो गुणवचनादिति ङीष् · वसु धारयति संज्ञायां भृतॄवृजीति खच् · खचि ह्रस्वः · गोत्राः शैलाः सन्त्यस्यां · अर्श आद्यच् · गां जलं त्रायते वा · त्रैङ् पालने · आतोनुपेति कः · कुवते कूङ् शब्दे मितद्र्वादित्वाड्डुः · प्रथ्यते प्रथ विस्तारे प्रथेः षिवन् संप्रसारणं च · षित्वान्ङीष् · षिवन्नित्येके · पृथिवी · वोतो गुणेति ङीषि पृथ्वी · पृथिवी पृथ्वीति शब्दार्णवः · पृथ्वी भूमौ महत्यां चलकपत्र्यां कृष्णजीरके · क्षमते · क्षमूष् सहने · क्षमेरुपधायालोपश्चेत्यच् · यत्तु पृषोदरादित्वादल्लोपः बाहुलकान्न वृद्धिलोपश्चेति मुकुटः · तन्न · उक्तरीत्या निर्वाहात् · पचाद्यचि क्ष्मा च · अवति अव्यते वा · अवेररक्षणादौ · अर्तिसृधृ इत्यनिः · मेदः अस्त्यस्यां · अत इनिः · मेदः प्रोमेदः कुष्ठे हेति शालिहोत्रः · मेद्यति वा · ञिमिदा ग्रहादित्वादिनिः · मह्यते · मह पूजायां चुरादावदन्तः · ण्यंतादचरः · महिः कृदिकारेति ङीष् · यत्तु मह्यं ते मृतान्यस्यां मह्यने वा पुंसीति घः · गौरादि ङीषिति मुकुटः · तन्न · हलश्चेति घञ् प्र

सर्वंसहा वसुमती वसुधोर्वी वसुंधरा । गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका । उर्वरा
सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥ ४ ऊषवानूषरो द्वावप्यन्यलिंगौ स्थलं स्थली ॥ ९

संगात् · कर्मणि घञ् · स्याप्रसंगाच्च करणाधिकरणयोरनुवर्तनात् · वीचिः पंक्तिर्महिः केलिरित्याद्या ह्रस्वदीर्घयो रिति वाचस्पतिः · यद्वा · महीयते · महीङ् पूजायां कण्ड्वादियगन्तः · क्विबिति क्विप् · यलोपयलोपौ · कृदिकारादिति ङीष् · तदभावे विसर्गः इति कश्चित् · तन्न · कारग्रहणान्नेत्युक्तत्वात् · महीनद्यंतरे भूमौ मह उत्सवतेजसोरिति हैमः · सप्तविंशतिः · ३ मृद्यते मृद क्षोदे · संपदादिः · स्वार्थे मृदस्तिकन् · हैमः · मृच्छब्दात् सस्नौ प्रशंसायां · द्वे प्रशस्तमृदः · ऋच्छति · ऋगतौ · पचाद्यच् · यद्वा ईर्यते · ऋगतौ · ऋदोरप् · उरण्रपरः · यद्वा उर्व्यते · उर्वी हिंसायां · खनोघचेति घः · उपधायां चेति दीर्घस्तु संज्ञापूर्वकत्वान्न · उर्वरति · यद्वा · संपदादिक्विप् · राल्लोपः · उरुः चासौ वरा च उरुर्वरा वा · उर्वरा स्यात्तु भूमात्रे सर्वसस्याढ्यभुव्यपीति हैमः · सर्वाणि चनानि सस्यानि च · तैराढ्या मृत् · एकं · उषति · उष रुजायां · इगुपधेति कः · क्षारयति · क्षर संचलने · णिच् · पचाद्यच् · क्षारा चासौ मृत्तिका च · द्वे · ४ ऊषोस्त्यस्मिन् · मतुप् · ऊषसुषीति रः · द्वे · स्थलति · ष्ठल स्थाने · पचाद्यच् · यत्तु स्थल्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घिपंते स्मिन्भूतानि मृमृशीत्युः मरुर्ना गिरि धन्वनोः धन्व्यतेस्मात् धवि र्गत्यर्थः सौत्र इति मुकुटः तन्न धातुपाठे दर्शनात् कनिन्युवृषीति कनिन् धन्वा तु मरुदेशो नाऽस्त्री वे चापे स्थलेपि च द्वे निर्जलदेशस्य· खिलति· खिलउं छे· इगुपधेति कः खिल्यते वाऽस्मिन् हलश्चेति घञ् संज्ञापूर्वकत्वान्न गुणः नप्रहन्यते स प्रहृ न हिंसागत्योः कर्मणि क्तः समे समानार्थे द्वे हलाद्याक्रष्टस्य ५ गच्छति गम्लृ गतौ· पृषद्बृहन्महज्जगदिति निपातितः शतृवद्भावादुगितश्चेति ङीप् जगत्या छिष्टपेक्तौ वेदवा यौनाऽजंगमे त्रिषु· जगती भुवने क्ष्मायां छंदोभेदे जनेपि च लोक्यते लोकृ दर्शने· घञ्· लोको विश्वे जने इति हेमः विशंत्यत्र विश प्रवेशने विटपविष्टपविशिपोलपाः पादिपाठे तु विष्यते पिष्यते वात्र· पिश गतौ पिष्लृ संचूर्णने वा· विष्टपः पुमानिति वोपालितः भवंत्यस्मिन् रंजेः क्युन् भूसूधूभ्रस्जिभ्य इति क्युन् भुवनं· यत्तु जंगम्यते इति स्वामिना विगृहीतं· यच्च पुनः पुनर्वृद्धिक्षयौ गच्छतीति मुकुटेन तन्न वर्त्तमाने पृषद्बृहदिति सूत्रे यङर्थस्य वृत्तिकृद्भिरनुक्तेः गत्यर्थानां कौटिल्य एव यङ् विधानाच्च एकं महाभूतं पृथ्वी

समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ५ त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् लोकोयं भारतं वर्षं शरावत्यास्तु योवधेः ६ देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ७ आर्यावर्त्तः पुण्यभूमिर्मध्यं विंध्यहिमागयोः ॥

पंचमहाभूतेंद्रियविषयात्मकं तु जगदिति· पृथ्वी जगतो भेदः पंच अयं जंबुद्वीपनवमांशः भरतस्य राज्ञ इदं तस्येदमित्यण्· महर्षिव्यासरचिते जंबूद्वीपे च भारतमिति रभसः दृष्यते· वृषु सेचने भयादीनामुपसंख्यानमित्यच्· पुंनपुंसकयोर्वर्षं जंबूद्वीपाद्यवृष्टिष्विति रुद्रः वर्षं प्रयानं विदुः प्राज्ञा इमं लोकं च भारतमिति भारविः उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणं वर्षं तद्भारतं नाम भारती यत्र संततिः वर्षो स्त्री भारतादौ च जंबूद्वीपाद्यवृष्टिषु· शरावत्या नद्या मर्यादायाः ६ प्राचा सहितो दक्षिणो देशः· प्राच्यां भवः द्युप्रागपेति यत् एकं तत एवावधेः पश्चिमेन सहित उत्तरो देशः उदीच्यां भवः द्युप्रागिति यत् एकं प्रतिगतोऽन्तं अत्यादयः क्रांताद्यर्थे इति समासः म्लेच्छानां देशः चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते तं म्लेच्छविषयं प्राहुरार्यावर्त्तमतः परं हि शिष्टाचाररहितखशादिदेशस्य· मध्यश्चासौ देशश्च· मध्ये भवः मध्यमः हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि· प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः इति मनुः विनशनं कुरुक्षेत्रं द्वे· ७ आर्या आसमंतात् वर्त्तंतेऽत्र हलश्चेति घञ् पुण्य

दासमुद्राच्च पश्चिमात् तयोरेवान्तरं गिर्योरार्यावर्त्तं विदुर्बुधा इति मनुः हिमप्रधानोऽगः हिमागः हिमालयो रित्तिपाठे तु हिमेन अल्यते अलभूषणादौ घञ् इति विंध्यहिमाग मध्यदेशस्य नियमो वर्त्तते अधिकरणस्य कर्तृत्वविवक्षाऽत्र वर्त्तते क्विप् नहि वृतीति दीर्घः यत्तु नियमेनावध्यते यानि यतं वावर्त्तते नैव संति जना अत्रेति पुंसि वा हुलकात्संपदादित्वात् क्येभ्योपि दृश्यत इति वाऽधिकरणे क्विविति मुकुटः तन्न वाहुलकस्यागतिकगतित्वात् जनः पदं वस्तु यत्र भवे जनपदो जानपदोपि जनदेश कारिति विश्वमेदिन्यौ देशजननिवासस्थानस्य दिशति दिश अतिसर्जने विसिनोति षिञ् बंधने पचाद्यच् परिनिविभ्य इति षत्वं विषीयं ते त्रेत्वरराजिविग्रहे तु मूर्द्धन्यो नुपपन्नः सितसयेति क्ताजं तयोः सूत्रे नुवादात् दृश्यते वा घञ् विषयोऽयस्यया ज्ञातस्तत्र गोचरदेशयोः शब्दादौ जनपदे चेति हेमः उपवर्त्तते त्र ल्युट् इति मुकुटः । तन्न घञोल्युडपवादत्वात् अतोन्यत्रापीति युच् त्रीणि स्थानमात्रस्य ८ गोष्ठशब्दमभिव्याप्य नडाः प्रायाः यत्र कुमुदनडवेतसेभ्यो ड्मतुप् ऋय इति मादुपधेति वा

नीवृज्जनपदो देशविषयौ तूपवर्त्तनम् त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ९ शाद्वलः शादहरि
ते सजंबाले तु पंकिलः जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः १० स्त्री शर्करा शर्करिलः शार्करः शर्करावति देश एवादिमावेवमुन्नेयाः सिक

वत्वं नडाः संत्यस्मिन् नडशादाड्वलच् इति नडाधिकदेशस्य कुमुदानि संत्यत्र कुमुदानि प्रायाण्यत्र एकं वेतसाः संत्यत्र बहवो वेतसा यत्र एकं ८ शीय ९ तावति ११
ति शाद्धूशातने ज्वलादित्वाण्णः शीयते स्मिन्निति वा हलश्चेति घञ् शादो बालतृणमस्मिन् ड्वलच् शादैर्बालतृणैर्हरितः एकं नवतृणप्रचुरस्य जंबालेन पंकेन सह पं कोऽस्मिन्नस्ति पिच्छादित्वादिलच् इति सकर्दमस्य जलं प्रायं यत्र अनुगता आपोऽत्र ऋक्पूरित्यः ऊदनोर्देशे तथाविधो जलप्रायः कं जलं छ्यते परिच्छिन्नत्ति छो छेदने आतो नुपेति कः कच्छमनूपमिति वोपालितः त्रिष्विति वाधनार्थे पुंसीति त्रीणि जलाधिकदेशस्य १० शर्करास्त्यत्र देशे लुविलचौ च सिकताशर्कराभ्यां चेत्यण् अन्यतरस्यां ग्रहणान्मतुप् आद्यौ भवौ मध्यान्मइत्यत्रादेश्चेति वचनान्म आदिमौ शर्करा शर्करिलो देश एव नान्यत्र शार्करः शर्करावानितीमौ तु देशादेशयोः एवं सिकता सिकतिलः नीमौ देश एव सैकतः सिकतावानिति तु देशादेशयोः केचित्तु शर्करासिकताशब्दौ बहुवचनांतावाहुः चत्वारि अश्मप्रायमृदधिकस्य चत्वारि वालुकाबहुलदेशस्य ११

Digitization by eGangotri

अ·को·
टी·रा·
द्वी·कां·
३

नद्यंबुभिः वृष्ट्यंबुभिश्च संपन्नैर्धान्यैः पालितः नदी माता यस्य· नद्यन्तश्चेति कप्· देवो माता यस्य· देवो मेघः सुराणां द्विकमणेकैकं १२ शोभनो राजा यत्र नपूजनादिति टचोः भावः इति
मुकुटः तन्न· बहुव्रीहौ टचोऽप्रसंगात्· मतुप्प्रकरणे सुराज्ञः जन्त्रा सौराज्ये इति साधुः एकं स्वधर्मपरराजयुक्तदेशस्य· अन्यत्र राजमात्रयुक्तदेशे· एकं गावस्तिष्ठन्त्यत्र घञर्थे क
नि कः अंबांबेति षत्वं· गवां स्थानं स्वार्थे कः गोष्ठं गोस्थानकं गोष्ठी सभा संलापयोः स्त्रियां ढे· पूर्वंभूतं गोष्ठं· गोष्ठात् खञ् भूतपूर्वे इति खञ् एकं १४ पर्यन्ते भूः परितः सरंत्यत्र पुंसी
ति घः हेत्वदादिसमीपभूमेः स्त्रियां वर्तमानायामालो सेतुः सिनोति सीयते वा· षिञ् बंधने सितनीति तुन्· आल त्यभः अलवारणे इन्· यद्वा· अल्पते नया इत्यपादिभ्यः
इर्सेतोःपुल इति ख्यातस्य॥ वामेर्वामंवा लूयते लूञ् छेदने· वाहुलकात्कुः नअकृति· अककुटिलायां गतौ· वाहुलकादुः यद्वा नम्यते भूरनेन णमप्रह्वत्वे शब्दे· फलि
पाटिनमिमनिजनांगुक्पटिनाकिधतश्चेन्युः नाकिश्च इकार उच्चारणार्थः वलं ते पालिनो त्र अलीका दयश्चेति निपातः वीलि पिपीलिकादिनिकाभिः तमृत्तं जस्य भ

देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः स्यान्नदीमातृको देवमातृकश्च यथाक्रमं १२ सुराज्ञि देशे राजन्वान् स्यात्ततोन्यत्र राजवान् गोष्ठं गोस्था
नकं तत्तु गौष्ठीनं भूतपूर्वकं १३ पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकं १४ अयनं वर्त्म मार्गाध्वपंथानः

१५ अयते ईयते वानेन करणेति ल्युट्· इति मुकुटः तन्न· घञोल्युटपवादत्वात् अतेस्तु च· कर्मणि वा ल्युट्· अयनं पथि गेहे ऽ र्कस्यो दग्दक्षिणतो ग(१२६वीसृतिः
तो इति हैमः इतं ततः वर्तते ऽ नेन वा· मनिन्· मृज्यन्ते वितृणीक्रियन्ते पादैः मार्ग्यते वा· मृजूशुद्धौ· मार्ग अन्वेषणे वा· यत्तु मृग्यते नेनेति मुकुटेनोक्तं तन्न· अल्लोपस्य स्थानिवत्वा
ल्लक्षणाभावान्नोपधावृद्धिः स्यात् मार्गो मृगमदे मासे सौम्यर्क्षे ऽ न्वेषणे पथि इति हैमः अतिबलं अदमसुले· अदेई चेति क्वनिप् ध्वां नादेशः यत्तु अम्यते सततं गम्यते अने
नेति मुकुटेनोक्तं· तन्न· उक्तसूत्रविरोधात् अतने ध्वक्वनिपोरविधानात् पथ्यन्ते नेन· पथ गतौ· पथिमथ्यृभुक्षामात् इति निः यतन्त्यनेनेति वा· पतेस्थ चेति निः थान्तादेशश्च· पथइ
त्यदन्तोपि वादः पथश्च मार्ग श्चेति त्रिकांडशेषः पद्यते नया पद्यरिभ्यामविः क्रदिकारादिति ङीष् सरन्त्यनया सृगतौ क्तिन् इति मुकुटः तन्न अजव्या मिति ल्युट् प्रसंगात्
करणस्यापि कर्तृत्वविवक्षायां क्तिच· सृतिर्गतौ पथि इति हैमः॥ अर्त्तीन्यनिः सरणिः श्रेणि वर्त्मनोरिति दन्त्यादौ रभसः शुभं शुभमार्गे सेतु च धारणिः पथि चावलावितितालव्या

राम·
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दावजयात्ताल्व्यादिरपि तत्र शृहिंसायां बाहुलकादनिः पादाभ्यां हन्यते हनहिंसागत्योः क्तिन् हिमकाषिहतिषु चेति पद्भावः पद्धतिः पथि पंक्तौ चेति हैमः पादाय हिता शारीरा
वयवा घञ् पद्यात्तदर्थे इति पद्भावः पदमस्मिन् हन्यमिति वा वर्त्तते नया वृते श्चेमनिः वर्त्मा पथि वर्त्तने तर्कपिंडे च इति हैमः चान्मुडित्येके तत्र वर्त्मनि एकः पादोस्या
कुंभपदीषु चेति निपातः यद्वा संख्यासुपूर्वस्येति पादस्यांतलोपः पादोन्यतरस्यामिति वा ङीप् पादः पत् अत्र पक्षे एकपादित्यपि रूपांतरं एकपदं तत्काले नपुंसकं वर्त्म।
निस्त्री स्यात् [illegible] १४ सती पूजायां कुगतीति समासे न पूजनात् संश्चासौ पंथाश्च सन्महदिति तत्पुरुषः ऋक्पूरित्यः त्रीणि शोभनमार्गस्य विरुद्धोध्वा अवाद्यो गताद्य
र्थ इति समासः उपसर्गादध्वन इत्यच् दुष्टोध्वा विरुद्धः पंथाः ऋक्पूरित्यः इति मुकुटः तन्न क्लीबत्वाप्रसंगात् अतो विरुद्धः पथ इति विग्रहीतव्यं कुत्सितोध्वा कुगतीति
समासः कोः कत्तत्पुरुषेचि ईषदर्थे चेति कादेशः कुमार्गोपीषन्मार्गो भवति कुत्सितः पथः वाढः पथश्च मार्गश्चेति त्रिकांडशेषात् द्वंद्वः पथशब्दः पथशब्देन समासेन पुं

स्त्रियोः पद्धतिः पद्या वर्त्मन्ये कपदीति च १५ अतिपंथाः सुपंथाश्च सत्पथश्चार्चितेध्वनि व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः १६ अपं
थास्त्वपथं तुल्ये शृंगाटकचतुष्पथे प्रांतरं दूरशून्योध्वा कांतारो वर्त्म दुर्गमम् १७ गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम्॥ १ सत्वं निर्वाच्यं पथिन्

शब्देन समासे कापथ्यस्ययोरिति कादेशे पथः संख्याव्ययादेरिति क्लीबत्वं भवति सत्पथ सुपंथाः स्याद्व्यध्वो विपथ कापथावितिरभसोप्येवं कुत्सितार्थकुशब्दस्य प
थशब्देन समासे कुपथोपि पंच १६ पथोभावः नञिति तत्पुरुषः पथो विभाषेत्यः अपथं नपुंसकं द्वे मार्गाभावस्य शृंगं प्राधान्यमटति अटगतौ कर्मण्यण् संज्ञायां कन् च
तुर्णां पथां समाहारः तद्धितार्थेति समासः ऋक्पूरिति समासांतः द्विगुरेकवचनमिति एकत्वं पथः संख्येति क्लीबत्वं द्वे प्रकृष्टमंतरमत्र प्रादिभ्य इति बहुव्रीहिः दूरश्चासौ शू
न्यश्च एकं कस्य जलस्य सुखस्य वा अन्तः कांतमृच्छति ऋगतौ कर्मण्यण् एकं १७ गोर्यूतौ छंदस्युपसंख्यानं अध्वपरिमाणे चेत्यवादेशः धन्वंतरसहस्रं तु क्रोशः क्रो
शद्वयं पुनः गव्यूतं स्त्री तु गव्यूतिर्गोरुतं गोमतं चादिति वाचस्पतिः धनुर्हस्तचतुष्टयं द्वाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुंसि भाषित इति शाश्वतः क्रोशयोर्युगं द्वे।
किष्कूनां हस्तानां चतुःशती चतुःशतमिति तुणा न द्विलात् चतुर्गुणं शतमिति वा शाकपार्थिवादिः नल्यते णल बंधने उल्वादित्वात् कान्यस्तु नल्वं हस्तशतमित्या

CC-0. In Public Domain. Digitization by eGangotri

घंटोपलक्षितः पंथाः शाकपार्थिवादिः यद्वा· घंटानां पंथाः घंटाग्रहणं वादित्राणां तद्वतां हस्त्यादीनां चोपलक्षणं· ऋकूपूरिसः संभूय सरंत्यत्रानेनवा सृगतोकरणोति ल्युट् इतिमुकुटः तन्न· घसल्युडपवादत्वात् वाहुलकाद्वाल्युट् युचतुयुक्तः दशधन्वंतरी राजमार्गो घंटापथः स्मृतः इतिचाणक्यः द्वैराजमार्गस्य· तत्संसरणंपुरस्य चिद्धवति· तद्दाउपनिष्क्रिरंतिनिस्सरंतिसैन्यान्यत्र· कृ विक्षेपे· ऋदोरप· इतिमुकुटः तन्न· अपोवाधकस्यल्युटोपिपुंसीतिघस्यापवादत्वात्· यद्वा· उपनिक्षीर्यन्तेसैन्ये हन्यते· कृ हिंसायां· कर्मण्यप· दृदुदुपधस्येतिवः १९ इतिभूमिवर्गः॥ पिपर्त्ति पृ पालनपूरणयोः भ्राजभासेतिक्विप· उदोष्ठ्येत्युत्वं हलिचेति दीर्घं इतिमुकुटः तन्न· वीरित्यस्यविषयात्· पूर्यते· पुर अग्रगमने· संपदादिक्विवा· यत्तु पृ पालने· स्मादृदोरप्पूर्वविप्रतिषेधेनगुणाद्त्वमितिमुकुट आह तन्न पूर्वविप्रतिषेधे प्रमाणाभावात्· पिपर्तीत्यादावतिप्रसंगाच्च· यदपिपिपर्त्तिपूरयतिवेतिविगृह्य पृ पालने इति धातुमुपन्यस्यभ्राजभासेतिक्विविप्युक्तं· तदपिन· उक्तधातोः पूरयतीतिरूपासंभवात्· पूरीआ

घंटापथः संसरणं तत्पुरस्योपनिष्करं १९ इतिभूमिवर्गः॥ पूः स्त्रीपुरीनगर्यौ वापत्तनंपुटभेदनं स्थानीयंनिगमोन्यत्तुयन्मूलनगरात्पुरं १ तच्छाखानगरंवेशोवेश्याजनसमाश्रयः॥

१९ प्यायने इत्यस्मादुक्तसूत्रेणक्विपोऽविधानात् सर्वत्रदीर्घोकाराश्रवणप्रसंगाच्च· पुरतिइगुपधेतिकः कर्मणः कर्तृत्वविवक्षाऽत्र· गौरादित्वाज्ज्ञानेरितिवाङीष्· नगाः संत्यस्मिन्· नगपांडुभ्यो रः पक्षेक्लीवत्वं· पत्तनसाहचर्यात्· पतंतिजनायत्र वीपतिभ्यां तनन् पट्टनंपुटभेदनमितिवाचस्पतिः वाहुलकात्यटस्तनन्· पुटानिपात्राणिभिद्यंतेत्रभिदिर विदारणे· अधिकरणेल्युट्· इतिमुकुटः तन्न· हलश्चेतिघञोल्युडपवादत्वात्· पुंचतुउचितः स्थानायहित तस्मैहितमितिछः नितरांगच्छंत्यत्र गोचरेतिनिपातः निगमाः पूर्वाणिन्व दनिश्चयात् वणिकूपथाः इतिहेमः स तमूलनगरंराजधानी· तत्तोन्यत्पत्तनंपुरं १ शाखेवनगरं एकंविशंत्यत्रविशप्रवेशने· हलश्चेतिघञ्· नेपथ्येगृहमात्रे चवेशोवेश्यागृहेपिचेतितालव्यांतेरभसः गृहमात्रेगणिकायाः सद्मनिवेशोभवेत्तुतालव्यः तालव्यो मूर्द्धन्योलंकरणेकथितआचार्यैरित्यूष्मविवेकः वेश्याजनस्यसमाश्रयोवासस्थानं २ वेश्यानिवासस्यआसमंतात्पणायंतेपणंतेवा पणव्यवहारे· गोचरसंचरेतिसाधुः निषीदंत्यस्यांजनाः षद्लृविशरणगत्यवसादनेषु· संज्ञायांसमजेतिक्यप्· सदिरप्रतेरितिषः २ तद्धस्यविपणंतेत्र· पणव्यवहा ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थी· स्वार्थे कन्· हट्टः हट्टः पण्यविक्रयस्थानस्य· हट्टमार्गस्येति स्वामी· आपणः पण्यवीथी च हट्टं पंवीथीति संज्ञितमिति शाश्वतः आपणः पण्यवीथ्यां च पण्ये च विपणिः स्त्रि
यामिति रभसः २ रथं वहति तद्वहति रथयुगेति यत्· रथ्या तु रथसंघाते प्रतोल्यां पथि चत्वर इति हेमः प्रतोलयति· तुल उन्माने· चुरादिः पचाद्यच्· गौरादिङीष यत्तु एर
जिति मुकुटेनोक्तं तन्न प्रतोलयतीति विग्रहप्रदर्शनात्· अकर्त्तरि कारके भावे चेरचोऽविधानात्· विशन्ते· शीङः किद्रस्वश्चेति खः विशिखाखनित्रिकायां रथ्यायां विशि
खः शरे इति हेमः त्रीणि ग्राममध्यमार्गस्य· चीयते चिञ् चयने· कर्मण्येरच्· उप्यते त्र· डु वप् बीजतंतुसंताने वपिवृधिभ्यां रन्· वप्रश्चावरणे हृदे प्राकारे मूलबंधने इति ध
रणिः हु प्राकारधारस्य। प्रक्रियते· डुकृञ् करणे· कर्मणि घञ्· उपसर्गस्य घञीति दीर्घः आङ् वा· सादकारयोः कृत्रिम इति दीर्घ इति तु स्वामिमुकुटौ तन्न अस्यादर्शनात्· वृ
ञ् वरणे· कर्त्तरि ल्युट्· करणे वा· वरुणो वरुणं द्रुमे प्राकारे वरुणं स्मृत्यामिति हेमः सल्यते· षल गतौ कर्मणि घञ्· सालो वरणसर्जयोरिति रभसः ताल व्योन्तपक्षयोः

आपणस्तु निषद्यायां विपणिः पण्यवीथिका २ रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् प्राकारो वरणः शालः प्राचीनं प्रांततो वृतिः ३ भि
त्तिः स्त्री कुड्यमेडूकं यदंतर्न्यस्तकीकसं गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ४॥ ९ शालो वृक्षे वृतौ द्रुमेदे च· तालव्यदंत्य उक्तस्तथा स्त्रियां वृक्षस
शाखायामित्यूष्मविवेकः तत्र शल गतौ धातुर्बोध्यः त्रीणि प्रागेव· विभावां चेरदिक स्त्रियामिति खः प्राचीरमिति पाठे तु प्राचीयते· प्राङ्पूर्वः चिञ् चयने शुसिचिमीनां दी
र्घश्चेति क्रन्· दीर्घो प्रांततः इति सप्तम्यास्तसिः वरणं वृतिः व्रियते नया वृञ् वरणे क्तिन् वृत्तिरित्यपि नामेति स्वामी तिमुकुटः तन्न करणे ल्युट्प्रसंगात् एकं ग्रामादेरंते कं
टकादिवेष्टनस्य १ भिद्यते भिदिर् विदारणे· क्तिन्· भित्तिः कुड्यप्रभेदे चेति हेमः कुड्यं साधुः तत्र साधुरिति यत्· पृषोदरादित्वात् कुड्यते वा   कुडु कार्कश्ये· ण्यत्· हे· यत्
कुड्यमध्यन्यस्तास्थि तत्· ईड्यते· ईड स्तुतौ· उलूकादयश्चेति साधुः मवेदेडोमभेडुकमेडूकं चेति द्विरूपकोशः एकमस्थ्यादिमयकुड्यस्य· गृह्णाति ग्रह उपादाने· गेहे कः
गेनगलेघ्नेन ईह्यते काम्यते· ईह चेष्टायां· कर्मणि घञ्· गां गलोभांगं धर्मा वा ईह ईप्सिता यस्मिन् वा· गेहम् स्त्री शालासभे स्त्रियामिति वाचस्पतिः उदूर्ध्वमवसीयते स्म षोऽ
न्तकर्मणि षिञ् बंधने वा क्तः यतिस्यतीति इत्वं· अवसितमृद्धे ज्ञाते ऽप्यवसानगते च वाच्यलिंगः स्यात्· विशंत्यत्र· विश प्रवेशने· मनिन्· सीदंत्यत्र षद्लृ विशरणे देमनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निशायामभ्यन्तेस्म अमगत्यादौ· क्तः रूप्यमत्वरेतिनेट्· निशांतंस्म दनंपस्त्यमगारंमंदिरंपुरमितिवाचस्पतिः वसनं· वसनिवासे· वसेक्तिः तत्रसाधुयत् अपस्त्यायतिसंहतंभवति· ष्ट्यैस्त्यैशब्दसंघातयोः आतश्चोपसर्गेइतिकः पृषोदरादिःवष्टिभागुरिरल्लोपइतिस्वामिमुकुटौतन्न· तत्रापस्त्यायहणात् नलोदवसितंपस्त्यमितिवाचस्पतिःसीदंत्यत्रपद्· अधिकरणेल्युच· स्वार्थेण्यंतात् युचिसादनमपिसदनंसादनमितिद्विरूपकोशः सदनंमंदिरेतोये·भवंत्यत्रभूःभुच्·भवनमस्त्यत्रवा अर्शआद्यच्भवनंसदनेभावेइ तिहेमः अगानृच्छति·ऋगतौ· कर्मण्यण्· आअगयते· अगकुटिलायांगतौ· कर्मणिघञ्· विद्यादगारमागारमपगामाप्यागामपीतिद्विरूपकोशः मंद्यतेसुप्यतेत्र· मदिस्तुत्यादौ इविमदोनिकिरच्· मंदिरोमकरावासेमंदिरंनगरेगृहे इतिहेमः गृहणाल्होभूम्न्येवपुंसिचान्तक्लीबेनिचीयतेधान्यादिकमत्रचिञ्चयने·पाय्यसान्नाय्येतिसा धुःनिकाय्यः समसंघयोः परमात्मनिलक्षेचेतिहेमः निलीयतेत्र लीश्लेषणे· पुंसीतिघः एरज्वानिलयो ऽस्त्रमयेगृहे· गोपनस्यप्रदेशेपीतिहेमः एवमालयः ५ वसं

निशांतपस्त्यसदनंभवनागारमंदिरं गृहाःपुंसिचभूम्न्येवनिकाय्यनिलयालयाः ५ वासः कुटीद्वयोः शालासभासंजवनंत्विदं चतुःशालं
मुनीनांतुपर्णशालोटजोस्त्रियां ६ चैत्यमायतनंतुल्येवाजिशालातुमंदुरा॥ ९ त्यत्रहलश्चेतिघञ्· वासोवेश्मन्यवस्थानेवासास्यादटरूषकेइतिहे मः कुटतिकुटिलीभवतिः कुटकौटिल्ये· इगुपधेतिकः इगुपधात्किदितिइनिप्रत्ययेकुटिः कृदिकारादितिङीषाकुटः कोटशिलाकुटेघटेगेहेकुटीस्मृता चित्रगुच्छाकुंभदा सीइतिहेमः शालंत्यत्रशलगतौ· हलश्चेतिघञ्· शालेहालेमत्स्यभेदे· शालोकस्त्रंदेशाखयोःस्कंधशाखायामितिहेमःसहभांसत्र· अन्यत्रापीतिडः सभा घूतसमूहयोः गोष्ठ्यां सभ्येषुशालायामितिहेम. विंशतिः संजवंत्यत्र· जुगतौसौत्रः अधिकरणेल्युच्· चतस्रः शालाःसमाहृताःआवन्तोवेतिवाक्लीवत्वं·एकमन्योन्याभिमुखशालाचतुष्टयगृहस्य· पर्णनिर्मिताशाला· शाकपार्थिवादिः उटस्तृणपर्णादिरितिदशीकोशः उटाज्जायतेस्म अन्यत्रापीतिडः द्वेमुनीनांगृहस्य ६ चीयतेचित्यान्निचित्येचेतिसाधुःचित्यायाइ दं· तस्येदमित्यण् तस्येदमितिविग्रहप्रदर्शनंमुकुटस्यप्रमादःचित्यायाःस्त्रीलिंगत्वात् आयतंतेत्र यतीप्रयतने· अधिकरणेल्युच्· चैत्यमायतनेबुद्धविवेप्युद्देश्य पादपइतिरुद्रः द्वेयज्ञस्थानस्य· उद्देश्यवृक्षस्यसभ्ये· वाजिनांशाला· मंदंतेत्र· मदिस्तुत्यादौमंदिवासीत्युरच्मंदुरावाजिशालायांशयनीयार्थवस्तुनि हेः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अश्वशालायाः आविशंत्यत्र विशप्रवेशने· करणेतिल्युट् युज्वा· आवेशनं शिल्पिशाले भूतावेशप्रवेशयोरिति विश्वमेदिन्यौ· शिल्पिनां शाला· शिल्पस्य शालेति तु स्वा
मी· द्वे प्रपिवंत्यस्यां· पापाने· आतश्चोपसर्गे· पानीयस्य शाला· स्वार्थे कन् द्वे ७ मठं तेत्र मठमदनिवासयोः हलश्चेति घञ्· संज्ञापूर्वकत्वान्न वृद्धिः यद्वा· मठति निवासय
ति· पचाद्यच्· छात्रांतेवास्यादियेषां परिव्राजकक्षपणकादीनां तेषां निलयः बौद्धानां तु विहारोस्त्री· एकं· गंजंत्यस्यां गजि शब्दार्थः गुरोश्च हलः इत्यः गंजा स्त्रीनोसुरा
गृहे· गंजः स्यात् सुक्षितिरीठायां भांडागारे तु न स्त्रियामिति विश्वमेदिन्यौ· मदिरायागृहं द्वे सघसंघानगृहस्य गर्भद्वागारं वासस्य गृहं· द्वे गृहमध्यभागस्य नास्ति रिष्टमत्र
न रिष्यते स्म हिंस्यते रितिवा· रिषहिंसायां· क्तः अरिष्टो लशुने निंबे फेनिले काककंकयोः अरिष्टमशुभे तक्रे सूतिकागार आसवे· शुभमरणचिन्हे चेति विश्वमेदिन्यौ सू
तेव सूतिका· सूतेकादीनां वा सूतिकागृहं· द्वे· चत्वारः पर्यायाइत्यन्ये ८ ईयते नेन इणगतौ· करणे ल्युट् युज्वा वा तस्यायनं· गवामक्षीव· अक्ष्णो दर्शनादित्यच्· गावः

आवेशनं शिल्पिशाला प्रपा पानीयशालिका ७ मठश्छात्रादिनिलयो गंजा तु मदिरागृहं गर्भागारं वासगृहमरिष्टं सूतिकागृहम
८ वातायनं गवाक्षोथ मंडपोस्त्री जनाश्रयः हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां ९ सौधोस्त्री राजसदनमुपकार्योपकारिका स्वस्तिः

जलानि किरणा वा· इतिव्याप्नुवंति· एतमनेन वा· अक्षूव्याप्तौ· अकर्तर्यर्थे घञ्· पत्तुरद्द्रस्ययोः समासे चेत्यच् द्वे १ कः सर्वतोभद्रो नंद्यावर्तादयोपि च १०
तिस्वामिनोक्तं· तन्न· एतद्वचनस्यादर्शनात्· गवाक्षी प्रक्वा रुण्यां गवाक्षो जालके कपौ· द्वे जालकस्य· मंडनं मंडः मडिभूषायां· घञ् मंडंपाति· पारक्षणे· आतोनुपपति
कः· मंडंपिवतिवा जनानामाश्रयः द्वे हरति मनः हृञ्हरणे· अघ्न्यादित्वाद्यत् सुद्ध आदिनास्वस्तिकादिः एकं· देवानां भूभुजां च गृहं प्रसीदति मनोत्र· हलश्चेति घ
ञ्· उपसर्गस्य घञ्तीति दीर्घः आढ्या एकम् ९ सुधास्त्री लेपने मूर्वास्नुही गंगेष्टिकामृते· सुधा लेपोस्याखि· ज्योत्स्नादित्वादण् राज्ञः सदनं योग्यत्वात्· यद्वा· सदनानां राजा
राजदंतादि· द्वे उपक्रियते· कर्मणि ञ्ण्यत् हलोण्यत्· उपकरोति· ण्वुल्· उपकार्य्युपकारिकेति द्विरूपकोशदर्शनादुपकार्यपि· तत्रोपकारयति· पचाद्यच् गौरादि
त्वात् ङीष्· यत्तु उपाधिकं करोतीति विगृह्य कर्मण्यण्लिङ्युक्तं मुकुटेन तन्न निपातानामसत्वार्थकत्वेन कारकत्वायोगात्· द्वे राजगृहस्य स्वस्ति क्षेमं कायति कै शब्दे· आतोनुपे

अ·को·
टी·रा·
द्वि·कां·
६

विशिष्टच्छंदोत्र यद्वाविशिष्टान्छंदयतिसाभिलाषान्करोति·ण्वुल्·कृत्वा·विछंदक इति पाठ इति स्वामी·तत्र उच्चकृद्दिःसौधो·ण्वुल्·आदिनारु चकवर्द्धमानादिगृहः ईश्वरगृहविशेषाणां पृथगेकैकं स्त्रीणामगारं·अंतरभ्यंतरे पुरंगृहं अवरुद्धांतेत्र·ल्युट्·पुंज्वाघत्रितु अवरोधः ११ हर्म्यकाः शुद्धा अंतेसमीपेस्य·चत्वारिअत्यन्तेअदअतिक्रमणे·कर्मणिघञ्·घट्टयतिवा·अच्·सुवंसत्र द्रुसुशब्दे·अर्तिसुह्विति मः प्रज्ञाद्यणि क्षौमः द्वेहर्म्यादिषु परिगृहस्य॥ प्रहन्यते अगारैकदेशेप्रघणः प्रघाणश्चेति साधुः प्रघणोऽलिंदकेतामुकलशेलोहमुद्गरे इति हैमः अल्यतेभूष्यते अलभूषणादो दाहुलकान्किंदच्·प्रज्ञाद्यणि आलिंदोपि गृहैकदेशे आलिंदः प्रघाणः प्रघणास्तथेत्यमरमाला·अलिंदस्त्वल्पपिंडिकेतिसुभूतिः त्रीणि द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कस्य १२ गृहमवगृह्यतेनया गृहउपादाने·करणेतिल्युट्·युचितुगोरादिः देहनं·दिहउपचये·भावेघञ्·देहं प्रकोष्ठो विस्तृतभुजोभूपकक्षांतरेपिच।गोमयाद्युपलेपं लातिलाआदाने·आतोनुपेतिकः गौरादिः द्वे उदुंबरस्य अंगत्यत्र·अगिग

विच्छंदकः प्रभेदाहि भवंतीश्वरसद्मनां स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनं ११ शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियां प्रघाणप्रघणालिंदा बहिर्द्वारप्रकोष्ठके १२ गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे॥ अधस्ताद्दारुणि शिलानासादारूपरिस्थितं १३ प्रच्छन्नमन्तर्द्वारं स्यात्पक्ष

तो·करणेतिल्युट्·अंगनं प्रांगणे याने कामिन्यामंगनामतेति नांतवर्गे विश्वः अंगणमितिपाठे तु पृषोदरादिः चत्यते·चतेयाचने क्रृगदृशृदृत्र १८ द्वारं तु पक्षकम्॥

चतिभ्यः ष्वरच्·चत्वरं स्यान्तयांश्लेषेस्थंडिलांगणयोरपीति हैमः अंजंत्यत्र अजगतौ अजिरशिशिरेतिकिरच्·त्रीणि॥ शिलति·शिलउंच्छे·इगुपेतिकः शिलउच्छोस्त्रियां ग्रावद्वाराधःस्थितदारुणोरितिनालव्यादौरभसः तलदारु शिलीयोपिन्नासादारुर्द्धमस्यपदिनि बोपालिनात्·शिलीस्यपि·एकं·नासयते·णासृशब्दे·गुरोश्चेत्यः विज्ञेयानासिकानासानासादारुर्द्धदारुचेति दंत्यांतेरुद्रः नासादारूपरिद्वारस्याधोदारुशिलास्त्रियामिति नाममाला·स्तंभद्वारस्थकाष्ठस्यैकं उपरिभिन्निधारकस्य काष्ठस्य वा १३॥ प्रकर्षेणच्छन्नं द्वारं कुगतीतिसमासः·अंतःस्थितं द्वारं धाकपार्थिवादिः एकं सोधादौ गुप्तद्वारस्य खिडकीतिख्यातस्य पक्षेपार्श्वे द्वारं·पक्ष इव·इवेप्रतिकृतौकन्संज्ञायांवा·द्वे पार्श्वद्वारस्य·प्रच्छन्नमंतर्द्वारं स्यात्पक्षद्वारं तदुच्यत इतिकात्यात् पूर्वान्वयीत्यन्ये·वबस्यावृणोतिभित्यादि अलीकादयश्चेतिनिपातः वलीकः पट

CC-0. In Public Domain. Digitization by eGangotri

पुंस्त्वमपि· नितरां ध्रियते· धृङ्· अवस्थाने निश्चयेन धरति जलमिति वा· धृञ् धारणे· मूलविभुजादिः अन्येषामपीति दीर्घः निश्चयेन इन्ध्यते निरिंधी दीप्तो स्फायीति रक् मु
कुटो त्राकरणव्युत्पत्तिस्तु नादर्तव्या कर्त्तरि कृदिति वाक्यशेषात्· नीध्रं नेमो वलीके चरे वत्नीभेऽपि कानने· पटलस्य छदिषः प्रांते· त्रीणि· पटलानि ला आदाने आतो नु
पसर्गेति कः पटति उदकं वा पटगतौ एयर्थः वृषादिः पटलं तिलके नेत्ररोगे च्छदिषि संचये· पटिके परिवारे चेति हैमः छादयति· छद अपवारणे· चुरादिः अर्चिशुची
नीसिः इस्मन्निति ह्रस्वः साहचर्यात्· सांतं क्लीबमिति मुकुटः नञ् छदिः स्त्रियामिति लिंगानुशासनसूत्रात्· पटं चालमप्यत्र द्वे· १४ गोपायति· गुपू रक्षणे· बाहुलकान्नस
ट् प्रत्ययः अल्लोपयलोपौ· यद्वा· गवां गोभिर्वा पानं गोपानं किरणानां ग्रहणं किरणैर्वा शोषणं· तत्स्यतीति निवर्त्तयतीति षो अंतकर्मणि आतोनुपेति कः गौरादिः वलति· वल सं
वरणे· बाहुलकादभच्· गौरादिः शुद्धान्तं वडभी चन्द्रशालेसौ धोर्द्धे वेश्मनीति रभसः वक्राणि दारूणि यस्मिन् छेकस्य वृच्छादनार्थं दारुस्य वक्रकाष्ठस्य· छन्नेति स्यात् तस्य प

वलीकनीध्रे पटलप्रांतेथ पटलं छदिः १४ गोपानसी तु वलभी च्छादने वक्रदारुणि कपोतपालिकायां तु विटंकं पुंनपुंसकं १५ स्त्री द्वार्द्वारं प्रतीहारः
स्याद्वितर्दिस्तु वेदिका तोरणोस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरं १६ कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु॥ १९ टला धारवंशपंजरस्येत्यन्ये· पालयति· पाल र

क्षणे· ण्वुल्· कपोतानां पालिका· कपोतान् पालयति· कर्मण्यण् ङीप्· संज्ञायां कन्निति वा· विशेषेण टंकयते त्र टकि बंधने· हलश्चेति घञ्· अज्वेति मुकुटस्य प्रमादः द्वे गृहप्रां
तरचितपक्षिस्थानस्य १५ द्वारयति· द्वृ वरणे· णिजंतः विच्· यद्वा द्वार्यते संपदादिः पचाद्यचि द्वारं· द्वारं निर्गमेऽभ्युपाये इति हैमः प्रतिह्रियते आव्रियते· कर्मणि घञ्· उपसर्ग
स्य घञीति वा दीर्घः प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति· त्रीणि विगता नर्दिर्हिंसास्याः नर्दि हिंसायां· सर्वधातुभ्य इतीन् वितर्दिः तस्यां इन्नंतात्कृदिकारादिति वा ङीष् स्वा
र्थे कन् प्रांगणादिषु कृतस्योपवेशस्थानस्य द्वे· तुरंत्यत्र तुरलत्वरणे हिंसयोः अधिकरणे ल्युट् युज्वानो लयंत्यत्रेति वा तुल उन्माने रलयोरेकत्वं तुरत्यननेति वा· तुर त्वरणे जौ
होत्यादिकः बहिर्द्वारात्· बहिश्च तद्द्वारं चेति वा द्वे द्वारवात्स्यभागस्य पुरस्य द्वारं· गोपायति· गुपू रक्षणे· बाहुलकादुरच्· यद्वा· पोलति· पुल महत्वे· इगुपधत्वात् कः रलयोरभे
दः गोभिः पुरं गाः पुरति· पुर अग्रगमने एयर्थः मूलविभुजेति कः द्वे· १६ हस्तिनो नख इव हस्तिनानखन्यत इति वा· खनु अवदारणे· अन्येष्वपीति डः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

अ·को· एकं पुरद्वारे· वनतामार्थे कृतस्य कमनिमनस्य मृत्कूटस्य कं वातं पिरोवा पाटयति पटगतौ· ण्यन्तः कर्मण्यण् कवाटमित्यन्ये तत्र कं वातं वटति· वट वेष्टने स्त्रियां टिड्ढेति ङीप्· कुड्·

टी·रा· दिः· कृ दारणे क वंशव्दमटतीति वा· इयर्त्ति· अर्त्तिकमीत्यरन्· स्त्रियां गौरादित्वात् ङीषिति पंजिका· कवाटश्च कपाटश्च त्रिषु स्यादररं ननेति वा चस्पतिः· सर्वधातुभ्य इन्नीति अररि

हि·को· रं तोपि· अररं छदकपाटयोरिति विश्वमेदिन्यौ· हे तत्र कपाटं विष्कम्भाति स्कंभुः सौत्रो रोधनार्थः कर्मण्यण्· मुकुटस्तु आवश्यके लिनिरिति व रनूज हि ष्कंभ्यर्गलमिति मूलपाठं

७ मन्यन्ते· वेः स्कम्नातेर्नित्यमिति षत्वं· अर्ग्यते अर्ज अर्जने· वृषादित्वात्कलच्· न्यंक्वादित्वात्कुत्वं· स्त्रियां टाप्· लघुत्वविवक्षायां ङीषिति पंजिका· एकं कपाटरोधनकाष्ठस्य १७

आरुह्यते रुह प्रादुर्भावे· करणे ल्युट्· आरोहणं स्यात्सोपाने समारोहे प्ररोहणे· सह विद्यमान उपरि आनो गमनमनेनेति हे पाषाणादिकृतस्य सौधाद्यारोहणमार्गस्य नियत

ता श्रेणिः पंक्तिरत्र· सविसर्गपाठे निश्चिता श्रेणिरत्र· परसाहचर्यात्स्त्रीत्वं निश्रेणिरधिरोहिण्यां खर्जूरी पादपेपि चेति हेमः अधिरुह्यते नया· ल्युट् हे काष्ठादिकृतारो

कपाटमररं तुल्ये तद्विष्कम्भोर्गलं न ना १७ आरोहणं स्यात्सोपानं निःश्रेणिस्त्वधिरोहणी सम्मार्जनी शोधनी स्यात्संकरोवकरस्तथा १८ क्षिप्ते

मुखं निःसरणं सन्निवेशो निकर्षणः समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् १९ ग्रामान्तमुपशल्यं स्यात्सीमसीमे स्त्रियामुभे· ॥ ॥

हणमार्गस्य संमृज्यतेऽनया ल्युट् मृजेर्वृद्धिः शोध्यतेऽनया शुध शौचे ण्यन्तात् ल्युट्· एषु कर्त्तरि ल्युड्वर्दन्यप्यत्र हे संकीर्यते· कृ विक्षेपे हिंसायां वा· ऋदोरप्· संका

र इति पाठे तु कर्मणि घञ्· अवकीर्यते· क्षिप्तधूल्यादौ हे १९ खन्यते· खनु अवदारणे डित्खनेर्मुट् चोदात्त इत्यच् आदेर्मुडागमः मुखमुपाये प्रारंभेग्रेष्ठे निःसरणस्य यो

रिति हेमः निःसरन्त्यनेन सृगतौ· ल्युट्· निःसरणं मृतौ· उपाये गेहादिमुखे निर्वाणे निर्गमेपि चेति हेमः हे निर्गमनप्रवेशमार्गस्य· संनिविशन्तेत्र· विश प्रवेशने हलश्चे

तिघञ् कर्षणान्निर्गतः निरादय इति समासः हे पुरादेगृहादिरचनापरिच्छिन्नदेशस्य· संवसन्त्यत्र· वस निवासे उपसर्गे वस इत्यथच्· ग्रसते· ग्रसु अदने· ग्रसेरा चेति म राम·

न आत्वं· ग्रामः स्वरे संवसथे ग्रीष्म उष्मजे भेदयोः हे वेश्मनो भूः वसन्त्यत्र· वसेस्तुन्नगारे णिच्च हे गृहरचनावच्छिन्नभूमेः १९ ग्रामस्यान्तं समीपं· शल्यमुपगतं प्रादिस ७

मासः ग्रामग्रहणं चोपलक्षणं· अत एव उपकंठोपशल्ये हे इति त्रिकांडशेषः हे ग्रामादिसमीपदेशस्य· सीयते षिञ्बंधने· नामन्सीमन्नित्यादिना निपातितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनइति नडीप्. डाबुभाभ्यामितिपक्षे डाप्. घोषंति गावोत्र. घुषिरविशब्दने. हलश्चेति घञ्. घोष आभीरपल्ल्यां स्याद्गोपालध्वाननघोषके कांस्ये चांबुदनादे नादे वा घोषमघुरि
कोषघौ. आभीराणां पल्लिः कुटीग्रामकयोः पल्लिरिति शाश्वतः ३ गोपग्रामस्य पचंति क्विप्. कणंति. कणशब्दे. पचाद्यच्. पचः कणा यत्र पाककलहद्विकप्रधानं तत्र नाम्य
ते. शावं रांति शबराः तेषामालयः ३ भिल्लग्रामस्य २ इति पुरवर्गः महीं धरति धृञ् धारणे. मूलविभुजादित्वात्कः. शिखरमस्यास्ति अतइनिः शिखरी स्याद्यामार्गे शैलपाद
पयोः पुमान् क्ष्मां बिभर्ति डुभृञ् धारणपोषणयोः क्विप्चेति क्विप् तुक् ह्रियते. हृञ् हरणे. ऋहलोर्ण्यत्. न हार्यः अहार्यो हर्तुमशक्ये शैलेपीति हेमः धरति धृञ् धारणे.
पचाद्यच्. धरः कूर्माधिपे गिरौ. कार्पासमूले ऽथ धरा मेदो भूमिजरायुष्विति हेमः पर्वाणि संत्यत्र. तप्पर्वमरुद्भ्यां. यद्वा पर्वति पर्वपूरणे. दृसदृशोन्यतश्च अत्ति अद्यते वा अद्
भक्षणे अदिशदिभूशुभिभ्यः क्रिन्. अद्रिः स्तु पर्वते सूर्ये शाखिनि चेति हेमः गां त्रायते. त्रैङ् पालने आतइति कः गोत्रं क्षेत्रे ऽन्वये छत्रे संभाव्ये बोधवर्त्मनोः वने नाम्नि

घोष आभीरपल्ली स्यात्पक्कणः शबरालयः २० इति पुरवर्गः॥ महीध्रे शिखरि क्ष्माभृदहार्यधरपर्वताः अद्रिगोत्रगिरिग्रावाचलशैलशि
लोच्चयाः १ लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः २॥ ११ चगोत्राः ह्रीगोत्रा भुवि गवां गणो इति हेमः गिरति

गृ निगरणे. बाहुलकात्किः ऋत इद्धातोः गिरिः पूज्ये ऽक्षिरुजि कंदुके शैले गिरीयके गीर्णे च पीति हेमः ग्रसते. ग्रसु अदने. अन्येभ्योपीति वनिप्. पृषोदरादिः न चल
ति चल कंपने. पचाद्यच्. अचलस्तु गिरि कीलयोः अचला भुवीति हेमः प्रचुराः शिलाः संत्यत्र ज्योत्स्नादित्वादण्. शैलो भूभृति शैलं तु शैलेये ताक्ष्यशैलके इति
हेमः शिलाभिरुच्चीयते चिञ् चयने. एरच्. २योरपि १ लोक्यते लोकृ दर्शने. भावे घञ्. न लोकः अलोकः लोकालोकौ प्रकाशांधकारावत्रस्तः अंतर्बहिः सूर्यकिरणानां स्पर्शास्पर्शा
भ्यां चक्रं भूमंडलं वलते वल वेष्टने. कर्मण्यण्. डलयोरेकत्वस्मरणाच्चक्रवाडोपि. यद्वा चक्राकारेण वाडते. वाडृ आप्लाव्ये. पचाद्यच्. चक्रवालमस्यास्तीति वा अ
र्शआद्यच् चक्रवालोऽद्रिभेदे स्याच्चक्रवालं तु मंडले इति हेमः ३ त्रीणि कूटान्यस्य त्रिकूटः सिंधुलवणे त्रिकूटः पर्वतांतरे इति हेमः त्रीणि ककुदस्तु शृंगाण्यस्य. त्रिककुत्पर्व
ते ३ असतिस्म असदीप्तौ गत्यर्थेति क्तः यद्वा. अस्यते स्म असु क्षेपणे. क्तः अस्तं क्षिप्तेप्यवसिते त्रिषु ना पश्चिमाचले इति विश्वमेदिन्यौ. चरंत्यत्र चर गतौ चरेरमः पश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

... in Public Domain. Digitization by eGangotri

अ·को· हिममस्मिन्नस्ति· मतुप्· निषीदति· पचाद्यच्· पृषोदरादिः निषधः कठिनेदेशेतद्वज्जे पर्वतांतरे इति विश्वमेदिन्यौ· विरुद्धं ध्यायति· ध्यैचिंतायां· आतश्चोपसर्गइति कः पृषो
टी·रा· दरादिः यद्वा· वीध्यते· त्रिरं धीदीप्तौ· रायन्· अंतर्भावितण्यर्थः शकंध्वादिः· वींधे वा अघ्र्यादिः विंध्यास्त्रियांलवण्यांस्यात्पुंसिव्याधाद्रिभेदयोः माल्याकारत्वास्यास्ति· मतुप्· परि
द्वि·कां· तोयात्रयादृश्यते· शेषेरूखप्· स्वार्थेकन् गंधेनमादयति मदीहर्षे· णिजंतः नंद्यादिः स्याद्गंधमादनमृगेगंधकेवानरांतरे· स्त्रीसुरायांनगेनस्त्रीचिरजीविककाकयोः हेम्नः
८ कूटोस्यास्ति· आदिशब्दान्मलयदर्दुरचित्रकूटमैनाकसह्यादिग्रहः ३ पिनष्टि पिष्लृ संचूर्णने· बाहुलकादानच्· पृषोदरादिः मूर्द्धन्यषः पषत्यनेन· पषबाधेस्पर्थेच· हल
श्चेति घञ्· अणति· अणशब्दे· अच्· पाषश्चासौअणश्च· यत्तुपर्वोर्णिरितिआनच् इतिमुकुटः तन्न उक्तसूत्रादर्शनात्· प्रस्तृणाति· स्तृञ्आच्छादने पचाद्यच्· प्रस्तरो
ग्रावेतिचमणाविति हेमः गिरति गृणातिवा· गृनिगरणेशब्देवा· अन्येभ्योपीतिवनिप्· पृषोदरादिः यद्वागरति· गृसेके· मूलविभूजादिः अवति· अवरक्षणादौ· बाहुल

हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः गंधमादनमन्येचहेमकूटादयोनगाः ३ पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषत् कू
कात्क्वनिः ग्रश्चासावश्चग्रावा तु प्रस्तरेपृथ्वीधरेइति विश्वः उपलाति· लाआदाने आतश्चोपेतिकः यद्वा· प ५ टोस्त्रीशिखरं शृंगंप्रपातस्त्वतटोभृगुः ॥
लति· पलगतौ· अच्· ओः शूंभोः पलः बोधकः उपलोग्रावरत्नयोः उपलातुप्रर्करायामितिहेमः अश्नुते· अशूव्याप्तौसंघातेच· अन्येभ्योपीतिमनिन्· शिलति· शिल
उंछे तालव्यादिः इगुपधेतिकः दृणाति दृविदारणे दृणातेः षुगह्रस्वश्चेत्यदिः दृषमध्योषदृषद इत्यूष्मभेदान्मूर्द्धन्यमध्यः सप्तकूटयति· कूटदाहे पचाद्यच् प
तुइगुपधेतिक इतिमुकुटः तन्न· कूटश्चुरादित्वेनणिजंतत्वादिगुपधत्वासंभवात्· णिजभावेकूट्यतेवा घञ्· कूटंपूर्द्वारयंत्रयोः मायादंभाद्रिशृंगेषुसीरांगेऽनृतेत्रुटौ।
च्छ्रयोः निश्चलेऽयोघनेराशौ इतिहेमः शिखास्यास्ति शिखायाह्रस्वश्चेतिरः शिखांराति वा· ड्यापोरिति ह्रस्वः शिखरंपूलकाग्रयोः पक्वदाडिमबीजाभमाणिक्यशकलेपि
च शिरिवृक्षाग्रकक्षास्विति हेमः अस्त्रीतिपूर्वोत्तराभ्यांसंबध्यते· शृणाति· शृहिंसायां· शृणातेर्ह्रस्वश्चेति गन्नुडह्रस्वाः शृंगंप्रभुत्वेशिखरेचिन्हेक्रीडांबुयंत्रके· विषाणो
त्कर्षयोः श्चायशृंगः स्यात्कूर्च्चशीर्षके· स्त्रीविषायांस्वर्गमीनभेदयोर्ऋषभौषधाविति विश्वः त्रीणि प्रपतंत्यस्मात्· पत्लृगतौ· अकर्त्तरीति घञ्· प्रपातेनिर्झरेभृगौ। अव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोपश्च। न्यंक्वादित्वात्कुत्वं भृगुः सानौ जमदग्निप्रपातयोः शुक्रे रुद्रे चेति हैमः प्रपातस्तु तटो भृगुरिति पाठे प्रपतन्त्यनेनेति प्रपातः प्रपातस्तु तटो भृगुः त्रीणि ४ कटति कटनि कस्यते वा कटे वर्षावरणयोः कुन् शिल्पिसंज्ञयोः कटकस्त्वद्रिनितम्बे वा हस्तभूषणे इति हैमः एकं पर्वतमध्यभागस्य मेखला ख्यस्य स्नौति जलं स्नाति वा स्नुः प्रस्रवणे स्नाशोचे वा मितद्र्वादित्वाद्डुः प्रतिष्ठन्तेऽत्र घञर्थे कः प्रस्थो स्त्रियां मानभेदे सानो वनमनुचरन्ति वस्तूनि सनोति षणु दाने हसनिजनीति ञुण् सानुरस्त्री वने प्रस्थे वात्यामागर्ल्पको विदे त्रीणि पर्वतसमभूमिभागस्य हितत्वात् प्रस्थोऽप्यस्त्री उनत्ति जलेन उंदी क्लेदने उंदिगुधिकुषिभ्यश्चेति सः किदित्यनुवृत्तेर्नलोपः उन्दन्तीति मुकुटेन कृतं विग्रहप्रदर्शनं प्रामादिकं उंदेरौधादिकत्वात् प्रस्रवं स्त्रापोऽस्मात् स्नु गतौ भीमादयश्चेति कर्म्यल्युट् इति वाऽपादाने ल्युट् द्वयं तोजलं स्रवति तस्य स्थानस्य वारिणः प्रवाहः निर्झरणं द्वयं हानौ झृ देशप् यत्तु निर्झरणं तस्ये नेतिविग्रहप्रदर्शनं मुकुटेन कृतं तन्न करणे ऽपोऽदुर्लभत्वात् ल्युटा बाधात् घञपि दुर्लभः मृषोदैवादिकत्वान्न पित्वादङ् झृष्ट अचः झरः झरिः नतो

कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियौ उत्सः प्रस्रवणं वारिप्रवाहे निर्झरो झरः ५ दरी तु कन्दरो वा स्त्री देवखातविले गुहा गह्वरं गण्ड शैलास्तु च्युताः स्थूलोपला गिरेः ६ खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः॥ ११ झरिषि झरी च उपसर्गान्तरनिवृत्यर्थो निर् द्वे उत्सान्निर्गतजलप्रवाहस्य पंचापि पर्याया इत्यन्ये ५ दृणाति दृ विदारणे पचाद्यच् दरा डितिपाठान्तरात् टिड्ढाणञिति ङीप् दरोऽस्त्री साध्वसे गर्त्ते कंदरे तु दरी स्मृता दराव्ययं मनागर्थे कं जलं तेन दीर्यते कृ दारप् स्त्रियां टाप् द्वे कृत्रिमस्य गृहाकारस्य गिरिबलस्य अकृत्रिमपर्वतस्य विले बिलेति बिल भेदने इगुपधेति कः गूहति गुहू संवरणे इगुपधेति कः यत्तु गुहत्यनेऽनया भिदाद्यङिति मुकुटः तन्न अजब्भ्यामिति वार्त्तिकविरोधात् गाह्यते गाहू विलोडने छित्वरच्छत्वरेति ष्वरजंतं निपात्यते गुहः षण्मातुरे गुहा सिंहपुच्छ्यां च गर्ते च पर्वतादेश्वशंकरे केचित्तु देवखाने विलं गुहेति कात्यात् गह्वरं विलदंभयोरिति शाश्वता च चत्वारि नामानीत्याहुः त्रीण्यकृत्रिमस्य गिरि विलस्य गंडः कपोले पिटके इति विश्वः गंड इव शैलाः शैलशब्दस्तद्वयवे वर्त्तते विशेषणं विशेष्येणेति समासः शैलानां गंडा इवेति वा राजदंतादिः गण्डशैलो ललाटे स्याच्युतस्थूलोपलेगिरेः एकम् ६ खन्यते खनु अवदारणे खनिकषीति इन् कृदिकारादिति वा ङीष् इत्यजादिभ्य इत्तीञ् खनिरेव मता खानिरिति द्विरूपकोशः आकुर्वन्त्यत्र डुकृञ् आकीर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·को· पुंसि संज्ञायामिति घः आकरोनिकरे खनौ हृ पद्यन्ते एभिः पदगतौ· हलश्चेति घञ्· पादा मूलोस्तुर्यांशांघ्रिबुध्नप्रत्यंतपर्वते इति हैमः प्रत्यंते महाद्रीणां समीपे ये क्षुद्राः पर्वताः द्वे
टी·रा· उपासन्ना अध्यारूढा· उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्· एकैकं ७ दधाति शोभां· सितनोतीति तुन्· सुवर्णरूप्यताम्राणि हरितालं मनःशिला· गैरिकांजनकासी
द्वी·कां· ससीसलोहाः सहिंगुलाः गंधकोभ्रकमित्याद्या धातवो गिरिसंभवाः एकं गिरौ भवमिति विग्रहे गिरिकशब्दात् अण् अव्ययिकन्यायात् अध्या त्मादित्वाट्ठञ्वा· गैरिकं तु वि
९ शेषेण धातुः धातुशब्देनैव प्रसिद्धत्वात् गैरिकं धातुरुक्तयोः एकं कावजनि जनी प्रादुर्भावे· सप्तम्यां जनेर्डः पृषोदरादिः कुंजं त्यत्र कुजि अव्यक्ते शब्दे हलश्चेति घञि
निकुञ्जः तत्र कुजि धातोर्धातुपाठे अदर्शनात् यदुक्तं न्यंक्वादेरिति कुत्वाभाव इति तदपि न न्यंक्वादेरित्यस्य कुत्वविधायकत्वात्· निरत्रोपसर्गान्तरनिवृत्त्यर्थं कुंजिरा
वरणार्थो लोकादिति क्षीरस्वामी· कुंजोऽस्त्रियां निकुंजोऽपि हनौ दंते च दंतिनामिति विश्वः हेलतादिभिः पिहितस्यस्थानस्य· ८ इति शैलवर्गः अटंत्यत्र· अट गतौ· पद्य

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ७ धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे ८ इति शैलवर्गः

अटव्यरण्यं विपिनं गहनं काननं वनं महारण्यमरण्यानी गृहारामास्तु निष्कुटाः १॥ १ द्यिष्याम विः कृदिकारादिति ङीष्· यत्तु मुकुटः अटा वयः पक्षि
णोत्र· पूर्ववन्ङीष् संज्ञाशब्दत्वादनुपसर्जनादिति स्त्रीप्रत्ययस्य न निषेध इत्याह· तन्न· अटविशब्दस्य कृदंतत्वाभावात्· संज्ञाशब्दत्वादिति हेतोरप्रयोजकत्वात्समु
दायस्यानुपसर्जनत्वाच्च· अर्यते· ऋगतौ· अर्तेर्निंदिस्यन्यः वेपंते· टुवेपृ कंपने· वेपितुह्योर्ह्रस्वश्चेतीनन्· विशेषेण पियंत्यत्र वा· पिगतौ· बाहुलकान्नक्· गाह्यते· गाहू विलो
डने· बहुलमन्यत्रापीति युच्· कृच्छ्रगहनयोरिति निर्देशात् ह्रस्वः गहनं वनदुःखयोः गह्वरे कलिले चापीति हैमः काननयति दीपयति स्मरादिः कनी दीप्तिकांतिगतिषु ण्य
न्तः युच्· ल्युड्वा· कं जलमननं जीवनमस्येति वा· काननं तु ब्रह्मास्ये विपिने गृहे इति हैमः वनति वनसंभक्तौ· पचाद्यच्· यत्तु वन्यते अजिति मुकुटः तन्न· कर्मणि पचाद्य ९
चोभावात्· वनं नपुंसकं नीरे निवासालयकानने· षट्· महच्च तदरण्यं च· सन्महदिति समासः महदरण्यं हिमारण्ययोर्महत्त्व इति· ङीषानुकौ द्वे गृहस्यारामाः कुटा
द्गृहान्निष्क्रान्ताः निरादय इति समासः निष्कुटस्तु गृहोद्याने स्यात्केदारकवाटयोः द्वे गृहोपवनस्य॥ १॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

आरमन्त्यत्र हलश्चेति घञ् उपगतं वनं प्रादयो गताद्यर्थे इति समासः एवकारादकृत्रिमवनव्युदासः द्वे कृत्रिमवृक्षसमूहस्य वट्यते वट वेष्टने संज्ञायामिति ण्वुल् वुत्रिति मुकुटस्य प्रामादः टाप् प्रत्ययस्थादिति त्वं वृक्षाणां सा एकं मन्त्रिणो वेश्याया गृहस्योपवनस्य २ आक्रीडन्त्यत्र क्रीडृ विहारे हलश्चेति घञ् द्वयमाक्रीडमुद्यानमित्यमरमालायां तु क्लीबमुक्तं उद्यान्त्यत्र या प्रापणे अधिकरणे ल्युट् उद्यानं स्यान्निःसरणे वनभेदे प्रयोजने द्वे राज्ञः सर्वोपभोग्यवनस्य प्रमदानां वनं ङ्यापोरिति ह्रस्वः यत्र सस्त्रीको राजा क्रीडति तस्यैकं ३ वीथ्यते वीथ याचने इगुपधात्किदितीन् वाहुलकाद्दीर्घः वा ङीष् वीथी वर्त्मनि पंक्तौ च गृहाङ्गे नाटकरूपके इति हैमः आलति अल भूषणादौ आङि इन् आलिः सख्यावली सेतुष्वनर्थे विशदाशये इति हैमः आवलति वल संवरणे आङि इन् पंचते पचि विस्तारे क्तिच् पंक्तिश्छंदः श्रेण्योरिति हैमः श्रीयते श्रिञ् सेवायां वहि श्रीनिनिः श्रेण्यां स्त्री कारुसंहताविति विश्वः पंचसान्तरपंक्तेः लिख्यते लिख अक्षरविन्यासे भिदादेः पाठादङ् गुणो रलयोरेकत्वस्मरणाद्रेखापि लेखा लेख्ये देवते च लेखा राज्यालि

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् अमात्यगणिकागेहोपवने वृक्षवाटिका २ पुमानाक्रीड उद्यानं राज्ञः साधारणं वनं स्यादेतदेव प्रमदवनं
नमन्तःपुरोचितम् ३ वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः वन्या वनसमूहे स्यादंकुरोऽभिनवोद्भिदि ४ वृक्षो महीरुहः शाखी विटपी पादपस्त

पादपीति हैमः राजति राजृ दीप्तौ इन् वपीवसिजीज्वा राजी रेखायां पंक्तौ चेति हैमः द्वे निरंतरपंक्तयपंक्तिसाधारणायाः ॥ वनानां समूहः पाशादिभ्यो यः द्वे अंकयते अकि लक्षणे मंदिवाशिमथीसुरच् खर्जूरादित्वाद्दूरः अंकुरश्चांकुरः प्रोक्त इति हलायुधः अंकुरो रोमणि सलिले रुधिरेऽभिनवोद्गमे इति हैमः उद्भिनत्ति भुवं भिदिर् विदारणे सम्पदादित्वात् क्विप् अभिनवश्चासावुद्भिच्च द्वे ४ वृक्षति वृक्ष वरणे पचाद्यच् वृश्च्यते वा ओव्रश्चू छेदने सक् मत्स्यादेराहति रुह बीजजन्मनि प्रादुर्भावे च मूलविभुजादित्वात्कः इति मुकुटः तन्न इगुपधेति अस्य सत्वात् शाखास्यास्ति व्रीह्यादित्वादिनिः यद्वा अवश्यं शाखति शाखृ व्याप्तौ आवश्यकेति णिनिः शाखी स्यात्पादपे लोके तु रुष्का १ ख्या जने पुंमान् विटपः शाखाविस्तारोऽस्यास्ति अत इनिः पादैः पिबति पा पाने सुपीति कः पादपो वृक्षपीठयोरिति हैमः तरति तरत्यनेनेति वा तॄ प्लवनसंतरणयोः भृष्धी तृचरीत्युः अनसः शाकटस्याकं गतिं हंति अन्येष्वपीति हं ञेडः कुट कौटिल्ये पचाद्यच् इगुपधेति को वा मुकुटस्तु कौति शब्दायतेऽपस्यन्ते ति कलोष्ठः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

अ·को·
टी·रा·
द्वि·कां·
२०

बाहुलकादिभ्योपीतिडः कुटादित्वान्ङित्वे गुणाभावः बाहुलकान्नेकादेशः इति वरनूटवर्गद्वितीयं मन्यते· तत्र कौतीति विगृह्य कुटादित्वोक्तिः प्रामादिकी आहादिकस्य कौतीति रूपसंभवात् तौ हादिकस्य कुवतेरिति रूपस्य संभवात् सत्यते· पत्लृ गतौ· अकर्तरीति घञ्· मुकुटस्तु सलति वायुना चलति ज्वलितिकसंतेभ्यो णइत्याह· तन्न· इं त्यादेस्तत्र पाठाभावात् ज्वालव्योश्चादेस्तत्र पाठात्· पुंसि भूरुहमात्रेपि सालो वरणसर्जयोरिति रंत्यादेरभसः सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि· पलाशानि संत्यस्य· अत इनिः पलाशी वृक्षरक्षसोरिति विश्वमेदिन्यौ· द्रवत्यूर्ध्वं· द्रुगतौ· मितद्र्वादित्वात् डुः समुदायेवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात् द्रुः शाखास्यास्ति· द्युद्रुभ्यां मः द्रुमस्तुपादपेपारिजाते किंपुरुषेश्वरे इति हैमः नगच्छति· गम्लृ गतौ· पचाद्यच् त्रयोदश ५ वनस्पतिः पारस्करप्रभृतीति सुट्· वनस्पतौ भवः दित्यदित्येति ण्यः पुष्पाज्जातैः फलैर्हेतुभिः एकं वनस्पतिर्नाद्रुमात्रे विनापुष्पं फलिद्रुमे· एकम् ओषः प्लोषो दीप्तिर्वा धीयतेत्र· डु धाञ् धारणपोषणयोः कर्मण्यधिकरणेचेति किः फलपाकएवांतोयस्याः रूपभे॥

अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ५ वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ओषध्यः फलपाकांताः स्याद्वंध्यः फलेग्रहिः ६ वंध्यो
फलेऽवकेशी च फलवान्फलिनः फली प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ७॥ ९९ दात्· स्त्रीत्वं एकं फलानि गृह्णाति ग्रह उपादाने फलेग्रहिरात्मं

भरिश्चेति साधुः हे फलसमये फलग्राहकस्य ६ बंधस्त्वाधौ च बंधने· बंधेसाधुः तत्रसाधुरिति यत्· यत्तु मुकुटः दिगादित्वाद्यदित्याह तन्न· अस्य सूत्रस्य तत्र भव इत्यत्र पाठात् तत्र साधुरित्यस्य प्राग्घितादित्यधिकारे पाठात् न फलान्यस्य· अवसन्नाः केशा यस्य सो वकेशी निष्फलः सोस्ति दृष्टांतत्वेनास्य अत इनिः स यथा निष्केशः एवमयं निष्फलः अवकं शून्यमीष्टेत्यच्छीलः सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिरिति वा त्रीणि फलान्यस्य संति· मतुप्· फलबर्हाभ्यामिनच्· अत इनिः त्रीणि फलसहितवृक्षस्य फलति त्रिफला विशरणे· ञीतः क्तः ९०
आदितश्चेति नीडभावः अनुपसर्गात्फुल्लक्षीवेति तस्य लः प्रादिसमासः प्रफुल्लति वा फुल्ल विकसने· अच्· उत्फुल्लसंफुल्लयोरुपसंख्यानं· उत्फुल्लकरणे स्त्रीणां मुत्तानेचविकस्वरे· व्याहतः कोशः संकोचोस्मात् प्रादिभ्यो धातुजस्येति समासः मूर्द्धन्यांतो वा कचति कच बंधने पचाद्यच्· विगतः कचोऽस्मात् विकचः क्षपणके तो नाकेशः स्फुटितेऽन्यवत् स्फुटति· स्फुट विकसने इगुपधेति कः स्फुटो व्यक्त प्रफुल्लयोः श्वेतव्यासे इति हैमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यकासील्कसगनौ॰ गत्यर्थेतिक्तः अवंध्यादयो विकासिनां नाम्नि त्रिलिंग्यां स्युः निष्ठनिस्थाणुः यत्तु सुभूतिः घेन्वादित्वात् उणत्वं चेत्याह॰ तन्न॰ स्थाणुरिति सूत्रस्य सत्वात्॰ घेन्वादिसूत्राभा
वाच्च वा नेति पुंस्त्वं रूपभेदात् स्त्रीवत्वं॰ स्थाणुरस्त्री तिवा पाठः स्थाणुः कीले हरे पुमान्॰ अस्त्री ध्रुवे इति हैमः ध्रुवति ध्रुव गतिस्थैर्ययोः इगुपधेति कः ध्रुवो वटे वसु योगभिदोः शंभौ
शंकावुत्तानपादजे स्थिरे निश्चले निश्चिते च ध्रुवं खे जस्रतर्कयोः ध्रुवा मूर्वा शालिपर्ण्योः स्रुग्भेदे गीतभिद्यपीति हैमः शंकते स्मात् शकि शंकायां खरु शंकु इति साधु शंकुः पत्रशिला
जाले संख्या कीलक शंभु सुयादो स्त्रभेदयोर्मदू इति हैमः त्रीणि शाखापत्ररहित तरोः शाखा च शिफा मूलं च॰ ते ह्रस्वे शाखाशिफे यस्य क्षोतिडु सुशब्दे वाहुलकात् पोगुणश्च॰ एकं
सूक्ष्मशाखामूलस्य शाखोटकादेः ८ नप्रकांडोस्य निष्ठनिष्ठागतिनिहृतौ॰ स्थः स्तोम्बजवकौल स्तोगुल्मे तृणादीनां प्रकांड द्रुमगुच्छयोः गुडति गुडूरक्षायां वाहुलकान्मन्॰ इ
लयोरिकत्वं गुल्मः सेनाघद्रुभिदोः सैन्यरक्षणसंभिदोः स्तंबे स्त्रियामामलकोलावल्लीवस्त्रवेश्मसु इस्कंधरहितस्य॰ वल्लति वल्ल संवरणे सर्वधातुभ्य इन्॰ वल्लीतु वेल्लिः सर

फुल्लश्चैते विकसिते स्युरवंध्यादयस्त्रिषु स्थाणुर्वा ना ध्रुवः शंकुः ह्रस्वशाखाशिफः क्षुपः ८ अप्रकांडे स्तंबगुल्मौ वल्ली तु व्रततिर्लता लताप्र
तानिनी वीरुद्गुल्मिन्युलप इत्यपि ९ नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः॥

१० लेति वा च स्यतिः पचाद्यच् गौरादित्वात् ङीषिति मुकुटोक्तिश्चिंत्या॰ व
ल्ली स्यादजमोदायां लतायां कुसुमांतरे इति हैमः प्रतनोति तनु विस्तारे क्तिच् क्तौ च संज्ञायां पृषोदरादित्वात् अस्य वो वा प्रततिर्व्रततिः सर्वेति हलायुधं यद्वा व्रतमिव करोति व्रतयति व्रतशब्दात् तत्क
रोतीति ण्यंतात् बाहुलकात् तिः व्रततिः सुप्रतानिन्यां विस्तारे इति हैमः लतति लतिः सौत्रो धातुर्वेष्टनार्थः पचाद्यच्॰ लता ज्योतिष्मती दूर्वा शाखा वल्ली प्रियंगुषु स्पृक्कामाधव्योः
कस्तूर्यामिति हैमः त्रीणि लतामात्रस्य॰ शाखापत्रप्रचयः प्रतानः सोस्त्यस्याः सा प्रतानिनी ईदृशी लता वीरुदादिशब्दत्रयवाच्या॰ विरुणद्धि रुधिर् आवरणे क्विप् अन्येषामपि
पीति दीर्घः साहचर्यात् स्त्री॰ नहि वृतीति दीर्घः न्यंक्वादित्वात् कुत्वमिति स्वामी मुकुटोक्तिश्चिंत्या रुधेस्तत्रादर्शनात् कुत्वादर्शनाच्च॰ वीरुल्लताविटपयोः स्त्रियां गुल्मः प्रतानोऽस्त्यस्याः अतइ
निः वलति वल संवरणे विटपविस्तृप विशिपोलपाः इति वलेः संप्रसारणं कपश्च उल्पते उलं सौत्रः आवरणार्थो दाहार्थो वा कपश्चाकृवर्मणस्येति कपो वा॰ विटपादय
इत्यपः इति स्वामि मुकुटौ तन्न तादृशसूत्राभावात् उलपस्तु गुल्मिनी तृणभेदयोरिति हैमः ९ नगस्य तरोः आरोहणं भावे घञ् दैर्घ्ये॰ आरोहो दैर्घ्य उच्छ्राये स्त्री कट्यां॰ ॥

CC-0. In Public Domain. Digitization by eGangotri
NSU, Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शानमिद्रुपि आरोहणे गजारोहे इति हैमः आदिना गिरिदेवालयादिग्रहः उच्छ्रयणं श्रिञ् सेवायां उदिश्रयतीति घञ् उत्सेधनं षिधु गत्यां भावे इति घञ् उत्सेधस्तूच्छ्रये न स्त्री क्लीबे
संहनने पि च श्रित्रो बाहुलकादेरजपि त्रीणि वृक्षादिदैर्घ्यस्य प्रकाश्यते कर्भेदने चुरादिः एरच् पृषोदरादिः काम्यते कमु कान्तौ णिङ् वरंडादयश्चेति डो वा प्रकांडो विटपे
शस्ते मूलस्कंधांतरे तरोरिति स्कन्धते आरुह्यते स्कंदिर् गतिशोषणयोः कर्मणि घञ् पृषोदरादिः यत्तु मुकुटेन उणादौ स्कंदिर् धातोः स्कंदेश्च स्कांग इत्य च प्रत्ययो घश्चांतादे
श इत्युक्तं तन्न तत्रासुनो विधानात् चोऽविधानात् स्कंधः स्यान्नृपनावंशसंपरायसमूहयोः कायेतरुप्रकांडे च भ्रात्रादौ छं इत्साभिदोनि धांतेषु मेदिनी द्वे १० शाखति शाखृ व्या
प्तौः पचाद्यच् यत्तु शाख्यते व्याप्यतेऽनया गुरोश्वेयः इति मुकुटः तन्न अजव्याप्तिनिवार्तिकविरोधात् शाखा द्रुमांशे वेदांशे भुजे पक्षांतरेंतिके इति हेमः द्वे स्कंधजा शाखा शाला
ति शल चलने ज्वलितादित्वात् णः शाला तरुस्कंधशाखा शाला भवनमिष्यते इति शाश्वतः द्वे स्कंधात्प्रथमोत्पन्नशाखायाः शेते शीङ् स्वप्ने बाहुलकात् फक् ह्रस्वश्च शिफा जटायां।

अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोः १० समे शाखालते स्कंधशाखाशाले शिफाजटे शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता

सरिति मांसिकायां च मातरि जटति जट संघाते पचाद्यच् द्वे मूलस्य जटारूपस्य वटादेः शाखाया अवलं (एलता ११ शिरोग्रं शिखरं वा ना मूलं बुध्नोंघ्रिनामकः
विनी शिफा अवरोहति लंबते रुह बीजजन्मनि प्रादुर्भावे च पचाद्यच् अवरोहो वनतरोर्व्यारोहे चलनोद्गमे एकं मूलादूर्ध्वंगता शिफा लता स्यान्मुकुटस्तु प्रसंगादवरोह
स्यार्थांतरमाह तरुमूलात्प्रभृति वृक्षाग्रपर्यंतं गता गुडूच्यादिलताप्यवरोह इत्याह एकम् ११ श्रीयते श्रि सेवायां श्रयते स्वांगे श्रिरः किच्चेत्यसुन् धातोः शिरादेशश्च यत्तु शेते
स्वांगोपरि तिष्ठतीति शीङः किच्चेत्यसुन् शिरादेशश्चेति मुकुटः तन्न उज्ज्वलदत्तादिवृत्तसूत्रादर्शनात् शिरः प्रधाने सेनाग्रे शिखरे मस्तकेपि च अगति अग कुटिलायां गतौ ।
ऋज्रेन्द्राग्रवज्रेति साधुः अग्रं पुरस्तादुपरि परिमाणे पलस्य च आलंबने समूहे च प्रान्ते च स्यान्नपुंसकं अधिके च प्रधाने च प्रथमे चाभिधेयवत् शिखां राति रा दाने कः शिख
रोस्त्री द्रुमाग्रे चाद्रिशृंगपुलकाग्रयोः त्रीणि मूलति मूल प्रतिष्ठायां इगुपधेति कः मूलं शिफाभयोः मूलं विज्ञे निके बध्नाति बध्यते वा बन्ध बंधने बंधेर्ब्रधिबुधी चेति नक् उ
घ्नो नामूलरुद्रयोः अंघ्रेर्नाम नामयस्य अंघ्रिर्ना पादमूलयोः त्रीणि मूलमात्रस्य सरति कालांतरं सृ गतौ स ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिरे इति घञ्। सारो बले मज्जनि च स्थिरांशेन्याय्ये च नीरे च धने च सारं वरे न्यव सारमुदाहरंति। मज्जति द्रुमस्तोशुद्धोश्च नुक्षन्निति साधुः समोसमानलिंगोनरीति वा पाठः पुं
सीत्यर्थः लज्जावद्राजवन्मज्जा मांससारास्थिसारयोरिति भागुरेरावन्तोपि मज्जो का मज्जया सहेति। द्विरूपको शास्त्वचति त्वचसंवरणे क्विप्। यद्वा तनोति तन्यते वा तनुर्विस्तारे
तनोते रनश्च वः चाच्चि कू वलति वलसंवरणे शूकवल्कोल्का इति कन्। यद्वा वल्कपरिभाषणे वल्कयति। पचाद्यच्। वलति वा हुलकात्कलः वल्कं लाती ति तु स्वामी यत्तु वलेः क
लजिति मुकुटः तन्न। उक्तसूत्रादर्शनात्। वल्कं वल्कल शल्कयोः त्रीणि १९ काशते काशृ दीप्तौ। हनिकुषिनीरमिकाशिभ्यः क्थन्। तितुत्रेति नेट्। काष्ठं दारु इति काष्ठानुप्रकर्षे
स्थानमात्रके। द्विशिदारु हरिद्रायां कालमानप्रभिद्यपीति हैमः दीर्यते दृ विदारणे दृसनिजनीति ञुण्। पुंनपुंसकयोर्दारुरिति त्रिकांडशेषः दारुस्यात्पुन्नले काष्ठे देवदारौ नपुंस
कं इन्धकाष्ठमात्रस्य इंधेर्घिरनेन। ञि इंधी दीप्तौ करणेति ल्युट्। एधतेः नेन। असुन्। यत्तु वाहुलकान्नलोपोगुणश्चेति मुकुटः तन्न। एधतेरुभयासंभवात् इध्यते नेन। ञि इंधी दीप्तौ

सारो मज्जा नरि त्वक्स्त्री वल्कं वल्कलमस्त्रियां १९ काष्ठं दार्विंधनं त्वेध इध्ममेधः समित्स्त्रियां निष्कुहः कोटरं वा ना वल्लरिर्मञ्जरिः ह्नि

इषियुधीधीति मक्। अनिदितामिति नलोपः एधे हलश्चेति करणे घञ्। ञि इंधी अवादेधोध्मेति निपातितो वा एधः १८ स्त्रियो १३ पत्रं पलाशं छदनं दलं पर्णं छदः पुमा
पुंस्पयमसमिध्यते नया संपदादिः त्रीण्यग्निसंदीपने तृणकाष्ठादेः हूयागादो हूयमानस्य काष्ठस्य वा पंचापि पर्याया इति स्वामी। निश्चयेन कुहयते कुह विस्मापने। पचाद्य
च्। निश्चयेन कुहयति कुह विस्मापने इगुपधेति क इति मुकुटः तन्न कुहेश्चुरादावदंतात्मनेपदित्वात्कुटनं कोटः कुट कौटिल्ये भावे घञ् कोटं राति रा दाने। आतोनुपेति कः
द्वे स्यादि रंधस्य वल्लति वल्ल संवरणे क्विप् ऋच्छति ऋ गतौ। अच इः वल्लू चासावरिश्च यद्वा वल्लेः संपदादित्वात् क्विप् वल्लमृच्छति। अच इः
यद्वा घञ् वल्लं मंजुलमृच्छति अच इः शाकंध्वादिः द्वे १३ पतति पत्लृ गतौ ष्ट्रन् पत्त्रं तु वाहनेपर्णे स्यात्पक्षे शरपक्षिणोः पलमुन्मानमांसयोः पलं मांसमश्नाति। अश
भोजने कर्मण्यण् मुकुटस्तु पलगतौ घञर्थे कः पलति रक्षति जलादेः पलरक्षणे पचादिः पलं चलनमश्नुते व्याप्नोती त्याह। तन्न घञर्थे क इति नस्यास्तापाभ्युपिहति
युक्तपर्थेतिपरिगणनात्। पलरक्षणे इति धातोरसत्वात्। पचाद्यजंतस्य पलं चलनमिति वाक्या संभवात् पलाशः किंशुकः शटी। हरिहर्लोराक्षसश्च पलाशं छदनेस्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पलाशः किंशुके स्वपे हरिते पलाशपत्रे छद्यते नेन· छद अपवारणे· आधृषाद्वेति णिजभावपक्षे करणे ल्युट्· छदनं छादने पक्षपिधाने छेदने· छिदिर् कर्त्तने दलति द
लत्युद्गारणे· पचाद्यच्· दलमुत्से घखण्डयोः शस्त्रे छेदे पथ च दृश्यं पत्रे पिपर्त्ति पृपालनपूरणयोः कृपृविभिधाञ्भ्योऽनुः यद्वा· पृणाति पृणप्रीणने पचाद्यच्· यद्वा पर्णयति प
र्णं हरितभावे पचाद्यच्· यत्तु मुकुटः पिपर्त्ति प्रीणयति· पचाद्यच् चिवा पर्णमित्याह· तन्न· असंभवात् पर्णो स्त्रिपर्णे पर्णं तु पत्रे इति हैमः· छद्यते अनेन णिजभावे पुंसि संज्ञायामिति
घः णिज्ञं नै स्यापि छदः पलाशोऽगडुनिग्रंथिपर्णं तमालयोः· छद्यतेऽनेन वा छादेर्घे इति ह्रस्वः पुमानिति विशेषणं तु क्लीबनिरासार्थं· षट्· पल्लते· संपदादित्वात् क्विप्· तेन ऋदोरप्
पल्लवासोल्लवश्च· पल्लव किसलये चले· विटपे विस्तरे लक्तरागे शृंगारपिंगयोः व्याडि सुपुंसि क्लीबे च पल्लवः किंचित्सलति· षल गतौ· बाहुलकात् कपन् प्रत्ययः पृषोदरा
दिः ह्लेनव पत्रस्य विस्तरणं· स्तॄञ् आच्छादने· प्रथने वावशब्दे इति भावे घञ्· विस्तारस्तनौ विटपे· विटान् पाति पारणे· आतोनुपेतिकः यद्वा विटानां पानं· पापाने· घञर्थे
कः यद्वा· विटति विट्यते वा· विट आक्रोशे· विटपविष्टपेतिकपन्· यत्तु वक्ष्यते अनेनवट वेष्टने· विटपादयश्चेति सूत्रमुपन्यस्तं मुकुटेन· तन्न· एतादृशसूत्रादर्शनात्·

पल्लवोस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम् २४ वृक्षादीनां फलं शस्यं वृन्तं प्रसवबंधनम्· ॥ ॥

विटपो न स्त्रियां स्तंब शाखा विस्तार पल्लवे· विटाधिपे ना· इति शाखादिविस्तारस्य· केचित्तु त्रमेदिनीकोशादेव पल्लवादि चतुष्टयमेकार्थमाहुः· शाखायां पल्लवे स्तंबे विस्तारे विटपो
स्त्रियामिति रभसाच्च· स्कंधादूर्ध्वं तरोः शाखाक टयो विटयोमत इति कात्याच्च २४ आदिना लतागुल्मादिग्रहः· केचित्तु वृक्षादीनामिति पूर्वेणापि संबध्नंति· फलति· फल निष्प
त्तौ· पचाद्यच्· फलं निष्पन्नं सस्य शब्दवाच्यं· फले हेतु कृते जाती फले फलक सस्ययोः स्मृति· षसषस्तिस्वप्ने· माच्छासस्तिसूभ्यो यः तालव्यपाठे तु शसुहिंसायां· शस्यते· नकि शसि
चर्तीनियत्· काम्पीति मुकुटोक्तिश्चिंत्या· अचोयदित्यत्र तकादीनामुपसंख्यानात्· बसेर्हिदंत्यस्य तकीत्यत्राग्रहणाच्च· इति फलस्य· वृणोति· वृञ् वरणे· बाहुलकाद्दंजिधृषी १२
निक्तः नुम् च मुकुटस्तु वृणोतेर्नुक्तेति सूत्रं कल्पितवान्· बाहुल्यात् त्वणत्वमिति तच्चिंत्यं अनुस्वारं प्रति णत्वस्यासिद्धत्वात्· वृन्तं प्रसवबंधे च घटीधाराकुचाग्रयोः प्रसूयते·
पुष्प सके· ऋदोरप्· बध्यतेनेन· बंध बंधने· करणे ल्युट् पुष्प प्रसवस्य पुष्पफलपत्रस्य बंधनं· द्वे ॥

CC-0. In Public Domain. Digitization by eGangotri

शलति शल चलनसंवरणयोः पचाद्यच्· अटति· अटगतौ· मृगय्यादित्वात् क्तुः शलश्चासावटुश्च ताल्व्यादिः शटीशटितं शलादुरित्यूष्मभेदात्· एकं· फले इत्येव· वायतिस-
पेओवैशोषणे· गत्यर्थाकर्मकेति कर्तरि क्तः ओदितश्चेति नत्वं· वन्यते· वनुयाचने· घञ्वा· वानं शुष्कफलेशुष्केसीवनेगमनेकटे· जलसंप्लुतवानोर्मिसुरंगासौरभेषु च इति हैमः
उभे शलाटुवाने त्रिषु स्त्रियां वाना एकम् ॥ क्षरति क्षरसंचलने· ण्वुल्· क्षारकोरसे· कोरकेपक्ष्यादिपाशे इति हैमः क्षारकः पक्षिमत्स्यादिपिटके जालके पिच· जालमिव· इवे
प्रतीतिकन्· जालकं कोरके दंभे कुलाया नाययोरपि· नपुंसि मोचनफले स्त्रियां तु वसनांतरे गिरिमाद्ज लौकायामपि स्याद्विधवास्त्रियां· भटानामश्मरचितांगरक्षिण्यां च जालि
का इति नवकलिकाहं इत्यस्य कलयति· कल गतौ संख्याने च· चुरादिः अच इः स्वार्थे कन्· कुर्यते· कुरशब्दे तोरे कृत्रादिभ्यः संज्ञायां वुन्· कोरको ऽस्त्री कुड्मले स्यात्कक्कोलकमृ
णालयोः द्वे अविकसितकलिकायाः गुध्यते गुधपरिवेष्टने· उंदिगुधिकुषिभ्यश्चेति सः कित्·॥ स्तबके हारभेदे च गुत्सः स्तंबेपि कीर्तित इति दंत्यांतेषु रुद्रः श्रीभोजस्तु शास्या
दिभ्यश्छमित्याह· स्वार्थे कन्· पुष्पादिस्तबके गुच्छो मुक्ताहारकलापयोरिति च वर्गांते रंतिदेवः स्तूयते· ष्टुञ् स्तुतौ· कृत्रादिभ्यो वुन्· षट्ठानि ष्ठति स्थलो वजवको· द्वे विका ॥

आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु ॥ क्षारको जालकं क्लीबे कलिका कोरकः पुमान् स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियां १६ ॥
सोन्मुखकलिकायाः इति मुकुटः कलिकादिकदंबस्येत्यन्ये· कुड्यते· कुटतिवा· कुटछेदने· कौटिल्येवा· कुटिकम्प्रि १९ स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमं ·॥
भ्यां कलच्· बाहुलकात् कुडेरपि मुंचति कलिकात्वं· मुञ्चमोक्षणे· बाहुलकात् हुलक्· मुंचेरलकू कत्वमुत्वं चानरूनि स्वामिमुकुटौ तन्न तादृशसूत्राभावात्· ईषद्विकासोन्मु
खकलिकायाः द्वे ॥ सुष्ठु मन्यंते आभिः मनज्ञाने असुन्· मुकुटस्तु सुप्रीतं मन आभिरिति विगृह्य प्रादिसमास इत्याह· तन्न· अन्यपदार्थत्वालाभात्· भूम्नि स्त्रियां सुमन
… कोशः सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोरिति मेदिन्या देरे कत्वमपि· पुष्पं सुमनाः कुसुममिति नाममाला· पुष्यति पुष्पविकसने· पचाद्यच्· पुष्पं विकासआ
… दस्य विमाने च कुसुमे नेत्ररुज्यपीति हैमः प्रसूयते स्म· षूङ् प्राणिप्रसवे· स्वादय ओदितः ओदितश्चेति निष्ठानत्वं प्रसूनं तु प्रसवे फलपुष्पयोरिति हैमः कुस्यति·।
… कुसेः हं भोमेदे तारत्युमः संज्ञापूर्वकत्वान्न गुणः कुसुमं स्त्रीरजो नेत्ररोगयोः फलपुष्पयोः सर्वसाधुसमाने षुसुमं स्यादभिधेयवत्· चत्वारि ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

अ॰ को॰ टी॰ रा॰ टी॰ कां॰ १३

सहह्मूमस्विद्यति· कामजनकत्वात्· दो अवखंडने· आतोनुपसर्गे कः· एषो दरादिः यद्वा मकरमप्यं दाति· अदि बंधने· कर्मण्यण्· शकंध्वादिः यद्वा गतिकारकोपपदानामित्युक्तेः सु
तुम्भिर्मकरन्द इति कृत्समासे प्रध्ययनवृत्तरसेह्यमिलं इति मुकुटः तन्न· उत्तरदले विभक्त्यनुपपत्तावपि पूर्वदले विभक्तिसत्त्वात्· अन्यथा राजदृशीं चर्मकार इत्यादौ नलोपो न स्यान्नदृ
ष्टान्तोऽप्यस्तु· अतः प्राध्ययनमित्यस्यैव ष्टत्वात्· पुष्पस्य रसः॥ परागच्छति· गम्लृ गतौ· अन्येष्वपीति डः· परागः कौसुमे रेणौ धूलिस्नानीययोरपि· गिरिप्रभेदे विख्यातावुपरागे
च चंदने ऽर्पुमनसा रजः॥ १७ द्वाभ्यां स्त्रीपुंसाभ्यां हीनं फले पुष्पे पत्रे च वक्ष्यमाणमश्वत्थादि फलपुष्पादिषु वर्तमानं नपुंसकलिंगं ज्ञेयमित्यर्थः· विकारावयवयोः इत्यन्नस्य प्रत्ययस्य फले लुक्
पुष्पमूलेषु बहुलमिति लोपः पूर्वोक्तायवा रः हरीतक्याः फलं हरीतक्यादिभ्यश्चेति लुप्· लुपि युक्तवद्व्यक्तिवचने· हरीतक्यादिषु व्यक्तिरिति लिंगमेव प्रकृतिवत् संख्या
आदिना कोशातकी द्राक्षा बदरी केटकारिकेत्यादयः॥ अश्वत्थस्य फलमाश्वत्थं प्लक्षादिभ्योऽण्· वेणोर्विल्वादिभ्योऽण्· विधेर्न लोलुक्· न्यग्रोधस्य च केवलस्येत्यैच्· इंगुदा

मकरंदः पुष्परसः परागः सुमनोरजः १७ द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियां आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले १८ बार्हतं च फ
ले जंम्बा जम्बूः स्त्री जम्बुजाम्बवम् पुष्पे जाती प्रभृतयः स्वलिंगा व्रीहयः फले १९ विदार्याद्यास्तु मूलेऽपि पुष्पे क्लीवेऽपि पाटला॥

दं १८ बृहत्याः फलं पृथक् पृथक् एकैकं जमति· जमु अदने· अंदूदंभूजंबूः इत्यनेन कूप्रत्ययो बुगागमश्च निपातितः जंबूः स्यात्पादपांतरे तथा सुमेरुस्थे द्वीपभेदेऽपि
च स्त्रियां· जंब्वाः फलं· जंबावेत्यण्· तस्य विधानान्न लुक्· पक्षे ओरञ्· तस्य लुब्वेति वा लुप्· लुपि युक्तवत्· पक्षे फले लुक्· लुपि जंबूः अतिजांबवं लुकि जंबु ह्रस्वो नपुंसके· श्रीलिजा
त्या पुष्पं जाती पुष्पमूलेषु बहुलमित्यनुशासनादेरत्रो ऽणश्च लुप्· यूथिकाशेफालिकामल्लिकाद्याः यवानां फलानि· यवाः अवयवे च प्राण्योषधीत्यण्· फलपाकशुषामिति लुप्मा
षाः मुद्गाः॥ १९॥ विदार्याः भूकूष्माण्ड्याः मूलं पुष्पं फलमपि· विदारी· गंभारी शालपर्णी पाटला याः पुष्पं· लुकि तु पाटलं· पाटलः कुसुमे वर्णे प्याशुव्रीहिश्च पाटल इति प्राश्व १३
तान् पुंल्लिंगोऽपि बुध्यते· बुध अवगमने· सर्वधातुभ्य इन्· नोक्तमनित्यमिति न गुणनिषेधः बोधिश्चासौ द्रुमश्च· बोधिः पुंसि समाधौ स्याद्भेदे पिप्पलपादपे· इति कोशोऽपि· पिप्प
लो बोधिरश्वत्थ इति· चलं दलमस्य· पिप्पलं जलमस्यास्ति· मूले सिक्तत्वात्· अर्श आद्यच्·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिप्पलं सलिले वस्त्रच्छेदभेदे च नानरौ कुंजरेणाश्यते अशभोजने कर्मणि ल्युट् २० शाल्मलिवटाद्युपक्षयान श्वश्चिरं तिष्ठति सुपीतिकः पृषोदरादिः यद्वा अश्वस्थं जलमस्यास्ति अर्शआ
द्यच् आपः प्रजाहितं शीतमश्वस्थं पवनं विषमिति केशरमाला अश्वत्थः पिप्पलद्रोस्याद्श्वस्यापूर्णिमामता पंचकपयस्तिष्ठंत्यत्र अमरमालायां पवर्गतृतीयमध्योपि पृषोद
रादिः दधिवर्णो द्रवस्तिष्ठत्यस्मिन् गृह्णाति ग्रह उपादाने ग्रह्यादित्वात् णिनिः मननं मन ज्ञाने संपदादिः गमः क्वौ गमादीनामिति नलोपः तुक् मथति मथ विलोडने
पचाद्यच् मनोमथः मन्मथः कामचिंतायां कपित्थे कुसुमायुधे दधिफले स्यात् पुष्पयुक्तं फलमस्य दंतानां शठ इवापकारित्वात् सप्त २१ उदुंबधितर्मवरमनेन उदति शब्देनांव
नेवा अविशब्दे वाहुलकाद् रन् पृषोदरादिः उदुंबरस्तु देहल्यां वृक्षभेदे च पंडके कुष्ठभेदे पि च पुमांस्ताम्रे पि स्यान्नपुंसकमिति विश्वः मुकुटस्तु मेदिनीसंमत्या टवर्गतृतीय
मध्यमप्याह तन्न तत्र मध्यवर्णनियमाभावात् आद्यंतयोरेव नियमात् जंतवः फलेस्य यज्ञमंगति अग्निर्गत्यर्थः कर्मण्यण् हेमवर्णं दुग्धमस्य चत्वारि कुंभूमिवि

बोधिद्रुमश्चलदलः पिप्पलः कुंजराशनः २० अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः तस्मिन्दधिफलः पुष्पफलदंतशठावपि
॥२१॥ उदुंबरे जंतुफलो यज्ञांगो हेमदुग्धकः कोविदारे चमरिकः कुद्दालो युगपत्रकः २२ सप्तपर्णो विशालत्वक् शारदो विषमच्छदः॥

दृणाति दृविदारणे कर्मण्यण् पृषोदरादिः चमरमस्यास्ति अतइनिठनौ कुमुद्दालयति दलविदारणे कर्मण्यण् शकंध्वादिः युगंयुग्मं पत्रमस्य चत्वारि कांचनारइति
ख्यातस्य २२ कांडे कांडे सप्तपर्णान्यस्य विशाला त्वगस्य शरदि पुष्प्यति कालात्साधुपुष्प्यदित्यण् शारदीऽन्यतापि शारदी तोयपिप्पल्यां सप्तपर्णे च शारदीति दंत्यान्तेषु रु
द्रः विषमः छदो यस्य चत्वारि छतवनी निख्यातस्य आरग्वधं रोगशंकायां संपदादिः आरगं रोगशंकामपि हंति कर्मण्यण् बहुलं तणीति हंतेर्वधः अदंतः एयल्लोपावि
वि[illegible] यद्वा रंज रागे संपदादिः आरजं रोगरागमपि हंति यत्तु मुकुटः आसमंताद्रुजं वधति छिनत्ति वध छेदने सेचनपूरणे पृषोदरादिरित्याह तन्न उक्तधातोः पा
[illegible]कुत्राप्यदर्शनात् यत्तु वधिः प्रकृत्यंतरमिति जनिवध्योश्चेति सूत्रे वृत्तिः तन्न मुनित्रयविरोधादिति प्रपंचितं मनोरमामंडने यदपि स्वामिनोक्तमासमंताद्रुजां वधो
त्रेति तदपि न व्यधिकरणबहुव्रीहित्वपृषोदरादित्वकल्पनप्रसंगात् व्यचकोपि ह्रस्वादिरपि अरग्वधो यसंपाकः कृतमालस्तथार्ग्वधः इति रत्नकोशात् राजा चासौ वृक्षश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रम्यालांराजा· राजदंतादिरितिवारोगालांराजानंवृश्चतीतिवा· ओव्रश्चूछेदने वाहुलकात्सक्· सम्यकूपाकोस्य दंत्यादिः· शंकल्याणंयाकोस्येतितालव्यादिरपि सामीतु
पूर्वोक्ष्मणैविमकतीतिविगृह्णनूशम्याकमितिपाठंमन्यते· संपाकस्तर्के केघृष्टेसम्याकश्चतुरंगुलं। चतस्रोंगुलयःप्रमाणमस्यपर्वणः तद्योगात्तद्वृक्षोपि २३ आरेवयति।
निःसारिष्मितमलंसारकत्वात्· रेवृस्नवगतौलिच्·विच्· अतति· अतसातत्यगमने·पचाद्यच्· आरेवृचासावतश्च व्याधीन्हंति· कर्मण्यण्· हनस्तोचिराणलोः कृतमालास्य
पुष्पैः शोभनोवर्णोस्य·सुष्ठुवर्णोस्यस्येतिवापाठः अष्टौधनवहेडइतिख्यातस्य जम्यतेजमुअदनेगंभीरादयश्चेतिसाधुः दंतानांशठइव·जंभयत्यम्लत्वात्·जभीगात्रवि
नामे·पचाद्यच्·रधिजभोरितिनुम्·गंभीरादिलादीरन्· वृषादित्वात्कलच्·जंबीरः प्रस्थपुष्पेस्यात्तथादंतशठद्रुमे पंचजंभीरीतिख्यातस्य २४ वृणोति वृञ्वरणे·
कर्तरिल्युट्·वरणोवा·कृवृदारिभ्यउनन्· वरुणस्तरुभेदेऽप्सुप्रतीचीपतिसूर्ययोः सिनोति· सीयतेवा·षिञ्बंधने· सितनीतितुन्· सेतुर्नालोकुमारके·तिक्तःशाको

आरग्वधेराजवृक्षशम्याकचतुरङ्गुलाः २३ आरेवतव्याधिघातकृतमालसुवर्णकाः स्युर्जंबीरेदंतशठजंभजंभीरजंभलाः २४॥
वरुणोवरुणःसेतुस्तिक्तशाकःकुमारकः पुन्नागेपुरुषस्तुङ्गःकेसरोदेववल्लभः २५ पारिभद्रेनिंबतरुर्मंदारःपारिजातकः ॥

स्य शाकत्वंचास्यपत्राणांशाकमध्येपाठात्·तिक्तशाकस्तुखदिरेवरुणेपत्रसुंदरे·कुमारश्चिरतरुणत्वात्कुमारयतिकुमारक्रीडायां·पचाद्यच्·कुमारइव इवेप्रतिकृताविति
कन्·पंचपुमान्नागइव·उपमितंव्याघ्रेतिसमासः·पुन्नागः नृश्रेष्ठः प्राधान्यात्सइव पुन्नागस्तुसितोत्पले· जातीफलेनरश्रेष्ठेपांडुनागद्रुमांतरे·पुरअग्रगमने·पुरःकुषन्नय
नुपिपर्त्तीतिविगृह्यपुरःकुषन्निस्तुपन्यसंमुकुटेनतद्भसात्·पुरुषरत्वात्मनिनरेपुन्नागेच· तुंज्यते·तुजिहिंसायां·घञ्·उच्चत्वाद्वा·न्यंक्वादिः·तुंगःपुंनागनगयोर्बुधेस्यात्
न्नतेऽन्यवत्·तुंगीप्रोक्ताहरिद्रायांवर्वरायामपीष्यतेइतिहेमः प्रशस्ताःकेसराअस्य·अर्शआद्यच्·केसरोनागकेसरे·तुरंगसिंहयोःस्कंधकेशेषुवकुलद्रुमेपुंन्नागवृक्षेकिं
जल्केस्यात्केसरंतुहिंगुनीतिहेमः देवानांवल्लभः पञ्चगुर्जरदेशेसंदेशाराइतिख्यातस्य २५ पारमस्यास्तिअतइनिः पारिपारंगतंभद्रमस्य· परितोभद्रमस्येतिवाप्रज्ञाद्य
ण्·पारिभद्रस्तुनिंबद्रुमेदारेदेवदारुणि·नियमयति·यमउपरमे·पृषोदरादिः·निंवति·णिविसेचने·पचाद्यच्· ववयोरक्यं· कर्मणिघञ्वा·निंवसंज्ञकस्तरुःशाकपार्थिवादिः

मंदं कृच्छ्रमितिवा· कृगतौ: कर्मण्यण्· यद्वा· मंदते· मदिस्तुत्यादौ· अंगिमदिमंदिभ्य आरन्· पारिपारं गतं· जातं जन्मास्य· पारिलः समुद्राज्जातो वा· स्वार्थे कः चत्वारि व कायी नीति
ख्यातस्य· अतिशयेन नेयतिलीशः समाधौ· इगुपधेतिकः यद्वा अतिक्रांतो निशाः अत्यादय इतिसमासः पृषोदरादिः स्यंदते· स्यंदू प्रस्रवणे· बहुलमन्यत्रापीति युच्· स्यंदनं तु
स्मृतं क्लीवं रथांगे तिनिशे नरीतिरभसः स्यंदनं तु स्तुतो नीरे तिनिशेनारथेस्त्रियां· नयति लीनुशापणे· नियोमिः पुल्लिंगस्तिनिशे नेमिश्चक्रधारां ते स्त्रियामपीति रुद्रः द्रुलो
पेइतिदीर्घः रथस्य द्रुः तत्रोपयुक्तत्वात्· अतिशयिनो मुक्तोविस्तारोस्य कप्· २६ वंच्यते वंचुगतौः बाहुलकादुलोजत्वं च· वंजुलः पुंसितिनिशे वेतसाशोकयोरपि· चि
त्रं करोति· अतिदार्ढ्यपिलघुत्वात्· क्विप्· सप्तमपीतं करोति· तत्करोतीतिणिच्· बहुलमन्यत्रापीति युच्· तनोति· तनु विस्तारे· पचाद्यच्· कपीनां कपेर्वर्णस्य वा तनः अ
न्येषामपीतिदीर्घः यद्वा याः लक्ष्म्यास्तनई तनः कपीनां कपेर्वा ईतनः आम्रमतति अतसातत्यगमने कृत्रादिभ्यो वुन्· ह्रस्वादिरपि· अम्लत्वमतति· रलयोरैक्यं· कपि

तिनिशस्यंदनोनेमीरथद्रुरतिमुक्तकः २६ वंजुलश्चित्रकृच्चाथद्वौपीतनकपीतनौ आम्रातकेमधूकेतुगुडपुष्पमधुद्रुमौ २७ वानप्रस्थम
धुष्ठीलौजलजेत्रमधूलकः पीलौगुडफलस्रंसीतस्मिंस्तुगिरिसंभवे २८ अक्षोटकंदरालौद्वावंकोटेतुनिकोचकः॥ ॥

चूतोऽम्रातकोस्य फलेप शुहरीतकीतित्रिकांडशेषः त्री एयंवाडा इतिख्यातस्य मत्यते मन्यते वा· महपूजायां· मनज्ञाने वा· उलूकादयश्चेतिसाधुः गुड इव पुष्पमस्य
मधुनामा द्रुमः २७ वनप्रस्थेवनेकदेशेभवः तत्रभवइत्यण्· वानप्रस्थोमधूकेपिस्यात्तृतीयाश्रमेपुमान्· मधुष्ठीवति· ष्ठिवु निरसने· इगुपधेतिकः पृषोदरादिः मधुष्ठी
लो गर्भस्य द्विवा पंचमहुआ इतिख्यातस्य अत्रमधूके· मधुलाति· ला दाने· आतो नुपेतिकः अन्येषामपीतिदीर्घः स्वार्थे कन्· गिरिजे त्रेतिमूलपाठ इतिसुभूत्यादयः गौर
शाको मधूलकोन्यो गिरिजः सोऽल्पपत्रक इतिमाधवः मधूकोन्यो मधूलस्तु जलजो दीर्घपत्रक इतिस्वामी एकं पीलप्रतिष्टंभे· मृगय्वादित्वात् दुः गुड इव फलमस्य· स्रंसपतिम
लं· स्रंसुअधःपतने· आवश्यके णिनिः त्री लाि गुर्जरदेशे पीलूइतिख्यातस्य तस्मिन् पीलौ गिरिजे २९ अक्षणोति· अक्षू व्याप्तौ संघाते च बाहुकादोटः अक्षस्येव उदाः
पर्णान्यस्येति वा· कर्परमालति· अलभूषणादौ· कर्मण्यण्· यद्वा· कर्परास्यास्ति· सिध्मादित्वाल्लच्· कंदराल इतिवापाठः पूर्ववत् हैपर्वतपीलोः अखरोट इतिख्यातस्य

वाहुलकाद्दोटः निकुच्यते कुचशब्दे तारेरकृत्त्वादिभ्योवुन् अंकोलोपि २ अंकोलस्य द्वे राढ इतिख्यातस्य प्रशस्तानि पलाशान्यस्य अर्शआद्यच् यद्वा पलं मांसम श्नाति अशभोजने कर्म
ण्यण् पलाशः किंशुकः शटी हरिद्रुर्लोराक्षसश्च पलाशंछदने स्मृतमिति हैमः किंचित् शुक इव शुकतुंडाभपुष्पत्वात् शृणाति शृहिंसायां ने अच् यद्वा प्रशस्तानि पर्णान्यस्य
अर्शआद्यच् यद्वा पिपर्त्ति पॄपालनपूरणयोः कॄपॄवृषिघाञ्भ्योनः पर्णं पत्रे किंशुके ना वातं पोथयति पुथहिंसायां कर्मण्यण् चत्वारि अयनं इण्गतौ नपुंसके इति क्तः वाविभ
कल्पस्येतं अस्मेस्यति षोअंतकर्मणि आतोनुपेति कः यद्वा उयते वेञ् तंतुसंताने वेञ्संद्धेत्यसच् बाहुलकात्त्वं न यत्तु वेतसवाहसपनसा इत्यसनिनिपातनात् इवतुडि
त्याह मुकुटः तन्न उणादिषु तत्सूत्रादर्शनात् २८ रम्यते रमक्रीडायां हनिकुषिनीरमिकाशिभ्यः क्थन् रथोस्यंदनवानीरावित्सजयः रथः पुमानवयवेस्यंदने वे
तसेपि च अभ्रमिवाभ्रसमये वा पुष्यमस्य वेति विद्यते वा वाहुलकाद्दुलच् गुणाभावश्च विदुलस्तु पुमानम्लवेतसे वेतसेपि च शीतमस्यास्ति अच् वेतसे बहुवारे नागु

पलाशे किंशुकः पर्णो वातपोतोऽथ वेतसे २८ रथाभ्रपुष्पविदुलशीतवानीरवंजुलाः द्वौ परिव्याधविदुलौ नादेयी चांबुवेतसे २९ सो

लो शीते हिमे त्रिष्विति रभसः क्लीबलिंगमपि शीतं तुषार वानीरबहुवारद्रुमेषु वेत्सजयात् वायति ओवैशोष ३० भांजने शिग्रुतीक्ष्णगंधकाक्षीवमोचकाः॥
ले क्विप् वं शुष्कमाससमंतान्नीरमस्य वजति वजगतौ वाहुलकाद्दुलच् नुमच वंजुलः पुंसितिनिर्दिष्टवेतसाशोकयोरपि षट् वेतइतिख्यातस्य परिविध्यते व्यध ताडने
घञ् परिव्याधस्तु पुंसिस्याद्द्रुतसे च द्रुमोत्पले नद्यांभवा नद्यादिभ्योढक् नादेयीनागरंगस्याज्जपायां जलवेतसे भूमिजंब्वां वजंब्वां च कांगुष्ठे पिचयोषिति अंबुनिजातोवेत
सः शाकपार्थिवादिः चत्वारि जलजातवेतसस्य ३० शोभामनक्ति अंजूव्यक्तिम्रक्षणकांतिगतिषु कर्तरिल्युट् बहुलमन्यत्रापीति युज्वा अन्नाद्यलि शोभांजनः सुष्ठुभाताम
क्ति ल्युट् अन्नाद्यण् इंस्यादिरपि शिनोति शिञ्निशाने जंब्वादयश्चेतिनिपातितः शिग्रुर्नाशाकमात्रे च शोभांजनमहीरुहे तीक्ष्णोगंधोस्य पोषादिभावेतिकप् आक्षीवतिअ
क्षीवयतिवा क्षीवृमदे पचाद्यच् हस्वादिरपि अक्षीवं वसिरंधाशिगोनाऽमत्ते पुनरन्यवत् मोचयति मुच्लृमोक्षणे णिच् अच् मोचः शोभांजने पुंसिमोचा शाल्मलिरंभयोः तत्र
स्वार्थेकन् पंच सहेंजन इतिख्यातस्य असौ शोभांजनं रक्तपुष्पः मधुप्रधानः शिग्रुः इतिमुकुटः रक्तोमधुकरः रक्तकंठानामितिदर्शनात् मधुर्मधुरः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिग्रुरित्येके एकं मुनग इति ख्यातस्य। नरिष्टमस्मात्। अरिष्टो लशुने निंबे फेनिले काककंकयोः। रिष्टा परिष्टे क्षेमाशुभाभावे पुंसि तु द्वे च फेनिले। फेनादिलच्। हेरीठा इति ख्यातस्य ॥२॥ बिलति। बिल भेदने। उल्वादिः। शंडते। शडि रुजायां सलिकल्यनि महि भडि भण्डि शंडी स्यादिनेलच्। शंडिलस्य गोत्रापत्यं। गर्गादिभ्यो यञ्। शांडिल्य इवेति। शंडयति रुजं वा। इलच्। स्वार्थे ष्यञ्। शांडिल्यः पावकांतरे। विटे मुनौ चेति हेमः। शिलूषस्यापत्यं। शैलूष इवेति वा। नटे बिल्वे च शैलूष इति तालव्यादिः मूर्द्धन्यांतेरभसः। मां लक्ष्मीं परं आलुनाति। लूञ् छेदने। वा हुलकाड्डूरक्। श्रीप्रदः श्रीप्रियं वा फलमस्य। शाकपार्थिवादिः। श्रीफलः पुंसि मालूरे धात्रीनीलिकयोः स्त्रियां। यं च बिल्ववृक्षस्य। प्लक्षति। प्लक्ष संचलने। अन्यत्रापीति डः। शपिलकादिः। यद्वा। प्लाक्ष्यते प्लक्ष भक्षणे। कर्मणि घञ्। प्लक्षत्यधो गच्छतीति वा। अच्। प्लक्षो जटी गर्दभांडद्वीपभित्कुंजराशने। जटति। जट संघाते। सर्वधातुभ्य इन्। ङीष् वा। जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटी। रुद्रे तु गर्दभांडे जटी प्लक्षो। पृची संपर्के। बाहुलकात्कटः। गौरादिङीष्। पर्कटी नूतनफले पूगादेः

रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ॥२२॥ बिल्वे शांडिल्यशैलूषौ मालूरश्रीफलावपि प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः

प्लक्षपादपे श्राश्वत्थोपि। विरूपापर्कटी प्लक्षः प्लक्षः पिप्पलपादपः त्रीलिपाकरि इति ख्यातस्य न्यक् रुणद्धि। रुधि ॥२३॥ गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ
र् आवरणे। कर्मण्यण्। न्यग्रोधस्तु पुमान् व्यामवटयोः शमीतरौ। न्यग्रोधी तूपचित्रायां। वहवः पादा अस्य। संख्यासुपूर्वस्य। वटति। वट वेष्टने। अच्। वटी त्रिषु गुणे पुंसि स्यान्न्यग्रोधकपर्दयोः त्रीणि ॥२३॥ गालवस्यापत्यं। ऋष्यंधकेत्यण्। गालं नेत्रस्य वैवायति। ओवै शोषणे। आतोऽनुपसर्गे कः। वा गालवो मुनिभेदे स्यात्त्रोध्रवृक्षे च कीर्तितः। शबराणामयं। तस्येदमित्यण्। इत्यादिरपि। शाबरः ख्यापराधे च लोध्रे पापे च पठ्यत इति। दंत्यादावजयः। शाबरी शूकशिंब्यां स्यात्पुंसि पापापराधयोः। लोध्रे वर्ण्यं करे पुंसि कांतिके येगताधिये इति तालव्यादिः। रुणद्धि। रुधिर् आवरणे। बाहुलकाद्रन्। शूद्रादयः इति रल्लिति मुकुटः। तन्न। तादृशसूत्राभावात्। कपिलकादिः। तार्यते मलमनेन। तॄ कृपिभ्यः कीटन्। इत्वं रपरत्वं। तिलस्नेहने नांगं। तिल स्नेहने। उल्वादिः। मार्ष्टि अनेन। मृजू शुद्धौ। ल्युट्। नंद्यादित्वाल्ल्युरिति मुकुटः। तन्न। तस्य कर्तरि विधानात्। मार्जनं न हृद्यो मार्जो पुंसि स्याल्लोध्रशाखिनि। षट् श्वेतलोध्रस्य। आद्याः श्वेतलोध्रे शेषा रक्तलोध्रे इति स्वामी। अम्यते अमगत्यादौ। अमितम्यो दीर्घश्चेति रक्। दीर्घश्च। चूष्यते स्म। चूष पाने

अ·को· अच्·रसमलति·अलभूषणादौ· कर्मण्यण्·त्रीणि सहकारयति मेलयति हूं हूं· अच्· अतिशयितं सौरभमस्य एकमतिसुगन्धाम्रस्य ३३ कुम्भेति संघातविगृहीतं· कार्मुके
द्वी·कां· वरश्मर्यां च कुंभः क्लीवं तु गुग्गुलाविति रभसः· उदूखले गुग्गुलौ च क्लीबमुक्तमुलूखलमिति रुद्रः· कुंभोलूखलकं कुंभं कुम्भोलूखलकं वरमिति वाचस्पतिः कमुंभति· उंभ पू
१६ रणे· कर्मण्यण्· शकंध्वादिः· उर्ध्वं खं उलूखं· पृषोदरादिः· उलूखं लाति· ला दाने आतोनुपेति कः· ततः स्वार्थे कः· कुंभोलूखलकाकारा द्रूक्षकोशान्निर्यातं· कोशभवः अध्या
त्मादि ठञ्· कौशिको नकुले व्यालग्राहे गुग्गुलु शक्रयोः· कोशजोलूकयोश्च स्याद्विश्वामित्रमुनावपि· कौशिकी चंडिकायां च नदीभेदे च योषिति· गोजति गुजस्तेये· क्वि
प्· गुजो व्याधेर्गुडति· गुड रक्षणे· बाहुलकादुः· डलयोरेकत्वं· पुरति· पुर अग्रगमने· इगुपधेति कः· पुरं पाटलिपुत्रे गेगुग्गुलौ तु पुमानयमिति रभसः· यत्तु विपर्ति पुरः इगुप
धेति कः· उदोष्ठ्यपूर्वस्येत्युत्व इति स्वाम्याह· तन्न· प्रीञ् तर्पणे कांतौ चेत्यस्य तत्र ग्रहणात्· प्रीणातीति प्रियः इति वृत्तिकृता विगृहीतत्वात्· प्रीणातीति प्रियः इत्युक्ता इगुप

आम्रश्चूतो रसालोसौ सहकारोतिसौरभः ३३ कुंभोलूखलकं क्लीवे कौशिको गुग्गुलुः पुरः शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ३४ राजा
धत्ता प्रीकिरः क इति माधवोक्तेश्च पं च शिलति शिल उंछे· बाहुलकादुः श्लेष्माणमन्तति· अत सातत्यगमने· क्वुन् १ दनं पियालः स्यात्सन्नकद्रुर्धनुष्पटः ॥ शाखि·सर्वतोमदुष्टाः ॥
शिल्पिसंज्ञयोरपूर्वस्यापि· श्यायते स्म· श्यैङ् गतौ· गत्यर्थाकर्मकेति क्तः· द्रवमूर्तीति संप्रसारणं· हलः इति दीर्घः· उद्दालयति· दल विशरणे· णिच्· अच्· बहून्वारयति· वृ
ञ् वरणे· णिजंतः· क्वुन् शिल्पिसंज्ञयोः· पंच व्यवहार इति लसोडा इति ख्यातस्य ३४ राजभिरद्यते· अद भक्षणे· कर्मणि ल्युट्· राजादनं क्षीरिकायां पियाले किंशुकेपि च
राजातनमिति पाठे राजानमतनोतीति वा ल्युः राजादनं प्रसरको राजातनन इति वाचस्पतिः पीयते· पीयुः सौत्रो धातुः पीयुकुलिभ्यां कालन्· बाहुलकान् ह्रस्वश्च· प्रीणातेः कालनि
प्रियालोपि· प्रियालश्च पियालक इति माधवः· सन्नोलीनः कद्रुर्वर्णोस्य द्रवंति धारयति· धनधान्ये· भृमृशीचरीत्युः· उसिर्वा· धनुः पियालद्रुम इति रूपरत्नाकरः· धनुः पुमा
न् प्रियाल द्रौ राशिभेदे शरासने इति नानार्थमेदिनी धनुः पियाले नानस्त्री राशिभेद शरासन इति सांतेषु च पटति· पट गतौ· अच्· पटः पियालवृक्षे नासुचेले पुंनपुंसक १६
मिति रभसः· धनुष इव पटो विस्तारोस्येति समस्तनामेति स्वामी चत्वारि चार इति ख्यातस्य कंजलं बिभर्त्ति डुभृञ् धारणपोषणयोः कर्मण्यण्· पृषोदरादित्वान्नत्वं गंभारी

CC-0. In Public Domain. Digitization by eGangotri

सर्वतोभद्र इत्युक्तः काव्यचित्रे गृहांतरे निम्बे ना सर्वतोभद्रा गंभारीनटयोषितोरिति विश्वः काश्मरीमो अन्येभ्योपीति मनिन् वनोरचेति ङीब्रौ मध्विव पर्णान्यस्याः पाककर्णेति ङीष् स्वार्थेकन् ३८ श्रीयुक्तानि पर्णान्यस्याः श्रीपर्णी स्यादग्निमंथे ऽब्जे श्रीपर्णी शाल्मलौ हठे इति हैमः श्रीपर्णी काश्मरी कुंभ्योः क्लीबेपद्माग्निमंथयोः भद्राणि पर्णान्यस्याः काश्मरी शब्दोस्त्यस्य अन्येभ्योपि दृश्यत इति यच् समस्तं भारीति ख्यातस्य कर्कं कंटकं दधाति डुधाञ् अंदूदंभ्वितिनिपातितः कू प्रत्ययांतः शकंध्वादित्वात् पररूपमिति स्वामी चिन्त्यः वदति वद स्थैर्ये इति भ्रमीत्यरः गौरादि ङीष् यत्तु द्वयोरित्युक्तेः कर्कंधूर्वदरश्चेति मुकुटः तन्न वदरी कोलेस्त्री वेतु तत्फले इति मेदिनी विरोधात् कोलति घनीभवति कुलसंस्त्याने अच् गौरादि ङीष् मुकुटस्तु इन् प्रत्यये वा ङीषित्याह तन्न कोल्याः फले ऽण् लुको ङीषो लुकि च कोलिरिति रूपापत्तेः इति ह्रस्वांतोपि कौवलति वल प्राणने अच् कुवली शब्दोप्यत्र श्रीलि कोली कुवली वदरीणां फले ऽण् लुकौ लुक् तद्धितलुकीति ङीषो लुक् कोलं कोलफले क्लीबं पिप्पली चव्ययोः स्त्रियां फेनो स्यात्त्रिफेना

गंभारी सर्वतोभद्रा काश्मरी मधुपर्णिका ३५ श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः कर्कन्धूर्बदरी कोलिः कोलं कुवलफेनिले ३६॥

सौवीरं वदरे घोंटाप्यथ स्यात्स्वादुकंटकः विकंकतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ३७ ऐरावतो नागरंगो नादेयी भूमिजंबुका॥ ॥

दिलन्च ३६ सुवीरदेशेभवं स्त्रीनोंजने तु सौवीरं वदरे कांजिकेपि चेति रत्नकोशः रभसः घोलते घुलभ्रमणे वाहुलकात् टः घोंटा तु वदरी पूगवृक्षयोरपियोषितीति वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् अटव्यामेव सा घोंटा गोपघोंटेति चोच्यते इति सुभूतिः षट्कर्कंधूफलस्य स्वामी तु आद्यास्त्रयो वृक्षार्थाः अन्ये फलार्थाः घोंटा तूभयार्थेत्याह स्वामी तु घोंटाकोले व्यत्यासेन पठति कंटको स्यास्ति अर्शआद्यच् स्वादुश्चासौ कंटकश्च विकंकते कंकिगत्यर्थः अतच् प्रत्ययः स्रुवायाः वृक्षः स्रुवाद्वयो होमपात्रे शल्लकी मूर्वयोः स्त्रियां ग्रंथिरस्यास्ति सिध्मादित्वाल्लच् व्याघ्रस्य पादामूलोन्यस्य पादस्य लोप इत्यकारलोपः पंचकं ठेर इति ख्यातस्य ३७ इरावत्या विद्युत इदं वायं तस्येदमित्यण् ऐरावतो भ्रमातंगे नारंगे लकुचद्रुमे नागभेदे च पुंसि स्याद्विद्युत्तेंद्रद्वयोः स्त्रियां नपुंसकमहेंद्रस्य ऋजुदीर्घशरासने नागारजंत्यत्र रंजरागे हलश्चेति घञ् नागस्यापि दूरस्यवरं गोस्यति वा नागरंगे तु नारंगो नार्यगस्तु वामन इति वाचस्पतिः नारंगः पिप्पलीरसे यमजप्राणिनि विटे नागरंगाद्रुमेपि च द्वे नारंगी इति ख्यात

Digitization by eGangotri

अ·को· कांगुष्टेपि च यो षितीतिविश्वः भूमेर्जंबूः ह्रस्वत्वात् स्वार्थे कन् द्वे चत्वारि नारंगस्य त्यन्यतिष्यतितिम आईत्वे मृगय्वादिः संज्ञायां कन् स्फूर्जति दुओस्फूर्जा वज्रनिर्घोषे एवे
टी·रा· ल् कालः स्कंधो यस्य कालस्कंधस्तमालः स्यात्तिंदुके जीवकद्रुमे इति विश्वः शितिः कालः सारो मज्जा यस्य चत्वारि तेंदू इति ख्यातस्य ⁂ काकानां काकवर्णो वा तिंदुः पृषो
द्वी·कां· दरादिः कुलस्य प्रतिकृतिरिव इवे प्रतिकृताविति कन् कुलकं तु पटोले स्यात्संवद्धश्लोकसंहतौ पुंसि वल्मीककाकेन्दु कुलश्रेष्ठेषु कथ्यते इति विश्वमेदिन्यौ काकैः पी
९७ ल्यते पील प्रतिष्टंभे बाहुलकादुः काकानां पीलुरिवेति वा चत्वारि कट्टतिंदुकस्य कुचिलेति ख्यातस्य सन्ये गोभिर्लिख्यतेस्म लिह आस्वादने क्तः झाटं संघातं लाति आ
तोनुपेति कः अहानि घंटा बाहुलकाड्ढे तेष्टः घत्वं च पटनं पटगतौ घञ् पाटं लाति बाहुलकाड्डिः घंटा चासौ पाटलिश्च स्वामी तु नामद्वयमाह मोक्षयति रोगं मुचेः सन्
नास्कर्मकाल्लिजंतादच् मोक्षस्तु मुक्तिपाटलिमोचने यत्तु मोक्ष अवसाने चुरादिरिति मुकुटः तन्निर्मूलं मुक्ष्मा निरोगं मुषसेये स्तृवृभूशुषिमुषिभ्यः कक् स्वार्थे कन्
यत्तु मुष्मातीति विगृह्य मुष्व खंडने इत्युपन्यस्तं तदयुक्तं तस्य दंत्यांतत्वात् क्वादिषु पाठाभावाच्च मुष्को मोक्षकवृक्षेस्या त्संघाते वृषलेपि च पंचलो घ्रवि

तिंदुकः स्फूर्जकः कालस्कंधश्च शितिसारके ⁂ काकेंदुः कुलकः काकपीलुकः काकतिंदुके गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ
⁂ तिलकः क्षुरकः श्रीमान्समौ पिचुलझाबुकौ श्रीपर्णिका कुमुदिका कुंभी कैटर्य्यकट्फलौ ⁂॥ ९ शोषस्य ⁂ तिलति तिल सेह
ने कुन् शिलिसंज्ञयोः तिल इवेति वा कन् तिलको द्रुमरोगाश्वभेदेषु तिलकालके क्लीवं सोवर्चललवणे न स्त्रियां तु विशेषके क्षुरति क्षुर विलेखने कुन् क्षुरकः को
किलाक्षे स्याद्गोक्षुरे तिलकद्रुमे श्रीरस्त्यस्य मतुप् श्रीमांस्तिलकवृक्षे स्यान्मनोज्ञे धनिके त्रिषु त्रीणि अपि चूतूलं लाति पिचुः स्यात्तूलकर्षयोरिति धरणिः पिचुलो झाबुके पि
स्यान्निचुले जलवायसे झामिति शब्दं वेति गच्छति वीगत्यादिषु मितद्वादित्वाड्डुः ततः संज्ञायां कन् द्वे झाउ इति ख्यातस्य श्रीः पर्णेषु यस्याः पाककर्णपर्णेति ङीष् स्वार्थे
कन् श्रीपर्णिका पृश्नी कुंभ्योः क्लीवे पद्माग्निमंथयोः कौ मोदते मुद हर्षे इगुपधेति कः स्वार्थे कन् कुमुदं कैरवे रक्तपद्मे स्त्री कुम्भिकौषधौ गंभार्यां पुंसि दिग्नागे नागशाखा
मृगांतरे कुंभीव कुंभी रसाधारत्वात् पृश्निकायां च कुंभी स्यात् पाटलो कट्फले पि चेति रंतिदेवः केटनं किट त्रासे घञ् केटं राति अतितिक्तत्वात् चतुर्वर्णादित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रामति क्रमु पादविक्षेपे· वाहुलकादुकः क्रमुकः पट्टिकालोध्रेगुवाके भद्रमुस्तके· यत्तु शिल्पिसंज्ञयोरिति क्कुनिवेश्याह मुकुटः तन्न· क्रमक इति रूपापत्तेः पट्टिका आख्याय
स्य· पट्टो स्यास्ति· अत इनिः पटः पेषणयाघातो व्रणादीनां च वंधने च तत्र पट्टो व्याघ्रराजादिश्रासनांतरपीठयोः यद्वा· पट्टि शब्दात्कित्रिजं गा तङीष्· पट्टिः स्त्री पट्टभेदे स्यात् ललाटे
कुम्भिकाद्रुमे· लाक्षाप्रसीदत्यनेनेयुच् करलोलाक्षांप्रसादयति वा क्तोत्स्युट इति ल्युट् चत्वारि लोध्रभेदस्य· तुदति पापं तुद व्यथने· इगुपधेति कः पृषोदरादिः अन्येषामपी
ति दीर्घ इति मुकुटः तन्न· तत्रोत्तरपद इत्यधिकारात् घञर्थेक इत्यपि न यद्वा तुवदति· वदव्यक्तायां वाचि· मूलविभुजादिः कर्मणः कर्त्तृत्वं यद्वा तूयते· तूङ् सुतौ· वाहुलकाद्दः कु
टादिः तूद इति स्वामी तत्र तुद व्यथने· इगुपधेति कः पृषोदरादिः युवं सनेन· युमिश्रणामिश्रणयोः क्रुयुभ्यां चेति पो दीर्घश्च· मुकुटस्तु पूष वृद्धौ इगुपधत्वात्कः पवते
वा पूर्व्वो लोपश्चेति पवते रूपं न धात्वंतलोप इति वदन् पूष इति पाठं मन्यते· किंतु पुर्व्वो लोपश्चेति सूत्रमुज्वलदत्तादौ न दृश्यते क्रामति· क्रमु पादविक्षेपे· वाहुः

क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः· तूदस्तु पूयः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥ तूलं च नीपप्रियककदंवास्तु हलिप्रिये वीर

लकादुकन्· क्रमुको भद्रमुस्तके· गुवाके पट्टिकालेप इति हेमः· ब्रह्मणि वेदिके साधुः तत्र साधुरिति यत्· पंचा ९ वृक्षोरुष्करोग्निमुखी भल्लातकी त्रिषु ॥
भाव कर्मणोरित्यनुप्रवृत्या· ब्रह्मणो ब्रह्मणि वा दारु ॥ तूलयति तूल्यते वा तूलं निष्कर्षे इगु तिको घञ् वा पुल्लिङ्गः सुपि चौ तूलः क्लीवं स्याद् ब्रह्मदारुणीति रुद्रः ष
ड्ब्रह्मस्याकारस्य पार्श्वपिप्पल इति ख्यातस्य तूत इति ख्यातस्येत्यन्ये नयति नीयते वा· णीञ् प्रापणे· पानी विषिभ्यः पः वाहुलकाद्गुणाभावः नीपः कदंव वंधूक नीलाशोकद्रु
मेषु च· प्रीणाति· प्रीञ् तर्पणे· क्कुन् शिल्पि संज्ञयोः प्रियकः पीतसारके· नीपे चित्रमृगे चालोप्रियं गौ कुंकुमेपि च· कदति कद् सौत्रो हिंसार्थः कृकदिकडिकटिभ्योम्वच् क
दर्लि द्वित्वं वच् इति मुकुटः तन्न तादृशसूत्राभावात् कदंवं निकुरंवे स्यान्नीपसर्षपयोः पुमान् हलिनः प्रियः सुराया अधिवासनात् चत्वारि कदंव इति ख्यातस्य वीरइव ॥
क्षोदुः स्पर्शत्वात्· वीरवृक्षस्तु भल्लातकार्जुन द्रुमयोः पुमान्· अरुर्व्रणं करोति· दिवा विभा निशा इति टः नित्यं समासेनुत्तरपदस्थस्येति षः अरुष्करो व्रणकृति त्रिषु भल्लातके पुमा
न्· अग्निरिव मुखमस्याः गौरादिः भवेदग्निमुखी देवे विषे भल्लातके स्त्रियाम्· भल्ल इव अतति अत सातत्यगमने· क्कुन्· जातेरिति ङीष्· चत्वारि भेला इति ख्यातस्य ॥

अ·को·
टी·रा·
द्वी·को·
१८

गर्द्दभोगंधमिदपि गर्द्दभं अमति· अमगत्यादिषु· ञमंताड्डुः कंदरां लाति· आतइतिकः कंदरालः पुमान् गर्द्दभाण्डे प्लक्षतरावपि· याः लक्ष्म्यां स्त्रनः ईतनः कपीनां कपेर्वर्णस्य वार्द्द
तनः कपीतनो गर्द्दभांड इशिरीषाम्रातकेषु च· अश्वत्थे चेतिविश्वः शोभनं पार्श्वमस्य प्लक्षः इति· प्लक्षसंचलने· अन्येष्वपीति डः कपिलिकादित्वाल्लत्वं प्लक्षो द्वीपे गर्द्दभांडेऽश्व
त्थे जटिनि पक्षके इति हेमः पंच गेठी ति ख्यातस्य तिम्यति तिम आर्द्रीभावे· अलीकादयश्चेति निपातः तिंतिडीत्वं प्लिका चिंचा तिंतिडीका कपिप्रियेति वा चस्यतिः चिमित्यव्य
क्तं शब्दं चिनोति· चिञ् चयने· अन्येष्वपीति डः अम्लो रसोस्यास्ति· अत इति ठन् अम्लिका चाम्लिका चिंचा तिंतिडीका च तिंतिला इति चंद्रः त्रीणि पीतः सारोस्याः रलयोरेक
त्वं ४३ सृजति· सृज विसर्गे· ण्वुल् यद्वा सर्ज्यते· षर्ज अर्जने· क्वुन् अस्यति· असु क्षेपणे· ल्युः प्रियको जीवको सनइति रत्नकोशः असनं क्षेपणं क्लीवं पुंसि स्यात् जीवकद्रुमे· प्र
ज्ञाघ्राण· पीठे भस्कंधयोः क्लीवमासनं नातु जीवकइति रुद्रः भसो· वंधूकस्येव पुष्पाण्यस्य· प्रीणाति· प्रीञ् तर्पणे· क्वुन् प्रियकः पीतसारके· नीपे चित्रमृगे चालो प्रियंगौ कुं

गर्द्दभांडे कंदरालकपीतनसुपार्श्वकाः प्लक्षश्च तिंतिडी चिंचाम्लिका थो पीतसालके ४३ सर्ज्जकासनवंधूकपुष्पप्रियकजीवकाः सा
ले तु सर्ज्जकार्ष्याश्वकर्णकाः सस्यसम्बरः ४४ नदीसर्ज्जो वीरतरुरिंद्रद्रुः ककुभोर्ज्जुनः राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ४५॥

कुमेपि च· जीवयति· जीवप्राणधारणे· ण्वुल् जीवकः प्राणके पीतसारक्रूयणयोरपि· कूर्चशीर्षे च पुंसि स्यात् षट् विजयसार इति ख्यातस्य सल्यते षलगतौ· कर्मणि घञ्
सारोदार्ष्यमति प्राप्यित्तमस्य· अर्शआद्यच् वा पुंसि भूरुहमात्रे पि सालो वरणसर्जयोरिति दन्त्यादौ रभसः कृषति· कृष विलेखने· इगुपधेति कः चातुर्वर्ण्यादित्वात्स्वार्थे
ष्यञ् अश्वकर्णइव पत्रमस्य· सस्यैः संव्रियते· वृञ् वरणे· ग्रहवृदृइत्यप् पंचसालस्य· ४४ नद्याः सर्जः वीरश्चासौ तरुश्च दृढकाष्ठत्वात् इंद्रस्य इंद्रइव वा द्रुः ककुप् स्त्रियां प्रवे
णी दिक् शोभा सु चंपकस्रजि· ककुभो दिशः संत्यस्य वहु विस्तारत्वात् अर्शआद्यच् ककुभो रागभेदे पि वीणांके ऽर्जुनपादपे अर्ज्यते अर्ज अर्जने· अर्जेर्णिलुक्चेति उनन्· पा
र्थे स्तु ककुभे जिष्णा विति विश्वात् पार्थो पि· पंचकोपीतक इति ख्यातस्य राजभिरद्यते अद भक्षणे· कर्मणि ल्युट्· राजादनं क्षीरिकायां पियाले किंशुके पि च· राजा
दनः पियालद्रौ क्षीरिकायां त्रिपत्रके इति हेमात् पुल्लिंगो पि· फलानामध्यक्षः क्षीरमस्त्यस्याः अत इति ठन् त्रीणि खिरणीति ख्यातस्य ४५ ॥ ॥ १८

इंगुदं इगिगतौ·घञ्·इंगं ददाति·दो अवखंडने·आतोऽनुपसर्गेकः पृषोदरादिः जातेरिति ङीष्·तपस्विनः उपयुक्तस्तरुः हे इंगुआ इति ख्यातस्य जियापूता इति ख्यातस्येति मुकुटः
भुर्जन भूर्जः भुर्ज वलप्राणनयोः घञ्·भूर्जस्य·प्रशस्तं चर्मास्यास्ति·व्रीह्यादीनिः चर्मी फलकपालौ स्याद्भूर्जे भूर्ज इति टावपि·मृदुस्त्वगस्य त्रीणि भोजपत्रवृक्षस्य पिच्छाशा।
ल्मलिनिर्यासोस्या अस्ति पिच्छादित्वादिलच्·पूरयति·पूरी आप्यायने ल्युट्·टिड्ढेति ङीप्·यत्तु मुकुटो वोरित्यादिना दीर्घ इत्याह तन्न हलपदान्तयोरभावात्·धातोर्दीर्घोपधत्वा
पूरणः पूरके त्रिषु·स्त्रीवंपिष्टप्रभेदे च पूरणी शाल्मली द्रुमे·मुंचति रसं·मुच्लृ मोक्षणे·पचाद्यच्·मोचः शोभांजने पुंसि मोचा शाल्मलिरंभयोः स्थिरमायुर्यस्याः षष्टिं वर्षसह
स्राणि वने जीवति शाल्मलिरिति वचनात्·शालयति·शल चलने णिजन्तः क्विप्·मलते मल धारणे·सर्वधातुभ्य इन्·शाल् चासौ मलिश्च पंचसेंवर इति ख्यातस्य ५५
पतितुमिच्छति पत्लृ गतौ सन्नंतः पचाद्यच् पृषोदरादिः यद्वा·पिच्छति·पिच्छ्यते वा·पिच्छ बाधे·अच्·घञ् वा शाल्मल्या वेष्टः क्वाथः कषायो निर्यूषो निर्यासो वेष्टकस्तथेति रभ

इंगुदी तापसतरुर्भूर्जे चर्म्मि मृदुत्वचौ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ५६ पिच्छा तु शाल्मली वेष्टे रोचनः कूटशाल्मलिः
चिरिविल्वो नक्तमालः करजश्च करंजके ५७ प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः॥ ८८ स्रः द्वे सेंवरिगांदस्य·रोचते·रुच दीप्तौ·अनुदात्तेतश्चेति

युच्·रोचना रक्तकल्हारे गोपित्तवरयोषितोः रोचनः कूटशाल्मल्यां पुंसि स्यात्क्रौंचके त्रिषु·कूटश्चासौ शाल्मलिश्च·द्वे कूटशाल्मलेरित्येके·चिरं विलति विल भेदने·वाहु
लकाद्रुः चिरिविल्व इत्यन्ये·नक्तं मालो धारणमस्य·नक्तमा अलति वा·अल भूषणादौ·पचाद्यच्·रक्तमाल इत्यपीति स्वामी·करेण जन्यते·अन्येष्वपीति डः·कं सुखं जलं वा रंजयति
कर्मण्यण्·रजरंजे नित्येति निर्देशात् क्विप्यपि नलोपः संज्ञापूर्वकत्वान्न वृद्धिः णिलोपस्य स्थानिवत्त्वान्नोपधावृद्धिरिति मुकुटः तन्न एवमपि णिनिमित्तवृद्धेर्दुर्वारत्वात्·करंजयति
कर्म्मण्यण् स्वार्थे कन्·करजस्याद्याष्टन खे करंज नखयोः पुमान् चत्वारि ५८ प्रकीर्यते कृ विक्षेपे अघ्न्यादित्वाद्यक्·ऋयति पूर्वविप्रतिषेधाद्दीर्घ रपरे चेति मुकुटः तन्न पू
र्वविप्रतिषेधस्य निर्मूलत्वात्·इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेनेति वचनाच्च प्रकीर्यः पूतिकरजे विप्रकीर्णे तु वाच्यवत्·पूतिश्चासौ करजश्च·पुनाति·पूञ् पवने·क्ति
न्निडीकादय इतीकन् तुच्छा·कलिं मारयति·यद्वा हेतुः पूतीकरंजः सुमनास्तथा कलहनाशनः मुकुटस्तु कलिं करोति कर्मण्यण्॥ ॥ ॥

अ·को· स्वार्थे कन्‌ कलिकारक इत्याह· चत्वारि कंटकवल्करंजस्य षड्ग्रंथ योयस्य अचूप्रत्ययः पूर्वादिस्तत्राजितियोगविभागाद्‌ च्‌· षड्ग्रंथायस्य वा षड्ग्रंथा तु वचायां स्त्रीस्यात्‌

टी·रा· करंजांतरे पुमान्‌ मर्कति· मर्कसौत्रो धातुः शकादिभ्योऽटन्‌· गौरादिः मर्कटी· करंजभिच्छुक शिंच्योः पुंसि वानरलूतयोः अंगारवल्लीपल्लीवल्लरी· करंजभेदानामेकेकम्‌ ५८

ह्री·कां· अवश्यं रोहति आवश्यके तिलोनि रोही रोहितके चैत्यवटपादपयोः पुमान्‌· रोहितो वल्लीस्यासि· स्वार्थे कन्‌· रोहितं कुंकुमे रक्ते ऋजुशक्रधनुरासने· पुंसि स्यान्मीनमृगयोर्भेदे।

९९ नारोहितद्रुमे· प्लीहशत्रुर्वननितिक्तश्च रोहितदृति तु माधवः प्लीहः शत्रुः दाडिमस्य पुष्पमिव पुष्पमस्य चत्वारि रोहितक इति ख्यातस्य गायंतं त्रायते त्रैङ्‌ पालने· आतोनुपेतिकः

गायत्री खदिरे स्त्री स्यादिति रभसः गायत्री द्रुपदा देवी छंदोभित्‌ खदिरे स्रुच वन्हि गायत्रिर्लीनत्थतिवैद्यकान्नां नोपि· त्रीह्यादित्वादिनिः बालास्तनयाः पत्राण्यस्य बालपत्र

श्चेति मूलपाठ इत्यन्ये· बालपत्रोय वासश्च खदिरश्चेतिपांचः आह च· खदिरो रक्तसारश्च गायत्री दंतधावनः· कंटकी बालपत्रश्च जिह्वशल्यः क्षतिक्षमः खदति· खदस्थै

करंजभेदाः षड्ग्रंथो मर्कट्यङ्गारवल्लरी ५८ रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः गायत्री बालतनयः खदिरो दंतधावनः ५९ अरिमेदो विट्‌खदिरे कदरः खदिरे सिते· सोमवल्कोप्यथ व्याघ्रपुच्छगंधर्वहस्तकौ ६० एरंड उरुबूकश्च रुचकश्चित्रकश्च सः॥ ६१ र्ये हिंसायां च· इषिमदिमुदिखिदिच्छि

दिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिवन्धिशुषिभ्यः किरच्‌· खदिरी शाकभेदे स्त्री नाचंद्रे दंतधावने· दन्तान्‌ धावति· धावुगतिशुद्ध्योः ल्युट्‌ चत्वारि ५९ अरिरि

वमेदः स्नेहोस्य विङ्गंधिः खदिरः दुर्गन्धिखदिरस्य· दृणाति· दृविदारणे· पचाद्यच्‌· कस्य जलस्य दरः कदरः खदिरे श्वेते ऋकच व्याधिभेदयोः सोम इव वल्कोस्य सोम

वल्कः सुधवलखदिरे कट्‌फले पि च दृश्वेतखदिरस्य व्याघ्रस्य पुच्छमिव पुच्छमस्य· गंधर्वस्य मृगभेदस्य हस्त इव पत्रमस्य ६० आ ईरयति वायुं· ईर गतौ कंपने च· अस्मान्‌ लि

जन्तान्‌· बाहुलकाद्‌ डच्‌· उरुं महान्तं वायुं वायति· ओवै शोषणे· उलूकादयश्च न्यूकः स्वपुरः क्रमुकोनिचुलो हिज्जलः एरंड उरुबूक इति वा पालितः उरुबूको रुबुक व्या

घ्रदलाश्चेति रभसः रोचते· रुच दीप्तौ· क्वुन्‌ शिल्पिसंज्ञयोरिति क्वुन्‌· चित्रयति· चित्रे अद्भुता दो क्वुन्‌ चित्रकं तिलकेनातु व्याघ्रभिच्चे चुपाठिषु चं चुर्गन्धर्थः यत्तु च किंग

ताविति धातूपन्यसनं मुकुटस्य तच्चिंत्यं· बाहुलकाद्‌ः चंचुस्त्रो द्यां स्त्रियां पुंसि गोजाडी च व्यडंवके· पंचअंगुलयोस्य· तत्पुरुषस्यांगुलेरित्यच्‌·॥ ॥ ९९

यत्तु हिंत्रिष्वामित्यजितिमुकुटेनोक्तं तच्चिंत्यं· मंडयति· मडि भूषायां णिच्· पचाद्यच्· आमलक्यां स्त्रियां मंड एरंडे ऽप्यो च पिच्छयोरिति रभसः· मंडः पंचांगुले ऽश्माके पुंसि क्लीवं तु मस्तुनि·। आमलक्यां स्त्रियां मंडा ख्या स्त्रियां सारपिच्छयोः अकारप्रश्लेषोपि· आमंडः पंचांगुल वर्द्धमान गंधर्वहस्ता इति हारावली आकारादिरपि· गंधर्वहस्तकोऽमंड आमंडो व्याघ्रपुच्छक इति तारपालः आरंड इत्येक इति स्वामी वर्द्धते· वर्द्धच्छेदनपूरणयोः शानच्· वर्द्धमानः प्रश्नभेदेऽशरावे रंडविस्तुषु· व्याडं मलमेव यति· अविस्रंसने· णिच् ण्वुल्· व्याडं वन इति स्वामि· तत्र त्युट्युज्वा· एकादश ५९ शमयति रोगान्· पचाद्यच्· गौरादिः अल्पा शमी· कुटी शमी शुंडाभ्योरः एकमल्पशम्याः शमी सक्तुफलायां चशिंविकायां च गुग्गुलौ· सक्तुवत्फलमस्याः अजादिः शिवं करोति· तत्करोतीति णिच्· पचाद्यच्· शिवा काटामलोषधी· अभयामलकी गौरी फेनसक्तुफला सुचक्री णि· पिंडीतनोति अन्येभ्यो पीतिडः संज्ञायां कन्· पिंडीतकः स्यात्तगरे मदनाख्ये महीरुहे मरुं वातिक्रान्· निर्जलेपि श्वसितिनंद्यादिः श्वसनं श्वसिते पुंसि मारुते मदनद्रुमे· करं हाटयति· हटदीप्तौ·णि

चंचुः पंचांगुलो मण्ड वर्द्धमानव्यडम्बकाः ॥५९॥ अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा पिण्डीतको मरुवकः श्वसनः करहाटकः ॥६०॥
शल्यश्च मदने शक्रपादपः पारिभद्रकः भद्रदारु द्रुकिलिमं पीतदारु च दारु च ६१ पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ॥ ॥

च्· कर्मण्यण्· स्वार्थे कन्· करहाटः शिफाकन्दे पद्मस्य मदनद्रुमे ६० शल्यगतौ शलति· अघ्न्यादित्वाद्यक्· श्वेडा शंकुशरे शल्यं नाश्वावित्मदनद्रुम इति तालव्यादौ रभसः मदयति· मदी हर्षग्लेपनयोः ल्युः मदनः स्मरवसंतद्रुभिद्धूरसिल्हके· षट् मयनफलाख्यवृक्षस्य शक्रस्य पादपः पारिनिष्ठां प्रांशं भद्रमस्य पारिभद्रस्तु निंबद्रुमे दारौ देवदारुणि भद्रं दारु भद्रदारु णिच् क्लीबमित्यमरमाला चातत्पुंस्यपि· किलति· किल श्वैत्यक्रीडनयोः बाहुलकात्किमच्· द्रुश्चासौ किलिमं च· पीतं च तत् दारु च· दीर्यते· दृ विदारणे· दृसनिजनीति ञुण्· पुंनपुंसकयोर्दारुर्विति त्रिकांडशेषः ६१ पूतिच तत्काष्ठं च देवस्य दारुः अष्ट· पाति· क्विप्· टलति· टल वैक्लव्ये· सर्वधातुभ्य इन्· पाश्चासौ टलिश्च पाटं लाति· आतोनुपसर्गे कः पाटला पाटलो स्त्री स्यादस्याः पुष्पे पुनर्नवा नमोघा· अलिप्रिया विशाला ग्राव्यमोघा पाटलिर्द्वयोरिति वाचस्पतिः मोघा स्त्री पाटला वृक्षे मोघं त्रिषु निरर्थक इति रुद्रात्मोघापि मोहयति· पचाद्यच् न्यंक्वादिः काचस्थाली काचस्थाली पात्रं· स्वामी तु कालस्थालीति पठति· कालो वर्णोऽस्या अस्ति· ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

Domain. Digitization by eGangotri

अर्शआद्यच्. अजादिः कालाजुकस्तवृंताख्यामंजिष्ठानीलिकासु च तिष्ठति स्थागतिनिवृत्तौ स्थाचतिमृजेरालजवालञालीयचः स्थालीस्थामाटलोरत्योः फलेरोहति रुगु पधेतिकः तत्पुरुषेकृतीत्यलुक् ५४ कृस्नवृंतमस्याः कृस्नवृंतापाटलायांमाषपर्ण्यांचयोषिति कुबेरस्येवाक्षियस्याः अक्ष्णोदर्शनादित्यच् गौरादिः मुकुटस्तुबहुव्रीहौस क्थ्यक्ष्णोरित्यचमुजितस्याह तन्न अस्वांगत्वात् वृक्षस्याप्राणित्वात् सत्पपाडलादिति ख्यातस्य श्यामोवर्णोस्त्यस्याः अर्शआदिः श्यामोवटेप्रयागस्थवारिदेहदारके पिकेचक्लृप्त हारितः पुंसिस्यात्हूतित्रिषु मरिचेकृष्णसत्त्ववल्लौक्लीवंस्त्रीशारिवौषधौ अप्रसूतांगनायांचप्रियंगावपिचोच्यते यमुनायांत्रियामायांकृष्णत्रिवृतिकौषधौ महिलायाआद्ध यआद्धयोयस्याः समत्सुपमानेतिसाधुः ५५ लतति लति सौत्रोधातुः पचाद्यच् प्रियंगुनखयोर्लता स्पृक्काज्योतिष्मतीवल्लीलताकस्तूरिकासु च गविभूमौवचने वरिअ मिवारन्नस्तुसोः कर्म्मणिल्युट् गुंद्रयति गुद्रिस्त्रोदे अच् गुंद्रस्तजनकेस्त्रीतुप्रियंगोभद्रमुस्तके प्रियंगच्छति मृगय्वादौनिपातः प्रियंगुः स्त्रीराजिकाकणयोरपिफलि

पाटलिःपाटलामोघाकाचस्थालीफलेरुहा ५४ कृष्णवृंताकुबेराक्षीश्यामातुमहिलाह्वया लतागोवंदनीगुंद्राप्रियंगुःफलिनीफली ५५
विष्वक्सेनागंधफलीकारंभाप्रियकश्चसा मंडूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः ५६ स्योनाकशुकनासर्क्षदीर्घवृंतकुटन्नटाः ॥

न्यांकंगुसंसेच फलमस्त्यस्याः अतइनिः फलिन्यग्निशिखायांचफलिन्यांस्त्रीफलिनेत्रिषु गौरादित्वान्ङीष् फलीफलिन्यां ५५ विष्वक्सेनोतिप्रियंधने कृत्यल्युटोबहुलमितिनः अजि तिमुकुटोक्तिश्चिंत्या विष्वक्सेनाफलिन्यांस्याद्विष्वक्सेनोजनार्दने गंधवत्फलमस्याः पाककर्णेतिङीष् गंधफल्यपिगुंद्रायांचंपकस्यचकोरके ईषद्रंभा ईषद र्थेचेतिकोः काः प्रीणाति प्रीञ्तर्पणे कुन् प्रियकः पीतसारके नीपेचित्रमृगेचालेप्रियंगौकुंकुमेपिचभ्रमरे मंडूकस्येवपर्णमस्य पत्रेउर्णोस्यपत्रोर्णः श्योनकोश्वेपिस्त्री वंस्याच्छोणकेपुमान् नटति नटनृत्तौ पचाद्यच् कटूनांगानस्य टुंटुरितिकायति कैशब्दे आतोनुपसर्गेकः टुंटुकः शोणकाख्ययोः ५६ सीव्यति षिवुतंतुसंताने बाहुल कान्न अंतरंगत्वाद्यण् स्योनः किरणः सूर्ययोः तेनाकस्यकायतेवा अकंकुटिलायांगतौ अच् घञ्वा श्यायते श्यैङ्गतौ पिनाकादौनिपातितः श्योनाकस्यालव्यादिरपि शुकनासेवपुष्पमस्यास्ति अर्शआद्यच् ऋषति ऋषीगतौ स्नुव्रश्चिकृत्यृषिभ्यः किदितिसः ऋक्षः पर्वतराजेस्यात् भल्लूकेशोणकेपुमान् दीर्घंवृंतमस्य कुटन्नवक्री

२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शोणेति· शोणृ वर्णे· पचाद्यच्· स्वार्थेकः· स्वामी तु शावति· शोनकइत्याह· इयर्ति· अर्तेररुः कपिलिकादिः ह्रादश नित्यमामलके लक्ष्मीर्नित्यं हरितगोमये· नित्यं शंखे च पद्मे च नित्यं शुक्ले च वाससीति श्रवणात् तिष्यं मंगल्यं फलमस्याः अजादित्वाट्टाप्· तिष्ये कलियुगे फलमस्याः सेवयेति वा· आमलते मलधारणे· क्वुन्· जातेरिति ङीष्· गौरादित्वकल्पनं तु चिंत्यं· ५७ मस्त्रियेनेनया· तनिमृङ्भ्यां किच्चेति तन्· अमृता मागधीपथ्यागुडूच्यामलकीषु च· वयो यौवनं तिष्ठत्यनया· घञर्थे कः· वयस्था तु स्त्रियां ब्राह्मीगुडूच्यांमलकीषु च· सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणीषु च· कायस्थापि· कायस्था तु हरीतक्यामलक्योश्च प्रकीर्त्तिता तिरभसः चत्वारि विगतं भीतं रोगभयमस्मात्· जातेरिति ङीष्· गौरादित्वकल्पनं त्वयुक्तं विशिष्टं भीतमस्माद्वा· भूतकल्पो राश्रयत्वात्· अक्षति· अक्षू व्याप्तौ· पचाद्यच्· अक्षो ज्ञानात्मशाकटावयवेषु सुपाशके· रुद्राक्षेंद्राक्षयोः सर्पविभीतकतरावपि· चक्रे कर्षे पुमान् क्लीबमक्षं सौवर्चलेन्द्रिये· तुष्यति· तुष तुष्टौ· इगुपधेति कः· घञर्थे क इत्युक्तिश्चिंत्या· परिगणनात्· धान्यत्वचि तुषः पुंसि विभीतकतरौ

शोणकश्चारलौ तिष्यफला त्वामलकी त्रिषु ५७ अमृता च वयस्था च त्रिलिंगस्तु विभीतकः नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ५८
अभया त्वव्यथा पथ्या कायस्था पूतनामृता हरीतकी हैमवती चेतकी श्रेयसी शिवा ५९॥ ११ वपीति मूर्द्धन्यांते रुद्रः कर्षफलमस्य· भूतानां आवासः

कलेर्द्रुमः घट्टवहेडाद्रुतिख्यातस्य नभयमस्या· अभया स्त्री हरीतक्यां मुख्यौ रेचनपुंसकं· निर्भये वाच्यलिंगः स्यात्· न व्यथा यस्याः अव्यथो निर्व्यथे सर्पे चारटीपथ्ययोः। स्त्रियां· पथो नपेता· धर्मपथ्यर्थन्यायादनपेत इति यत्· पथ्या स्त्री हरीतक्यां हिते त्रिषु· कायस्तिष्ठत्यनया घञर्थे कः· कायस्था तु हरीतक्यामलक्योश्च प्रकीर्त्तिता तिरभसः कायस्थः परमात्मनि· नरजातिविशेषे ना हरीतक्यां तु योषिति· पूतं करोतीति तत्करोतीति णिच्· बहुलमन्यत्रापीति युच्· पूतना तु हरीतक्यां दानवीरोगभेदयोः हरिर्वर्णः इतो यस्यां संज्ञायां कन्· गौरादिः हिमवति जाता· तत्र जात इत्यण्· हैमवत्यभया स्वर्णक्षीर्योः श्वेतवचोमयोरिति विश्वः चेतयति· चिती संज्ञाने· ण्वुल्· गौरादिः अतिशस्ता· ईयसुन्· प्रशस्यस्य श्रः उगितश्चेति ङीप्· श्रेयसी करिपिप्पल्यामभयापाठयोरपि· शिवं करोति· तत्करोतीति णिच्· पचाद्यच्· शिवो मोक्षे महादेवे कीलके ग्रहयोगयोः वालके गुग्गुलौ वेदे पुंडरीकद्रुमेपि च· सुखक्षेमजले क्लीबं शिवा नाद्यामलोषधौः अभयामलकी गौरी फेरुसक्तुफलासु चेति विश्वमेदिन्यौ· एकादश ५९ ॥

अ· को· पीतश्चासौ द्रुश्च पीयतेच सुखायं पापानि· पः किच्चेति तः चुंमास्थेतीत्वमिति मुकुटः तच्चिंत्यं· उक्तसूत्रा दर्शनात् क्तप्रत्यये न गतार्थत्वाच्च· सरति सृगतौ· वाहुलकादलच् सरलः
टी· रा· पूतिकाष्ठनाम्नो दारावक्रयोस्त्रिषु पूतेः पावनस्य काष्ठं· पूतिकाष्ठं च सरले देवदारु महीरुहोः त्रीणि सरलादेरिति ख्यातस्य द्रुमे उत्पलं तदाकारं पुष्पमस्य· सप्तमीति योगविभा
द्वी· कां· गात्समास इति मुकुटोक्तिश्चिंत्या वहुव्रीहि विग्रहस्य प्रदर्शनात्· कर्णिकामियर्ति ऋगतौ कर्मण्यण्· कर्णिकारः पुमान् आरग्वधपत्रौ च द्रुमो सले· परिविध्यति· व्यधताडने
२१ रव्याद्यघेतिणः परिव्याधस्तु पुंसि स्याद्वेतसे च द्रुमोत्पले· त्रीणि कठचांपाइ इति ख्यातस्य· लकयते· लक आस्वादने वाहुलकादुचः पृषोदरादित्वादिलोलिकुचोपि· दह
ति तो हति वा· दहभस्मीकरणे तुहिर अर्दने· मृगय्वादित्वान्निपातितः अहडु रित्यपीति स्वामी· त्रीणि वडहर इति ख्यातस्य ९० पनाय्यते स्तूयते चेतसवा हसेति असज्ज
तो निपातितः पणस इत्यपि पाठः पनसः कंटकिफले कंटकेवानरांतरे स्त्रियां रोगप्रभेदे स्यात्· कंटकाः संत्यस्य· अत इनिः कंटकि फलमस्य द्वे कटहर इति ख्यातस्य निचो

पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः ९० पनसः कंटकिफलो निचुलो हिज्जलोंवुजः काकोदुंवरिका फल्गु
र्मलपूर्जघनेफला ९१ अरिष्टः सर्वतोभद्रहिंगुनिर्यासमालकाः॥ ९१ लति चुलसमुच्छ्राये· चुरादीनां णिज्वा· इगुपधेति कः पचन्नु निचोलस्तेरिति विगृह्य घ
ञर्थे कइत्युक्तं मुकुटेन· तन्न परिगणनविरोधात्· अंतरंगत्वेन गुणप्रसंगाच्च निचुलस्तु निचोले स्यादिज्जलाख्यमहीरुहे· हिनोति· हिगतौ वृद्धौ च क्विप्· हित्· जलमस्य इज्ज
ल इत्यपिपाठः एति इण्गतौ क्विप् तुक्· इत् जलमस्य· निचुले ज्जल हिज्जला इति रभसः अंवुनि जातः जनी प्रादुर्भावे· सप्तम्यां जनेर्डः त्रीणि स्थलवेतसस्य वानीरेकविभेदस्या
न्निचुलः स्थलवेतसे इति शब्दार्णवात्· समुद्रफलेति ख्यातस्येत्यन्ये काकप्रिया उदुंवरो संज्ञायां कन्· फलति· फलनिष्पत्तौ· फलिपाटी तिसाधुः फलाद्वसारेभिधेयवत्· नदी
भेदे मलस्त्वां स्त्री· मलं पापे च किट्टे च वर्चस्के कृपणे मल इति धरणिः मलात् पापात् पुनाति· पूञ्पवने· क्विप्· मलं पति· युञ्जुगुप्सायां· क्विप् वाहुलकाद्दीर्घः यद्वा· मलने मलधारणे वा २१
दुलकादयूरित्यपिपाठः जघने फलं यस्याः अमूर्द्धेति सप्तम्या अलुक् चत्वारि कटुंवरीति ख्यातस्य ९२ न रिष्टमशुभमस्मात्· अरिष्टोलसुने निंवे फेनिले कककाकयोः अरिष्टम
शुभे तक्रे सूतिकागार आसवे शुभे मरणचिन्हे च· सर्वतोभद्र यस्मात्· सर्वतोभद्र इत्युक्तः काव्यचित्रे गृहांतरे· निंवे ना सर्वतोभद्रा॥ ॥ ॥

र्थभारीनष्टयोषितोः हिंगवाकारोहिं गुगंधोवानिर्यासोस्य हिंगुनिर्यासः इत्येषानिवेहिंगुरसेपिच मलते मलधारणे ण्वुल् परस्मैपदंवुन्प्रत्ययविधानंचिंत्यं पिचुंकु
ष्ठभेदं मर्दयति मृदक्षोदे णिच् कर्मण्यण् पिचुमंदयतीतिपिचुमंदः इतिस्वामीनिवेतिस्वास्थ्यं णिविसेचने पचाद्यच् बवयोरेकत्वंषट्नीवइतिख्यातस्यपिच्छा अस्त्यस्याः पिच्छा
दिलादिलच् पिच्छिलं विजिलेन्यवत् स्त्रीयोतिकाशिंशुपयोः शाल्मलीसिंधुभेदयोः नगुरुरस्मात् अगुरुली वेशिंशपायांजोगकेलघुनि त्रिष्विति रुद्रः शीर्षं शीर्षे वा पाति
आतइतिकः पृषोदरादिः यद्वा शिमित्यव्यक्तं शब्दं शब्देन वा शपति शपआक्रोशे पचाद्यच् शिंवाभिः शपतीतिवा रेविकाशिंशपेनिर्दिष्टा द्वाशब्दलोपः छिनालव्या शिंशपाश्च
श्रृतयेतिशब्दभेदात् अगुरुसाराशिंशपा अंगुरुशिंशपेत्येकंनामेतिस्वामी तन्न उक्तरुद्रविरोधात् त्रीणिसिंसद इतिख्यातस्य साकपिलवर्णपुष्पासतीभस्मगर्भोच्यते भ
स्मगर्भेयस्याः शुक्लसारत्वात् एकं शृणातिशीर्यतेवा शृहिंसायां शृपृभ्यांकित् इतीषन् जनोति तनुविस्तारे अच् यासनः ईतनः कपीनांकपेर्वर्णस्यवा ईतनः मंडतेमंडिक

पिचुमंदश्चनिवेष्यपिच्छिलागुरुशिंशपा कपिलाभस्मगर्भासाशिरीषस्तु कपीतनः मंडिलोप्यथचांपेयश्चंपकोहेमपुष्पकः एतस्यक
लिकागंधफलीस्यादथकेसरे वकुलोवंजुलोशोकेसमौकरकदाडिमौ ॥ ११ ल्वाणे सलिकल्पनीति इलच् वाहुलकादिति मुकुटस्तु चिंत्यः रलयोरेकत्वा

द्वंडिरोपि मंडिरोमंडिलोनेतिवाचस्पतिः त्रीणिसिरीसइतिख्यातस्य चंपायाः अपत्यं स्त्रीभ्योढक् चांपेयश्चंपकेस्वर्णे किंजल्के नागकेसरे चंपयति चंप्यतेवा चपिगत्यां कु
नहेमवर्णंपुष्पमस्य त्रीणिगंधः फलंसाध्यमस्याः पाककर्णेतिङीष् प्रियंगौस्त्री गंधफलीचंपकस्यचकोरकइतिरुद्रः एकंचंपककलिकायाः केजलेसरतिसृगतौपचाद्य
च्वाकेसराः संत्यस्य अर्शआद्यच् केगरं हिंगुनिर्यासौवंकिंजल्केनस्त्रियांपुमान् सिंहच्छटायांपुन्नागेवकुलेनागकेसरेवंकतेवकिगत्यर्थः वाहुलकादुलच् आगमशा
सनमनित्यमितिनतुम् द्वेवोजसरीतिख्यातस्य वजतिवजगतौ वाहुलकादुलचनुमचनशोकोस्मात् अशोकस्त्रिषुनिः शोकेपुंसिकंकोलपादपे स्त्रियांतुकटुरोहिण्यांपा
रदेस्यान्नपुंसकं द्वे अशोकस्य करोतिदोषाभावं कृञादिभ्योवुन् करकस्तुपुमान्पक्षिविशेषे दाडिमेपिच हृयोर्मेघोपलेनस्त्री करकंचककमंडलौ दलनंदालः दलविशर ८०
णे घञ् दालेननिर्वृत्तः भावप्रत्ययांतादिमप् डलयोरेकत्वं दाडिमस्तुत्रिलिंगः स्याद्दलायांकरकेत्रिषु दाडिंवापि दाडिंवसारपिंडीरस्वाद्वम्लशुकवल्लभाइतिरभसात्

Digitization by eGangotri

अ॰ को॰ चंपायाअपत्यं॰ चांपेयश्चंपके स्वर्णोत्किंजल्के नागकेसरे केसराः संत्यस्य॰ अर्शआद्यच्॰ नागाख्यः केसरः स्वर्णाभपुष्प्यात्वो नागकेसरः षट्पदप्रिय इति रभसः कांचनस्याह्वयआह्व
टी॰ रा॰ योऽस्य॰ चत्वारि॰ जयति जिजये॰ पचाद्यच्॰ जयाजयंतीतिथिभिन्नपथ्योमातत्सखीषु च अग्निर्मंथेनाजयंते विजये च युधिष्ठिरे तत्पूर्वदीति॰ ङच्॰ विदित्यनुवृत्तेर्ङीप्॰ जयंतीहस्व॥
टी॰ कां॰ मित्रोर्यरिंद्रपुत्रीपताकयोः पुमानैंद्रहरे भीमे तर्कमृच्छति॰ ऋगतौ॰ कर्मण्यण्॰ नद्यांभवा॰ नद्यादिभ्योढक्॰ टिड्ढेति ङीप्॰ विजयंतस्येयं॰ तस्येदमित्यण्॰ स्वार्थे कन्॰ यद्वा वैज
२२ यंतीपताकेव॰ इवे प्रतिकृताविति कन्॰ पंच अरणीति ख्याताया॰ ज्ञाहीति ख्यातायाः इत्येके ६५ श्रीः पर्णेषु यस्य॰ श्रीपर्णोस्त्वग्निमंथे इ॰ कुंभश्रीपर्णी शाल्मलौ हठे इति हेमः अग्नि
मन्याति मंथ विलोडने॰ कर्मण्यण्॰ कणतीति॰ कण शब्दे॰ ण्वुन्॰ कणाः संत्यस्या वा॰ अत इनिठनौ॰ कणिका सूक्ष्मवस्तुनि॰ अग्निमंथे इति हेमः गणनं॰ गण संख्याने॰ इक् कृष्यादिभ्यः
कणिं करोति॰ कर्मण्यण् स्वार्थे कन्॰ यद्वा गणयति॰ ऋच्छति ण्वुल्॰ गणिका वासाकारिका च॰ जयति॰ पचाद्यच्॰ जयाजयंतीतिथिभिन्नपथ्योमातत्सखीषु च अग्निर्मंथेनाजयंते

चांपेयः केसरो नागकेसरः कांचनाह्वयः जयाजयंती तर्कारी नादेयी वैजयंतिका ६५ श्रीपर्णमग्निमंथस्स्यात्कणिका गणिकारिका जयो
थ कुटजः शक्रो वत्सको गिरिमल्लिका ६६ एतस्यैव कलिंगेंद्रयवभद्रयवं फले॥ ९९ विजये च युधिष्ठिरे पंच जयश्रीपर्णस्य अरणीति ख्यातायाः इत्येके दशाप्य
रणिपर्याया इति स्वामी॰ कूटे शृंगे जायते स्म॰ सप्तम्यां जनेर्डः॰ पृषोदरादिः॰ प्रज्ञाद्यण्॰ कौटजः कुटजः कौटीति च॰ इ॰ शक्नोति शक्ल शक्तौ॰ स्फायितंचीति रक्॰ शक्रः पुमान्देवराजे
कुटजार्जुनभूरुहोः॰ वदति॰ वद व्यक्तायां वाचि॰ वृतृवदिहनिकमिकषिभ्यः सः॰ ततः संज्ञायां कन्॰ गिरिमल्लीव इवार्थे कन्॰ चत्वारि कुरैया इति ख्यातस्य ६६ कलिं गच्छति॰ अं
तर्भावितण्यर्थो द्रुमभेदस्य त्रापीति डः॰ खचूडिश्चेति मुकुटः॰ कलिंगायतीति स्वामी॰ यवाकारबीजत्वाद्यवं॰ इंद्रसंज्ञस्य वृक्षस्य यवं॰ भद्रं च तद्यवं च॰ कलिंगेंद्रयवः पुमानित्यमर
माला॰ दृष्टा नाद्रिंद्रयवः पुमानपि॰ तत्रैव स्त्री कांडपाठात्॰ कलिंगा च॰ त्रीणीन्द्रयवस्य कूचिः॰ पाकोस्य कुलपाकं फलमस्य॰ आविजति स्म॰ ओविजी भयचलनयोः॰ आङ्पूर्वः॰ २२
गत्सर्थाकर्मकेति क्तः॰ ओदितश्चेति नत्वं॰ केचित्तु नञ्पूर्वत्वमाहुः॰ शोभना सेना यस्य॰ एति संज्ञायामगादिति णत्वं॰ रषाभ्यामिति णत्वं॰ मुकुटस्तु सुषूसिनोति षित्वं धने॰
कृञ्चत्रृखपिसिदुभ्यो नरु स्यात्॰ उज्ज्वलदत्तादीनां तु उणादिसूत्रस्य कृञ्चत्रृसिदुपन्यनिखपिभ्यो नित् इति पाठो दृश्यते॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करं मृद्नाति· मृद् क्षोदे· कर्मण्यण् स्वार्थे कन्· मकारं करमर्दः शिरीषो मूर्द्व पुष्पकः इति शुभांगः करामर्द कोस्येति मुकुटः तन्न उक्तकोशविरोधात्· चत्वारि करीरादीनि व्याप्त
स्य ❀ कालः स्कंधोस्य· कालस्कंधस्तमालेस्यात्तिंदुके जीवकद्रुमे ताम्यति· तमु ग्लानौ· तमिनिभ्यो णित् इति कालन्· तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे· तापिनं छादयति छद अप
वारणे· कर्मण्यण्· पृषोदरादिः यत्तु तत्पुरुषे समो लुकि तापिंछ इति मुकुटः तन्न· अलौकिकविग्रहेऽसमःप्रवेशाभावात्· चीतिः तमालस्य· स्यंदते· स्यंदू प्रस्रवणे· स्यंदेः संप्रसारणे
घञ्चेतुः वा हुलकात् दत्रघोन· मुकुटस्तु घमिच्छति· स्वार्थे संज्ञायां वा कन्· तदुक्तं· सिंदुवारः श्वेतपुष्पः सिंधुकः सिंधुवारितः· नीलपुष्पः शीतसहो निर्गुंडी नीलसिंधुक इति
सिंदुं वृणोति वारयति वा· वृञ् वरणे· वृञ् आवरणे वा· कर्मण्यण्· शोभनो रसोस्य· ईद्रसः सुरसः इंद्रसुरिस इति स्वामी निर्गुडति· गुड रक्षायां इगुपधेति कः पृषोदरादिः
गुडा हे पृ नान्निर्गतेति स्वामी· गौरादिः मुकुटस्तु गुडि रपठितोपि भूवादेराकृतिगणत्वात् दृष्टव्य इत्याह· निर्गुंडी नीलशेफाल्यां सिंधुवारद्रुमेपि च इंद्रवहणेति जीवानुको

कृष्णपाकफलाविग्नसुषेणः करमर्दके ❀ कालस्कंधस्तमालः स्यात्तापिच्छोप्यथ सिंदुकः सिंदुवारेंद्रसुरसौ निर्गुंडींद्राणिकेत्यपि ❀ वेणी
खरागरी देवताडो जीमूत इत्यपि श्रीहस्तिनी तु भूरुंडी तृणशून्यं तु मल्लिका ❀ ॥ जन्यजनकलक्षसंबन्धोपि पुंयोगस्तत्र गृह्यते· इंद्रमानयति अन्यत्रेणितात्कर्मा
ण्यण् ङीप् कन्· ह्रस्वत्वं चेति मुकुटः इंद्राणी कर्णेस्त्री णांपौलोमी सिंदुवारयोः पंचम्यां डीतिख्याताया: ❀ वेणी वा देवताडे वेणी स्यात्स्त्रवेण्यामपि योषिनीतिरभसः
नी स्यात्लान्खरा देवताडे खराणी स्याश्रिषुस्याद्वर्द्दभे पुमानिति रभसः गृणाति· गृ शब्दे पचाद्यच् गौरादिः गरीखरायां करणेक्लीवे नागविशेषविषे· मूषिकविषघ्नत्वाद्गरमालिरतिग
रागरीति तु स्वामी· तदुक्तं जीमूतको देवताडो वृत्तके शोगरागरीति· देवमिंद्रियं ताडयति· तड आघाते· कर्मण्यण्· देवो मेघसुरेराज्ञि स्यान्नपुंसकमिंद्रिये· जीमूत इव· जीमूतो दो
धृतिकरे देवताडेपयोधरे· पंचश्रियाहस्तः श्री हस्तोविद्यते स्याः अत इनिः हस्तं गृह्णाति हस्तयति· अथ श्रियं हस्तयति· आवश्यके तिणिनिरिति वा· भुवं रुंडति आच्छादयति रुटि लु
टि स्तेयकरणे इत्यत्र माधवीयायां वृत्तौ रुडि लुडी संपरे इति पाठांतरमुपन्यस्तम्· कर्मण्यण्· हस्तिकर्णोयत्र आषुणकविशेष इति स्वामी· तृणो धन्तुरांतानि पुष्पाणीति च· तृणशून्येसाधु
तत्रसाधुरिति यत्· तृणशून्ये शुल्ले साधु तृणशून्यमिति स्वामी· तृणशून्यं मल्लिकायां तथा स्यात्केतकीफले इति विश्वमेदिन्यौ मल्लते गंधं मल्यते वा· मल्ल धारणे· सर्वधातुभ्य इन्· वी

अ·को· भुविपदमस्याः गौरादिः शीताभीरुः शमभीरुरिति वा पाठः शीतं वियोगिनो भीरुर्यस्याः मल्लिका शीतभीरुश्च गवाक्षी भद्रमल्लिका शीतभीरुर्मदयन्ती भूपदी तृणशून्यकमिति वाचस्पतिः
टी·रा· चत्वारि वेल्लिरिति ख्यातायाः आस्फोटयति स्फुटिर् विकसने पचाद्यच् पृषोदरादित्वात् टस्य तो वा आस्फोता विष्णुक्रान्तायां वनमल्लकपर्णयोरिति रभसः आस्फोतस्य पु-
द्वी·कां· मान् कर्पर्ण्यस्यात् कोविदारके आस्फोता गिरिकर्ण्यां च वनमल्ल्यां च योषिति एकं वनमल्ल्याः शेरते शेफा अलयो यस्यां वा डीष् स्वार्थे कन् सुष्ठु वहत्यामोदं वह प्रापणे पचाद्यच् सुवहा
२३ शल्लकी लाघवर्णी गोधापदी सुरसा शेफालिकयोः स्त्री सुवहः सुखवहे वीणायामभिधेयवल्लिङ्गः नीलवर्णो नीला दोषघ्नी शालिनि चेति ङीष् स्वार्थे कन् नीलिका नीलिका क्षुद्रोग
शेफालिकासु च चत्वारि न्यवारीति ख्यातायाः ७० शोभनो रसो यस्याः श्वेता चासौ सुरसा चेति भूतानि विशति विश प्रवेशने कर्मण्यण् हेतु मगधदेशे भवा तत्रभव इत्यण् माग-
धी मगधोद्भूते शुक्लजीरकवंदिनोः वैश्यतः क्षत्रियापुत्रे मागधी स्यात्तु पिप्पली यूथी भाषाविशेषयोश्चेति हेमः चित्राकर्षकत्वाद्गणिके व गणिका पृथ्वी विश्वाभीतक्कोरी सुनातु दे

भूपदी शीतभीरुश्च सैवास्फोता वनोद्भवा शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ७० सितासौ श्वेतसुरसा भूतवेश्यथ मागधी गणिका
यूथिकाम्बष्ठा सा पीता हेमपुष्पिका ७१ अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता॥ १८ वन्ते यूथमस्त्यस्याः अत इति ठनौ यूथिका स्थानके पुष्पविशेषे पिच

योषिति अंबेव मातेव तिष्ठति सुपिस्थ इति कः अंबांवेति षत्वं आपोरिति ह्रस्वः अंबे तिष्ठतीति स्वामी अंबष्ठो देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च अंबष्ठा पम्लेलोण्यां स्या-
त्पाठा यूथिकयोरपीति विश्वः चत्वारि जूहीति ख्यातायाः हेमवर्णपुष्पमस्याः पाककर्णेति ङीष् स्याद्धेमपुष्पिका यूथी चंपको हेमपुष्पकः एकं तस्या एव पीतपुष्यायाः ७१
अतिक्रान्तो मुक्तां शौक्ल्यात् अत्यादय इति तत्पुरुषः गोस्त्रियोरिति ह्रस्वः यद्वा मुक्तान् विरक्तान् अतिमुक्तस्तु निस्संगे वासंत्यां तिनिशेऽपि च पुंडति पुंड्यते वा मुडि खंडने पु-
डि च स्फायीतिरक् स्वार्थे कन् वसंते पुष्प्यति कालात्साधु पुष्प्य दिस्यण् वासन्ती माधवी पृथ्व्यो रलेनाः विहिते त्रिषु मधौ पुष्प्यति माधवोऽजेमधौ राधे वा सवे न स्त्रि-
याम् मिषौ वासन्ती कुट्टनी मद्य मधुशर्करा सुस्त्रियाम् इति रेवोपि वैशाखे माधवः क्लृप्तेमा धवी चातिमुक्तके पंच मुष्टमन्यते मन ज्ञाने असुन् यद्वा शोभनम् मनोऽस्यां स्त्रि-
यां सुमनसो भूम्नि पुष्पजातौ तु भेदतः विद्वत्स्वपि यदा दष्ठलदाभेदेन शिष्यत इति व्याडिः सुमना याश्च पत्रे लोति सुश्रुतदर्शनात् टाबन्तोपि मालती लनति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लतसौत्रौ वेष्टनार्थौ मूलविभुजादित्वात्कः गौरादिः मालं तनोति वा अन्येष्वपीति डः मालती युवतौ का च माच्यां जातीविशल्ययोः ज्योत्स्नायां निशि नद्यां च जायते जनी प्रादुर्भ
र्भावे क्तिच् जनसनेत्यात्वं वाडीष् यत्तु जायन्तेऽस्यामिति नयेति वा हुलकाज्जनेः कर्तरि क्तिजित्याह तन्न अनयेति करणविग्रहं प्रदर्श्य कर्तरीति कथनं व्याहतं वाहुलकादि
ति च क्तिच्क्तौ चेति सूत्रस्य सत्वात् जातिः स्त्री गोत्रजन्मनोः अश्मन्तिकामलक्योश्च सामान्यच्छन्दसोरपि जातीफले च मालत्यां त्रीणि चं वेलीति ख्यातायाः सप्तमनोवुद्धी
द्रियाणि चला आदाने आतोनुपेति कः अथ सप्तला नवमाला च मर्कष्यां गुञ्जापाटलासु स्त्रियां नवा मुख्या माला स्याः कप् हे २२ माघे साधु तत्र साधुरिति यत् माघभवं
दिगादित्वाद्यदिति प्रांचः कुंभुवं दायति द्यति वा दैप् शोधने दो अवखंडने वा आतइति कः पृषोदरादिः कुण्यते वा कुण शब्दे अव्दादश्चेति दो वा णान्तः यत्तु तत्पुरुष इति
द्वितीयाया अलुकृ इति मुकुटः तन्न अलौकिकविग्रहे द्वितीयाया अप्रवेशात् षष्ठ्याः प्रवेशाच्च माघ्यः कुंदः कुरुंटक इति पुंस्कांडे रत्नकोशात् पुंस्त्वमपि कुंदो माघ्यो

सुमना मालती जातिः सप्तला नवमालिका २२ माघ्यं कुंदं रक्तकस्तु बन्धूको वंधुजीवकः सहा कुमारी तरणिरम्लानस्तु महासहा २३ तत्रशो
ऽस्त्री मुकुंदस्त्वमिनिध्यंतरे पुना हे कुंदस्य रक्तपुष्पत्वाद्रक्तः स्वार्थे कन् वध्नाति चित्तं वंध वंधने उलूकादयश्चेत्यूकः वंधू(१) णो कुरवकस्तत्र पीते कुरंटकः॥
कं वंधुजीवे स्याद्धूकः पीतसारके वंधुरि वजीवं जलमस्य त्रीणि दोपहरिया इति ख्यातस्य आतपं सहते षह मर्षणे अच् टाप् सहा वलेन स्त्रियां स्यात् स्त्रियां तु
नखभेषजे दंडोत्पला मुद्गपर्णी कुमारी पृथिवीषु च कुमारीव यद्वा कुमारयति कुमार क्रीडायां अच् गौरादिः यद्वा कामयते कमुकांतौ कमेः किदुच्चोपधायाः इत्यारन्
वयसि प्रथमे इति ङीप् कुमारी रामतरुण्यां वनमाल्येन दीभिदि कन्या पराजिता गौरी जरा द्वीपेषु च स्मृता तरत्यनया तृप्लवनतरणयोः अर्तिसृधृधम्यश्यवितृभ्योऽनिः
घुमलो तरणिः पुंसि कुमारी नौकयोः स्त्रियां त्रीणि घी उकुआरी इति ख्यातायाः न म्लायति स्मः गत्यर्थाकर्मके ति क्तः संयोगादेरातो धातोर्यण्वत इति निष्ठा नत्वं अम्लान स्त्वम
ले भिंटी भे इति हेमः अम्लानो महासहायां नाम्यलिमत्सु निर्मले इति विश्वः महती चासौ सहा च सन्महदिति तत्पुरुषः आन्महत इत्यात्वं महतो विमर्दस्य सहावेति मुकुटः तच्च
असामानाधिकरण्ये नात्वाप्रसंगात् महासहा मा षपर्णी मम्लानेपि च योषितीति कटसरपि या सामान्यस्य २४ तत्राम्लाने शोणे रक्ते कुत्सितईषद्वाऽऽलीनामत्यमकारं दत्वात्

Digitization by eGangotri

अ·टी· स्त्रिकुरवकः म्लानम्लानझिंटीप्रभेदयोः कुर्द्धद्रोति· संज्ञायांक्कुन् उवङ्·उकारहूयवानितिमुकुटः रुंटतिरुटिरित्ययकरणे· एवुलक्कुन्वा· कुत्सितः कोवीरुंटकः कुगतीतिसमासः
टी·रा· कुरुंटकः पीतपुष्पाम्लानझिंटिकयोः पुमानकुर्यते· कुरच्छेदने· वाहुलकाद्रंटः स्वार्थेकन्निसकोकारवानितिकश्चित· तत्रकुरशब्दे इतिपठितुंयुक्तं रक्तपीतपुष्पयुक्तक
२५ टसरपियाइतिरव्याताया एकैकम वण्यतेवणशब्दे· कर्मणिघञ्· वाणातुवाणामूल्वस्त्रीनीलझिंट्यांपुनर्द्वयोः दस्पतेदसुउपक्षये· कर्मणिघञ्गौरादिः दासीवाणाभुज्ञि
ष्ययोः आर्तः स्त्रीणांगलति· गलअदने· अच· त्रीणिनीलझिंटिकायाः ७४ सीरेभवः तत्रभवइत्यण्· कर्षः तत्रभवः दृद्धाच्छः संज्ञायांकन· सैरेयकइतिपाठेनद्यादिभ्यो
ढकू सैरीयकः सहचरः सैरेयश्चसहाचरः पीतोरक्तोथनीलश्चकुसुमैस्तविभावयेत· पीतः कुरंटकोज्ञेयोरक्तः कुरवकः स्मृतः नीलआर्तगलोसासीवाणाओदनपा
कपि·भिमितिरटति·अच·पृषोदरादिः गौरादिङीष· द्वेझिंटीसामान्यस्य· तस्मिन्सैरेयके· एकं सहचरति पचादौचरडिति टित्वनिपातनात्ङीप· यज्ञभिक्षासेनेतिच

नीलाझिंटीद्वयोर्वाणा दासी चार्तगलश्चसा ७४ सैरीयकस्तुझिंटीस्यात्तस्मिन्कुरवकोरुणे पीताकुरंटकोझिंटीस्यात्तस्मिन्सहचरीद्वयोः ७५
ओड्रपुष्पंजपापुष्पंवज्रपुष्पंतिलस्ययत प्रतिहासशतप्रासचंडातहयमारकाः ७६ करवीरकरीरेतुक्रकरग्रंथिलावुभो· ॥ ॥

कारस्यानुक्तसमुच्चयार्थत्वाच्चेरेषद्र्त्याह मुकुटः तन्न· तत्रप्रमाणाभावात अन्येषामपीतिदीर्घत्वेसहाचरइत्यपीतिस्वामीतिमुकुटः तदपिन· आङेवसिद्धत्वात द्वे ७५।
आर्द्रपदुवत्ति· उंदीक्लेदने· स्फायितंचीतिरकवाहुलकादस्पडत्वे· आड्रपुष्पमस्ययत्तुउडश्लेषणे· वाहुलकाद्रन्निति मुकुटः तन्न· धातुपाठेउडरदर्शनात· जवतिजुसौत्रो
धातुर्गतौवेगेच· अच·जवति· अच·जवायांतुजपास्त्रियामितिधर्मदासः ओड्रपुष्पेपिवृक्षेपिजवाशब्दः प्रकीर्तितइतित्रिकांडशेषः द्वेओदरइतिरव्यातायाः वज्रमिवपुष्पं
तिलस्यपुष्पं एकम प्रतीपोहासोविकासोस्य· शतप्रासाः कुंताइवपत्राण्यस्य· शतंपुष्पाणिप्रास्यतिवा· असुक्षेपणे· कर्मण्यण· चंडमततिअतसातत्यगमने· कर्मण्यण· ह
यानांमारकः ७६ करंवीरयतिवीरविक्रांतौ· कर्मण्यण· करवीरः कृपाणेस्यादेत्यभेदाश्वमारयोः करवीर्यादितिश्रेष्ठगवीपुत्रवतीषुच· पंचकणेरइतिरव्यातस्यकिरति·
कृविक्षेपे· कृस्तृकटिपटिशौटिभ्यईरन· यत्तुकगृशृडिभ्यईरजितिमुकुटस्तन्न· उणादिवृत्तिषुतत्पाठस्यादर्शनात· करिणामीरयतिवा· वंशांकुरेकरीरोऽस्त्रीवृक्षभिद्घट २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अच·टोवा· ऋकरः करीरवृक्षेस्त्री नेऋकचेचपक्षिभेदे च· ग्रंथिरस्यास्तिसिध्मादित्वाल्लच· ग्रंथिंलातिवा· ग्रंथिलस्तु करीरद्रौविकंकतन रोपुमान्· संग्रंथेत्रिष्वभद्रायांत्रीणि क
शील इतिख्यातस्य उन्मत्तयति· तत्करोतीतिणिच्· पचाद्यच्· उन्मत्त उन्माद वति धतूरमुचुकुंदयोः कितवाः संसस्यग्राहकाः अर्शआद्यच्· कितान् इत्ववंचति· वंचुगतौ· अन्येभ्योपीति
उः कितवोधूर्तवन्मत्तेवंचकेकनकाव्हये· धूर्व्यतेस्मधूर्वीहिंसायां· कर्मणिक्तः धूर्वतीतितुश्चांचः तत्रकर्तरिक्तोदुर्लभः मतिबुद्धिपूजार्थेभ्यश्चेतिचकाराद्बोध्यः यद्वाधूर्वनंधूर्तं·
भावेक्तः तदस्यास्ति· अर्शआद्यच्· धूर्त्तंतुखंडलवणेधतूरेनाविटेत्रिषु· धयतिधातून्· धेट्पाने· वाहुलकादूरच्· पृषोदरादिधतूरस्तुस्मृतो धूर्तोदेविनाकितवः शठइतिख्या।
मी· धूसति· धूसकांतिकरणे· क्विप्· तूर्यति· तूरीगतित्वरणहिंसयोः इगुपधलात्कः धूश्चासौतूरश्चेतिमुकुटः धुस्तूरस्तुपुंडरीशोधूस्तूरः कनकाव्हयइतिशब्दार्णवः कन
मी· धूसति· धूसकांतिकरणे· क्विप्· तूर्यति· तूरीगतित्वरणहिंसयोः इगुपधलात्कः धूश्चासौतूरश्चेतिमुकुटः धुस्तूरस्तुपुंडरीशोधूस्तूरः कनकाव्हयइतिशब्दार्णवः कन
कमाव्हयायस्य· कनकंहेम्निपुंसिस्यात्किंशूकेनागकेसरे धत्तूरेकाञ्चनारेचकालीयेचंपकेपिच ७७ मास्तिनास्तितुलायस्यमाश्रीः तुलास्येतिवा· कनकनामत्वात्·।

उन्मत्तः कितवोधूर्तोधत्तूरः कनकाव्हयः ७७ मातुलोमदनश्चास्यफलेमातुलपुत्रकः फलपूरोबीजपूरोरुचकोमातुलुङ्गके ७८ समीरणोमरु
वकः प्रस्थपुष्पःफणिज्जकः॥

मातुलोस्त्रीहिभिन्मातृभ्रात्रोश्चमदनद्रुमेधत्तूरे· मदयतिमदीहर्षग्लेपनयोः ल्युः मदनः स्मरवसंतद्रुमिद्धत्तूरसिल्हके· सप्त· मातुलस्य
पुत्रइव· कन्· मातुलपुत्रकइत्यपिमामकतनयेफलेचधूर्तस्यएकंफलेनपूर्यतेपूरीआप्यायने· इगुपधेतिकः कर्मणिघञ्वामुकुटस्तुफलंबीजंचपूरयति· कइत्याहःत
त्राणुचितः इगुपधत्वाभावाण्णिजंतस्य· एवंबीजपूरः हेविजौराइतिख्यातस्य· रोचते· रुचदीप्तावभिप्रीतौ च· अंतर्भावितण्यर्थःक्वुन्· रुचकोबीजपूरेचनिष्के स्तकपोत
योः नद्ध्योः सर्जिकाक्षारेप्यश्वाभरणमाल्ययोः सौवर्चलेपिमंगल्यद्रव्येपिकटकेपिच· मीनात्यरुचिं· मीञ्हिंसायां· वाहुलकात्तुन्· लुंग्यतेलुजिभासार्थः घञ्न्यंक्वादिः· मातु
लुंगः मातुलश्चासौलुंगश्चस्वार्थेकन्· द्वे· स्वामीतुचतुर्णांपर्यायतामाह· तद्उक्तं फलपूरोबीजपूरः केसरीबीजपूरकः बीजकः केसराम्लश्चमातुलुंगश्चपूरकः अनेकार्थे· सौवर्चलंमातुलुंगंरि
लाचंदनपेषणी· ग्रीवाभरणकंठेषुचतुर्ष्वरुचकंस्मृतं ७८ समीरयति· ईरगतौ· ल्युः समीरणस्तुपवनेपथिकेचफणिज्जके· मरोवाति· क्वुन्· भवेन्मरुवकःपुष्पमिच्छत्यु इ
फणिज्जके· प्रस्थेसानौपुष्प्यति· पुष्पविकसने· अच· फणीजातोस्मात्· फणाभपत्रपुष्पत्वात्· फणीउज्जकोवर्जकोस्यैतिकेचित् उभौपृषोदरादीजम्यते·॥ ॥

जमु अदने· विच्· वीरयति· अच्· जम् चासौ वीरश्च· जंबीरः मरुवकपुष्पे स्यात्तथा रंत शठद्रुमे· पं· चमरु आ इति ख्यातस्य· पर्णान्यस्यसंति· असु क्षेपणे· कर्मण्यण्· यद्वा· पर्णैरसति· अ
सरीषो· पचाद्यच्· कठिनं जरयति जॄष्· ण्यंतः कर्मण्यण् पृषोदरादिः कुंठति· शुठ प्रतीघाते· कुठिंच· पतिकट्टिकुठीत्येरक्· आगमशास्त्रस्यानित्यत्वान्न नुम्· कुठ गुठ प्रतीघा
ते कुठि चेत्यतो रदुराइयश्चेति द्रक् पृषोदरादित्वादनुषंगलोप इति मुकुटः तन्न· कुठधातोः सत्त्वे पृषोदरादिकल्पनावैयर्थ्यात्· द्रक्कल्पनापि व्यर्था· एरका सिद्धत्वात्· त्रीणि पा
र्णासस्य· ७९ अत्र पर्णासे· अर्जयति· अर्ज सर्ज अर्जने· ऋज गतिस्थानार्जनोपार्जनेषु वा· ण्यंतः ण्वुल्· एकं· श्वेतपर्णासस्य· पाठी स्यात्· अतः इनिः चित्रं बुद्धिं त्रायते· त्रै
ङ् पालने आतोनुपसर्गे कः· स्वार्थे कन्· चित्रकं तिलकेनात्तु व्याघ्रभिच्चं चु पाठिषु· वन्हिः संज्ञायस्य· वन्हिपर्यायनामकः इत्यर्थः· त्रीणि चीता इति ख्यातस्य· अर्क आह्वाय
स्य· अर्कोऽर्कपर्णस्फटिकेरवौ ताम्रे दिवस्पतौ· वसति· वस निवासे· शृस्वृस्निहीत्युः स्वार्थे कन् वसुकः रोमके पुंसि शिवमल्यर्कपर्णयोः बाहुलकाद्धूम्रश्रुरिति मुकुटः त

जम्बीरोऽप्यथ पर्णासे कठिञ्जरकुठेरकौ ७९ सितेऽर्जकोऽत्र पाठी तु चित्रको वह्निसंज्ञकः अर्काह्ववसुकास्फोतगणरूपविकीरणाः ८० मं
दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ शिवमल्ली पाशुपत एकाष्ठीला वको वसुः ८१॥

९ न· उक्तसूत्रे वसतेर्ग्रहणात्· आस्फोटयति इति· स्फुटिर विक
सने अच्· पृषोदरादि· आस्फोतस्तु पुमानर्कपर्णे स्यात्कोविदारके· आस्फोता गिरिकर्ण्यां च वनमल्ल्यां च योषिति· नानात्वाद्गणाः बहूनि रूपाण्यस्य· विकिरति कॄ विक्षेपे
कॄ इति क्युन् रत्वं रपरत्वं बाहुलकाद्दीर्घः· विविधः किरणोऽस्येत्यन्ये ८० मंदानि पर्णानि अण्· मंदेरयते वा· घञ्· मंदारस्यात्सुरद्रुमे· पारिभद्रेऽर्कपर्णे च मंदारो हस्तिमूर्तयोः
अर्काभानि नीरूपाणि पत्राण्यस्य· समआक इति ख्यातस्य· अस्मिन् शुक्ले· अलति· अल भूषणादौ· क्विप्· अल चासावर्कश्च· अलर्को धवलार्के स्याद्योगोन्मादितकु
क्कुरे· अलयतीति मुकुटः तन्न· णावुपधावृद्धिप्रसंगात्· प्रतापं च सुस्तेजः स्यात्· पाकः प्रकृतस्तापसायेन वा दृश्येनार्कस्य शिवप्रिया मल्ली· पशुपतेरयं· ततः प्रियत्वा
त्· पाशुपतो वकपुष्पे पशुपतस्यधि दैवते च तद्भक्ते· एकमस्थिलाति· सुषामादित्वात् षत्वं दीर्घत्वं च· एकाष्ठीला वनतिक्तकौषधौ पुंसि वकपुष्पे· वाति· बाहुलकात् कुकः·
कुनो कारस्य उत्वं वा· वक इति पाठे· कुन्· वकस्तु वकपुष्पे स्यात्कंके श्रीदे वरक्षसि· वसे· वसति वा· शृस्वृस्निहित्रप्यसि वसीत्युः वसुर्ना देवभेदाग्निभायोक्त्रवसु राज

वंद्यते· वदि अभिवादनस्तुत्योः गुरोश्चेत्यः· वृक्षमत्ति· अदभक्षणे· ल्युट्· वृक्षादनी तु वंदायां विदारीकंदकेपि च· इति विश्वमेदिन्यौ· वृक्षं रोहति· मूलविभुजादिकः· वृक्षरोहतीति।
वा इगुपधेति कः· जीवति· रुहिनदिजीविप्राणिभ्यः षिद्वाशिषीति झच् षित्वात् ङीष्· कन्· जीवंतिका गुडूच्यां च जीवाख्यशाकवन्द्योः· चत्वारि वृक्षोपरिजातलताविशेष।
स्य· वत्सैरद्यते· अदभक्षणे· ल्युट्· छिन्नारोहति· इगुपधेति कः· ङ्यापोरिति ह्रस्वः· गुडति· गुडरक्षणे· बाहुलकादूच्ट्· तंत्रयति· तंत्रि कुटुंबधारणे· ण्वुल्· न मृतमस्याः· अ
मृता मागधी पथ्या गुडूच्यामलकीषु च ८२ जीवति झच्· जीवंतिका गुडूच्यां च जीवाख्याशाकवंद्योरिति विश्वः· सोमस्य वल्ली· विगतं शल्यमस्याः· विशल्याग्निशिखादंतीगु
डूचीत्रिपुटासु च· मधुमयानि पर्णान्यस्याः· पाकपर्णेति ङीष्· न वमूर्वति· मुर्वी बंधने· अच्· दीव्यति· पचाद्यच्· देवडिति निपातनान्ङीप्· मुकुटोक्तं गौरादित्वं चिंत्यम्· देवी
क्लेनाभिषेकायां तेजनीस्पृक्कयोरपि· मधुरसोस्याः· भवेन्मधुरसा द्राक्षामूर्विकादूर्विकासु च· मुरति· मुर संवेष्टने· शकादिभ्योटन्· सप्तरात्रात्पुरे क्षीरे मूर्विकायां तु मोरटा· तेज

वंदा वृक्षादनी वृक्षरुहा जीवंतिकेत्यपि वत्सादनी छिन्नरुहा गुडूची तंत्रिकामृता ८२ जीवंतिका सोमवल्ली विशल्या मधुपर्ण्यपि मूर्वा देवी
मधुरसा मोरटा तेजनी स्रुवा ८३ मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि· पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ८४॥ ८४ ॥ ॥

पालने· ल्युट्· स्रवति· स्रु गतौ· अच्· संज्ञापूर्वकत्वाद्गुणाभावे स्रुवो होमपात्रे शल्लकीमूर्वयोः स्त्रियां· ८३ मधु लाति· आतोनुपेति कः· अन्येषामपीति दीर्घः· मधुनः श्रेणि
रत्र· गोः कर्ण इव· गोः कर्णो यस्या इति वा· पाककर्णेति ङीष्· गोकर्णोऽश्वतरेपि स्यान्मृगसर्पगणांतरे· अंगुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधाविति विश्वः· पीलोरि
व पर्णान्यस्याः· पाककर्णेति ङीष्· पीलुपर्णी चिंचिकायां मूर्वायामोषधीभिदि· इति दशमुरहारावलिरव्याख्यातायाः पठ्यते· पठ व्यक्तायां वाचि· कर्मणि घञ्· पाठस्तु पठने ख्या
ता विद्धकर्ण्यां तु योषिति· अंबष्ठाप्यम्ललोण्यां स्यात्पाठायूथिकयोरपि· विद्धौ कर्णौ यया· अविद्धौ कर्णौ यया· अविद्धोऽच्छिद्रः· पर्णरूपः कर्णोस्या इति मुकुटः· स्था
पयति· ल्युट्· स्थापनं रोपणे पुंसवने पाठौषधौ स्त्रियां· अतिशयेन प्रशस्ता· प्रशस्यस्य श्रः· श्रेयसी करिपिप्पल्यामभयापाठयोरपि· रस्यते· रस आस्वादने· कर्मणि घञ्·
अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः· रसो गंधरसे जले शृंगारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः देहधातुप्रभेदे च पारदस्वादयोः पुमान्· स्त्रियां तु रसनापाठाशल्लकीकंगु

अ·को·
टी·रा·
द्वी·कां·
२६

पापेचलति·चलविलसने·पचाद्येचेलडितिनिपातनान्ङीप·गौरादित्वकल्पनंमुकुटक्तंतव्यर्थंपचेर्यङंतादचिपापक्तीतिपापचीवायुस्तमीरयतिवा·अण·प्राचिभवाविभाषा
चेरिति खः चेनेतिक्तः स्वार्थेकनदृश्यपाठेतिख्यातायाः कटति·कटेवर्षावरणयोः·शृस्त्वलिहीत्यत्रचकाराद्उः वटिकटिभ्यांचेत्युरिनिमुकुटः तन्न·उज्वलदत्तादिषुतत्सूत्रस्या
दर्शनात्·कटुः स्त्रीकटुरोहिण्यांलताराजिकयोरपि·कटति·अच्·कटंदृणातीति·हेमवरले·संज्ञायांभृतॄइतिखच्·अरुर्द्विषेतिमुम्·कटंभरेतिपाठइत्यन्ये·कटंभराप्रसार
ण्यांरोहिण्यांगजयोषिति·कलंविकायांरोहिण्यांवर्षाभूमूर्वयोरपि·अशोकइवरोहति·उपमानेइतिणिनिः व्यस्तमपीदंनाम·अशोकःकटुरोहिण्यामशोकोवंजुलद्रुमइ।
तिरभसः रोहिणीकटुरोहिण्यामितिरुद्रः अशोकरोहिणीशकाचक्रांगीशकुलादनीतिनिघंटुः अशोकस्त्रिषुनिःशोकेपुंसिकंकेलिपादपे·स्त्रियांतुकटुरोहिण्यांपारदे।
स्यान्नपुंसकं·रोहिणीकंठरुग्भिदि·भमित्कटंभरासोमवल्केपुलोहितागवोः कटुश्चासौरोहिणीच·कटुरोहिण्यांरिष्टाचशोकातिक्तकरोहिणीतिनिघंटुः ८५ मत्स्यानोपितमिव·न

एकाष्ठीलापापचेली प्राचीनावनतिक्तिका कटुः कटंभराशोकरोहिणी कटुरोहिणी ८५ मत्स्यपित्ताकृष्णभेदी चक्राङ्गी शकुलादनी आत्मगुप्ताजडा

त्स्वादुत्वात् कृष्णोवर्णोभेदश्छेदोस्याः कृष्णभेदाचंडरुहेतिनिघंटुः कृष्णमलंभिनत्तिवा·कर्मण्यण·ङीप·चक्राकारमङ्गमस्याः ((अव्यंडाकण्डूराप्रावृषायणी ८६॥
गौरादिः·अंगगात्रेतिनिर्मूलं·चक्रांगोमानसौकसि·चक्रांगीकटुरोहिण्यामितिहेमः·शकुलैर्मत्स्यभेदैरद्यते·अत्तेः कर्मणिल्युट्·शकुलादनीस्त्रियांकृष्णभेदीकचटघ्नकयोः·अ
ष्टकुटकीतिख्यातायाः·आत्मनागुप्ता·दुःस्पर्शत्वात्·कर्तृकरणेतिसमासः·जडयति·तत्करोतीतिणिजन्तादच्·जडास्त्रियांशूकशिंब्यांहिमग्रस्तमूकाप्रज्ञेषुचत्रिषु·मुकुटस्तुकंडू
दिनाशेः स्यूजननादिंद्रियाणिजडयतिस्तंभयतिजलअपवारणेइत्यवोचत्·तन्न·णौवृद्धिप्रसंगात्·जडतिवा·डलयोरैक्यात्·नजहातिशूकान्अजहेतिस्वामी·ज्ञेयाजांग।
लिकासेवसाजहाप्रावृषायणीतीदुः नविगतमंडमस्याः अव्यंडाप्रावृषभागुसेतीदुः मुकुटस्तुअधिकमंडवीजमस्याअधिकममतिअमरोगेजमंताड्डावाअध्यंडेत्याह·तत्रमूलं। २६
मृग्यं·कंडूंराति·रादाने·आतोनुपेतिकः पृषोदरादित्वाद्ध्रस्वत्वमपि·कपिकच्छूश्चकंडूराकंडूराशूकशिंबिकेतींदुः मुकुटस्तु·कंडूरस्त्यस्याः कंडूकच्छूस्योह्रस्वश्चेतिरो
ह्रस्वत्वंचेत्याह·तन्न·उक्तवार्तिकस्यादर्शनात्·प्रावृषातुजलाणीवरतित्रिकांडशेषः·प्रावृषामेसयतेवा·कर्तरिल्युट्·कृत्यचइतिणत्वं॥ ८६ ॥

ऋष्यैर्मृगैः प्रोक्ता ऋषिभिः प्रोक्तेति वा ऋष्यप्रोक्ता शतावर्यपि तिवला शूकशिंबिषु शूकयुक्ता शिंबिः शस्यं छत्रं कशिशिरालि च शूकशिंबिरिन्यूषविवेकादिति लब्धा शूकशिंबिषु
कर्कटी शूकशिंबा चेति वाचस्पतिः कपीनां कच्छूः कंडूहेतुत्वात् मर्कटीव विविधचेष्टाहेतुत्वात् अथ मर्कटी करंजभिच्छूकशिंब्योः पुंसि वानरलूतयोः नवकवांच इति व्याख्या ना
याः चित्रं रूपमस्त्यस्याः चित्रा खुपर्णी गाडुंवा सुभद्रादेतिकासु च मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियां उपगता चित्रं न्यग्रुणद्धि वहुमूलत्वात् अच् गौरादिरिति ङीषः न्यंचं हलादौ
नि वा कर्मण्यण् न्यग्रोधी तृपचित्रायां द्रवति द्रु गतौ लटः शतृ शं वृणोति वृञ् वरणे शमिधातोरित्यच् गौरादिः मुकुटस्तु खजिसाह शंवरी चाखुपर्ण्यां स्यात् वर्षति वृषु से
चने इगुपधेति कः ८७ प्रतीची श्रेणीयस्याः सुतानां श्रेणिरस्याः रमंते अत्र रमुक्रीडायां त्रमं ताडुः रंडा मूषिकपर्ण्यां च विधवायां च योषिति स्वामी तु चंडा अते चण्डेत्याह प्रत्यक्श्रे
णि वृषा चंडा पुत्रश्रेण्या खुपर्णिके ति निघंटुः मूषिकः पर्णमस्याः मूषिककर्णाकारपत्रत्वात् पाककर्णेति ङीष् दशमूसाकर्णीति व्याख्यातायाः अपमार्जत्यनेन हलश्चेति घञ्
निष्ठायामनिट्त्वात् कुत्वं उपसर्गस्य घञीति दीर्घः अपकृष्ट आसमंतान्मार्गोस्येति वा शिखरे प्रायेणाभवति अध्यात्मादित्वाट्ठञ् धाम्नोऽर्गः धामार्गवानि आतोनुपेति कः धामा

ऋष्यप्रोक्ता शूकशिंबिः कपिकच्छूश्च मर्कटी चित्रोपचित्रा न्यग्रोधी द्रवंती शंवरी वृषा ८७ प्रत्यक्श्रेणी सुतश्रेणी चंडा मूषिकपर्ण्यपि अपा
मार्गः शैखरिको धामार्गवमयूरकौ ८८ प्रत्यक्पर्णी केशपर्णी किणिही खरमंजरी हंजिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ८९॥

र्गवस्तु पुंसि स्यादपामार्गे च घोषके अधामार्गवइति स्वामी अधामार्गवोऽपामार्गः कोशातकी चेति द्व्यर्थे मयूरप्रतिकृतिः इवे प्रतिकृताविति कन् मयूरकोप्यपामार्गो स्त्रीवं तु स्यां जनेपुनः ८८
प्रत्यंचि पर्णान्यस्याः पाककर्णेति ङीष् कपिलोमतुल्यानि लोमशानि पर्णान्यस्याः केशपर्णीति स्वामी किणिनो व्रणान् जिहीते ओहाङ् गतौ आतोनुपेति कः गौरादिः किणिनो व्र
णान् हंति वा अन्येष्वपीति डः खरा मंजरिरस्याः गौरादिर्वा अष्टौ अपामार्गस्य हंति रोगान् पचाद्यच् पृषोदरादिः अंगारवल्ली हंजी च वेदीवर्वरकस्तथा भनक्ति रोगान् भंजो आम
र्दने ण्वुल् वा पृषोदरादिः ब्रह्मणोऽयं ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकं भूमिदेवेपि पुंल्लिंगः फंजिकाऽष्टक्वयोः स्त्रियां पद्मा भं पुष्पमस्त्यस्याः पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यां
तरे वुजे नानागे स्त्री फंजिका श्री चार्वीटी पन्नगीषु च भर्जनं भ्रस्जपाके घञ् भ्रस्जोरोपधयोरमन्यतरस्यामिति रमागमः चजोरिति कुत्वं भृजी भर्जनेवा घञ् भर्गोस्त्यस्याः ज्यो

अंगारवत् वल्ल्यस्याः समासांतविधेरनित्यत्वान्न कप्· वालेयस्य शाकः गर्दभभक्ष्यशाकत्वात्· वर्वर्ति· वृत्र् वरणे· यङ्लुगंतः पचाद्यच्· वर्धते· वृधु छेदने· ण्वुल्· नवभार्याः
मञ्जो शोभनेवर्णे तिष्ठति· सुपिस्थ इति कः अंबांबेतिषत्वं पृषोदरादिः यद्वा अतिशयेन मंजुः अतिशायने तमबिष्ठनौ· विकसति· कसगतौ· अच्· विकषति कष हिंसायां
मिति मुकुटः जिंगति· जिगिगतावितिकेचित्पठंति· गौरादिः समंततोंऽगति· अगिगतौ· अच्· कालेमिश्यते मिश्रशब्दे· कर्मणि घञ्· गौरादिः स्वार्थेकन्· कालं वर्णं मिषति
मिषस्पर्द्धायां पूर्ववत्· मूर्द्धन्यषेति वा· मंजिष्ठा कालमेषीचेतिनिघंटुः मण्डूकवत्पर्णमस्याः पाककर्णेति ङीष्· मंडूकपर्णी मंजिष्ठा ब्राह्मण्योर्नातु श्योनाके· मंडति
मंडआभंडने· भडिगतौ इतिस्वामी· वाहुलकादीरन्· पचाद्यच्· भंडीरी· भंडी च· गौरादिः भंडी योजनवल्ल्यपि· रक्ताभंडीरिकाचेतीन्दुः प्रज्ञाद्यण्· हेमपुष्पी च भांडीरीतिरभ
सः योजनगामिनी वल्ली· नवमंजीठेतिख्यातायाः यसनं· यसुप्रयत्ने· भावे घञ्· यासो स्त्यस्य· अर्शआद्यच्· यातिवाहुलकादसच्· यौति युमिश्रणामिश्रवणयोः

अङ्गारवल्ली वालेयशाकवर्वरवर्द्धकाः मंजिष्ठा विकसा जिङ्गी समंगा कालमेषिका मण्डूकपर्णी भंडीरी भंडी योजनवल्ल्यपि यासो
यवासो दुःस्पर्शो धन्वयासः कुनाशकः रोदनी कच्छुरानंता समुद्रांता दुरालभा पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिपर्णिका ॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ॥

जीन्यासः दुःखेनस्पृश्यते· स्पृशसंस्पर्शने· घञ्· खल्वा· दुःस्पर्शो धन्वयासेनाकंटकार्यां स्त्रियां त्रिषु खरस्य
र्शो· धन्वनोयासः मरुभवत्वात्· कुं नाशयति· णशअदर्शने· ण्यंतः पचाद्यच्· स्वार्थेकन्· रोदयति· रुदिर् अश्रुविमोचने ल्युट्· चोदनीतिस्वामी· रोदनं क्रंदने स्त्रेपि दुरालभो
मचो स्त्रियां कच्छुंराति· रादाने· आतइतिकः पृषोदरादित्वाद्ध्रस्वः कच्छुरा शूकशिंव्यां च शटी दुःस्पर्शयोरपि· नअंतोस्याः अनंता च विशल्यायां शारिवादूर्वयोरपि कणादु
रालभा पथ्याः पार्वत्यामलकीषु च· समुद्रांतोस्त्यस्याः अर्शआद्यच् समुद्रांऽतोस्या वा· समुद्रांता तु कर्पासीपृक्कादुरालभासु च· दुःखेनालभ्यते· डुलभष्प्राप्तौ· ईषद्दुःसुनि
खल्· आगमशासनस्यानित्यत्वान्नुम् [crossed-out text] पृश्निरल्पं पर्णमस्याः पृथगसक्तं पर्णमस्याः पाककर्णेति ङीष्· चित्रं पर्णमस्याः अंघ्रेराकारस्य पर्णा
न्यस्याः ङीष्· स्वार्थेकन्· अंघ्रिर्मूलमाश्रयत्वेनास्त्यस्याः अंघ्रिवल्लिकेति मुकुटः क्रोष्टुभिर्विन्ना विचारिते वदने वेति वा सिंहपुच्छमस्याः सिंहपुच्छाकारपुष्पत्वात्· उपमानात्प

CC-0. In Public Domain. Digitization by eGangotri

बाहुलकाद्दालोपः धावति धावुगतिशुद्ध्योः बाहुलकादनिः गृहति · गृह संवरणे · इगुपधेति कः न वपिठ वनीति ख्याततायाः निदिग्धे तेस · दिह उपचये क्तः टाप् स्वार्थे कन् · स्पृशति · स्पृश स्पर्शने इगुपधेति कः स्पृश बाधनस्पर्शनयोरिति मुकुटोक्तं निर्मूलं गौरादिः व्याजिघ्रति · व्याघ्रादिभिरिति लिंगादात श्चोपसर्ग इति कः न तु पाघ्रेति शः गौरादिः बृहति · बृह वृद्धौ · वर्त्तमाने पृषद्बृहदिति निपातः शतृवत्त्वान्ङीप् · क्षुद्रायां क्षुद्र वार्तक्यां बृहतीछंदसि क्वचिदिति शाश्वतः कंटकानि यर्त्ति · ऋ गतौ · कर्मण्यण् स्वार्थे कन् ॥ प्रचोदयति · चुद संचोदने · ल्युट् · कोलति कुल संस्त्याने इगुपधेति कः गौरादिः लिजं तेन विगृह्य क इत्यभिधानं मुकुटस्य चिंत्यं लिजंतस्येगुपधत्वाभावादनुपयोगाच्च · क्षुणत्ति · क्षुदिर् संपेषणे स्फायीति रक् · पशु क्षुद संप्रेरणे इति धातुरूपं न्यस्तो मुकुटेन · स धातुपाठे न लभ्यते · क्षुद्रा व्यंगा नटी कंटकारिका सरघासु च · चांगेरी वेश्ययोर्हिंस्रामक्षिकामात्रयोरपि · दुःस्पृश्यते ईषद्दुरिति खल् · राष्ट्रमस्त्यस्याः अत इनिठनौ · राष्ट्रं स्यान्नृपवर्त्तने · उपद्रवे क्लीबपुंसोः इति भट कटा इति ख्याततायाः नीलादे

निदिग्धिका स्पृशी व्याघ्री बृहती कंटकारिका ॥ प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ रंजनी श्रीफली तुत्था द्रोणी दोला च नीलिनी

वधाविति ङीष् · नीली रुम्भे दनीलिन्योः कल्यते कल क्षेपे · कर्मणि घञ् · यत्तु कर्मण्येरच् इति मुकुटेनोक्तं · तन्न · कलधातोरजंतत्वाभावात् · हलश्चभावप्रसंगाच्च · ण्यंतत्वे तु कल्यते इति विग्रहप्रदर्शनस्यासंभवाच्च · काला तु कृष्णत्रिवृन्नामंजिष्ठानीलिकासु च · क्लीतकं क्रयोत्यस्याः कपिरिकादित्वाल्लत्वं · अत इनिठनौ क्लीतकं विनिमय इति स्वामिमुकुटौ · ग्रामे भवा · ग्रामाद्यखञौ · ग्रामीणा नीलिका यां स्त्री ग्रामोद्भूतेऽभिधेयवत् · मधुराणि पर्णान्यस्याः पाककर्णेति ङीष् · मधुपर्णी तु गंभार्यां नीली संज्ञौषधावपि ॥ रंजयति · ल्युट् णिलोपस्यस्थानिवद्भावाद्दसनयोश्चेति वा नलोपो न रज्यतेनयेति विग्रहे तु करणेति ल्युटि भवस्यैव रंजेः कृल्लिनिति वा · गुंडारोचनिको नीलीमंजिष्ठासु च रंजनी · रजनी नीलिनी रात्रि हरिद्रा जतुकासु च · श्री वत्फलमस्याः श्रीफलः पुंसि मालूरे धात्री नीलिकयोः स्त्रियाः तुद्यते · तुद व्यथने · पातृतुदीति थक् तुत्थयति वा · तुत्थ आवरणे · पचाद्यच् · तुत्थमंजनभेदे स्यान्नीलीसूक्ष्मैलयोः स्त्रियां · द्रवति · द्रु गतौ वहिश्रीति निः नूणाति स्वामी नृण पूरणे · नूण्यतेनया · हलश्चेति घञ् गौरादिः नूणी नील्यां निबंधे वाना · दोलयति · दुल उत्क्षेपे · पचाद्यच् · मेलेति स्वामी दोला नील्यां यानांतरेपि च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुख्या·श्रीफलिकामेलासारवाही·चरंजनीतिनिघंटुः·नीलोवर्णोस्यस्याः·अतइनिरेकारइत्यनीलेतिख्यातस्य·अवल्गोरशोभनाम्नातः·सोमइवसोमेनवाराजति·राजदीसोउ
यमानइतिवासुख्यजानाविविवाणिनि·शोभनावल्लिरस्याः·सोमस्यवल्लिः·स्वार्थेकन् ९५ कालंमिषति·मिषस्पर्द्धायां·कर्मण्यण्·कृष्णफलमस्याः·अजादित्वाट्टापवातंसं
कोचयति·कुचशब्देतारे·मूलविभुजादित्वात्कः·पृषोदरादिः·मुकुटस्तुवाचंगुंजतिवागुञ्जीत्याह·गुजिअव्यक्तेशब्दे·पूर्ववत्·गौरादिः·पूतिःफलेषुस्याः·पाककर्णेतिसेषु
अष्टौवकुचीतिख्यातायाः·कृष्णोवर्णोस्यस्याः·अर्शआद्यच्·कृष्णास्याद्द्रौपदीनीलीकणाद्राक्षासुयोषिति·उपकोलति·कुलसंस्त्यानेबंधुषुच·अच्पचादिः·उपगताकुल्यामिति
वाविदेहेपुभवा·वैदेहीरोचनासीतावणिकस्त्रीपिप्पलीषुच·मगधेषुभवा·मागधीस्त्रीकणायूथ्याशर्करवन्मगधोद्भवे·पुंसिवैश्यात्क्षत्रियाजेशुक्लजीरकवंदिनोः·चपति·च
यसांत्वने·वृषादित्वात्कलच्·चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषुच·कणशब्दे·अंतर्भावितण्यर्थः·पचाद्यच्·कणाजीरककुम्भीरमक्षिकापिप्पलीषुच ९६ ओषति·उ

अवल्गुजः·सोमराजीसुवल्लिः·सोमवल्लिका ९५ कालमेषीकृष्णफलावाकुचीपूतिफल्यपि· कृष्णोपकुल्यावैदेहीमागधीचपलाकणा ९६
उषणापिप्पलीशौंडीकोलाथकरिपिप्पली·कपिवल्लीकोलवल्लीश्रेयसीवशिरःपुमान् ९७ चव्यंतुचविकाकाकचिञ्चीगुंजेतुकृष्णला ॥

षदाहे·वाहुलकात्कुनदीघीदिरपि·उषति·उषरुजायां·उषणंमरिचेक्लीबंकणायामूषणास्त्रियां·पिपर्त्ति·पृपालनपूरणयोः·नाहुलकाद्लच्·पृषोदरादिः·गौरादिः·पि
प्पलंसलिलेवस्त्रच्छेदभेदेचनात्तरौनिरर्गलेपक्षिभेदेकणायांपिप्पलीस्मृता·शुंडायांमद्यपानगृहेभवा·शौंडोमत्तेचविख्यातेपिप्पल्यांतुभवेस्त्रियां·कोलति·कुलसं
स्त्याने·पचाद्यच्·कोलंकोलफलेक्लीबंपिप्पलीचव्ययोःस्त्रियाम्·दशपिप्पल्याः·करीवपिप्पली·वृहत्त्वात्कपिरिववल्लीकोलइववल्ली।तयोस्तुल्यरोमत्वात्·अतिशये
नप्रशस्ता·श्रेयसीकरिपिप्पल्यामभयायाःठयोरपिवसेर्वसआच्छादने·वाहुलकात्·क्रिरच्·तालव्यपाठेतुवशकांतौसंज्ञापूर्वकत्वान्नसंप्रसारणम्·वशिरःपुमान् २८
किणिहीहस्तिपिप्पल्योः·क्लीवेब्धिलवणेस्मृतं·पंचगजपिप्पलीतिख्यातायाः ९७ चर्व्यते·चर्वअदने·एयत्·पृषोदरादिः·चव्यंतुचविकेक्लीवंचवायामपियोषिति·
कृन·चविकंस्त्रियामपिचव्याकोलाचचविकाचव्यंकुंजरपिप्पलीतिहेमचंद्रः·ट्टेचव्येतिख्यातस्य·केचित्तुपूर्वान्वयमाहुः·यदाहचन्द्रनंदनः·चव्याकोलाथचविकाश्रे

यसीगजपिप्पली च्यवनं कोलवल्ली तु चव्यं कुंजरपिप्पली अत्र पक्षे तु स्याने चः पाठः काकवर्णो चिंचा गोरादिरिति स्वामी गुंजति गुजि अव्यक्ते शब्दे पचाद्यच् गुंजा तु काक।
चिंचायां पटहे च कलध्वनौ कृष्णवर्णलाति त्रीलि चोंघचीति ख्यातायाः पलं मांसं कषति कषहिंसार्थः मूलविभुजादित्वात्कः पृषोदरादिः तत्पुरुष इति द्वितीयाया अलुक् इ।
तिमुकुटः तन्न अलौकिकविग्रहे मोप्रवेशात् पलंकषा गोक्षुरके स्त्रियां गन्धापलाशयोरिति मूर्द्धन्यान्तेषु रभसः यत्तु कर्षतीति विगृह्य पृषोदरादिरित्युक्तं न चिन्त्यं कष
तिनैव सिद्धत्वात् अच् प्रत्ययविधानमपि चिंत्यं कर्मण्यणः प्रसंगात् पलंकषा गोक्षुरके रास्ना गुग्गुलु किंशुके तु डीरीलाक्षयोश्च स्त्री राक्षसे तु पलंकषः इक्षुगंधा इ
वर्णघोस्याः समासान्तो विधिरनित्यः इक्षुगंधा कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे शुनो दंष्ट्रेव संज्ञापूर्वकत्वान्न दीर्घः स्वादुः कंटकोस्य ९८ गोधेनोः पृथिव्या वा कंटकः।
गोकंटको गोक्षुरके स्थपुटे च गवां खुरे क्षुरति क्षुर विलेखने इगुपधेति कः स्वार्थे कन् गोगौ वा क्षुरकः वनस्य शृंगाट इव श्वदंष्ट्रो गोक्षुरस्त्रिकंटकपुटः श्वदंष्ट्रा।

पलंकषा त्विक्षुगंधा श्वदंष्ट्रा स्वादुकंटकः ९८ गोकंटको गोक्षुरको वनशृंगाट इत्यपि विश्वा विषा प्रतिविषाति॥
विषोपविषारुणा ९९ शृंगी महौषधं चाथ क्षीरावी दुग्धिका समे शतमूली बहुसुताभीरुरिंदीवरीवरी १००॥

स्वादुकंटक इति रभसः सप्त गोक्षुरस्य इति ख्यातस्य विशति विश प्रवेशने अशूप्रुषीति क्वन् विश्वं कृत्स्ने च भुवने विश्वे देवेषु नागरे विश्वा प्यतिविषायां स्यात्त्वचे
ष्टिविषाक्वाघौ इगुपधेति कः विषं जले विषायां स्त्रियां क्ष्वेडे तु न स्त्रियां प्रतीपं विषं यस्याः विषमतिक्रान्ता विषमुपगता अरुणो वर्णोस्याः अरुणातिविषाख्या मामंजि
ष्ठात्रिवृतासु च ९९ शृणाति शॄ हिंसायां शृणातेर्ह्रस्वश्चेति गन् कित्तु ह्रस्व गौरादिः शृंगी विषायामृषभे स्वर्णमीनविशेषयोरिति विश्वः महच्च तदौषधं च महौषधं
तु शुंठ्यां स्याद्विषायां लसुनेपि च अष्टौ अतीस इति ख्यातस्य क्षीरमवति अवरक्षणादौ कर्मण्यण् दुग्धमस्त्यस्याः ठन् दुद्धी इति ख्यातायाः शतं मूलान्यस्याः बहवः सुता
यस्या न भीरुः स्थिरपत्रत्वात् इन्दीवरमस्त्यस्या अर्शआद्यच् गौरादिः इन्दीवरं कुवलये शतावर्यां च योषिति नीलोत्पलाकारपुष्पत्वात् वृणोति पचाद्यच् गौरादिः १००

Digitization by eGangotri

अ. टी. रा. ॥ ऋष्यैः प्रोक्ता ऋष्यप्रोक्ता शतानि वर्यतीति वल्ली शूकशिंबि मु अभीरु लिपत्र्याण्यस्याः पाककर्तीति ङीष् नारायणाज्जाता नारायणी च्युते भीरुः गौर्यादित्वान्ङीष् नारायणी मता शतेना वृ
टी. रा. लोति पचाद्यच् गौरादिः शतावरी तु शच्यां स्यादिंदीवर्यामपि स्त्रियां न हि नोतीति हिंगतो वाहुलकाद्दुः सतावरीति स्वामी तायादश पीतं द्रवतीति द्रुग तो मितद्रू दित्वान्तद्रुः यत्तु मुकुटे
२९ नोक्तं अपष्ठ्वादयश्चेति कुरिति तन्न टिलोपस्याप्राभात् एतादृशसूत्राभावाच्च कलेरयं सर्वत्राग्निकलिभ्यां ढक् स्वार्थिकन कालीयक इति वा पाठः कालस्य वर्णस्यायं वृद्धाच्छः
प्रनिर्दिष्टा वैकटिनी स च कालेयकः स्मृतः कालीयको दारुनिशा तिरुद्रः हरिः पिंगः पीतो वा द्रुरस्य हरिद्रुः पीतचंदनमिति निघंटुः १११ दीर्यते दृ विदारणे दृस नीति नुणा
वो तदिति गौरादिभ्य इति वा ङीष् दार्वी दारुहरिद्रायां तथा गोजिह्विकौषधौ पचादि पृ वाद्यच् एषोदरादिः पीतदारु पचंपचेति निघंटुः दारुश्चासौ हरिद्रा च पिपर्ति पृथा
लन पूरणयोः विच् पर्वासौ जनी च परपालकं स्वास्थ्यं जनयतिवा जनी प्रादुर्भावे ण्यतः कर्मण्यण् सरदारुहलदीति स्वामी तायाः तचेरंतर्भावितण्यर्थात् पचाद्यच्
उग्रो गंधो स्याः उग्रगंधा जमोदायां वचायां छिक्कि कौषधौ षट्ग्रंथाः ग्रंथयोऽस्याः षड्ग्रथा तु वचायां स्त्री स्यात्करंजांतरे पुमान् गौर्लोमास्याः गोशब्दो गो लोम सदृशेला

ऋष्यप्रोक्ता भीरुपत्री नारायण्यः शतावरी अहेरुरथ पीतद्रु कालीयक हरिद्रवः १११ दार्वीपचंपचा दारुहरिद्रा पर्जनीत्यपि वचोग्रगं
धा षड्ग्रंथा गोलोमी शतपर्विका ११२ शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका॥ ९ द्वाति कः अच् समासांतो गौरादित्वान्ङीष् गो लोमा श्वेतदूर्वायां यां स्याम
द्वचामूतके शयोः शतं पर्वाण्यस्याः संतिश्री त्वादित्वाद्वृन् डावंताः स्वार्थे कन्वा शतपर्विका दूर्वायां वचायामपि योषिति पंचवचेति स्वामी तायाः ११२ हिमवति भवा हैमवत्यभ
या स्वर्णक्षीर्योः श्वेतवचोभयोः एकं वैद्यस्य माते व हिन स्तिहिंसि हिंसायां पचाद्यच् पृषोदरादिः गौरादिः सिंही तु कंटकार्यां स्यात् सिंहीस्वर्भानुमातरि वासाक्षुद्रयोः क्षु
द्रायां वा श्यते वा शृशब्दे गुरोश्चेत्यः स्वार्थे कन् पट्टा उश्यते वशकांतौ संज्ञायामिति ण्वुल् दंत्यांतोपि वा सयति पचाद्यच् वासो गृहे व्यवस्थाने वा सा स्यादटरूषक इति रु
द्रः वर्षति मधु वृष सेचने इगुपधेति कः वृषः स्याद्वासके धर्मे सौरभेये च शुक्रले इति मूर्द्धन्यांते विश्वः यत्तु वृष्यते पीयते वृषपाने घञर्थे क इति मुकुटेनोक्तं तन्न २९
धातुपाठे इदृशं नात् परिगणनाच्च अटतन्या च्छतो रुषति रुष हिंसायां मूलविभुजादिः अटे रूषति रूप मिश्रलो इगुपधेति के दीर्घो कार वानपि॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैद्यमाता टरूषकः सिंहास्यो वाजिदंतक इति रभसः वृषो वासा टरूषक इति माधवः सिंह आस्यमस्य सिंहास्यः सदृशपुष्पत्वात् वासयति ण्वुल् वसे आच्छादयति वा
जीदंतोस्य वाजिदंतः नाभके सरत्वात् तादृशपुष्पत्वाद्वा अष्टौ अरडूसा इति ख्यातस्य १०३ आस्फोटयति स्फुटिर् विकसने ण्यंतः अच् पृषोदरादिः आस्फोटा गिरि
कर्ण्यौ च वनमल्ल्यां च योषिति गिरिर्बालमूषिका कर्णोस्याः तत्कर्णं तुल्यपत्रत्वात् विष्णुना क्रांता नपराजिता अपराजिता ईशाने कृष्ये तरेनाजिते त्रिषु गिरिकर्णी
जया दुर्गा शालपर्णीषु योषिति चत्वारि स्वामी तु वासकपर्याया निमान्मन्यते इक्षुः गंधोस्य ईक्षुशब्द इक्षुगंधसदृशेलाक्षतिकः इक्षुगंधा कोकिलाक्षे क्रोष्ट्यां काशे
च गोक्षुरे कांडे नेक्षुरिव कोकिलोऽक्षियस्य कोकिलशब्दः कोकिलाक्षिसदृशेलाक्षणिकः अक्ष्णो दर्शनादित्य च इक्षुमिक्षुगंधं राति आतोनुपेतिकः क्षुर इव क्षुरः स्या
च्छेदनद्रव्ये कोकिलाक्षे च गोक्षुर इति विश्वः पंच तालमखाणा इति ख्यातस्य १०५ शालीनां भवनं क्षेत्रं शालेयं व्रीहिशाल्योर्ढक् तेन दस्यास्ति अर्श आद्यच् शालेयः स्या

वृषोऽटरूषः सिंहास्यो वासको वाजिदंतकः १०३ आस्फोटा गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता इक्षुगंधा तु कांडेक्षुकोकिलाक्षेक्षुरक्षुराः

च्छीतोपुमान् त्रिषु शाल्युद्भवे क्षेत्रे शीतमस्यास्ति अच् शिवमस्यास्ति शीतश्चासौ शिवश्च अथ शीतशिवं क्लीवं ॥१०४॥ शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः
गौले यमल्लिमथ्ययोः पुंसि शुक्लफला हृस्वे तथा मधुरिकौषधौ छत्रमस्यास्ति छत्राकारस्तवकत्वात् छत्रा मिसावति च्छत्रे कुस्तुंबुरुशिलींध्रयोः नपुंसकं चातपत्रे म
धुरो रसोस्त्यस्याः अच् मधुरा शतपुष्पायां मिश्रेया नगरीभिदोः मधुकुक्कुटिका मेदो मधूलीयष्टिकासु च क्लीवं विषे पुंसि रसे तद्वत्स्वादुप्रियेन्यवत् मस्यते मसी परिणामे इ
नूवाहुलकादतद्रः स्यान्मांसाशतपुष्पायां मधुरायां मिसिः स्त्रियामिति रंत्यां ते रभसः मिसिः स्त्री मधुरामांस्योः शतपुष्पाजमोदयोः सोमनंदी तु मिशी मिशिरिति तालव्यांते
आह मिशति मिश शब्दे इगुपधात्किदिति इन् ङीप् वा मिश्रयति अच् ईयते ईङ् गतौ अचोयत् मिश्रा चासौ वेया च शकंध्वादिः षट् वनशोफ इति ख्यातायाः सीतिहुंड
नेहुंडिवरणे पचाद्यच् सिंहतुंडस्यापभ्रंशोयमिति स्वामी पृषोदरादिः वज्रद्रुमः सिहुंडो थेति रभसात् स्वादिरपि वज्रद्रुः स्नुक् स्नुही ति पाठः वज्रनामा द्रुरिति मुकुटः।
स्वामी तु वज्रः स्नुक् स्त्री स्नुही गुडेति पठति वज्रा गुडूचिकायां च॥

अ·टी· टी·रा· ३०

वज्रीस्नुक्स्नुहः ईस्मृता स्नुह्यतिस्नुह उद्गिरणे क्विप् वा कुहेति कुत्वं भागुरिमते टाप् स्नुहीच स्नुहा स्नुग्भा स्नुडित्यमरदत्तः इगुपधात्कि वाङीष् गुडति गुड वेष्टने इगुपधे तिकः गुडा गोलेस्नुक्षि कृत्ती स्नुही गुडिकयोर्गुडेति रुद्रः गुडश्च स्नुही गुडयोर्गुडए क्षवगोलयोरित्यजयः १०५ समंतादुग्धमस्याः षट्सेहुंडइति ख्यातस्य वेल्लति वेल्लच लनेअच् अथवेल्लं कृमिघ्नतंडुलाविति रभसः नमोघा अमोघा सफलेवा च्यवत्स्त्री पथ्या विडंगयोः मोघापि कृमिघ्न तंडुलं मोघेति वाचस्पतिः चित्रातंडुला अस्याः तड आघाते ताड्यते सा नसिवर्लसीति निपातः तंडुलः स्याद्विडंगेपि धान्यादि निकरे पुमान् तंतुक्रिमि सूत्रं लाति कः तंतुलइति मुकुटः कृमीन् हंति अमनुष्य कर्तृके चेति ठक् विडति विड भेदने विडादिभ्यः कित् इंगच् विडंगस्त्रिषु भिन्नेस्यात्कृमिघ्ने पुन्नपुंसकं षट्विडंगस्य १०६ वलति वल संवरणे पचाद्यच् वलमस्त्यस्या इति वा अर्शआद्यच् वलयुक्ते त्वालिंगः स्याद्वला वाट्यालके स्त्रियां वाटीमलति अलभूषणे दोकर्मण्यण् स्वार्थेकन् एवुल्वा वाट्या आलकः इवलिया इति ख्यातस्य घंटिवारीति अच् घण्टाः पुष्पं यस्याः घंटापुष्पसत् पुष्पसदृशी लासत्तिकः पाककर्णेति ङीष् स्वार्थेकन् हेघंटेति ख्यातस्य मृद्वाति मृद्यते वा मृदस्सोरेकिं

मिश्रेयाप्यथ सीहुंडो वज्रद्रुः स्नुक्स्नुही गुडा १०५ समन्तदुग्धाथो वेल्लममोघा चित्रतंडुला। तंडुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकं

१०६ वला वाट्यालको घंटारवा तु शणपुष्पिका मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च १०७ सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत्। ॥

किणीकादयः श्चेति निपातः गोः स्तनो यस्याः गोस्तनसदृशो गोशब्दो गोलः स्वांगाच्चोपसर्जनादिति ङीष् गोस्तनो हारभेदेनाद्राक्षायां गोस्तनी स्त्रियां द्रां कुत्स्यते द्राक्षिकांक्षायां कर्मणिघञ् आगमशासनमनित्यं स्वद्यते स्वद आस्वादने क्तवा पाजीत्युणादौ गुणोति ङीष् मधुः रसोस्या भवेन्मधुरसा द्राक्षा मार्द्वीका दुधिका गुच्छफलाबद्धखेति ख्याताया १०७ सर्वा अनुभूतयो यस्यां सर्वैरनुभूयते कर्मणि क्तिन्निति वा सरति सृगतौ वाहुलकाद्दलन सरलेति पाठे युचेत्रयः पुटाः यस्याः सर्वानुभूतिः सरला त्रिपुटा त्रिपुटीमहतीसा श्वेति वाचस्पतिः त्रिपुटामल्लिकायां च सूक्ष्मैला त्रिवृतोः स्त्रियां त्रिभिरवयवैर्वृता त्री नवयवान् वृणोति वृञ् वरणे क्विप् तु कृत्तीन्ददीयान् भंडते भडि परिभाषणे कर्मण्यण् रोचते रुच दीप्तावभिप्रीतौ च ल्युट् रेचनीति पाठे रिचिर् विचने रेचनी त्रिवृता द्व्योरोचनी कर्कशः सूता ससश्वेतत्रिधारेति

किंद्च गौरादिः सुष्टु सेनया याति सेनाः शब्दात्तस्य पापाशेतिति ञीच् पचाद्यच् एतिसंज्ञायामगादिति षत्वं स्वार्थे कन् १०८ कालयति कलविलक्षेपे ण्यंतः पचाद्यच् गमसू
रविदलमस्याः अर्द्धश्चंद्रोयस्याः एनहि दलस्याई चंद्राकारत्वात् कालं मिषति मिषस्पर्द्धायां कर्मण्यण् सप्तश्या मत्रिधारेति ख्यातस्य मध्विव रवेतिकन् मधुकं क्ली
तकेपुमान् क्लीवं नं क्ली तृ अधार्थे भावे क्तः आगमश्शासनमनि यं क्लीतमधार्थेकलति कल क्षेपे चुरादिभ्यो णिज्वेति णिजभावः अन्येभ्योपीति ङः युक्तो द्रमः दरस्तु
क्तंमुकुटेन नतु स्त्री चमदे रन्त्यस्य मातृ यहासंपदादित्क्षिप् वा हुलका ह्लोपः क्लीं क्लीवत्वं तकति तक हसने मूलविभुजादिकः वृष्यत्वात् यष्टीं मध्विवास्याः कप्
मधुयष्टी वरेवेतिकन् मधुयष्टी च यष्टी च यष्टीमधुकमेव चेति वाचस्पतिः चत्वारि जेठीमधु इति ख्यातस्य १०९ विदारयति दृविदारणे ण्यंतः पचाद्यच् गौरादिः विदारीशाल
वर्ण्यां वशेगमे देसुगंधयोः क्षीरमिव शुक्ला द्रसुगंधोस्याः द्रसुशाब्दसलंद्वंधस इति गोणः समासांतविधेरनित्यत्वान्नेत्वं क्रोशति क्रुश आह्वाने सितनि मसीति नुन्
स्त्रियां चेति तृज्वत् ऋन्नेभ्यो ङीप् मुकुट सुष्ट्र निषित्वान् ङीषित्याह क्रोष्टी शृगालिका कूष्मविदारी लांगलीषुच चत्वारि कूष्मभूकूष्मांडस्य मुकुट सुशुक्लस्यमा

त्रिभंडी रेचनी श्यामापालिंदी तु सुषेणिका १०८ कालामसूरविदला ईचंद्रा कालमेषिका मधुकं क्लीतकं यष्टीमधुः कंमधुयष्टिका १०९॥
विदारी क्षीरशुक्लेक्षुगंधा क्रोष्टी च या सिता अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगंधिका ११० लांगली शारदी तोयपिप्पली शकुलादनी ॥

ह तन्न कूष्मविदारीति मेदिनीविरोधात् एतेन यासिता शुक्लेत्यपास्तं या असितेति छेत्तु मुचितत्वात् स्वामी तु विदार्यादित्रयं पठित्वा कूष्मो भूकूष्मांडोयं मालुदेशेषु
रसुला क्रोष्टी तु यासितेति पठित्वा शुक्लो भूकूष्मांडः रसुत्का अन्या क्षीरविदारीति त्रयं पृथक्पपाठ तत्र विभागत्रयमनुचितं उक्तमेदिनीविरोधात् क्षीरवती विदारीम
हती चासौ श्वेता च ऋक्षान् गंधयति गंधअर्दने मूलविभुजादिकः यद्वा ऋक्षो गंधोस्याः ऋक्षशाब्दसलंधस इति गोणः अन्या असिता याः शुक्लाकूष्मेति मुकुटोक्तं चिं
त्यै त्रीणि शुक्लभूकूष्मांडस्य ११० लांगलाकारोस्त्यस्याः अर्शआद्यच् गौरादिः लांगली तोयपिप्पल्यां क्लीवं तु कुसुमांतरे गोदारणे तृणराजगृहदारुविशेषयोः शरदि
भवा संधिवेलेत्यण् शारदो वत्सरे नवे शारद्व्ववेपीतमुद्गे शालीनेप्यथ शारदी सप्तपर्णे वृषिप्पल्यामिति हेमः तोयस्य पिप्पलीव शकुलैरद्यते अदभक्षणे कन्यल्युट् इति

अ·टी· शकुलादनी स्त्रियां कृष्णभेदी कचटशकयोः चत्वारि जलपिप्पलीति ख्याता तस्य खरमञ्जुते खरैरश्यते वा अश्नूव्याप्तौ संघाते च अश भोजने वा उत्वादयश्चेति वः अपि शिखण्डीति
रा·ही· केन्वाके न जलेन रौतीति रु शब्दे पचाद्यच् करवस्य मयूरस्येयं तस्येदमित्यण् यत्तु कारोरियं कारवस्येयं वेति व्याख्यातं मुकुटेन तन्न हित्वा च्छ प्रसंगात् कारवी मधुरादीप्यत्व
३१ कूपत्री कृष्णजीरके दीपनं घञ् दीपे साधुः नत्र साधुरिति यत् दीपकोपि अलंकारे यवान्यां च दीपको लोचमस्तक इति रभसः मीनाति रोगं मी ञ् हिंसायां मीनातेरूरन् मुकु
टस्तु मिनोतिग्रक्षिपत्यग्निमांद्यमिति खर्जूरादित्वादूरजित्याह तन्मंदं मीनातेरूरन्निति सूत्रस्य सत्वात् मयूरो नीलकंठेपि स्यान्मयूरशिखौषधाविति रभसः लोच्यते लोचृ
दर्शने घञ् यद्वा लोचयति लोचृ भासने पचाद्यच् लोचो दर्शनीयो भासमानो वा मस्तकोस्य मुकुटस्तु लुच्यते इति विगृहीतवान् तत्र लुंच अपनयने अस्मात् घञि नलोपविधा
यकस्याभावात् लोचमर्कट इत्यपीति स्वामी पंच मयूरशिखायाः १९१ गायायति गुपू रक्षणे आयाभावे पचाद्यच् गौरादिङीष् केचिद् जादित्वाट्टापमाहुः गोपी श्यामा गोप
वल्ली गोपा गोपालिका च सेति वाचस्पतिः श्यायते श्यैङ् गतौ इषियुधीन्धीति मक् शारणं शॄ हिंसायां कृगॄशॄपॄकुटीति णिः शारिरस्त्यस्याः अन्येभ्योपीति वः नअंतोस्याः अ

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः १९२ गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे १९३॥
कदली वारणबुसा मोचा रम्भांशुमत्फला॥

१९ न्येभ्योपीति वः नअंतोस्याः अनंता च विशल्यायां शारिवा दूर्वयोरपि उत्पलमस्त्यस्याः उत्पलाकारपुष्पत्वात्
अर्शआद्यच् यद्वा उद्यतं पलमनया उत्पला चासौ शारिवा च पंचगुलीरसः युज्यते युजिर् योगे ऋहलोर्ण्यत् यद्वा योगाय प्रभवति योगाद्यच्च योग्यः प्रवीणयोगार्हयापि शक्ते
ष्णु वाच्यवत् क्लीबमृद्धौषधौ पुष्यनास्त्र्यभामार्कयोषितोः ऋध्नोति ऋधु वृद्धौ क्तिन् च ऋद्धिः स्यादोषधीभेदे समृद्धावपि योषिति सिध्यति सिधु संराद्धौ क्तिन् च सिद्धिस्तु मोक्षे निष्प ३२
त्तियोगयोरिति हेमः लक्ष्यते लक्ष्यते वा लक्ष दर्शनलक्षमुद्वेनीः लक्ष्मीः संपत्तिशोभयोः ऋद्ध्योषधौ च पद्मायां वृद्धिनामौषधेपि च चत्वारि ऋद्ध्याख्यौषधेः इमे उक्ताश्चत्वारो वृद्ध्याख्यौ
षधेरप्याह्वया नामानि वर्धते नया वृधु वृद्धौ क्तिन् च वृद्धिस्तु वर्द्धने योगे प्यष्टवर्गौषधांतरे कालांतरे चाभ्युदये समृद्धावपि योषिति १९२ कं दत्ते क दधते वा कदि आह्वाने रोदने च
वृषादित्वात् साधुः केन वायुना दल्यते वा दल विशरणे खनो घचेति घः गौरादिः यत्तु घञर्थे क इति मुकुटः तन्न परिगणनात् मुकुटस्तु कदेः सौत्रात् कदलाद्यय इत्यलजित्या

CC-0. In Public Domain. Digitization by eGangotri

तन्नकरेः सौत्रस्यधातोरभावात् उज्ज्वलदत्तादिवृत्तिषु उक्तसूत्रस्यादर्शनात् कदलाकदलीप्रश्न्यांकदलीकदलीपुनः रंभावृक्षेथकदलीपताकामृगभेदयोः कदला डिंविकायांचशाल्मलीभूरुहेपिचअजादित्वाट्टापिकदला कदलश्चकदल्यसाविति व्याडिः वारणानांवुसावुस्यतिवुस्यतेवा वुसउत्सर्गे इगुपधेतिकः भिदाद्यङ्गाघञ् र्थेकइतिपरिगणनान्नेह प्रवर्त्ततेवुषेतिमूर्द्धन्यांतइतिकेचित् मुंचतिमुच्चमोक्षणेपचाद्यच् रभतेरभराभस्येपचाद्यच् रभेरशब्लिटोरितिनुम् रभ्यतेवाघञ् मुकुटस्तु रभतेनयाघञर्थेक इत्याह तन्न परिगणनात्कस्याप्राप्तेः मतितुकेऽनिदितामितिनलोपप्रसंगाच्चरंभाकदल्यप्सरसोर्नाचेलोवारणांतरे अंशुमतिसूक्ष्मावयववंति फलान्यस्याः यद्वा अंशुमानिवफलान्यस्याः अजादिः कदलीसुकुमाराचरंभाभानुफलामतेतिधन्वंतरिः काष्ठिनाइल्यतेइलस्वप्नक्षेपणयोः घञ् षट् कदल्याः मुद्गः पर्णमस्याः मुद्गशब्देनमुद्गपर्णसदृशंलक्ष्यते पाककर्णेतिङीष् इषत्कंईषदर्थेचेतिकोः कादेशः काकेनेषज्ज्वलेनमुद्गंगच्छतिगमश्चेतिडः यद्वा काकामुद्गाहर्षप्रा प्तायस्यांसहतेषहमर्षणेपचाद्यच् सहोवलेनस्त्रियांस्यात् स्त्रियांतुनखभेषजेदंडोत्पलामुद्गपर्णीकुमारीपृथिवीषुचश्रीतिमुग्धोनीतिरत्यानस्य ११३ वार्त्तमारो

काम्पील्लामुद्गपर्णीतुकाकमुद्गासहेत्यपि ११३ वार्त्ताकीहिंगुलीसिंहीभण्टाकीदुष्प्रधर्षिणी॥

ग्यमाकयति अककुटिलायांगतौ ण्यंतः कर्मण्यण् यद्वा वार्तंफल्गुअकंयस्याः जातेरितिङीष् वातिंगणस्तुवार्त्तागोवार्त्ताकः शाकविल्वकइतिरभसात् पुंस्यपिवार्त्ताकिं तिंगणोवृत्ताविति विश्वात् वार्त्तापि वार्त्ताकुरेणागुणसम्प्रयुक्तेतिवैद्यका वार्त्ताकुरपि हिंगुलातिआतोनुपेतिकः गौरादिङीष् हिंगुलोवर्णकद्रव्येनार्भटाक्यांतुहिंगुलीहिन स्तिहिंसिहिंसायांपचाद्यच् पृषोदरादिः सिंहस्तुराशिभेदेमृगाधिपेश्रेष्ठेस्यादुत्तरस्थश्वसिंहीस्वर्भानुमातरिवासावृहत्योः क्षुद्रायामितिहेमः भत्यतेभण्यतेवाभटभृतौ भणशब्देवापिनाकादयश्चेतिसाधुः दुःखेनप्रधृष्यतेञिधृषाप्रागल्भ्येकर्मणिल्युट् आभीक्ष्ण्येणिनौतुदुष्प्रधर्षिणी पंचभंटाक्याः नकुलानामियंप्रियत्वात् तस्येद मित्यण् नआकुलत्वंययावानाकुलीकुक्कुटीकंदेरास्नायांचव्यकेस्त्रियामितिविश्वः शोभनोरसोस्याः सुरसंतुत्रिषुस्वादौपर्णासेनानपुंसकं स्त्रीरास्नानागमात्रोश्वराजिरापु निवारस्यतेवारादानेरसआस्वादनेवारास्नासास्नेतिसाधुः रास्नादयइत्यानुपूर्वीमुकुटोक्ताउज्ज्वलदत्तादिषुनास्तिरास्नातुस्याद्भुजंगाख्यामेलापर्ण्यामपिस्त्रियां शोभनो

नव: कुमारीतिसमासः ॥

Digitization by eGangotri

अ·को· सुगंधोस्यस्स मुकुटसुतोभनोगंधोस्यामर्दी आद्यजिनात् नन्नगंधस्येदित्तीलप्रसंगात् वहुव्रीहिलोकार्यत्वाद्वेचाप्रसंगान् मत्वर्थेवहुव्रीहिविधानात् स्वामीतुरासासुगं
टी·रा· धयोः स्थानेनागसुगंधेतिपठित्वा सर्पसुगंधेतिव्याख्यत् गंधवती नाकुली ११४ नकुलानामिष्टा भुजंगानस्तति अस्तृव्याप्तौ कर्मण्यण् यद्वा भुजंगोऽक्षियस्याः अवृत्तोदर्शनादि
३३ त्यचूजानेरितिगौरादीतिवा ङीष् भुजंगशब्दस्यभुजंगाक्षिसदृशोलक्षणा छत्त्रमकतिष्ठत्त्राकारपर्णत्वात् अककुटिलायांगतौकर्मण्यण् सुष्टुवहतिपचाद्यच् सुवहाप्र
लकोलापर्णीगोधावदीसुरसाराशेफालिकयोः स्त्री सुवहः सुखवहे वीणायामभिधेयवद्वाच्यः नवरासनरूतिरव्यातायाः विदार्यागंधः विदारीगंधः ड्यापोरितिहूस्वः सोस्यस्याः
मुकुटस्तुविदारीगंधदूवगंधोस्याः इतिविवव्रार तच्चिंत्यं उपमानाच्चेतीकारादेशप्रसंगात् अंशवःसंत्यस्याः दीर्घमूलत्वात् अंशुमान्भास्करेसालपर्ण्यामंशुमतीस्मृता
सालः पर्णमस्याः सालशब्दस्यसालयर्णेसदृशेलक्षणा नालव्यशापीसेकेतिष्ठति अजिरशिशिरेतिसाधुः अंतर्भावितण्यर्थेवानिष्ठतिः स्थिराभूशालपर्ण्योर्नाशूनोमोक्ष
ऽचलेत्रिषुध्रुवतिध्रुवस्थैर्येरगुपधेतिकः ध्रुवोवटेवसवयोगभिदेोः शंभोशंकावुत्तानपादजेस्थिरेनिश्चितेचध्रुवंखेऽजस्रतर्कयोः ध्रुवामूर्वाशालिपर्ण्योः स्रुग्भेदेगील

नाकुलीसुरसारास्नासुगंधागंधनाकुली ११४ नकुलेष्टाभुजंगाक्षीछत्त्राकीसुवहाचसा विदारिगंधांशुमतीशालपर्णीस्थिराध्रुवा ११५

तुंडिकेरीसमुद्रान्ताकर्पासीवदरेतिच भारद्वाजीतुसावन्याशृंगीतुऋषभोवृषः ११६॥ ९९ भिद्यपीतिहेमः पंचशालपर्ण्याः ११५ तुंडिकान्शरीरा

णिईरयतिईरगतिप्रेरणयोः कर्मण्यण् समुद्रोऽंतोयस्याः यद्वासमुद्रयासहवर्तमानोऽन्तः समीपंयस्याः आच्छादकत्वात् करोतिक्रियतेवा कृञ्ञःपासः जातित्वाद्गौरा
दित्वाद्वाङीष्पृषोदरादिरितिमुकुटोक्तिस्तुचिंत्या कर्पासीशब्दस्यहृस्वादित्वात् दीर्घादित्वेप्रामाणिकेतुपञ्चाद्यणसिद्धत्वात् वदतिवदस्थैर्येवाफलकादरः चत्वारि
कर्पासरूतिरव्यातस्यभरद्वाजस्यमुनेरियंतेननिर्मितत्वात् तस्येदमित्यण् साकर्पासीवन्याचेत्तदाभारद्वाजीभारद्वाजीवनकार्पासिकायांतुसहाचंदनवीजिकाभारद्वा
जीमहावीर्याकुष्ठलाकुष्ठनाशिनीतिवाचस्पतिः एकंवनकर्पास्याः नर्मारूतिरव्यातायाः शृणातिगदेंशृहिंसायांशृणातेर्हूस्वश्चेतिगन् तुम्चगौरादित्वात् ङीष्ऋष
भोतिविषाणांचशृंगीमधुरवल्लभेतिरुद्रःजयोऋषतिऋषीगतौऋषिवृषिभ्यांकिंदित्यभच् ऋषभस्त्वौषधांतरेस्वरभिद्वृषयोःकर्णारंध्रकुंभीरपुच्छयोःवर्षतिवृषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गांगं जलमीरयति ईरगतौ क्षेपणे च मृगय्यादयश्चेति साधुः नागानां हस्तिनां बला झषति वानम् झष हिंसार्थः पचाद्यच् झषा नागबलायां स्त्री नायमन्त्यात् टवी शुनां गविभू
मावे धते एध वृद्धौ वाहुलकादुः संज्ञायां कन् ह्रस्वा चासौ गवेधुका च चत्वारि कंकहीति ख्यातायाः धाम ऋच्छति ऋगतौ अन्येभ्योपीति विच् धामार् चासौ गौश्च गोरतद्धि
तलुकीति टच् धामार्गवः पुंसि स्यादपामार्गे च घोषके घोषति घुषिर् विशब्दने पचाद्यच् स्वार्थे कन् घोष आभीरपल्ल्यां स्याद्गोपालध्वानघोषके कांस्ये चांशुदन्तादेना घोषाम
घुरिकौषधौ द्वे स्वेततोरयीति ख्यातायाः जालयति जलआच्छादने चुरादिः पचाद्यच् गौरादिः महती चासौ जाली च एकं घीया इति ख्यातायाः ११७ ज्योत्स्नास्त्यस्याः ज्योत्स्ना
दिभ्य उपसंख्यानमित्यण् संज्ञापूर्वकत्वाद्वृद्ध्यभावे ज्योत्स्न्यपि ज्योत्स्नी पटोली ज्योत्स्ना वन्निशोरिति हेमः पटति पटगतौ कपिगडिगंडी सो लच् स्वार्थे कन् पटोलं वस्त्रभेदे
नौषधौ ज्योत्स्ना तु योषितीति जलति जलधान्ये ज्वलितीति णः जानेरिति वा गौरेति वा ङीष् जालं गवाक्ष आनाये क्षारके दंभवृंदयोः जालो नीपद्रुमे जाली पटोलिकौषधौ स्त्रि
यां त्रीलिच्छिछिंडा इति ख्यातस्य नद्यां भवा नद्यादिभ्यो ढक् नादेयी नागरंगे स्याज्जपायां जलवेतसे भूमिजं बांच जंबां च कांगुष्टे पिच योषिति भूमिलग्ना जंबुका ग्रणकपार्थिवा

गांङ्गेरुकी नागबला झषा ह्रस्वगवेधुका धामार्गवो घोषकः स्यान्महाजाली स पीतकः ११७ ज्योत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका स्याल्लां
गलिक्यग्निशिखा काकाङ्गी काकनासिका ११८ गोधापदी तु सुवहा मुसली तालमूलिका॥ ११

द्वे भूमिजम्बुकायाः लांगलं पुष्पविशेषोस्त्यस्याः ठन् जानेरिति गौरेति वा ङीष् लांगलवत् वनति भूमिं तेन दीव्यतीति ठक् टिड्ढेति ङीप् अग्नेरिव शिखास्याः अग्निज्वाला लांग
लिकीति वाचस्पतिः द्वे करिहारीति ख्यातायाः काकस्येवांगं नासारूपं फलमस्याः गौरादिः काकस्येव नासिका यस्याः द्वे काकजंघायाः कौवाठोटीति ख्यातायाः ११८ गोधाया इ
व पादो मूलमस्याः कुंभपदीषु चेति साधुः सुवहति पचाद्यच् गोधापदी तु सुवहा त्रिफला हंसपद्यपीति कोषांतरं द्वे हंसपद्याः मुस्यति मुसखंडने वृषादिः मुसलं स्यादयोग्रे च
पुंनपुंसकयोः स्त्रियां तालमूल्यां माखुपर्ण्यां गृहगोधिकयोरपि तालो मूलमस्याः तालशब्दस्तालमूलसदृशे लाक्षणिकः पाककर्णेति ङीष् स्वार्थे कन् द्वे मुसलीति
ख्यातायाः अजः शृंगमस्याः अजशब्दोऽजशृंगसदृशे लाक्षणिकः गौरादिङीष् फलस्याजशृंगसदृशत्वात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

विषाणमस्त्यस्याः अर्श आद्यच् गौरादिः विषाणी क्षीरकाकोल्यामजशृंग्यां च योषिति कुष्ठनामौषधौ स्त्री वंत्रिषु शृंगे भद्रंतयोः द्वेमेढ्राशृंगीतिख्यातायाः गोजिह्वे च दर्वी विः
द्रवेप्रतिकृत्ताविति कन् दार्विकेतिपाठे दाम्यति दृविदारणे उल्वादित्वात्साधुः दार्वी दारुहरिद्रायां तथा गोजिह्विकौषधौ द्वेगोभीतिख्यातायाः॥ ११९॥ताम्यति तमुग्लानौ क्विप्
अनुनासिकस्येति दीर्घः वोलति वुलमज्जने चुरादीनां णिज्वा इगुपधेति कः ताम्वासौ वुलीच पृषोदरादिः तांवूलाख्या वल्ली शाकपार्थिवादिः गौरादिः तांवूली नागवल्ल्यां
स्त्री कमुके तु नपुंसकं नागलोकस्य वल्ली त्रीणि नागवल्लीतिख्यातायाः द्विर्जाता जनी अन्येभ्योपीति डः द्विजो विप्रस्त्रिययावश्यरंते विहंगमे द्विजाभाङ्गी रेणुकयोरिहेमचं
द्रः हरति कृत्यमामेडः हृत्योप्रेतिदीर्घः कषायेपि हरेणुर्ना रेणुकायां स्त्रियां भवेदिति रुद्रः रेणुरस्या अस्ति व्रीह्यादित्वात् ठन् इसुसुक्तांतात्कः रेणुरेव संज्ञायामिति कन्वा
मुकुटस्तु रेणुं करोति डः टापरेण काप्षोदरादिरित्याह तन्न पृषोदरादिरित्युक्तिश्चिंत्या रेणुकापि हरेलोचजामदग्न्यस्य मातरि कुंतिषु देशेषु भवा तत्रभव इत्यण्
कपिलो वर्णोस्त्यस्याः अर्श आद्यच् पुंडरीककरिण्यां तु शिंशुपाग्नोविशेषयोः स्त्री रेणुकायां कपिला वर्णे ना कुक्कुरेमुनो अनलं वासुदेवे च कपिलः परिकीर्तितः भस्मनो गंधः

अजशृंगी विषाणी स्याद्गोजिह्वादार्विके समे ११९ तांवूलवल्ली तांवूली नागवल्ल्यप्यथ द्विजा हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी॥ १२०॥
एलावालुकमैलेयं सुगंधि हरिवालुकं वालुकं चाथ पालंकायां मुकुन्दः कुंदकुन्दुरू १२१ वालं ह्रीवेरवर्हिष्ठोदीच्यं केशांबुनाम च॥ ॥

भस्मगंधोस्त्यस्याः अतइनिः षट् हरेणुकायाः १२० एलयति इलप्रेरणे पचाद्यच् टाप् एलाइव वलते वलप्राणने वाहुलकादुण् स्वार्थे कन् एलवालुकमिति स्वा
मी तत्र ङ्यापोरिति ह्रस्वः इलाया अपत्यं स्त्रीभ्यो ढक् शोभनो गंधोस्य गंधस्येदिति इत्वं हरिवर्णं वालुकं पंच पालनं पालरक्षणे संपदादिः पाला अंकयते अंक
पदे लक्षणे च अर्दंतः अचोयत मुक्तिं ददाति दात्रः आतोनुपेति कः पृषोदरादिः मुकुंदः पारदे विस्फोरत्नभेदे च कुं दुरो कुभूमिमुनत्ति उंदी क्लेदने कर्मण्यण् शकं
ध्वादिः कुंदो माध्ये स्त्री मुकुंदस्त्वमिनि ध्यंतरेषुना कुमुनत्ति उंदयति वा जज्वादयश्चेति साधुः चत्वारि पालक इति ख्यातशाकस्य कुंदुरुरिति ख्यातस्य वा १२१ वालयः
ति वलसंवरणे ण्यंतः पचाद्यच् वालो नाकुं तले श्वस्य गजस्यापि च वालधौ वाच्यलिंगो भवेदज्ञे ह्रीवेरे पुन्नपुंसकं अलंकारांतरे मध्ये वाली वाला तु दोस्त्रियां॥ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीपुन्नं वेरमस्य वेरं कलेवरे क्लीवं वार्त्ताको कुंकुमेपि च बर्हिषि कुशोतिष्ठति सुषिस्थ इतिकः अं वां वेति षत्वं उशीचि जातं सुघ्राणयेति यत् केशांवु नोर्नामनामयस्य
पंच नेत्रवाला इति ख्यातस्य कालेनानुसार्यते अः हलोण्यंत वर्द्धते सा वृधु वृद्धौ गसर्थेतिक्तः इतो जीर्णप्रवृद्धे ञित्रिपु क्लीवं तु शैलजे अश्मनः पुष्पमिव अश्मप्र
भवत्वात् शीतं च तत् शिवं च १२२ शिलायां भवं नद्यादिभ्यश्चेति ढक् शैलेयं तालपर्ण्यां च सैंधवे शैलजे नातुमधुपे शिलानुल्येन्यलिंगकं पंच शिलाजित इति ख्यातं
स्य तालः पर्णमस्याः तालशब्दस्तालपर्णसदृशे लाक्षणिकः पाककर्णेति ङीष् दितेरियं दित्यदित्येति ण्यः गंधस्य कुटीव मुरति मुखेष्ठ नेइगुपधत्वात्कः प्रशस्तो गं
धोस्याः अत इनिठनौ पंच मुरा ख्य सुगन्धिद्रव्यस्य गजेर्भक्ष्यते एयत् घञ्चा सुवहति पचाद्यच् सुष्ठु रभते सर्वधातुभ्य इति इन् आगमानित्यत्वान्नुम् सुरभिः घ्राह्य
की मातृभिन्सुराणो बुचयोविति रस्यते रस आस्वादने अरंतः घञ् रसः स्वादे जले वीर्ये शृंगारादौ विषे द्रवे बोले रागगृहे धातौ तिक्तादौ पारदेपि चेति हैमः १२३ महइ
ईरणमस्याः महमुत्सवमीरयति वा ल्युः कुं दुरुरिव प्रतिकृतिः इवे प्रतिकृताविति कन् गौरादिः सलति षलगतौ कुनए मोदरादिः सन्कः सल्लक्यते वा लकआस्वा

कालानुसार्य्यवृद्धाश्मपुष्पशीतशिवानि तु १२२ शैलेयं तालपर्णी तु दैत्या गंधकुटी मुरा गंधिनी गजभक्ष्या तु सुवहा सुरभी रसा १२३ महेर
णा कुन्दुरुकी सल्लकी ह्लादिनीति च अग्निज्वाला सुभिक्षा तु धातकी धातुपुष्पिका १२४ पृथ्वीका चंद्रवालैला निष्कुटिर्बहुलाथ सा ॥

दने कुनश्चाविदूर्भ शल्लकी इति तालव्यादौ रभसः तत्र शल चलने धातुः सल्लकी सिल्लकी ह्लादेति हृदः ह्लादयति वः शब्दं ल्हादी सुखे च आवश्यकेतिणिनिः अग्नौ
सा लेति ख्यातायाः अग्नेर्ज्वालेव रक्तपुष्पत्वात् सुष्ठु भिक्ष्यते घञ् धातुं करोतीति तत्करोतीति ण्यंतात् ण्वुल् गौरादिः धातुपुष्पमस्याः कोषिकः ५ कप् चत्वारि धवेति ख्यातस्य
१२४ प्रथते प्रथ प्रख्याने पर्करीकादयश्चेति साधुः चंद्रस्य कर्पूरस्य वालेव कर्पूरगंधित्वात् रालयति इल प्रेरणे पचाद्यच् निष्क्रान्ता कुटिः कौटिल्यमस्याः निष्क्रान्ता कुटे
र्वा कृदिकारेति वा ङीष् बहूनि बीजानि लाति आतोनुपेतिकः बहुला नीलिकायां स्यादेलायां दिवियोषिति कृत्तिकासु स्त्रियां भूम्नि विहायसि न पुंसकं पुंस्यग्नौ त्रिषु
च वाच्यवत् प्राज्य कृष्णयोः पंच एलाय चीति ख्यातायाः उपकुंचति कुंच कौटिल्याल्पीभावयोः ण्वुल् तुदति तुद व्यथने पात् ॥ ॥ ॥

Nepal Sanskrit ... Kathmandu

अ॰ टी॰ तुटीतिथकृ तुस्थमंजनभेदेस्यान्नीलीसूक्ष्मैलयोः स्त्रियां कुरतिकुरशब्देवाहुलकादंगचू गौरादिः त्रयःपुटायस्याः त्रिपुटा मल्लिकायां च सूक्ष्मैलात्रिष्वतोः स्त्रियांसत्तीनके
रा॰ द्वी॰ चत्तोरेचत्रिपुटः समुदाहृतः त्रुटतित्रुटछेदे इगुपधेतीन् त्रुटिः स्त्री संशयेखल्पे सूक्ष्मैलाकालमानयोः पंच सूक्ष्मैलायाः १२५ विगत आधिरनेन कौवेरं भास्वरं कुष्ठंपारि
३८ भाव्यंगदाह्वयमितिरभसः व्याधिः कुष्ठे च रोगे च कुष्णातिरोगं कुषनिष्कर्षे इहनिकुषीतिक्थन् कुष्ठं रोगे पुष्करे स्त्री परिभावेसाधु तत्रसाधुरितियत् स्वार्थेण्वाप्यते आ
प्नूव्याप्तौ ऋहलोर्ण्यत् वाप्यांभवं [illegible]पमिति क्वचित् पाठः आप्यमिति च उप्यते डुवप् बीजसंताने ण्यत् पाकंलातिपाकलं कुष्ठभेषज्ये पुंसि स्यात् कुंजरज्वरे उत्पलतिप
लगतोरक्षत्येवा अ[illegible]लान् पुष्पपर्वस्यांक्लीवंकुष्ठप्रसूनयोः षट् कुटेतिख्यातस्यशंखाः संत्यस्याः शंखाकारपुष्पत्वात् अतइनिः शंखिनी श्वेतवर्णायांचोरपुष्प्यांव
धूक्षिद्दिचौरश्चपुष्पंयस्याः रात्रिविकासित्वात् पाककर्णीतिङीष् केशाः संत्यस्याः अतइनिः केशी केशवतित्रिषुदेसेनाचोरपुष्प्यांस्त्री त्रीणि शंखाहुलीतिख्या

सूक्ष्मोपकुंचिकातुत्था कोरङ्गी त्रिपुटा त्रुटिः १२५ व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलं शंखिनी चोरपुष्पी स्यात् केशिन्यथवि
तुन्नकः १२६ झटाऽमलाऽझटा ताली शिवा तामलकीति च प्रपौण्डरीकं पुण्डर्यमथ तुन्नः कुबेरकः. १२७ ॥ ॥ ॥

तायाः वितुद्यतेसतुदव्यथनेक्तः स्वार्थेकन् १२६ झट्यते झटसंघाते घञ् संज्ञापूर्वकत्वान्नवृद्धिः झटतिवा अच् नमलायस्याः अदव्ययमाश्चर्ये अत आश्चर्यस्यझटः
संघातोस्यांअतिक्विप् झटतिअच् टाप् अच्चासौझटा च तालयति तलप्रतिष्ठायां ण्यंतः अच् तालः करतलेंगुष्ठमध्यमयोश्चसम्मितेगीतकालक्रियामानेकरस्फा
लेद्रुमांतरे वाद्यभेदेचकांस्यसत्सरोतालीझटोषधौक्लीवंतुहरितालेस्यात् शिवमस्त्यस्यां अर्शआद्यच् शिवा झटामलोषधौअभयामलकीगौरीफेरुसक्तुफला
सुच तनुश्चासावामलकीचपृषोदरादिः षट् भूम्यामलक्याः पुण्डरीकेणसदृशं शेषेइत्यण् प्रकृष्टंपौण्डरीकं यद्वास्वार्थेण् साधुपुष्पं स्थलपद्मं दृष्टिकृत् पुंड
रीककमितिरभसः पुंडयति पुडिखंडने अच् पुण्डस्य अर्यःप्रधानं शाकंध्वादिः द्वे पुण्डरीयेतिख्यातस्य तुद्यतेसतुदव्यथनेक्तः कुत्सितंवेरमस्य कुबेरकः

कुणति कुणसंकोचे इगुपधात्कित्‌ इति नः कुणिः खुनकवृक्षे ना कुकरेलभिधेयवत्‌ तुणिरिति क्वचित्‌ पाठः तूणयति तूणसंकोचे अच्‌ इः पृषोदरादिः कचतिकचि दीप्तौ वा हुलकान्नः छः यद्वा केन छूणति छूदि दीप्त्यादौ अन्येभ्योपीति डः कच्छः स्यात्‌ नुपेतुन्नकद्रुमे नौकांगे पुंसि वाराह्यां चीरिकायां चयोषिति काम्यते कमु कान्तौ मति बुद्धिपूजार्थे भ्यश्चेति क्तः लकतिल कआस्वादने अच्‌ कान्तश्चासौ लकश्च नंदनं दनदि समृद्धौ दन्‌ डीषानंद्यावृक्षः यद्‌ तुणीति स्यात्‌ तस्य रक्षः रक्ष सरर्यं तस्ये रमित्यणखंडने चडिकोपे अच्‌ चंडा घनहरी शंखपुष्प्यां स्त्रियां त्रिपनि कोपने नीत्रे पिधनं हरति हरतेरन्नुद्यमने ड्‌ चगौरादिः द्रुकुली नाघनहरीविरोकः क्रोधमूर्छित इति वाचस्पतिः श्रिलोति श्रिहिंसायां अर्तिलूधूसूखनिसहचर इत्रः स्त्रीमंस्या लक्ष रक्षलि चंडायां नाशुभेनस्त्रीकान्त्यायन्यां चयोषिति दृष्टानि पत्राण्यस्य गणाहासयति हंसे हसने ण्यन्ततः गणा इत्यप्यस्य नाम गणाः प्रमथसंख्येये चंडासेन्यप्रभेदयोरिति रुद्रः १२८ व्याडस्य व्याघ्रस्यायुधमिव व्याघ्रस्य नखमिव लुभ्यादिः भवेद्व्याघ्रनखः स्कंदगंधद्रव्यविशेषयोः नखस्त्वन्तरे क्लीबं

कुणिः कच्छः कान्तलको नन्दिवृक्षोथ राक्षसी चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः १२८ व्याडायुधं व्याघ्रनखं करजं चक्रकारकं॥
शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नलो १२९ धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी शुक्तिः शंखः खुरः कोलदलं नखमथाढकी १३०॥

अंजनं खंतदिव चक्रस्य कारकं चत्वारि नखाख्यगंधद्रव्यस्य शुषिरस्त्यस्याः शुष शुषीतिरः शुषिरमस्त्यस्यां वा अर्श आदिभ्यो च विद्रुमस्येव लता कपोतस्यांघ्रिरिव नटति नटसंकोचे अच्‌ गौरादिः नलति णल गंधे अच्‌ गौरादिः पंचमालकां गन्धीति व्याख्याताः १२९ धम्यते धमिः सौत्रः अर्तिसृधम्यनिः डीषा धमनो नानलः मत्वा ध्मापकः कृष्णात्विषु धमनी शुषिरा हट्टविलासिन्यां च योषिति अंजनमिव केशाअस्याः केचित्तु रदंहट्यंपूर्वान्वयीत्याहुः हंति शृत्स्तिहीत्युः हनुर्हट्टविलासिन्यां मृत्यारंभे गदे स्त्रियां द्वयोः कपोलावयवे हट्टे विलसति तच्छीलालस क्रीडायां सुपीतिणिनिः चत्वारि शोचति शुच शोके क्तिच्‌ :शुक्तिः शंखनके शंखे कपालेख इदगुजोः नखश्चावर्तयोर्मुक्तास्फोटदुर्नाम्नयोरपीति हेमः शाम्यति शमेः खः शंखः कंबौनिधिभेदे स्यान्नख्यामलिकाष्ठ्नीति हेमः खुरति खुरछेदने इगुपधेति कः खुरः शफे कोलदले इति हेमः कोलस्य बदर्या इव दलं नखनति अन्येभ्योपीति डः नखं तु गंधद्रव्ये स्यान्नखः करंजपंढयोरिति हेमः पंच आढकमस्त्यस्याः परिच्छेदकत्वेन

अर्श आद्यच्‌ आढौकतेवा ढौकृ गतौ अच्‌ पृषोद
रादिः गौरादिः आढकी चतुर्वर्या स्त्री परिमाणान्तरे त्रिषुः

Digitization by eGangotri

अ·टी·
टी·रा·
३५

कस्रेभवा तत्रभव इत्यण् मृत्स्ना स्त्यस्याः क्षेत्रत्वेन अर्श आद्यच् मृत्स्ना मृत्सा तुवर्योः स्त्री तुवरो स्त्यस्याः ठन् टाप् वार्षिका मल्लिका तूवर्या ढकी कच्छुराशटीति गोपालिता तूव
रीच मृतमालयति अलभूषणादौ एयंतः अण् संज्ञायां कन् अजिता तुवरी स्त्रुत्या मृत्स्ना मृत्तालकमिति कोशाद्धितकारं च मृदि तालः प्रतिष्ठास्य सुराष्ट्रे जातं जनी सप्तम्यां जे
नेर्डः षट्तु वरीति ख्याताया: कुटन्वक्रीभवन् नटति नटसंरने अच् दाशान् कैवर्त्तान् पिपर्त्ति पृ पालनपूरणयोः मूलविभुजादित्वात्कः दशपुरमिति दशपूरमिति च
क्वचित् पाठः दशपूरयति पूर पूर्तौ कर्मण्यण् यत्तु दशपूरयतीति विगृह्य इगुपधत्वात्क इत्याह मुकुटः तन्न लिजंतस्य गुपधत्वाभावात् अकारान्निरुपपदात्सोपपदो विप
तिषधेनेति वार्तिको दण्प्रसंगाच्च दशपुरो स्याः ऋक्पूरब्धूरिति समासांतः दशपूरं दशपुरं प्लव नं जीविता द्भ्यमिति वाचस्पतिः वनेयानीये जायते नं घादित्वात् ढकू वन्यं
च परिपेलवं प्लवं वन्यं ततः कैवर्त्त कुटन्नट संज्ञकं जायते मेद्रू काकारं शैवाल दल संचये कैवर्त्तीमुस्तकेली बं शोणाकेवा कुटन्नट इत्यजयः परितः पेलवं मृदु १३१ प्लवते प्लुङ् गा
तौ अच् प्लवः कारंडवेभे कुलके भेलके कपौ शब्दे प्लुतिगतौ प्लसे चंडालजलकाकयोः प्लवंगं धतृणे प्रोक्तं कैवर्त्तीमुस्तकेपि चेति विश्वः प्लवगो वानरे भेकेसारथौ चोष्णदी

काशीमृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे कुटन्नटं दाशपुरं वानेयं परिपेलवं १३१ प्लवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च ग्रन्थिपर्णं शुकं ब
र्हं पुष्पं स्थौणेयकुक्कुरे १३२ मरुन्माला तु पिशुना स्पृक्का देवीलतालघुः॥ १९ धितेः गांजलं पिपर्त्ति पृ पालने मूलविभुजादिः गोर्जलं पुरमस्येति वा भ
गांजलं नर्दयति नर्दशब्दे कर्मण्यण् कैवर्त्तानां जातिः कैवर्त्ती कैवर्त्या मुस्तकं अष्टौ मा थ्रेति ख्यातस्य ग्रंथौ पर्णान्यस्य ग्रंथय इव पर्णान्यस्येति वा शोचति शुच शोके
शुगतौ वा शुक वल्कोल का इति निपातः शुकस्येव बर्हाणि पर्णान्यस्य स्येकं नामेत्येके ग्रंथिपर्णे शिरीषे च शुकः स्यादिति विश्वः शुको व्यास सुते कीरे रावणस्य च मंत्रि
णि शिरीषपादपे पुंसि ग्रंथिपर्णे नपुंसकं इति मेदिनी बर्हं पत्रं प्रशस्तमस्य इनिः पुष्यति पुष्य विकसने अच् बर्हिपुष्पमित्येकं नामेत्येके बर्हपुष्पमित्यन्ये बर्हमिति पृथ
ङ्नामेति कश्चित् स्थूणाया अपत्यं स्त्रीभ्यो ढक् कुकुरो स्यास्ति कुक्कुर शब्दस्तद्धं घेलाक्षालिकः अर्थआद्यच मरुदित्यत्राप्यन्वेति मरुदेवे समीरे नाग्रंथिपर्णे नपुंसकं
पंचकुक्कुरोदा इति ख्यातस्य १३२ मरुद्भिर्म्लयंते मलधारणे घञ् व्यस्तसमस्तं नामेदं स्पृक्का तु ब्राह्मणी देवी मरुन्माला लता लघु समुद्रांता वधूः कोटी वर्हालं कापिका मरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्रियन्ते मृङ्‌ प्राणत्यागे मृग्रोरुतिः मत्स्यते मत्स्य धारणे घत्र् पिंशन्ति पिश अवयवे सुधिपिप्लिमिथिभ्यः किदित्युनन् पिशुनं कुंकुमे पि च कपिवक्त्रे च काके नासूचके क्रूरयोस्त्रि
षु एका यां पिशुना स्त्री स्यात् स्पृश्यते स्पृश संस्पर्शने वाहुलकात्क पृषोदरादित्वात्सलोपे एका पिदी व्यतिरेवी कृता भिषेकायां तेजनी स्पृक्कयोरपि लता तिलत आघाते सौ
त्रः अचूलता प्रियंगुनखयोः स्पृक्का ज्योतिष्मती वल्लीलता कस्तूरिकासु च माधवी दूर्वयोः लं घते लघि गतौ लंघिवंहोर्नलोपश्चेत्युः लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत्
क्लीवं शीघ्रे कृष्णागुरुणि च एका नामौषधौ तु स्त्री समुद्रांऽताः स्याः वहति उह्यते वा वहो धश्चेत्यूः वधूः स्त्री शारिवौषधी स्नुषा पूटी नवोढासु भार्या एकांगनासु च एका महि
ला च वधूरिति त्रिकांडशेषः कोटिभिरग्रैर्वर्षति मधु वृषु सेचने अचूलंकायामुच्यते डु वपू कृ न व विस्तपीतिवस्तउः दृशा अस्परक इति ख्यातस्य १३३ तपोस्त्यस्याः जटिलत्वा
त् असायेति विनिः जटास्त्यस्याः अर्श आद्यच् यद्वा जटति जट संघाते अच् मन्यते मनेर्दीर्घश्चेति सः गौरादिः मांसस्य दामिषे लोवकं कोली जटयोः स्त्रियां जटास्त्यस्याः
पिच्छादी लच् जटिला पिप्पली मांस्योर्जटायुक्ते तु वाच्यवत् लोमानि संत्यस्याः लोमशा मुनिमेषयोः मांसी त्वादामिषीति स्वाम्युक्तो विग्रहोऽयुक्तः तथा पाठस्य क्वचिददर्श

समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि १३३ तपस्विनी जटामांसी जटिला लोमशा मिसी त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकं १३४
कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधं १३५॥ ८८ नात् मस्यति मसी परीणामे सर्वधातुभ्य इन् कृदिका

रादिति वाङीष् पृषोदरादिः सृट् जटामांसीति ख्याताया: त्वगिव पत्त्रमस्य त्वगिति नामास्य त्वक् स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः अन्यदुत्कटगंधित्वात् संप्रोदश्च
कटच् विभक्तिभेदः किन्तु डित्वात् प्रशस्ता त्वगस्यास्ति अर्श आद्यच् प्रशस्तं चोचमस्यास्ति अर्श आद्यच् त्वक् त्वच चोच शब्दाः स्युर्वल्के चर्मणि पत्त्रक इति धरणिः
वरमंगमस्य शोषादिभाषेति कप् पट्टलकपत्त्रस्य तज इति ख्यातस्य १३४ कर्जेति कर्जव्यथने खर्जूरादित्वात् ऊरः पृषोदरादिः स्वार्थे कन् द्रविडदेशे जातः तत्र जा
त इत्यण स्वार्थे कन् कल्पो विधौ भवः तत्र भव इत्यण कन् पाठांतरे कालेसाधुः तत्र साधुरिति यत् स्वार्थे कन् वेधे मुख्यः स्वार्थे कन् चत्वारि कर्चूर इति ख्यातस्य जा
तिमात्रविवक्षायामोषधिशब्दप्रयोगः द्रव्यमात्रविवक्षायां तु औषधशब्दप्रयोगः ओषधेरजातावित्यण् सर्वमित्यनेन घृततैलादिकमप्यौषधशब्दवाच्यमित्यु

अ·टी·
टी·रा·
३६

शाकपत्नेभोक्तं शाक्रः शक्तौ घञ् यद्वा शक्यति शोतनूकरणे वा कुलकाल्कः आदिना फलनाड्यग्रमूलादिग्रहः मूलपत्रकरीराग्रफलकांडाधिरूढकं त्वक्पुष्पं कवकं चैव शा
कं दशविधं स्मृतं अधिरूढकं तालबीजांकुरास्थिमज्जादि तंडुलाय हितः तस्मै हितमिति छः तंडुलीयः शाकभेदे विडंगे तनु नाप्पयोः मारिषः शाकभिद्यायेंनाट्योत्तं
पुंसि योषिति अल्पश्चासौ मारिषश्च हूचउराई इति ख्यातस्य विगतं शल्यमनया विशल्या लांगली दंती गुडूचीत्रिपुटासु च शल्येन रहितायां च प्रियायां लक्ष्मणा
स्य चेति हेमचंद्रः अग्नेरिव शिखा संतापो यस्याः अथाग्निशिखमुद्दिष्टं कुसुंभे कुंकुमेपि च लांगलिकाख्यौषधौ च विशल्यायां च योषिति न अंतो यस्याः फलानि संत्यस्याः
इनिः फलिन्य[illegible]फलिन्यां स्त्री फलिनेपि च शाक्रः अर्जुनतरुः पुष्पमस्याः शाक्रशब्दः पुष्पे लाक्षणिकः पाककर्णेति ङीष् पंचइन्द्रपुष्पीति ख्यातायाः १३६ अ
श्लेषवर्गो घोस्याः समासांतस्यानित्यत्वादुपमानाच्चेति न अर्ध्ययं धेति पाठं तं छगलस्येवांत्रमस्याः छगलेति पृथग्ग्रामे सन्ये छागेतुच्छगलश्छागी वृद्धदारकयोः स्त्रि
यामित्यनेकार्थे कोशः आवेगोस्त्यस्याः अर्श आद्यच् गौरादिः वृद्धो दारकोस्मात् वृद्धत्वं दारयति वा ण्वुल् जुंगति जुगि वर्जने अच् जुग्यते वा घञ् पंच ब्रह्मणि इयं त्रा

शाकाख्यं पत्रपुष्पादि तंडुलीयोल्पमारिषः विशल्याग्निशिखानंता फलिनी शक्रपुष्प्यपि १३६ स्यादृक्षगंधा छगलांत्र्यावेगी वृद्धदार
कः जुंगो ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी १३७ पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती हयपुच्छी तु कांबोजी माषपर्णी महासहा १३८

ह्मो जाता विसल्लिटिलोपः मत्स्याक्षीव पुष्पमस्याः मत्स्यशब्दः स्वावयवे गौणः वहुव्रीहाविति षच् ङीष् वयसि तिष्ठत्यनया घञर्थे कः वयस्था तु स्त्रियां ब्राह्मी गु
डूच्यामलकीषु च सूक्ष्मैलायां च काकोल्यां पथ्यायां तरुणीषु च सोमस्य वल्लरी चत्वारि ब्राह्म्याः १३७ पटूनि पर्णान्यस्याः पाककर्णेति ङीष् हिमवति जाता तत्र
जात इत्यण् स्वर्णमिव क्षीरमस्याः गौरादिः हिममस्त्यस्याः मतुप् शरादीनां चेति दीर्घः हेमवर्णपयस्त्वाद्धिमवद्भूमिसंभवा सा नागजिह्विकाकारानन्मूलं व ३६
र्णजोषधं चत्वारि मकोई इति ख्यातायाः हयपुच्छमिव पर्णान्यस्याः गौरादिः कंबोजदेशे भवा तत्रभव इत्यण् माषस्येव पर्णान्यस्याः पाककर्णेति ङीष्
॥ महती सहा आन्महत इति आत्वं महासहा माषपर्ण्यां म्लानेपि च योषिति चत्वारि १३८॥

Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुंडं चंचुः स्त्रियेषां अत इनिठन् तुंडिकानीरयति ईरप्रेरणे कर्मण्यण् पाठांतरे प्रशस्तं तुंडं प्रशंसायां कन् तुंडकमीर्ने अणरक्तं फलमस्याः अजादित्वाट्टाप् विंबीक यतिकेशा
व्दे आतोनुपेति काङ्ख्यापोरिति ह्रस्वः पीलोरिवपर्णमस्याः पीलुशब्दः स्वावयवेगौणः पाकेतिङीष् चत्वारि कुंदुरु इतिख्यातायाः वृणोतिवृञ्वरणे कृग्रिति ष्वरच् अ
नित्यः षित्वाङीष् वर्वरः घामरे केशे चक्रलेनी वृदंतरे पंजिकायां पुमान् शाकभेदेपुव्यभिदेः स्त्रियां वृणोति अच् गौरादिः कस्यशिरसो वरी कवरं लवणाम्लयोः कवरी
केशविन्यासशाकयोरिति हेमः तुंजति तुजि हिंसायां अच् ङीष् स्वकादिः तुंगः पुंनागनगयोर्बुधे स्यात् उन्नते न्यवत्त तुंगाप्रोक्ता हरिद्रायां वर्वरायामपीष्यते इति हेमः खरंपु
ष्पमस्याः अजस्येवगंधोस्याः अजशब्दः स्वांगेलाक्षणिकः पंच १३९ एलाया इव पर्णान्यस्याप्. केतिङीष् सुवहति अच् सुवहा शल्लकी एलापर्णीगोधापदीषु रास्ना
शेफालिकयोः स्त्री सुवहः सुखवहे वीणायामभिधेयवद्वाच्यः रासते रासृशब्दे रास्यते वा रास्ना सास्नेतिसाधुः युक्तो रसोयस्याः चत्वारि चांगमु शोभने दक्षे चांगमीरयति ईर
प्रेरणे कर्मण्यण् चुक्रयति चुक्रव्यथने ऋज्रेन्द्रेतिरन् चाहुलकाच्चुक्रमपिसाधु चुक्रमिव इवेप्रतिकृतौ विति कन् चाशठति शठचं घल्के शके तवे प चाद्यच् इत्तानां शठा

तुंडिकेरी रक्तफला विंबिका पीलुपर्ण्यपि वर्वरा कवरी तुङ्गी खरपुष्पाजगन्धिका १३९ एलापर्णी तु सुवहा रास्ना युक्तरसा च सा चाङ्गेरी चुक्रिका
दन्तशठाम्बष्ठाम्ललोणिका १४० सहस्रवेधी चुक्रोम्लवेतसश्शतवेध्यपि नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि १४१ जीवन्ती जीवनी जीवा जी

स्याद्दंतशठो जंबीरेऽपि स्यैकस्मेर्दके नागरंगेपि च पुमान् स्याज्जंगेप्यं च योषिति अम्बेतिष्ठतिसुपीतिकः अंवाम्बेति षत्वं अंवष्ठो देशभे ((वनीया मधुस्रवा ॥
दे पिविप्राहे इत्यासु तैपिच अंवष्ठाप्यम्ललोण्यां स्यात् पाठायूथिकयोरपि अम्ललेऽप्यनुनास्वार्थे कन् पृषोदरादित्वात्त्वम् पंचलोनिका इतिख्यातस्य १४० सहस्रंशतं वा वेधि
तुशीलमस्य विधविधाने सुपीतिणिनिः चुकत्यनेन ऋज्रेन्द्रेति साधुः अम्लश्चासौ वेतसश्चानम्रत्वात् चत्वारि नमस्करणशीला सुपीतिणिनिः गंडेषु ग्रंथिषु काली समंगति
अगि गतौ अच् खदति खदस्थैर्ये अजिरशिशिरेति साधुः खदिरशाकभेदे स्त्रीनां चंद्रेदंतधावने चत्वारि हातानाजोडी इति ख्यातायाः नवलज्जालु इति ख्यातस्येति मुकुटः १४१
जीवति जीवप्राणधारणे शतनाउगितश्चेतिङीप् जीवंती जीवनीशब्दो गुडूचीवंद्योरपि जीव्यतेऽनया करणेति ल्युट् पुज्वा जीवनी॥ ॥ ॥

अ·टी· जीवना चापि जीवंती जीवंत्योः क्रमात् जीवयति पचाद्यच् जीवा जीवंतिका मोर्वी वचासिंजिनभूमिसु न स्त्री तु जीवने जीवनाय हिता तस्मै हितमिति छः मन्यते मन न्या ने फलि
ए·टी· पाटीसुः यश्च मधुपुष्परसे सोद्गमध्येनातुमधुद्रुमे वसंत दैत्यभिच्चैत्रे स्या जीवं त्यां तु योषिति स्रवति स्रुगतौ अच मधुस्रवेत्यकं नामेत्यन्ये वटगुर्जरदेशे दोडीति ख्याता याः कूर्च
३० श्मश्रुतद्वच्छीर्षमस्य मधुर एव स्वार्थे कन् स्याद्ध्रस्वांगो मधुरको मधुरश्चिरजीवक इति रभसः शृणाति शृ हिंसायां शृणोतेर्ह्रस्वश्चेति गन्नुट् शृंगं प्रभुत्वे शिखरे चिन्हे क्रीडां
तु यंत्रके विषाणोत्कर्षयोश्चाथ शृंगः स्यात् कूर्चशीर्षके· स्त्री विषायां स्वर्णमीनमेरुस्कंधमेषयोर्ह्रस्वान्यगान्यस्याः जीवयति ण्वुल् जीवकः प्राणकोपीतसारकृपणयोरपि कूर्चशी
र्षे च पुंसि स्यादाजीवे जीर्विवकामता त्रिषु सेविनि हृद्याशो जीविनो राहितुंडिके पंच अष्टवर्गांतर्गत जीवकस्येति मुकुटः १५२ किरातदेशेऽस्ति जन्मस्थानमस्य अर्शआद्यच् कि
रातश्चासौ तिक्तश्च भुवो निंब इव अनार्यप्रियश्चासौ तिक्तश्च शाकपार्थिवादिः चिरातिक्तोपि किरातश्चिरातिक्तश्च भूनिंबहिमकावपीति रभसः चीराचिरायत इति ख्यातस्य
सप्तलाति आतोनुपेति कः अथ सप्तला नवमालाचर्मकषागुंजासु विगतामला यया सा विमला त्रियां सातलायां मुवामे रनिर्मलेत्वभिधेयवत् सातं सुखं लाति भूरयः फे

कूर्चशीर्षो मधुरकः शृंगह्रस्वांगजीवकाः १५२ किराततिक्तो भूनिंबोऽनार्यतिक्तोथ सप्तला विमला सातला भूरिफेना चर्मकषेत्यपि १५३ वाय
सोली स्वादुरसा वयस्थाथ मकूलकः निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि १५४ अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका० ॥

नायस्याः चर्मणः कषा पत्नसी हुंडभेदस्य चर्मघास स्यात्यन्ये १५३ वायसानोलंडति ओलडि उत्क्षेपे अन्येभ्योपीति डः शकंध्वादिः स्वादुः रसोस्याः वयसि स्थापयते नया घञ
थेकः वयस्था तु स्त्रियां ब्राह्मीगुडूच्यामलकीषु च सूक्ष्मैलायां च काकोल्यां पथ्यायां नकुलेष्टच क्षीरिककोडीति ख्यातायाः मंकति मकि मंडने पिंजाद्यूलच् स्वार्थे कन् स्त्रा
गमशासनस्यानित्यत्वान्नत्रुम प्रषोदरादित्वादुत्वे मकूलकोपीत्यन्ये कुं भूमिं चिभर्ति संज्ञायां भृञिति खच् खच्चडिद्वाच्यः नियतः कुंभः प्रादयोगतेति समासः निकुंभः कुंभक ३०
र्णोस्यत नयेदंति कौ प्रध्वौ राध्यजिद्रम्यने वाद्रमुउपशमे हसिमृग्रिणीति तन् स्वार्थे कन् दंतोऽद्रिकूटकेकुंजे दशनेश्चौपधो स्त्रियां प्रत्यंची श्रेण्यस्याः समासांतानित्यत्वान्न
कप् उदुम्बरस्येव पर्णान्यस्याः पाककर्णेति ङीष्पपवव्रजदंत्याः १५४ अजमोदयति मुद हर्षे ण्यंतः कर्मण्यण् अजादित्वाट्टाप् अजेन मोदते मोद्यते वा० ॥

CC-0. In Public Domain. Digitization by eGangotri

पचाद्यच् उग्रो गंधो स्याः उग्रगंधा वचा सैव त्रयवान्या ग्रंथिकौ मधाविति हेमः ब्रह्मणा दृश्यते दृभीग्रंथे घञ् कर्तृ कारणे कृते निसमासः दुष्टोयवः इंद्र वरुणेति ङीषानुवौ इ वार्थे ।
स्वार्थे वा कन् समकार पाठेयमेनानिति अनघ्राणे नेपुलुयवानी इयम्य हूहेनाममी चत्वारः पर्याया इत्येके पौष्करमूले इत्यन्वयः पुष्णाति पुष्यति वा पुषपुष्टौ पुषः किदिति करन्
पुष्करं पंकजे व्योम्नि पयः करिकराग्रयोः ओषधिद्वीपविहंगतीर्थरागोरगांतरे पुष्करं तूर्यवक्त्रे च कांडे खङ्गफलेच कश्मिरेपुमवं तत्रभव इत्यण् पद्मस्येव पत्रमस्य
पद्मवर्णमिति क्वचित्पाठः त्रीणि पुष्करमूलस्य १७५ नव्यथते व्यथदुःखसंचलनयोः पचाद्यच् अव्यथा नि व्यथे सर्पे चारटी पथ्ययोः स्त्रियामिति विश्वमेदिन्यौ अतिच
रति अचपद्मेत्तेपदगते अतिसु क्षितिम न् चारयति शकादिभ्योऽटन् पद्मे चरितुं शीलं नस्याः सुपीति णिनिः पंचमा कस्यकंपिलाया अदूरभवः संकाशादित्वात् ण्यः कंपतेकपि
किंचिच्चलेने वाहुलकादिल्यः प्रज्ञाद्यण् कं जलं पील्यति श्लेष्म घ्रत्वात् पील प्रतिष्टंभे कं पूर्वो दिगुपधेतिकः इतिमुकुटः तन्न एवं तस्य इगुपधत्वाभावात् अण्यंताद् णः
प्रसंगाच्च रूपासिद्धेश्च इत्थं नियकारमन्यते इत्येके करेकशति कशशब्दे पचाद्यच् अंतर्भावित ण्यर्थो वा शकंध्वादिः चंदते चदि आल्हादने स्फायितंचीतिरक् वइः क
मूले पुष्कर काश्मीर पद्मपत्राणि पौष्करे १७५ अव्यथातिचरा पद्मा चारटी पद्मचारिणी कांपिल्यः कर्कशश्चन्द्रो रक्तांगो रोचनीत्यपि १७६
प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः पद्माट उरणाख्यश्च पलांडुस्तु सुकन्दकः १७७॥ ९९ पूर्वकंपिल्यसुधांशु वा स्वर्णवारिपु रक्तांगमस्य रक्तांगस्तु
मही सुने कांपिल्यस्त्रीतु जीवन्त्यां क्लीवं विद्रुमधीरयोः रोचते रुच दीप्तौ कृन्यल्युटइति ल्युट् रोचनी कर्कशस्मृतारेचनीति क्वचित्पाठः पंचकलाइति स्वातस्य १७६ पुमां
संनाडयति नडभ्रंशे चुरादिः कर्मण्यण् मस्यानुस्वारपरसवर्णौ प्रकृष्टः प्रगतो वा पुन्नाडः एडो मेष एवगजोयस्य भंजकत्वात् पद्म एलनं इल प्रक्षेपे स्वप्ने च घञ् डलयो
रेकत्वं एडे स्वप्ने गजति गज मदे शब्दे च अच् दद्रुं हंति अमनुष्यकर्तृके चेति टक् अनूर्वस्येति नियमान्नणत्वं क्षुभ्नादित्वादितिमुकुटः स्वुचिंत्यः चक्रं दद्रुं मृद्गाति मृदक्षोदे क
र्मण्यण् स्वार्थे कन् पद्ममिव पद्यां वा पद्मसमूहं वा टति अट गतौ अण् उरणस्य मेषस्याख्येवाख्याऽस्य उरणाख्या स्त्रीवाक्षिप्स्यात्तत्तुल्यपुष्पत्वात् अष्टाच दर्शनादित्य
च इतिस्वामी षट्पुन्नाड इतिख्यातस्य पलति पलरक्षणे वाहुलकादांडुप्रत्ययः शोभनमनीच वा कंदयति भक्षकजातिभ्रंशकत्वात् कदि रोदने अच् स्वार्थे कन् ण्वुल्या

पि॰२

Digitization by eGangotri

अ॰ टी॰ लतासु अर्क्यते ऽर्च्यते वा विरुद्धलक्षणया निघ्नते अर्कस्तवने अर्चपूजायां वा घञ् दुष्टो द्रुमः तत्र पलांडौ हरितेपालाशो हू हरिद्वर्णपलांडोः महच्च तत्दौषधं च महौष
टी॰ रा॰ धं तु शुंठ्यां स्याद्धिंसायां लशुनेपि च अश्नाति अश्नुते वा अशभोजने अशूव्याप्तौ वा अशेर्लश्चोनन् गृंज्यते भक्ष्यत्वेन कथ्यते रोगेषु गृजि शब्दे कर्मणि ल्युट् गृंज
३८ नं विषदिग्धपशोर्मांसे क्लीबं पुंसि रसोनके नशुं चं गृंजनं चैव पलांडुकक चानि च वृत्ताकारालिकालाबुजातीयाजाति दूषितमिति १ श्वेतकंदः पलांडुविशेषो गृंज
नं लशुनं दीर्घपत्रश्चपिच्छगंधो महौषधं २ कारण्यश्च पलांडुश्च लतार्कश्चपराजिता गृंजनं पवनेष्टश्च पलांडोर्दश जातयः इति सुश्रुतेनोक्तत्वात् गंधाकृतिरसे
स्तुल्यो गृंजनस्तुपलांडुनः दीर्घनालाग्रपत्रत्वात् भिद्यते सोपलांडुतः ४ न रिष्टमशुभमस्मात् अरिष्टो लशुने निंबे फेनिले काककंकयोः अरिष्टमशुभे तक्रे सूतिका
गार आसवे शुभे मरणचिन्हे च महत्कंदमस्य रसे आस्वादने उन्यते पातकहेतुत्वात् उनपरिहाणे रश्च घञ्स्वार्थे कन् कुन्चापट्ल लशुनेति ख्यातस्य १४८ पु
नर्भी हूणं नवा नूयते वा ऋदोरप् सुभ्वादिः शोथं हंति अमनुष्येति ठक् टिड्डाणि ङीप् हूग रहपूर्णा इति ख्यातायाः विगतं तुन्नं व्यथनमस्मात् वितुन्नं सुनिषण्णेच

लतार्कदुर्द्रुमौ तत्र हरितेथ महौषधं लशुनं गृंजनारिष्टमहाकंदरसोनकाः १४८ पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्णकं स्याद्वात
कः शीतलोऽपराजिता शणपर्ण्यपि १४९ पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका १५०

नपुंसकं सुष्ठु निषण्णमस्मात् द्वे विसखपरि आ इति ख्यातायाः वातं करोति अन्येभ्योपीति डः शीतं लाति शीतलवातक इत्यपि नाम शणपर्णी शीतलवातक इति धन्वं
तरिः शणः पर्णान्यस्याः शणशब्दः शणपर्णसदृशो लाक्षालिकः याककर्णेति ङीष् अप्राप्तनर इव पर्णमस्याः इति कश्चित् न पराजिता अपराजित ईशानेत्यमरः ष्यंतरे नाःजि
तश्रिप्रुगिरिकर्णी जया दुर्गा शणपर्णी शुभेति चत्वारि पठशण इति ख्यातस्य १४९ पारावतस्येवांघ्रिरस्याः कटं वृणोति अन्येभ्योपीति डः गौरादिः पण्यते पण्यव्यवहारे ३८
अवद्यपण्येति साधुः ज्योतिरस्त्यस्याः मतुप् ललति लता सौत्रः अच् पंचमालकामणीति ख्यातायाः वर्षासु भवं जातं वा वर्षाभ्यष्ठक् वार्षिकं त्रायमाणा यां क्लीबं वर्षाभवे त्रिषु
त्रायते त्रैङ् पालने शानच् चानश्वा त्राणं त्राः संपदादिः त्राः अयति इण्गतौ शतावलेनभद्रा स्वार्थे कन् चत्वारि १५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्वक्सेनस्य प्रिया गृह्णाति क्तिच् पृषोदरादिः यत्तु गर्षति हिनस्ति रोगं गृषु हिंसायां क्तिन्निति व्याख्यातं मुकुटेन तन्न उक्तधातोरदर्शनात् कर्तरि क्तिनोऽसंभवाच्च घृष्टिरितिपाठान्तरं घर्ष
ति घृषु संघर्षे क्तिच् अथ गृष्टिः सकृत्प्रसूता गवी वदरयोः स्त्रियां घृष्टिः स्त्री घर्षणस्य हर्षा विष्णुक्रान्ता सुनाकिरी वराहस्येयं प्रियत्वात् तस्येदमित्यण् वाराही मातृभेदस्यादि विष्वक्सेनाभिधो
षधी वदति वदस्थे पै वाहुल्का दरः वदरा गृष्टि कर्पास्योरेलापर्ण्यो स्त्रियां पुमान् कर्पासस्यास्थ्नि वदरा कोले क्लीवं तु तत्फले चत्वारि वाराही कन्दे इति ख्यातायाः मारयति क्विप् मारिकं
शब्दो ल्युनाशनेकूपते कु डु शब्दे स्म दोरप् अहरादिः भृंगरवराजते राज् दीप्तौ अच् भृंगरजइतिपाठे भृंगइव रजोऽस्य सान्तो दन्तोपि रजशब्दस्य द्वैविध्यात् स्यात् मार्कवो भृंगरजो
भृंगराजः सुजागर इति स्मसात् द्वे भृंगराज इति भंगरी आ इति ख्यातस्य काकान् मंचते मचि धारणोच्छ्राय पूजनेषु कर्मण्यण् आगमशास्त्रस्यानित्यत्वान्न नुम् मच मुचि कल्कने
इति चारु वायसानामियं तस्येदमित्यण् काको दुंवरिकायां च काकमाच्यां च वायसी द्वे काकमाच्याः काकप्रिया इति ख्यातायाः १५१ शतं पुष्पाण्यस्याः सदृच् कांडे इति टाप् सितं
वर्हं शुभ्रं वा छत्रमस्याः छत्र मनिश्कांता अत्यादय इति समासः मधुररसत्वात् उपशुषीति रः मधुरा शतपुष्पायां मिश्रेया नगरी भिदोः मस्यति मस परिणामे इत्यएषोदरादिः मिसिः स्त्री

विष्वक्सेनप्रिया घृष्टिर्वाराही वदरेति च मार्कवो भृंगराजः स्यात्काकमाची तु वायसी १५१ शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः

अवाक्पुष्पी कारवी च सरणा तु प्रसारिणी १५२ तस्यां कटंभरा राजवला भद्रवलेति च॥ ११ मधुरा मांस्याः शतपुष्पाजमोदयोः अवाचि पुष्पाण्यस्याः

गौरादित्वान् ङीष् यत्तु पाककर्णेति ङीषित्याह मुकुटः तन्न सदृच् कांडेत्यस्य तदपवादत्वात् के आरोति पचाद्यच् यत्तु मुकुट आह कारोरियं कारवीति तन्न वृद्ध्युच्छेदस्य
स्यापवादत्वात् कारवी मधुरादी प्यत्वक्पत्री कृष्णजीरके समसौंफ इति ख्यातायाः अंत्यद्वयं उपावती इति ख्यातायाः इत्यके सरति सृगतौ वहुलमन्यत्रापीति युच्ल्यु
टि सरण्यपि सरणा सरणी चार्वीकटं भरा महावलेति रुद्रः प्रसायतेऽगमनया करणेति ल्युट् सारिणीत्यपि रुप्रभेदेनाप्रसारण्यां स्वल्पनर्घां च सारणी १५२ कंटविभ
र्ति संज्ञायां भृत्रितिखच् वलानां वलप्रदानां राजेव राजदंतादिः भद्रं वलमस्याः पंचकुञ्ज प्रसारणीति ख्यातायाः जायते आरोग्यमनया जनिघसिभ्यामिण् जनि वृद्धौ
श्चेति न वृद्धिः कृदिति वा ङीष् जनी सीमंतिनी वध्वोरुत्पत्ता वोषधीभिदि॥

... Campus, Kathmandu

अ॰ टी॰ जायते जीनी उलूकादयश्चेति साधुः जतुशब्दात्संज्ञायां कनि जतुका चरज्यते नयारंजरागे करणे ल्युट् न्यजरजेति निपातनान्नकचिरकि त्यपि नलोपः रजनी नीलिनी रात्रि
टी॰ रा॰ हरिद्रा जतुकासु च जतुकरोति क्विप् चक्रं चक्रमिव वा वर्तितुं शीलमस्याः सुपीति णिनिः १५३ स्पृशति स्पृश्यते वा स्पृक्स्पर्शे नेपदरुजेति घञ् पचाद्यच् वा कर्मणि घञ् वा पृ
३६ चक्रवर्तनशीलत्वात्तस्य शृटति शट रुजादौ अच् गौरादिः गंधं मूलमस्याः षड् वहवो ग्रंथयोस्याः कर्वति कर्व गतौ खर्ज्यादित्वादूरः कर्वुरोपि पलमश्नाति अश भोजने कर्म
ण्यण् पले मांसे आशा यस्य वा पलाशः किंशुकः शटी हरिद्रुर्ल्लो राक्षसश्च पलाशं छदनेस्त्रुतमिति हैमः पंचकारो वधे निश्चये च वलोयत्नेरेता वपि कारं वेल्लति वेल्ल चलने
कर्मण्यण् कटति कटे वर्षादौ बाहुलकादिल्लः कटति कट शौचे अस्मादिल्लच् इत्यन्ये स्वार्थे कन् कटिल्लकः सुवर्णो सेवर्षाभूकारवेल्लयोरिति विश्वः १५४ सुसुवति सूप्रेय
ला अच् गौरादिः उपसर्गात्सुनोतीति षः सुषवी कृष्णजीरके कारवेल्ले च जीरे चेति हैमः कोलिकरेला इति ख्याता या कोलति कुल संस्त्याने इगुपधेति कः स्वार्थे कन् कुल्वा

जनी जतूका रजनी जतुकृच्चक्रवर्तिनी १५३ संस्पर्शाथ शटी गंधमूली षड्ग्रन्थिकेत्यपि कर्चूरोपि पलाशोथ कारवेल्लः कटिल्लकः १५४
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः कूष्मांडकस्तु कर्कारुर्वारुः कर्कटी स्त्रियौ १५५ इक्ष्वाकुः कटुतुम्बी स्यात्तुम्ब्यलाबूरुभे समे

कुलकं तु पटोले स्यात्संवद्धश्लोकसहस्रे तो पुंसि वल्मीककोकेट्टकुलश्रेष्ठे कुकस्यते पटति पट गतौ अंतर्भावितण्यर्थो वा कपि गडि गंडी न्यो लच् पटोलं वस्त्रभेदे नौष
धौ ज्योत्स्नायां तु योषिति निक्तः एव स्वार्थे कन् पाटयति पच्यतेण्यन्तः फलिपाटीत्युः पटुर्दक्षे च नीरोगे चतुरे त्वभिधेयवत् पटोले तु पुमान् क्लीवे छत्रा लवणयोरपि च
तारि पशेरा इति ख्यातस्य कुईषद्रूष्मांडे षु वीजेषु यस्य पित्तलत्वान् कूष्मांड्युमायां स्त्री पुंसि कर्कोरो च गणांतरे भूर्णांतरे कर्क शुक्लवर्णमृच्छति ऋ गतौ बालुकादुण्
द्रूकष्मांडस्य हरणं ईरयतेति संपदादिः इरं कृणोति वारयति वा वृञ् वरणे बाहुलकादुण् तुर्यस्वरादिरीर्वारुः कर्कट्यापत्नतेवुधैः ह्रस्वादिरपि उन्मत्तो धुस्तूरिर्वारुः कर्कटि ३६
स्यादितिपस्कांडे रत्नकोशात् एवारुरितिपाठे आङ् वोध्यः करंकटति कटे वर्षादौ इन् ङीष्वा शकंध्वादिः हेकाकडीति ख्याता या १५५ इक्षुमाकरोति मितद्र्वादित्वात् डुः
यद्वा इच्छिकायां जातमिक्षु इति शब्दमकति अक गतौ बाहुलकादुण् इक्ष्वाकुः कटुतुंब्यां स्त्री सूर्यवंश्ये नृपे पुमान् कटुश्चासौ तुंबी च हेट ॥

तुंवति रुचिं तुवि अर्दने अच् गौरादिः इस्वाह्रदिति वाडीष् नलंवत्ते लवि अवस्रंसने नञ्नि लंवेर्न लोपश्चे न्पूर्णोन् अलाबूलु पिंड फला तुंवि स्तुंबी महाफला तुं वा तु वर्तुलाला बूर्निम्व
चूर्णी तुल्लाबुकेति वाचस्पतिः अलाबूलुंवकः प्रोक्त इति चंद्रः द्वे तुंवा इति ख्याताया: चीयते चित्रचयने अमिचीति क्तः चित्रा खुपर्णी गोडुंबा सुभद्रा इति कासु चामाया
यां सर्पनस्रुत्र नदीभेदेषु च स्त्रियां गांभूमि मिमत्स्णोति अस्त्यपामे कर्मण्यण् गवाक्षीलि द्रवारुण्यां गवा सोजालके कपावित्रि हेमः गांभुवं तुंवति तुवि अर्दने मूलविभु
जादिकः टाप् एषो दरादिः मुकुन्दस्तु गांडुं वयति तुवि अर्दने णिच्याह तन्न धातुपाठे गुडुविधानो रदर्शनात् अतो डीप्प्रसंगाच्च त्रीणि कर्कटी विशुषस्य विशालति शल्ल च
लने ज्वलितिणः टाप् विशालेति वा अत्रवा विशुप्रवेशने नामिविशिविडीनि कालन् विशाला लिंद्र वारुण्या मुज्जयिन्यां तुयोषिति नृपइत्यमिरो: पुंसि पृथुले प्यभिधेयवत्ता
इंद्र वारयति इन्द्रवरणेच्चुरादिः कृत्ददारीति वा हलकान्त एयन्तरण्युनन यत्तु मुकुन्दइंद्रं वृकुलो रेव ते अस्या अण् उत्तरपदस्य चेत्युत्तरपदवृद्धिरित्याह तन्न मंत्रहवि
र्यारेवस्वामिनि रेवनालयवहारात् उत्तरपदस्य चेत्यस्याधिकारत्वेन वृद्धिविधायकत्वाभावाच्च द्वे इन्द्रवारुणीति ख्याताया: १५६ अर्शोसि हंति अमनुष्येति टक् शू

चित्रा गवाक्षी गोडुंबा विशाला लिंद्रवारुणी १५६ अर्शोघ्नः सूरणः कंदो गंडीरस्तु समष्ठिला कलम्ब्युपोदका स्त्री तु मूलकं हिल्लमोचिका १५७

र्यते शूरी हिंसायां बहुलमन्यत्रापीति युच् कर्तरि ल्युड्वा यत्तु शूरत्नीति विगृहीतं मुकुन्देन तन्न शूरी धातोर्दिवाद्यात्मनेपदित्वात् सूर्यते सूरो हिंसायां युच्
ल्युड्वेति दंस्यादि रपि कंदति कंदयति कंद्यतेवा कदि आह्वाने रोदने च अच् घञ्वा कंदो: स्त्री सूरणो सस्य मूले जलधरे पुमानत्रीणि सूरण इति ख्यातस्यागंड इति गडि
वदनैकदेशे गंड्यते वा बाहुलकादीरन् यद्वा गंडीन् ग्रंथी नीरयति ईर प्रेरणे कर्मण्यण् समेति ष्ठुंतिमिथिलादय श्चेति साधुः यद्वा समस्य गष्ठिला बीजं यस्याः गंडीरो नासम
ष्ठिलेति माला द्वे ओल इति ख्यातस्यान्नूपजशाकभेदस्य गडिनीति भाषा कडति कडमदे क्वकदिकडि कटिभ्यो वचडलयोरेकत्वं के जले लंवते वा लवि अवस्रंसने पञ्चा
द्यचगौरादिः कलंबी तु श्वेतपर्वा कलंपूर्वा सुवीरुध इति वाचस्पतिः कलंबी शाकभेदेपिस्याद् इंडशरयोः पुमान् कलंबुर इति ख्यातस्य उपाधिकमुदकमस्यां उत्तरपदस्य चेत्युद:
कुप् टाप् अपगतोदकादयोदकेति स्वामी पोई इति ख्यातस्य मूलप्रतिष्ठायां कुनयद्वा मूलयति मूलरोहणे चुरादिः अच् संज्ञायां कन् एकं मूलेति ख्यातस्य हिलति हिल्लभाव
करणे रायुपधेति कः मोचयति ण्वुल् हिल्ला चासौ मोचि
का च ड्यापोरिति ह्रस्वः हिलसाल इति ख्यातस्य १५७

Public Domain. Digitization by eGangotri

अ॰ टी॰ वसतिरिहेति चिरं गुणो वास्मिन्वसंतिवसनिवासे उलूकादयश्चेति साधु वास्तोमवंवा अध्यात्मादित्वात् इगसुगिति कः एवं हुस्वमध्योपि एकं वयुवां इति ख्यातस्य कलंब्याद्याः पंच
टी॰ रा॰ शाकभेदाः स्युः शाकाख्यंपत्रमित्यत आरभ्य च मंडूकपर्णी यालंक्याचिल्लिकाचाप्यपोदिका चांगेरी हिलमोचा च कलंबी शाकजातय इति माला दूर्वति दूर्व्यते वा दुर्वी
५० हिंसायां अच् घत्र् वा उपधायां चेति दीर्घः शतं पर्वाण्यस्याः शेषादिति कप् यद्वा शतं पर्वेति पर्वपूरणे ण्वुल् शतपर्विकात्तु दूर्वायां वचायामपि यो क्षिति सहस्रवीर्या॰
ण्यस्याः भृगोरियं भार्गवी पार्वती श्रियोः दूर्वायामपि छिन्नापि रोहति इगुपधेति कः नञ्ज्तोऽस्याः अनंता च विशल्यायां शारिवा दूर्वयोरपि कणा दुरालभा पथ्यापा
र्वत्यामलकीषु च विश्वं मरागुडूच्योः स्यादनंतसुखन्मनि अनंतः केशवे शेषेपुमान्निरवधौ त्रिषु वदू १५८ सा दूर्वा शुक्ला गोलोमसु जाता तत्र जात इत्यण् संज्ञा
पूर्वकत्वान्न वृद्धिः गोलोमी श्वेत दूर्वायां स्याद्वचा भूतकेशयोः शतं वीर्याण्यस्याः गंडति गडि वदनैकदेशे वा हुलकात् दालन् गंडमलति वा कर्मण्यण् गौरादिः दिद्वे॰

वास्तूकं शाकभेदाः स्युर्दूर्वातु शतपर्विका सहस्रवीर्या भार्गव्यो रुहानंताथ सा सिता १५८ गोलोमी शतवीर्या च गंडाली शकुलाक्षकः ॥
कुरुविंदो मेघनामा मुस्ता मुस्तकमस्त्रियाम् १५९ स्याद्भद्रमुस्तको गुंद्रा चूडाला चक्रलोच्चटा ॥ इति वाऽऽशीषु शकुलस्य मत्स्यस्येवाक्षिणी यस्यां अक्ष्णो
दर्शनादित्यच् चत्वारि शुक्लदूर्वायाः स्वामी तु परे द्वे दूर्वाभेदस्येत्याह कुरून्विंदति विद्लृ लाभे अनुपसर्गाल्लिंपेति शः कुरुविंदो रत्नभेदे मुस्तकुल्माषयोः पुमानिति
विश्वः मेदिन्यो मेघनामानि नामान्यस्य मुस्तयति मुस्त संघाते चुरादिः अच् ण्वुल् चत्वारि मोथा इति ख्यातया: १५९ भंदते भदि कल्याणे ऋज्रेंद्राग्रेति साधुः भद्रं
करोति वा तत्करोतीति ण्यंताद्रच् भद्रश्चासौ मुस्तकश्च भद्रमपि नाम भद्रं स्यान्मंगले हेम्नि मुस्तके करणांतरे इति रुद्रः गां जलं द्राति द्रा गतौ आतोनुपेति कः पृषो
दरादिः गुंद्रस्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके द्वे नागरमोथा इति ख्यातस्य चूडास्त्यस्याः शाखिस्थादाताल जन्यतरस्यां चूडाला तु उच्चटायां स्त्री चूडावति च वाच्य
वत् चक्रं लाति आतोनुपेति कः उच्चटति चट भेदे अंतर्भावितण्यर्थः अच् त्रीणि मुस्ताविशेषस्य वमति द्रवमुद्गिरणे वृभूवमि कुष्यः शाकुइति मुकुटः तन्न उ
क्तसूत्रस्योज्ज्वलदत्तादिवृत्तिषु दर्शनात् अनुनासिकलोपस्य उपधादीर्घस्य च प्रसंगाच्च कुशाभृशाय्यो र्धात्वं तरणसिद्धत्वाच्च वनति वन्यते वा वनशब्दे वा हुलकात् शः ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वर्णकांतो घञन्त्वा संज्ञापूर्वकत्वान्न वृद्धिः संख्यावंश्ये नेति निर्देशान्नुम् वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेपि च त्वक्सारस्त्वचि वा सारो ऽस्य कर्मक्रियामृच्छति कर्मण्यण् तृ
लदंतादिति वा लुक् तृणेषु ध्वज इव १६० शतं पर्वाण्यस्य यव इव फलान्यस्य यवफलो मांसिकायां कुटजत्वचिसारयोरिति हैमः वेणति वेणृ निशामन वादित्रादा
नगमनज्ञानचिंतासु बाहुलकादुः यद्वा अजति अजिवृरीभ्यो निच्चेति णुः अजेर्वी वयति शोभंते स्वनेन वी धातोर्घेन्वादयश्चेति नुर्णत्वं चेति सुभूतिः दर्भेन उक्तसूत्राभावात्
वी धातोर्णशादिकत्वे न वयंति र्हस्वाभावाच्च वेणुर्नृपांतरे त्वक्सारेपि च पुंसि स्यात् मस्कते अनेन वा मस्क गतौ बाहुलकादरः यद्वा मस्कते मकि मडि मंडने अरः आगमशास्त्राणि
त्यत्वान्न नुम् मस्करः मस्करिणो वेणुपरिव्राजकयोरिति मुकुटः तेजयति शस्त्रमग्निं वा नंद्यादित्वाल्ल्युः युज्वा दश ये वेणवोः निलेनोद्धतास्ताडिताः श्चालिता वा शब्दायंते चीक
ति चीकयते वा शब्दायते चीक मर्षणे चीकयते शब्दं तद्विपर्ययश्चेति वुन् पृषोदरादित्वाद्वर्णविपर्ययश्चेति मुकुटः तदुक्तसूत्रादर्शनमूलकं यद्वा कीसव्यक्तं च कति
चक तृप्तौ अचसंज्ञायां कन् कुन्वा कीचेति अव्यक्तं कायति वा मूलविभुजादिकः अन्येभ्योपीति डो वा कीचको ऽरंध्रभिद्भिता हतसस्वनवंशयोः एकं १६१ ग्रंथते ग्र

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः १६० शतपर्वा यवफलो वेणुमस्करतेजनाः ॥ वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः १६१

थि कौटिल्ये सर्वधातुभ्य इन् ग्रंथिः सु ग्रंथिपर्वणा वंधे रूभे दपर्वणोः पर्वति पर्व पूरणे वा बाहुलकात्कनि पर्वक्लीबं ग्रंथिर्ना पर्वपरुषी गुंद्रस्तेजनकः शरः ॥
स हे ग्रंथौ प्रसूता वेलक्षणं तरे दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिषु त्रिष्वपि पर्तिपूर्णपालनपूरणयोः अर्त्तिपृवपी तुसु बाहुलकादुः प्रत्यये उदंतोपि मज्जासारो ग्रंथिः परुषः कु
सुमरेणुरिति पुरकोडरत्नकोषात् त्रीणि ग्रंथेः गोरते गुदि क्रीडायां बाहुलकाद्रक् पृषोदरादिः गुंद्रस्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके इति विश्वः तेजयति तिज निशाने
चुरादिः ण्वुल् कुन्वा शृणाति शृ हिंसायां अच् शरस्तु तेजने वाणे दध्यग्रे नाशरजं ले सरस्तु मुंजो बालाख्यो गुंद्रस्तेजनकः शर इति वाचस्पतेर्दन्त्यादिश्च सरति सृगतौ अ
च् त्रीणि शरहरीति ख्यातस्य नडति नड गहने अच् धमति धम ध्वाने सौत्रः धम्यते वा बहुलमिति युच् यत्तु ध्मो धमश्चेति न प्रत्ययो धमादेशश्चेत्याह मुकुटः तन्न
उज्ज्वलदत्तादिष्वेतत्सूत्रस्यादर्शनात् कृन्मकरणोदर्शनात् सौत्रधातुनागतार्थत्वाच्च धमनोऽनले क्रूरे भस्त्राध्मायके च धमनी कंधरा शिरा हरिद्रा चेति हैमः पोटन

गलअरण्ये स्त्रवणे च अच अथ पोटगलः पुंसि नले च काशमस्त्रयोः त्रीणि नलेति व्याख्यातस्य काशते काशृ दीप्तौ अच् काशस्तृणे रोगभेदे काशी वाराणसीपुरी काशीका
शश्च तृणवाचक इति शब्दभेदः गौरादित्वात् ङीष् १६२ इक्षुवदंधोस्याः संमासांतविधेरनित्यत्वान्नेत्वं इक्षुगंधा कोकिला क्षस्कोष्ठ्यां काशे च गोक्षुरे त्रीणि काशस्य वल्ले
वलसंवरणे क्विप् वजति वजं गतौ अच वल् चासौ वजश्च एकोवल्वज इति भाष्यकारवचनादेकलोपि एकं वगाई व्याख्यातस्य रसेनालति अल्यते वा पूर्यते पूरयति वा अ
लभूषणादौ अच घन्वा रसालं सिल्हके वालेरसालश्चे क्षु वृक्षयोः इष्यते इषु इच्छायां इषेः क्सुः सढोः कः सि इक्षोः कोशकारा द्या आदिनागृह्यते इक्षुः कर्कट
को वंशः कान्तारा वेणुभिः सृतिः इक्षुरस्य पौंड्रकश्च रसालः सुकुमारकः पुंड्यते पुडि खंडने स्फायीत्यादिना रक् मन्त्राद्यणपौंड्रः पुंड्रस्यापुंड्रकः सेव्यः पौंड्रकोऽतिरसो
मधुर इति वाचस्पतिः पुंड्रो देसविशेषे क्षुभेदयोरतिमुक्तके कांतारः समृच्छति ऋ गतौ कर्मण्यण् स्वार्थे कन् ण्वुल्वा १६३ विंपक्षिणमीरयति लुर्युज्वा विशिष्टजनमीरय

नडस्तु धमनः पोटगलोऽथो काशमस्त्रियां १६२ इक्षुगंधा पोटगलः पुंभूम्नि तु वल्वजाः रसाल इक्षुस्तद्भेदाः पुंड्रकांतारकादयः १६३ स्याद्वी
रणं वीरतरं मूलेस्योशीरमस्त्रियां अभयं नलदं सेव्यममृणालं जलाशयं १६४ लामज्जकं लघुलयमवदाहेष्टकापथे॥ ९ ति शूरवीरविक्रांता वि
ति सुकुटः तन्न विग्रहप्रदर्शनधातूपन्यसनयोर्विरुद्धत्वात् अच अतिशयितं वीरं द्विवचनेति तरप् स्याद्वीरणे वीरतरं वीरः श्रेष्ठे शरे चना द्रुगांडर इति व्याख्यातस्य वीर
णस्य मूले उश्यते वश कांतौ वशेः किदितीरन् नभयमस्मात् अभया स्त्री हरीतक्यामुशीरे च नपुंसकं तिमयेवाच्यलिंगः स्यात् नलं गंधं ददाति ददाते वा डुदाञ् दाने दे ङ् पा
लने वा आतोनुपेति कः नलदं स्यात् पुष्परसोशीरमांसीषु नहयोः सेवितुमर्हं षेवृ सेवने अर्हेण्यत् सेव्यं स्त्री वमुशीरे स्यात्सेवार्हे युनरन्यवत् मृणालमिव सादृश्ये न
नञ् मृणालमप्यत्र मृणालं नलदे स्त्री वं पुन्नपुंसकयोर्विसे जले आशेते श्च च यद्वा जलोजडआशयो यस्य जलाशयो जलाधारे स्याद् शीरेन्यलिंगकः १६४ लाति दो
षान् श्च च क्विप् वा लामज्जा सारोस्य कप् सुकुटस्तु चिंत्यः लघते रोगान् लंघ्यते वा भूस्पृष्टत्वात् लघि गतौ लंघिवंह्योर्नलोपश्चेत्युः लीयते लीङ् श्लेषणे अच व्यस्तैः समस्तं नाम
लामज्जकं सुवासस्यादगृमृणालं लयं लघ्विति सुभूतः लामज्जकं सुनालः स्यादमृणालं लयं लघु अवलीयते दाहो स्मात् अवदीयते दाहो नेनेति अवदाह्नमिति॥ ८१

CC-0. In Public Domain. Digitization by eGangotri

स्वामीतिमुकुटः तन्नः स्वामिग्रंथेऽदर्शनात् अवदीर्यते दाहो नेनेति स्वामिना व्याख्यातत्वात् केचित्तु अवदाहेष्टकापथमिति नामद्वयमाहुः लामज्जकं लघुलयमव दाहेष्टकापथे अवदानमिंद्रगुप्तमवदाहेष्टकापथे इति वाचस्पतिः इष्टकापथमस्य अधोवायुकरत्वात् यद्वा इष्टकेव दृढः पंथा यस्य इष्टकायामपि पंथा यस्येति वा दश ऽतृणजातयः तृण्यते तृणु अदने घञ् संज्ञापूर्वत्वाद्गुणो न घञर्थे कस्तु परिगणने नान्ना गिरति गीर्यते वा गॄ निगरणे ग्रो मुद्गे स्तुतिः स्यायते श्येगत्तोपि नाकादयश्चेति साधुः यद्वा श्यामं वर्णमकति अकगतौ अण् श्यामाकः श्यामकोपि चेति हलायुधः तत्र शकं ध्यादिलं वो ध्यं यत्तु शालूधूम्यो मकन्निसाह मुकुटः तन्न तस्योणादिवृत्तावदर्शनात् प्रमुखशब्दान्नीवाराद्याः मुकुटस्तु अनंतराः कुशादयो व्यवहिताश्चकं गुकोद्रवादयो गृहीताः इत्याह तन्न कोद्रवादीनामेवं सति हविष्यत्वापातात् १६५ कौशेते अन्येभ्योपीति डः यद्वा कुष्यति कुशिरश्लेषे इगुपधेति कः कुशो रामसुते द्वीपे पापिष्ठ योक्त्रयोः कुशी फाले कु

नलादयस्तृणं गर्मुत् श्यामाकप्रमुखा अपी १६५ अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणं पौरसौगन्धिकध्यामदेवजग्धकरौ हि

शो दर्भे कुशा वल्गां कुशं जले कुथ्यति कुथ पूतीभावे इगुपधेति कः कुथतीति स्वाम्युक्तविग्रह हिषं १६६ छत्त्रातिछत्त्रपालघ्नौ मालातृणकभू श्विंत्यः कुथः स्त्रीपुंसयोर्वर्णकंबले पुंसि बर्हिषि दर्भ्यते दभी ग्रंथे घञ् पूयते नेन पुवः संज्ञायामिति त्रः पवित्रं धर्षलोकुशे नाम्ने पयसि च क्लीबं मेध्ये स्यादभिधेयवत् चत्वारि पुरेभवं तत्र भव इत्यण् पौरं त्रिषु पुरोद्भूते कत्तृणे पुंनपुंसकं शोभनो गंधः सुगंधः प्रयोजनमस्य प्रयोजनमिति ठक् सौगंधिकोगंधवणिक् सौगंधिकं तु कल्हारे गंधोत्पलेपद्मरागे इति हेमः ध्यायते पशुभिः ध्यै चिंतायां बाहुलकान्मक् देवैरद्यते स्म क्तः अदो जग्धिर्ल्यप्तिकिति रोहति रुहे र्वृद्धिश्चेति टिषच् कत्तृणे रोहिषं क्लीबं पुंल्लिंगो हरिणे तरौ इति मूर्द्धन्यांतेरभसः षट् रोहिषमिति स्यात् तृणविशेषस्य १६६ छु दृतिछादयति वा छद अपवारणे त्र न् इस्मन्त्रन्क्षिपुचेति ह्रस्वः छत्राभि सा वति छत्रे कुस्तुंबुरु शिलींध्रयोः नपुंसकं चातपत्रे अतिक्रांतः छत्रं पालं क्षेत्रे हंति अमनुष्येति टक् त्रीणि जलजतृणविशेषस्य मालाकाराणि तृणा न्यस्य भुवस्तृणं पारस्करादित्वात् सुट् भूरव्ययं वा द्वे तृणविशेषस्य स्वामीतु छत्रादिपंच पर्यायानाह शस्यते शुष्यति वा शसुहिंसायां शुषशोषणे वा खष्यशिल्पशष्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰टी॰
टी॰रा॰
६२

नीपादयइतिपद्रतिमुकुटसुचिंत्यः उज्ज्वलदत्तादिवृत्तिषु नीपादय इति सूत्राभावात् शष्पं बालतृणेस्मृतं पुंसि स्यात् प्रतिभाहानौ बालं तृणं हेनवतृणस्य अदने घञ् घत्र
पोश्चेत्यदेर्घस्लृ घस्यते इति विगृह्णंतो स्वामिमुकुटौ चिंत्यौ घसेः सर्वत्र प्रयोगाभावात् अन्यथा घञपोश्चेति सूत्रवैयर्थ्यापातात् यौति यूयते वायुमिश्रणे अमिश्रणे च
वहियुभ्यां णिदित्यसच् संज्ञापूर्वकत्वान्न वृद्धिः हेगवादयदनीयतृणविशेषस्य तृण्यते तृण अदने घञ् संज्ञापूर्वत्वान्न गुणः अर्ज्यते अर्जअर्जने तृणस्या यांचिरि
त्युनन् अर्जुनः ककुभपार्थे कार्तवीर्यमयूरयोः मातुरेकसुतेपि स्याद्धवलेपुनरन्यवत् नपुंसकं तृणे नेत्ररोगे स्यादर्जुनी गवि उषायां बाहुदानद्यांकुहन्यमपिच क्वचित्
हेतृणमात्रस्य १६७ तृणानां संहतिः समूहः पाशादिभ्यो यः एकं नडानां संहतिः पाशादिभ्यो यः एकं तृणानां राजा राजाहः सखिभ्यष्टच् तृणराजन् इत्याहृ यायप
स्य तालयति तलप्रतिष्ठायां चुरादिः पचाद्यच् तालः करतले गुष्ठमध्यमायां च सम्मिते गीतकाल क्रियामाने करस्फाले द्रुमांतरे वाद्यभांडे वर्तकास्य सत्त्मरौतालो

शष्पं बालतृणं घासो यवसं तृणमर्जुनं १६७ तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः तृणराजाह्वयस्तालो नालिकेरस्तु लाङ्गली १६८ घोंटा तु पूगः क्रमुको गुवाकः खपुरोस्य

जटोषधौ ली वं तु हरिताले स्यात् तलति अच् तलश्चपेटे ताल ह्रो तलं ज्यावातवारणे त्सरौ स्वभावाधरयो
सं त्री घाते च संमतः हे नलति नल्यते वाणलगंधे वाहुलकादिण् केन वायुना ईर्यते ईरप्रेरणे घञ् नालिश्चासौ केरश्च कपिलिकादिः लं गति लगिगतौ वाहुल
कादलच् दीर्घश्च गौरादिः हे १६८ घोणते घुणभ्रमणे वाहुलकात् टः घोण्टा तु वदरीपूगवृक्षयोरपियोषिति पवतेपुनाति वा पूञ्पवने छाकृवडिभ्यो गक्रमुकु
टसु पूज्यते मान्यते सेचनादिना फलद्वारेणानेन वा घञि कुत्वे पूगः स्यात् तन्न पूजेश्चुरादिण्यंतत्वेन णिलोपस्य स्थानिवत्त्वेन कुत्वाप्रसंगात् निष्ठायामनिटइति
वार्तिकाच्च पूगः क्रमुकसंघयोरिति हेमचंद्रः क्रामति क्रमुपादविक्षेपे वाहुलकादुः संज्ञायां कन् क्रुन्चा क्रमुकस्तु पुमान् भद्रमुस्तके ब्रह्मदारुण्यपि फले कर्पासि
कायाश्च पट्टिकालोध्रपूगयोः गुवंत्यनेनस्वंसकत्वात् गुपुरीषोत्सर्गेपिनाकादयश्चेति साधुः यत्तु मुकुटः वा हुलकाद्गुणाभावः तन्न अस्य कुटादित्वात् गुवाकोपिचगू
वाकइति तालपालः तत्रैवाहुलकाद्दीर्घः खमिंद्रियमाकाशं वापि पर्ति पृपालनपूरणयोः मूलविभुजादिकः उरोष्ठ्यपूर्वस्य यत्तु अचिउत्वमाह मुकुटस्तन्न इत्वोत्वाभ्यां

असम्पूर्णस्य उद्गतो वेगो यस्मात् त्वंसकत्वात् उद्वेजं यन्नेन ओविजी हल्श्चेति घञ् ए कंक्रमुकफलस्य एते नालिकेराद्यास्तु योर्हितालेन चतुर्थेन सहिताः खर्जूराद्याश्चत्वारः तृ-
णजातीया द्रुमाः पूगकपार्थिवादिः हीनोऽस्य तालः पृषोदरादिः १६९ खर्जति खर्ज व्यथने खर्जिपिंजादिभ्य ऊरोलचाविति ऊरः जातेरस्त्रीति ङीष् गौरादित्वाद्वा न खर्जूरीति ख्या-
तायाः खर्जूरं ह्रस्वफलयोः खर्जूरः कीटवृक्षयोः केतयति कित निवासे कुनप्वुल् वा गौरादिः तालयति तल प्रतिष्ठायां चुरादिः अच् जातित्वात् गौरादित्वाद्वा ङीष् इति श्रीवघेल-
वंशोद्भवश्रीमहीधरविषयाधिपश्रीकीर्तिसिंहदेवाज्ञया श्रीमद्दीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां द्वितीयकाण्डे वनौषधिवर्गवि-
वरणं समाप्तं ४ सिंचति विच सत्त्रणे सिचेः संज्ञायां हनुमोकश्च यद्वा हिनस्ति हिसि हिंसायां अच् पृषोदरादिः सिंहः कण्ठीरवे राशौ सप्तमे चोत्तरस्थितः सिंहानुकं टकार्यां
स्यात् सिंहिं स्वर्भानुमातरि वासाटहस्त्योः क्षुद्रायां मृगाणामिंद्रः पंचं ते पचि विस्तारे अच् पञ्चं विस्तृतमास्यमस्य यद्वा मुखं पादाश्च पंचास्यानीव यस्य युद्धे मुख्यत्वात् हरि

फलमुद्गमेते च हिंतालसहितास्त्रयः १६९ खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः इति श्रीवनौषधिवर्गः ४ सिंहो मृगेन्द्रः पंचास्यो
हर्यक्षः केसरी हरिः शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः १॥ ११ णी पिंगले अक्षिणी यस्य बहुव्रीहाविति षच् केसराः स्कंधवालाः संत्यस्य अ-
तइनिः केसरी तुरंगे सिंहे पुन्नागे नागकेसरे केचित्तालव्योष्ममध्यमाहुः केवा शिरसि वा शीर्यते शृ हिंसायां शृदॄ पसो स्थ स्य इन् हल्दंतेत्सलुक् हरति अच इः
हरिश्चंद्रार्कवातश्वशुकभेकयमाहिषु कपौ सिंहे हरेऽजे ऽंशौ शक्रे लोकांतरे पुमान् मयूखे पिंगहरितोः षट् शारयति शृ हिंसायां स्वार्थे णिच् क्विप् दृ यते दॄङ् परिता-
यौवनोदयं स्तन्यते शब्द्यते वा कामुकैः स्तन शब्दे अच् पुंसीति घो वा कुचति कुच संकोचे इगुपधेति कः द्वे चूष्यते चूष पाने वा हुलकादुकः पृषोदरादिः चूचु इत्यव्यक्तं काय
ति पीयमानं स्वन्येभ्यो पीति डः आनोनुपेति को वा कुचस्याग्रं चूचुको ना कुचाग्रमिति रत्नकोशः द्वे क्रुड्यते क्रुड बाल्ये ऽदन घञ् मुकुटस्तु क्रोड इति घनीभवति क्रुड घनत्वेऽजि
त्याहतन्न घनत्वार्थस्य कुड इगुपधत्वात् उदुपधत्वेऽपि कुटादित्वेनाऽचि गुणासंभवाच्च क्रोडः कोलेशनो क्रोडमंके इति हेमः क्रोडः शूनौ शंकरे नानपुमानं करक्षसोरिति वि
श्वः भुजयोरंतरं द्वे अङ्कस्य ७७ इयर्त्ति ऋगतौ अर्त्तेरुच्चेत्यसुन् उरादेशः किंच उरो वक्षसि मुख्ये स्यादिति हेमः वदति सामर्थ्यं वदय्यक्तायां वाचि वद स्थैर्ये वा हनुवदिह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वत्सं तु वक्षसीति रुद्रः वक्षति वक्षः संघाते असुन् त्रीणि पंचापि वत्सस्येत्यन्ये पठ्यते पृथुसे चनेति थपुष्ट गृथेति साधुः एवं च समभागे पि देहस्यावयवांतरे एकं देहपश्चाद्भाग
स्यस्कंद्यते स्कंदिर् गतिशोषणयोः घञ् स्कंदेश्च स्वाग इति वा कुत्वकादन्सुन्यपि धः स्कंधः प्रकांडे कायांसे विज्ञानादिषु पंचसु नृपे समूहे व्यूहे चेति हेमः भुजस्य शिरः
अस्यते समाहन्यते भारादिना अंसः समाघाते घञ् यद्वा अमति अम्यते वा अमगतौ अमेः सन् अंसः स्कंधे विभागे स्यादिति हेमः त्रीणि जायते वाहुरस्मात् जन्यादयश्चेति साधुः
एकं अंसकक्षयोः संधेः ७८ कष्यते कष हिंसायां कृतृवदिहनिकमिकषिभ्यः सः कक्षः स्यादंतरीयस्य पश्चादंचलपल्लवे स्यात् दीपदे च दोर्मूले कक्षो वीरुत्तृणेषु च वाह्यो
मूलं द्वे स्पृश्यते स्पृश स्पर्शने स्पृशेः श्वण् शुनो दीर्घश्चेति वा द्विः यद्वा पर्शूनां समूहः पार्श्वं ण स वक्तव्यः इति तत्पदत्वेन भत्वाभावाद् दीर्घं गुणेन पार्श्वमंतिके कक्षाधोवय
वे च क्लीबे पर्शुगणेपि च एकं कक्षयोरधोभागस्य मध्ये भवं मध्यान्मः मध्यमो मध्यजेन्यवत् पुमान् स्त्रे मध्यदेशेप्यवलग्ने तु न स्त्रियां स्त्रियां दृष्टरजो नार्यां कर्णिकांगुलिभे

स्कंधो भुजशिरोंसोऽस्त्री संधी तस्यैव जत्रुणी ७८ बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः ७८ भु
जबाहू प्रवेष्टो दोः स्यात्कफोणिस्तु कूर्परः॥

द्वयोः अक्षरेऽलं दक्षिणत्याल्लग्यते स्म लगे संगे क्षुब्धस्वांतेति साधुः यद्वा लज्जते स्म ओलस्जी व्रीडे गत्यर्थेति क्तः
स्कोरिति सलोपः ओदितश्चेति नत्वं श्वीदित इति नेट् अवकृष्टं अवसन्नं वा लग्नं प्रादयो गतेति समासः अवलग्नोऽस्त्रियां मध्ये त्रिषु स्याल्लग्नमात्रके मध्ये शरीरस्य
भवं असांप्रतिके दत्तः यद्वा मांस्यो भां घत्ते अघ्न्यादयश्चेति साधुः मध्यं विलग्नं न स्त्री स्यान्न्याय्येंतरेऽधमे त्रिषु त्रीणि देहमध्यस्य परौ भुजबाहू ७९ भुज्यते अनेन भुजपालना
भ्यवहारयोः भुजन्युब्जाविति साधुः यद्वा भुजति भुजो कौटिल्ये इगुपधेति कः अथो भुजा द्वयोर्बाहौ करे बाधते वा बाधृ विलोडने अर्जिदृशिकम्यमीति उः ह्रस्वांत्यस्य मुकुट
सुवहं त्यनेन वर्हिरहित लिपश्चिभ्यश्चेत्युणित्याह तत्र पाणिनीयत्वादुपेक्ष्यं वहेर्हलश्चेति घञ् वाहते वा त्न प्रयत्ने अच् वा बाहोऽश्वभुजयोः पुमानिति दामोदरः वाहो टि ८०
बाहुरिति स्मृत इति दर्शी कोशः प्रवेष्टते वेष्ट वेष्टने अच् दाम्यत्यनेन दमु उपशमे दमेर्डोस भागुरिमते टाप् दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथेति धनंजयः च त्वा
रिकं मुखं स्फोरयति स्फुर स्फुरणे संचलने च एण्यंतः अच् रः पृषोदरादिः यद्वा केन सुखेन फणति स्फुरति वा फण गतौ स्फुर संचलने वा इन् पृषोदरादिः कफोणिः कफ

Digitization by eGangotri

रितिज्ञव्यर्त्तीवः कुरतिकुरशब्देक्किपकोरणंसंपदादिर्वापिपर्जिंपृपालनपूरणयोः अचकूर्चासोपरश्चयद्वाकुराग्रान्दे पूरः यद्वाकूव्यसनेनवाकुपक्रोधेवाहुलक
दरनदीर्घश्चकफोणिःकूर्परोरत्नेःपृष्टमितिनाममालाहेकूर्परस्योर्द्धमप्यासन्नोगंडःकपोलोस्यएकमप्रकुव्यतेनेनकुणूलादन्तंकुषनिष्कर्षेउषिकुषिमार्तिम्य
स्थनप्रकोष्ठमंतरंविद्यादरत्निमणिवंधयोरितिकान्यः प्रकोष्ठोमणिवंधेस्यात्कूर्परस्यांतरेपिचभूपकक्षांतरेपिस्यात्प्रविष्टःकोष्ठंकुसूलंवाअन्यादयःचांतेतिस
मासःएकंकफोणेरधोमणिवंधपर्यंतस्य ८० मणिर्वध्यतेत्रवंधवंधनेहलश्चेतिघञ्कनिष्ठायाआ आङ्‌मर्यादाभिविध्योरित्यव्ययीभावः कृणातिकिरत्यनेन
नवाकृञ्हिंसायांकृविक्षेपेवा कृशूशलिकलिगर्दिभ्योऽभचकृशृगर्दिरासिवल्लिभ्योऽभचइतिमुकुटोऽपाणिनीयः करेभातिवाभादीनोमुखीतिकः कर
भ्यमणिवंधादिकनिष्ठांतोष्टन्तसुतेज्ञापकसिद्धंनसर्वत्रेतिवहिर्योगेपंचमीनएकंपंचशाखाइवांगुलयोऽस्यघोनेऽस्मिन्नर्वेपुंसीतिघःशमइतिपाठांतरंशाम्यति

अस्योपरिप्रगण्डःस्यात्प्रकोष्ठस्तस्यचाप्यधः ८० मणिवंधादाकनिष्ठंकरस्यकरभोवहिः पंचशाखःशयःपाणिस्तर्जनीस्यात्प्रदेशिनी
॥८१॥ अंगुल्यःकरशाखाःस्युःपुंस्यंगुष्ठःप्रदेशिनी

कंडूर्मलोवानेनशमुउपशमेहलश्चेतिघञ्नोदात्तोपदेशेतिनवृद्धिःपाणिःशमःशयोहस्तइत्यमरमाला
शायःशय्याःहिपाणिषुपणायंत्यनेनपणव्यवहारेअस्मिपणयोःहडायलुकौचेतिइण्आयप्रत्ययस्यलक्चपण्यतेनेनवाहुलकादिञितिमुकुटस्तृक्तमूत्रास्य
रणमूलकःत्रीणिहस्तस्यतर्ज्यतेनयातर्जभर्त्सनेकरणेतिल्युट्प्रदिश्यतेनयादिशअतिसर्जनेल्युट्प्रदेशिनीतिपाठांतरंप्रदिशतिसुपीतिणिनिःप्रदेशोस्यस्या
वाइनिःद्वेअंगुष्ठसमीपांगुल्याः ८१ अंगतिअगिगतौऋतन्यंजीत्युलिःअंगुलिःकरशाखायांकर्णिकायांगजस्यचेतिहेमविश्वप्रकाशौवालमूललघ्वंगुलीनांवारोलःय ६६
द्वाअंगंपाणिपादमवयवंलातिवावाहुलकान्‌डिः अंगुलस्तुयवोमतइत्यमरदत्तः अंगुलोनाययवमानमितिनाचस्यतिःनत्रांगेर्वाहुलकादुलःकरस्यशाखाइवद्वेअंगु
ष्टेदंगवावीअंगोपालोतिष्ठतीतिसुपीतिकःअंवाम्वेतिषत्वंतर्जनीउक्तापिपयथासंख्यायपुनरुक्तामध्येभवामध्यान्मःमध्यमोमध्यजेस्त्रेदेहमध्येमध्यदेशेमध्यमा
कर्णिकांगुलिःराकारजस्वलाचापीतिहेमःननामग्रहणायोग्यमस्याः अ्नन्नोऽनयाभिरश्छेदनात्‌॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत एवास्यां पवित्री क्रियते अन्यस्या कनिष्ठाद्विवचनेनेति इष्ठन् युवाल्पयोः कन्वा कनिष्ठोऽल्पोऽनुजे यूनि कनिष्ठा त्वंतिमांगुलावितिहेमचंद्रः क्रमेणैकैकं ८२ पुनर्भवति अच् पुनर्नव इति वा पाठः करे रोहति इगुपधेति कः नखमस्य नभ्राडिति साधुः नखी स्त्री क्लीबयोः शुक्तौ नखरे पुन्नपुंसकं यद्वा नखनति खन्यते वा डडरे कवकाः नखरानि वा नखं त्रिष्वित्यमरमाला चत्वारि प्रदिश्यते दिश अतिसर्जने हलश्चेति घञ् उपसर्गस्य घञीति वा दीर्घः प्रदेशो देशमात्रे च तर्जन्यंगुष्ठसंमिते तलत्यत्र तलप्रतिष्ठायां हलश्चेति घञ् तालः करतलेऽगुष्ठमध्यमाभ्यां च संमिते गीतकालक्रियामाने करस्फाले द्रुमांतरे गोः कर्ण इव गोकर्णोऽश्वतरेऽपि स्यान्मृगसर्पगणांतरे अंगुष्ठानामिकोन्माने गोकर्णो मूर्विकौषधौ तर्जन्यादिसहिते विस्तृतेऽगुष्ठे क्रमेणैकैकं ८३ कनिष्ठया सह वितते ऽगुष्ठे वितस्तिर्वितस्यते वा तसु उपक्षये वीतसीति तिः बाहुलकान्निरितिमुकुटएतत्सूत्राम्मरणमूलकः द्वादश अंगुलयः प्रमाणमस्य तद्धितार्थो द्विगुः द्विगोर्नित्यमिति मात्रचो लुक् ततत्पुरुषस्यांगुलेरित्य

मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ८२ पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियां प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ८३
अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ ८४ द्वौ संहतौ सिंहतलप्रतलौ वामदक्षिणौ पाणिर्निकु
ब्जः प्रसृतिस्तौ युतावंजलिः पुमान् ८५ प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया ॥ ८६

चपेट चपति चपस्तत्वने अच् एटतिइट गतौ इगुपधेति कः चपश्चासाविटश्च चर्पटोऽप्यत्र चर्पटः फालविपुले चपेटे पर्पटेऽपि च प्रतलति तल प्रतिष्ठायां अच् तलमप्यत्र तलं स्वरूपाधरयोः खड्गमुष्टिचपेटयोरिति विश्वः प्रतलं पातालभेदे ततांगुलिकरे पुमान् प्रसृतो हस्तः प्राद्यो गतेति समासः त्रीणि विस्तृतांगुलौ पाणौ ८४ सिंहस्येव तलमत्र प्रतलते प्रश्लिष्टे वा तले अत्र संहतल इति पाठांतरं संहतं संघट्टं तलानि आतोऽनुपेति कः द्वौ वामदक्षिणयोः पाण्योर्मिलितयोर्विस्तृतांगुल्योः निकरांकुब्जः प्रकृष्टा सृतिरस्य प्रसृत इति वा पाठः तत्र प्रकृष्टं सृतमस्य प्रसृतः संप्रसारे स्याद्धि नीतिवेगितेत्रिषु अंजलौ स्यात्तु पुल्लिंगो जंघायां प्रसृता मता तौ प्रसृतौ मिलितौ अज्यतेऽनेन अंजू व्यक्त्यादौ ऋतन्यंजीत्यलिः अंजलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च एकम् ८५ बाहौ प्रसारितपाणौ हस्तः हसति हस्यते वाऽनेन वा हसे हसने हसिमृग्रिण्यमिति तन् कर करिकरे सप्रकोष्ठकरेऽपि च ऋक्षे केशात् परो व्राते विस्तृतः क

पद्मनाभीटीका॥

अ॰ टी॰ सहस्तः मुष्यते नया मुषस्तेये स्त्रियां क्तिन् यद्वा मुष्णाति क्तिच् बद्धया मुष्ट्या उपलक्षितः अरत्निः ऋच्छति अर्यते नेन वा ऋगतौ ऋतननीति कत्निच् रत्नरत्नी स्त्रियौ बद्धमुष्टितनांगु
टी॰ रा॰ ली इत्यमरमाला न नाऽरत्निः कफोणौ हस्तस्य कोष्टं चांगुल्या वितिरुद्रः एकं रत्निभिन्नः नञ्समासः निर्गता कनिष्ठा यस्मात्तेन मुष्टिना उपलक्षितः एकं ८६ विष्णोषे
६७ ण अस्यते नेन अस्यगतौ हलश्चेति घञ् मुकुटस्तु व्यामीयते नेनेति माङो मूलविभुजादित्वात्क इति व्याख्यत् तन्न कृत्कर्तरी त्यस्य प्रवृत्त्याकरणेकस्यासंभवात् व्यामीय
ते ऽज्ञाद्यनेनेति स्याभ्युप्येवं स्वस्वपार्श्वे प्रसारितयोर्बाह्वोर्मध्यं एकं दोषौ च पाणी च तत्र ऊर्ध्वं विस्तृतं दोष्पाणीयेन सः तादृशो ना तस्य यन्मानं परिमाणं तेन वा पुंसा
यन्मीयते तत्र पुरुषः प्रमाणमस्य पुरुषहस्तिभ्यामण् च पौरुषो नदः पौरुषी नदी पौरुषं सरः पौरुषं पुरुषस्य स्याद्भावे कर्मणि तेजसि ऊर्ध्वविस्तृतदोःपाणिनृमाने त्वभि
धेयवत् ८७ कणति कणशब्दे कणोष्टः कंठो गले सन्निधाने ध्वनौ मदनपादपे इति विश्वः यद्वा कंठते कठि शोके अच् समीपार्थशब्दे षु त्रिषु कंठं विदुर्बुधा इति शाश्व

सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना। ८६ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरं ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ८७ कं
ठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि कंबुग्रीवा त्रिरेखा साऽवटुर्घाटा कृकाटिका ८८॥

८९ तः गिलति गॄ निगरणे अच् अचि विभाषेति वा लः
यद्वा गीर्यते नेन पुंसीति घः यद्वा गलति गल अदने अच् गलः कंठे सर्जरसे हे ग्रीवाग्रभागस्य गीर्यते नया ग्रोवयव्हजिह्वा ग्रीवेति साधुः ग्रीवा शिरोधिस्तस्मिरे शिरो
धीयते स्यां कर्मण्यधिकरणे चेति किः कं शिरो धारयति संज्ञायां भृतॄवृजीति खच् खचि ह्रस्वः यद्वा धरति धृञ् धारणे अच् कं शिरसो धरा कंधरो वा रिवाहे स्यात् ग्री
वायां कंधरामता त्रीणि कंबुः शंखस्तद्वद्ग्रीवा तिस्रो रेखा यस्यां एकं अवटलति टलवैक्लव्ये अवटीकते वा टीकृगतौ मितद्वादित्वात् डुः यद्वा न वटति वट वेष्टने ६७
वटभाषणे वा बाहुलकात् डुः अवटुः पुरुषे कृकाटिका घाटेति वोपालितः घाटयति घाट्यते वा घट संघाते चुरादिः अच् घ ज्वाक्कृकं कंठमटति अट गतौ इन्
स्वार्थे कन् ण्वुल्तु परत्वात् अणा वाधान्न प्राप्नोति त्रीणि ग्रीवाया मुन्नतभागस्य घाटीति ख्यातस्य ग्रीवा पश्चाद्भागस्येति स्वामिमुकुटौ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्यते ऽनेन वच परिभाषणे भूत्रो वचिर्वा गुधृवीपचिवचीति त्रः वक्त्रमास्ये छंदसीति हेमचंद्रः आस्यं दंते अस्मादिना प्रस्रवति आस्यं द्यते ऽ वा ऽन्नादिना द्रवीक्रियते ऽस्यं द्र प्रस्रवणे अन्येभ्योपीति डः यद्वा असंते वर्णा येन अस्यते ग्रासो वास्मिन् असु क्षेपणे कृत्यल्युटो बहुलमिति ण्यत् मुखं मुखांतरालं च हृद्यमास्यमित्यमरमिति शाश्वतः आस्यं मुखे च तन्मध्ये तद्भवे च त्रिषु स्थितो वदंत्यनेन वदत्यनेन वद व्यक्तायां वाचि करणे ल्युट् तुंड इति तुडि तोडने अच् आ अनंत्यनेन अन प्राणने ल्युट् लप्यते ऽनेन लप व्यक्तायां वाचि ल्युट् खन्यते ऽनेन वा खनु अवदारणे डित् खनेर्मुट् चोदात्त इत्यच् स च डित् धातोर्मुडागमः प्राक् खनो मुडुदात्तश्च तनोः जडित प्रत्ययो भवेत् प्रजा सृजायतः खातं तस्मात् हृ मुखं बुधा इति निरुक्तं मुख मुपाये प्रारंभे श्रेष्ठे निःसरणास्ययोरिति हेमः सप्तमुखविलस्य तदुपलक्षिते समुदाये नृपचारात् घ्रायते ऽनेन घ्रा गंधोपादाने ल्युट् घ्राणं क्लीबं नासिकायां घ्राते स्याद्वाच्यलिंगकं वहति वह प्रापणे अच् गंधस्य वहा स्याद्गंधवहा नासायां पुल्लिंगे मातरिश्वनि घोणेति अनया वा घुण भ्रमणे अच् हलश्चेति घञ् वा नासते ऽनया वा णास शब्दे प्राग्वत् नासा तु नासिकायां वहारो ऽर्द्धदारुणि स्त्रियां नासे ऽप्युल् घ्राणं गंधवहा नासा नसा नस्या च नासिके ति साहसांकः कुल्या गंधवहा घोणा घ्राणं

वक्त्रास्ये वदनं तुंडमाननं लपनं मुखं क्लीबे घ्राणं गंधवहा घोणा नासा च नासिका ८९ ओष्ठाधरौ तु रदनच्छदौ दशनवाससी अधस्ताच्चिबुकं गंडौ कपोलौ तत्परो हनुः ९०॥

८९ नासा च नासिके ति कान्यः पंच ८५ उष्यते उष दाहे रेण उष दाहे उषि कुषीति थन् तत् धियते धृङ् अवस्थाने पुंसीति घः नञ्समासः अधरस्तु पुमानोष्ठे हीने ऽनूर्ध्वे च वाच्यवत् इत्यहश्च पाली त्येकत्वं न भवस्य नित्यत्वात् ओष्ठाभ्यां युतावधरौ विनिशाक पार्थिवादिर्वा रदनाश्छाद्यंते अनेन छद संवरणे चुरादिः पुंसीति घः छादेर्घे इति ह्रस्वः दशनानां वाससी इवावरकत्वात् चत्वार्युत्तराधरोष्ठमात्रस्य चीवति चीव्यते वा चीव आदानसंवरणयोः मृगय्वादिः स्वार्थे कन् चिनोति मांभ्यां वा प्राग्वत् अधस्तादधरोष्ठस्य चिबुः स्याच्चिबुकं तथेति निगमः एकमोष्ठाधोभागस्य गंड इति गडि वदनैकदेशे अच् गंडः स्यात्पुंसि खड्गि निग्रहयोगप्रभेदे च वीथ्यंगपिटकेपि च चिन्हवीरकपोलेषु हयभूषणबुद्बुदे कं पतने कपि चलने कपि गाडि गंडी त्योलच् कपीति निर्देशान्नलोपः कं सुखं पोलति वा पुल महत्वे कर्मण्यण् द्वित्वाभ्यां कपोलाभ्यां परः हंति भृशं स्वस्ति ही युः हनु हेट् विलासिन्यां स्यां वस्त्रेण दे स्त्रियां द्वयोः कपोलावयवे एकं कपोलाधोभागस्य ६०

In Public Domain. Digitization by eGangotri

घने रध्यते वानेन रद विलेखने दंशाद्दशनेऽकरणे इति ल्युट् दहदशो इति निर्देशान्न क्वचिदङ्क्रियापि लोपः यद्वा कर्तरि ल्युट् दाम्यति दमु उपशमे अंतर्भावितण्यर्थाद्ब
हुलकात् तन् दंतो द्विकटके कुंजे दशने ओष्ठोयघोस्त्रियामिति अच् चत्वारि तरंत्यनेन नृप्लवनतरणयोः ओरश्चल इति गुणे तालयति तल प्रतिष्ठायां चुरादिः मृगय्या
दिर्वा काकुर्जिह्वा उच्यतेऽनुद्यते वास्मिन् अनेकार्थत्वाद्दिरुक्षेपणे वर्तते घञर्थे कः पृषोदरादिः ईषत्क वत्ते वा कुङ् शब्दे अव्यादित्वात्साधुः यद्वा निश्चेष्टं ककुदं शि
रः ककुदे भवं तत्र भवइत्यण् हेरसं जानाति ज्ञा अवबोधने आतोनुपसर्गे कः रसयति रस आस्वादने नंद्यादित्वाल्ल्युः यद्वा रसपंस्य नयाण्यासश्रंथेति युच् रसति र
सशब्दे बहुलमन्यत्रापीति युच् वा रसनं स्वदने ध्वनौ जिह्वायां तु नपुंसि स्यात् तालव्या अपि दंताश्चेत्यादौ जिह्वायां रसना तथेत्युक्ते ईत्यतालव्यमध्येयं रसनं तु ध्वनौ
स्वादे रसज्ञा रसस्वयोः स्त्रियामिति रभसः रसेः सौत्रात् रसि रुचि हूटूशो युजिति मुकुटो पाणिनीयः लेढि लिह आस्वादने शेवयह्वजिह्वेति साधुः लि
हः पूर्वं जिह्वो ग्रीवेति वन्प्रत्यय इति मुकुटोऽपाणिनीयः त्रीणि जिह्वायाः सृजति लालादि सज विसर्गे वा बहुलकात् क्विन् प्रांतावोष्ठस्य सृक्कणी इति क्लीबकाण्डे मरद्

रदना दशना दन्ता रदास्तालु तु काकुदं रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी ॥९१॥ ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियो
कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका ॥९२॥

नः कवयुक्तमित्यन्ये अदन्तं सकमित्यपरे ऽन्यन्ते ऽन्येके सृक्किशब्द इकारांतः क्लीबं तत्र वा बहुलकात् क्विः एक
मोष्ठांतयोः ॥९१॥ ललनं ललई प्सायां लड विलासे वा डलयोरेकत्वं ललं विलासमीप्सां वा अटति अट गतौ कर्मण्यण् ललति वा उक्तधातुभ्यां वा बहुलकादाटच् अलति अ
ति वा अल भूषणादौ अलि तृषिभ्यां किचेतीकन् अलीकमहिते पीतिका त्यः वा बहुलकादीकन्नपि अलिकं ह्रस्वदीर्घमध्यमिति राजदेवः गुध्यते गुध परिवेष्टने इन् गा
वो नेत्रे धीयेते यस्मिन् कर्मण्यधिकरणे चेति किर्वा पुंस्ययं गोधिर्भालो महांश्शंख इति त्रिकांडशेषात् त्रीणि भ्रमति भ्रमु चलने भ्रमेर्डूः यद्वा भ्राम्यति क्विप् ऊङ् गमादीनामिति
गमः क्वावित्यत्र वार्तिकेन मलोपः ऊङ् चात्ऽप्राः एकं नेत्रोपरिभागस्थरोमराजेः कुरति कूर्यते वा बहुलकात् कूर्चमस्त्री भ्रुवोर्मध्ये कस्य न श्मश्रु केन त्वेए कं नासोपरि भ्रूद्वयमध्य
स्य तारयति नृप्लवनतरणयोः ण्वुल् तारका ज्योतिषीत्वाभावः तारकादेरित्यमिल्कर्णधारयोर्नट्वयो दृशिकनीनिकायामक्षि च पुमान् त्वात्तारितुत्रिषु कनति कनी दीप्तौ वा बहुलकादीनः स्वा

क्विनतायपर्ध्वं लम्फ्रणा इति विप्रावलेखक्वकनीनिका
तारकेऽक्ष्णः स्यात्कनीनिका तावलीं ८८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लोच्यतेनेन लोचृ दर्शने ल्युट् नीयतेनेन णीञ् प्रापणे ल्युट् दाम्नीतिपक्षे ष्ट्रन् नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च रथे च चक्षुषि नद्यां च रथनाभ्यां च योषिति ईक्ष्यतेनेन ईक्षद र्शने ल्युट् ईक्षणं दर्शने दृशीति हेमः चष्टे च ख्यातेनेन वा चक्षिङ् चक्षेः शिच्चेत्युसिः शिलादनार्द्धधातुकत्वात् ख्याञ् न वा हुलकान्न्यान्नेति मुकुटस्तु पाणिनीयः अश्नुतेऽ नेन वा अशू व्याप्तौ अशेर्निदिति क्सिः अक्षः सिच्चेति मुकुटो पाणिनीयः यद्वा अक्षति अक्षू व्याप्तौ इन् पश्यति दृशिर प्रेक्षणे क्विप् यद्वा दृश्यतेनया संपदादित्वात् क्विप् क्तिन् क्तिन् प्रत्ययस्येति बहुव्रीह्याश्रयणात् क्वचित् पिकुलं दृष्टिर्ज्ञाने दृशिर् दर्शने इति हेमचंद्रः अष्ट अस्यति अश्नुते वा कं कं अश्वादित्वात् साधुः दं त्यमध्यं तालव्यमध्यं च रुघ तेरु दिरु अश्रुविमोचने कर्मणि ल्युट् वाहुलकात् रोदनं रूं दनेस्त्रेपि दुसालं भोमघोत्रियामिति विश्वः अन्यत्रापीति रक् पक्षे अस्रः कोणकचे पुंसि क्लीवमश्रुणि शोणिते जगौ चास्रमश्रुणीत्यूष्मभेदात्तालव्यप्रकरणे तु श्च तालव्य मपि पंच ९३ अपांगति अगि गतौ अच् अपकृष्टो गाद्वा अपकृष्टान्यंगान्यस्माद्वा अपांगस्तु गहीनेस्यान्नेत्रांते ति लकेपि चेति विश्वः वात्याविति शाघः एकं कटाक्षति शायितो अक्षिणी यत्र बहुव्रीहौ सक्थ्यक्ष्णो रिति षच् कं कं टंगड मक्षति वा अक्षू व्याप्तौ कर्मण्यण् कटाक्षका क्षाविति रभ

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी दृग्दृष्टी चास्तु नेत्राम्बु रोदनं चास्रमश्रु च ९३ अपांगो नेत्रयोरन्तौ कटाक्षोपाङ्गदर्शने कर्णशब्द
ग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ९४ उत्तमांगं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम्॥ ९५ सान्तकाव्यापि अपांगे नदर्शनं द्वे कीर्यते शब्दग्रहणा

पक्षिप्यते यद्वा कीर्यते शब्दोऽस्मिन् किरति शरीरे सुखं वा कॄ विक्षेपे कॄवृजृषीति नः यत्तु करोति शब्दं ज्ञानमिति मुकुटः तन्न हृस्वान्नप्रत्ययाविधानात् यद्वा कर्णयति कर्ण भेदने इतः अच् कर्णः पृथासुते ज्येष्ठे सुवर्णालौ श्रुतावपि शब्दो गृह्यतेनेन ग्रहवृदृनिश्चिगमश्च इति अप् संज्ञायां हलश्चेति घञ् विधीयते घापवादत्वात् योगार्थमात्रे तु स न श्रूयतेनेन श्रु श्रवणे ष्ट्रन् श्रूयन्तेऽनया क्तिन् श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्तयोः स्त्रियां ल्युट् वा करणे श्रवणं श्रुतौ च कर्णे नक्षत्रे न नपुंसकं सर्वधातुभ्योऽसुन् षट् ९४ उत्तमं च तदंगं च सन्महदिति समासः शीयते उष्मादिना श्रयते वा अंगे शिरः किच्चेत्यसुन् शिरः प्रधाने सेनाग्रे शिखरे मस्तकेपि च शिरो वाची शिरोऽदंतो रजो वाची रजस्तथा कुमारशीर्षयोरिति ज्ञापकात् शिरः शब्दस्य शीर्षादेशः मुह्यत्यस्मिन्नाहते मुह वैचित्ये श्वन् उक्षन्निति साधुः मस्यते सम मसी परिणामे परिमानेवाक्तः

Digitization by eGangotri

अ·टी· चीति अव्यक्तं कुरति कुरशब्दे इगुपधेति कः कुंतलामूर्द्धजास्तस्माश्चिकुराश्चिकुराः कचाः इति दुर्गः कुंतं कुंताग्राकारं लाति आतोनुपेति कः कुंतलश्च षके वालेयवे नाभू
टी·रा· म्निनी इति पृके इति विश्वमेदिन्यौ वलति वलप्राणने ज्वलादित्वाण्णः वल्यतेऽवरुध्यते वा घञ् वालो ना कुंतलेऽश्वस्य गजस्यापि च वालधौ वाच्यलिंगो भवेद् ज्ञे ह्रीवेरपु
६८ न्नपुंसकं अलंकारांतरे मध्ये वाली वालात्तु दौस्त्रियामिति विश्वः कच्यते कच बंधने पुंसीति घः कचत्यात्मानं वा अच् कचः शुष्कव्रणे केशबंधे पुत्रे च गीःपतेः कचा
करेल्वामिति हैमः क्लिश्यते क्लिश बंधे क्लिशू उपतापे वा क्लिश्नाति वा क्लिशू विबाधायां क्लिशेरन्लोलोपश्च केशेते वा अन्येष्वपीति डः हलदन्तादित्यलुक् क
स्यशिरसि ईशो वा केशः स्यात् पुंसि वरुणे ह्रीवेरे कुंतलेपि च शिरसि रोहति इगुपधेति कः षट् ९५ केशानां समूहः अचित्तेति ठक् केशाश्वाभ्यां यञ्छावन्यतरस्यां
हे केशवृंदस्य अलंति अल्यंते वा अल भूषणादौ कृत्रादिभ्यो वुन् अलकाः कुवेरपुर्यामस्त्रियां चूर्णकुंतले चूर्णस्य कर्चूरादिक्षोदस्य कुंतलाः द्वे भ्रमर इव इव प्र
तिकृताविति कन् भ्राम्यंति वा ण्वुल् अथ भ्रमरको भृंगे गैरिके चूर्णकुंतले एकं काकस्य पक्ष इव शिखायाः अंड इव इव इति वा स्वार्थे वा कन् शकंध्वादिः शिखंडो

चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ९५ तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः ते ललाटे भ्रमरकाः काकपक्षः शिखंडकः
कवरी केशवेशोऽथ धम्मिल्लः संयताः कचाः

तु शिखावर्ही विति तालव्यादौ रभसः शकंध्वादित्वं केचिन्नेच्छंति शिखांडकः शिखंडका विति वा चस्यति सुभू
ता शिखंडो वर्हचूडयोः द्वे सामान्येन शिखायाः वालानां शिखाया वा वालानां तु शिरः कार्यं त्रिशिखं मुंडमेव वा ९६ कूयते कुङ् शब्दे कोररन् जानपदेति ङीष् कं शि
रो वृणोत्याच्छादयति कवरो नि निर्देशादण्णं वा धित्वाऽजिति मुकुटः कृष्णवर्णकं वृणोति वेति स्त्री मीच उक्तसूत्रादर्शनमूलको कवरं लवणाम्लयोः कवरी केशविन्या
सशाकयोरिति हैमः केशानां वेशः मार्जना बंधविशेषः द्वे धमति धम ध्माने सौत्रः विच् मिलति मिल संगमे वा कुल कान् लक् धम चासौ मिल्लश्च मोनो धातोरिति सौत्रे ६८
षु न भवति एकं चूडा इति ख्यातस्य धोते शीङ् हृस्वश्चेति खः शिखा शाखा वर्हि चूडालं गालिक्याग्रमात्रके चूडामात्रे शिफायां च ज्वालायां अपदेपि च चुडाते चुड संमुच्छ्रा
ये चुरादीनां णिज्वेति पक्षे भिदादिपाठाद् अङ् दीर्घत्वे चूडा शिखाग्रयोः वाहुभूषावलभ्योः श्चेति हैमः केशानां पाशः अल्पः केशपाशः गोरादिः त्रीणि शिरोमध्यस्थचूडायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चोटीति ख्याताया: व्रतिनः शिखा जायते जन्यते वा जनेष्टन् लोपश्च यद्वा जटति जटसंघाते अच् जटा लग्नकचे मूले मांस्यां स्त्रीसेपुनर्जटी सटति षट अवयवे अच् सटा जटाकेसरयोः कोटीरस्तु जटा सटेति रभसः ॥ ९७ वेणति वेणृ निशामनवादित्रादानगमनज्ञानचिंतासु इन् प्रग्रह उपसर्गांतरव्यावृत्त्यर्थः करणि श्रोणि वेणयद्ति स्त्री कांडे निगमः वेणी सेतुप्रवाहयोः देवताडे केशबंधे इति हेमः हु ओषितभर्तृकादि धार्यकेशरचनाविशेषस्य शिरसि भवः शरीरावयवाद्यत् ये च तद्धिते इत्यात्र वा केशेष्विति वचनात् शीर्षन् शीर्षण्यं तु शीर्षके सुकेशे पुंसि हे अन्योन्याः संपृक्ते स्नानादिनिर्मले वा केशे पाश्यते पशबंधे चुरादिः घञ् घो वा पाशस्तु मृगपश्चादिबंधने कर्णांते शोभनार्थः स्यात्कचांतेनिकरार्थकः छत्रादयते च निंदार्थः पश्यते पक्षपरिग्रहे घञ् घो वा पक्षो मासार्द्धके गेहपार्श्वसाध्यविरोधयोः केशादेः परतो वृंदे स्वले सखिसहाययोः हसति हस्यते वा हसे हसने हसि मृग्रिणिनि तन् कचवाचकात् परे संतः कलापोऽर्थ्याये वां हस्तः करे करिकरे सप्रकोष्ठकरेपि च स्यात् केशात् सरोज्ञाते नेपथ्ये च गते धृते हिते स्यादायुधज्वाला सूर्यतेजस्सु योषितीति विश्वमेदिन्यौ ९८ तन्वां रोहति मूलविभुजादित्वात्कः तनूरुहं तु लोमि

शिखा चूडा केशपाशी व्रतिनस्तु जटा सटा ९० वेणिः प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे
९८ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनं ९९॥ ((स्यात्पत्रे च न नपुंसकमिति विश्वः तनूरुहस्तु पुत्रे गरुत्मति

लोम्नि चेति हेमः रोहति नामन्सीमन्व्योमन्रोमन्लोमन्निति साधुः यद्वा रूपते रुशब्दे रुङ् गतौ भाषणे वा मनिन् कपिलिकादित्वाल्लत्वं वा लूयते वा मनिन् त्रीणि तस्य वृद्धिः तस्यां श्मश्रु मुखं श्रयति श्रिञ् सेवायां श्मनि श्रयते ड्वन् यद्वा श्मनि मुखे श्रूयते श्रु श्रवणे मितद्र्वादित्वात् डुः संपदादित्विक्विप् वा आगमशास्त्रस्यानित्यत्वान्नतुक् पुंसो मुखे एकं दाढिकायाः ॥ आकल्पनं क्लृपू सामर्थ्ये घञ् कृपो रो लः आकल्प्यते वा आकल्पयति वा स्वार्थे ण्यंतः आकल्पः कल्पने वेशे वेषणं विष्यते वा विष्लृ व्याप्तौ घञ् वेवेष्टि वा अच् तालव्यशांतो पि वेशनं विश्यते वा विशति वा विश प्रवेशने ग्रावत् त्रिष्वप्यधिकरणे घञ् वा वेशो वेश्या गृहे गृहे नेपथ्ये च नयति विच् गुणः ननोनेत्रस्य नेतुर्वा पथ्यं संज्ञापूर्वकत्वान्न ह्रस्वः नेपथ्यं तु प्रसाधने रंगभूमौ वेषभेदे इति हेमः प्रत्यंगं प्रतिख्यातं वा कर्मशाकपार्थिवादिः प्रसाध्यते नेनांगं करणे ल्युट् प

Domain. Digitization by eGangotri

एते वक्ष्यमाणा दश विष्णुपर्यन्ताः अलंकरोति तृन् अलंकर्त्ता इति इष्णुच् हे अलंकरणशीलस्य मंड्यते स्म मडि भूषायां क्तः प्रसाध्यते स्म षाध संसिद्धौ स्वार्थे ण्यन्तः क्तः
अलंक्रियते स्म भूष्यते स्म भूष अलंकारे परिष्क्रियते स्म क्तः संपरिभ्यामिति सुट् परिनिविभ्य इति षत्वं पंच भूषितस्य १०० भ्राजते तच्छीलः भ्राज भासे इति क्विप् भुव
श्चेति चाद्भ्राजेरपि इष्णुच् रोचते तच्छीलः अलंकृञिति ष्णुच् चौ एयलंकारादिना शोभमानस्य भूषणं गुरोश्चेत्यः अलंकरणं कृञः घञ् च हे अलंक्रियतेऽनेन घञ् अं
लंकारः कं कणादिषु उपमादाविति हेमः एवं परिष्कारोपि आभ्रियतेऽनेन भृञ् भरणे विभूष्यतेऽनेन मंड्यतेऽनेन मडि भूषायां ल्युट् मंडनं तु प्रसाधने मंडनोऽलं
करिष्णाविति हेमः पंच भूषाणां १०१ मंकतेऽनेन वा मकि मंडने वा हुलकादुटः आगमशास्त्रस्यानित्यत्वान्न नुम एकोकारं छुकारपाठे वाहुलकादुतोरतउः कि
रति अनेन वा कृ विक्षेपे कृतृकृपेः कीटन् हे चूडायां मणिः चूडामणिः काकचिंचाफले मूर्द्धमणावपीति हेमः शिरसो रत्नं द्वे तरस्तु तरलो पुंसि तरं लाति आतोऽनु

दृष्टेते त्रिष्वलंकर्त्तालंकरिष्णुश्च मंडितः प्रसाधितोलंकृतश्च भूषितश्च परिष्कृतः १०० विभ्राड् भ्राजिष्णु रोचिष्णू भूषा तु स्यादलंक्रिया॥
अलंकारस्त्वाभरणं परिष्कारो विभूषणं १०१ मंडनं चाथ मुकुटं किरीटं पुंनपुंसकं चूडामणिः शिरोरत्नं तरलो हारमध्यगः १०२ वालपाश्या
पारितथ्या पत्रपाश्या ललाटिका कर्णिका तालपत्रं स्यात्कुंडलं कर्णवेष्टनं १०३॥

((पतिकः तरलं चं चले विशेभास्वरेपि त्रिलिंगकं हारमध्यम
णौ पुंसि पवागृसुरयोः स्त्रियां हारस्य मध्यं हारमध्यं हारमध्यं गच्छति अन्येष्वपीति डः एकं १०२ वालपाशे केशसमूहे साधुः तत्र साधुरिति यत् वालेषु पाश्या पा
शसमूहो वा परितः तथाभूता परितथ्या चतुर्वर्णादित्वात्स्वार्थे ष्यञ् हे सीमंतस्थितायाः स्वर्णादिपट्टिकायाः स्वामी तु प्रथमं वालवंधनमुक्तावलीनामित्याह
पाशसमूहः पाश्या पत्रमिव पाश्या ललाटस्यालंकारः कर्णललाटात्कनलंकारे हे ललाटाभरणस्य कर्णस्यालंकारः प्राग्वत् कर्णिका कर्णभूषणे वीजकोशे स
रोजस्य करमध्यांगुलावपि कुट्टिन्यां हस्तिहस्ताग्रे इति हेमः तालस्य पत्रं सुवर्णरचितस्यापीदमेव नाम तालपत्रं तु कुंडले स्यात्तालपत्री रंडायामिति हेमचंद्रः ता
टंकोप्यत्र हे कर्णाभरणस्य च कुंडते कुंड्यते वा कुडि दाहे कुडि रक्षायां वा वृषादित्वात्कलच् कुंडलं कुंडला कारं लाति वा कुंडलं कर्णभूषायां पाशेपि वलयेपि च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रीवायां भवं कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेष्विति ढकञ् ग्रीवाया अण् चेति ठञि ग्रैवेयमपीति मुकुटः भूष्यतेनया भूष अलंकारे गुरोश्च हलः कंठस्य भूषा द्वे कंठे निख्याता
याः लंबते लबि अवस्रंसने लुः लडति लड विलासे लटः शतृ उगितश्चेति ङीप् शप्श्यनोर्नित्यमिति नुम् डलयोरेकत्वं ललंत्येव स्वार्थे कन् द्वे किंचिल्लंबमानकंठ
भूषणस्य सैव ललंतिका सुवर्णैः कृता प्रालंबते ण्वुल् एकं लंबकंठिकायाः सैव ललंतिका मुक्ताभिः कृता उरसः सूत्रमिव इवे प्रतिकृतौ कन् एकं १०४ मनो ह्रियतेऽनेन
ह्रियते वा घञ् यद्वा हारयति मनः स्वार्थे ण्यंतात् च हारो मुक्तासरे युधि मुक्तानामावली दीर्घा पंक्तिः हारो मुक्तावली हार इति रभसः द्वे हारः शतयष्टिकः स न देवैः छं
द्यते छद संवरणे घञ् यष्टिर्हारलता शस्त्रभेदयोरिति विश्वः यष्टिर्लता सरः सरिदित्यनेकार्थमाधवी एकं शतलतिकहारस्य यष्टीनां भेदात् हारभेदाः स्युः गुध्यते
गुध परिवेष्टने उंदि गुधि कुषिभ्यश्चेति सः कित् बाहुलकाद्गुणाभावो न गुत्सः स्यात्स्तवके संवे हारभिन्नं च्छिपल्लयोरिति रत्नमालायां तेषु विश्वः गुत्सोपि स्याद्गुच्छः स्तवके सं

ग्रैवेयकं कंठभूषा लंबनं स्याल्ललन्तिका स्वर्णैः प्रालम्बिकाथोरःसूत्रिका मौक्तिकैः कृता १०४ हारो मुक्तावली देवच्छंदोसौ शतयष्टिकः॥
हारभेदा यष्टिभेदाद्गुत्सगुत्सार्द्धगोस्तनाः १०५ अर्द्धहारो माणवक एकावल्येकयष्टिका सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः १०६ आ
वापकः पारिहार्य्यः कटको वलयोऽस्त्रियां॥

वे हारभित्कलापयोः गृप्यते गृहू शब्दे बाहुलकात्तच्छकृ द्वात्रिंशल्लतिको गुत्सो गुच्छार्द्धस्तत्त्वसंख्यकः गुत्सस्यार्द्धः
समप्रविभागाभावात् पुंस्त्वम् चतुर्विंशतियष्टिको हारो गुत्सार्द्धः चतुस्त्रिंशल्लतो हारश्चतुःसरिश्च गोस्तनः गोः स्तन इव १०५ विंशतियष्टिको हारो माणवकः परिकी
र्त्तितः अर्द्धं नैकदेशेन कृतो हारः शाकपार्थिवादिः माणवो बालः स इव यावादित्वात्कन् माणवको हारभेदे बाले कुपुरुषे वटौ एकसरा एका चासावावली च एका
वल्येव सप्तविंशतिमुक्ताभिः कृता नक्षत्राणां मालेव प्रत्येकमेकैकं १०६ आउप्यते डुवप कर्मणि घञ् स्वार्थे संज्ञायां वा कन् परिह्रियते ऋहलोर्ण्यत् परिहार्य एव
मंत्राद्यण् यद्वा घञंताच्चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् कटति कटयते वा कटे वर्षावरणयोः क्वुन् कटकः स्त्रीनितंबो द्रेदंतिनां दंतमंडने सामुद्रलवणे राजधानी व
लययोरपि वलते वल संवरणे वलि मलि तनिभ्यः कयन् वलयः कंठरोगे नाकं कणे पुन्नपुंसकं चत्वारि प्रकोष्ठाभरणस्य॥

Digitization by eGangotri

केवाहुष्टि रसियोनि शुभि श्रंलेखर्जादित्वादूरः वाहुलकाट्टिलोपः हलहंतादिति सप्तम्या अलुक् अंगं दयते दायति घतिवा देङ् पालने दैप् शोधने वा दो अवखंडने वा आं
नुपतिकः अंगदः कपिभेदे नाकेयूरेतु नपुंसकं अंगदायाम्यादिग्दंति हुसिन्या मपियोपिनिदृश्यगांडभूषणस्य अंगुलीभवं जिह्वामूलांगुलेश्छः स्वार्थे कन् कपिलकादित्वाद्
गुलीयकमितिमुकुटः तन्न तत्रेरकानुवादेनलविधानात् लानुवादेनरेफविधानाभावात् वालमूलेतिवर्तुं शक्यत्वाच्च ऊर्मिरिव इवेतिकन् ऊर्मिप्रकाशं कायतिवा ऊर्मिः स्त्री
पुंसयोर्वीच्यांप्रकाशेवेगभंगयोः इ अंगुलीभूषणस्य १०७ साऊर्मिका अक्षरैः सहिता चेत् अंगुल्यामुद्रंराति आतइतिकः मोदते वा मुदहर्षे स्फायितंचीनिरक् अंगुल्याः मु
द्रा एकं कंभुभं कलतिकलशृव्दे अच् कंकतेवा ककिलौल्ये वहुलमन्यत्रापीतिवा अनुदात्तेतश्च हलादेरिति वायुच् पृषोदरादित्वाणत्वं कंकणं करभूषायां सूत्रमंडने
द्रा एकं कंभुभं ... हेमखंगति
योरपि करं भूषयति कसेभूष्यनेनेन वा ल्युट् स्त्रीवं स्यामंडने सूत्रे कंकणं करभूषणमितिरभसः हस्तमंडनसूत्रे स्यात् कंकणो नापुमान् सरइतिरत्नकोशः हेमखंगतिर्धयो
लातिकः पृषोदरादिः मीयते ऊर्मि नप्रक्षेपणे कलंवा दयश्चेतिसाधुरितिमुकुटः श्चितयः। तन्मूत्रस्योज्वलदन्तादिषु दर्शनात् मेखलाद्विनितं वेस्यादूष्णनास्वङ्गंधयो

केयूरमंगदंतुल्येअंगुलीयकमूर्मिका १०७ साक्षराङ्गुलिमुद्रासा कङ्कणं करभूषणं स्त्रीकट्यांमेखला कांचीसप्तकीरशनातथा १०८ क्लीवे
॥ सारसनंचाथपुंस्कट्यांशृंखलंत्रिषु॥

रितिहेमः कांचते कांचिर्दीप्तिवंधयोः इन्वाङीष् अन्येभ्योपीति दीर्घ इतिमुकुटश्चिंत्यः धातोरेव दीर्घवत्वात् अ
न्येभ्योपीत्यनादृष्टस्य दीर्घविधायकस्याभावात् अन्येषामपीति वक्तुं युक्तत्वाच्च कांचीस्यान्मेखलादाम्निग्रामभेदेनगरस्य चसप्तति षयसमवाये वाहुलकात्तनू स्वार्थेक
न् सप्तभिरत्नेकाभिः किंकिणीभिर्वासप्तस्वरान् वाकायतिवा गौरादिः कार्यति अस्यांमूलविभूजादित्वात्क इतिमुकुटश्चिंत्यः अधिकरणेतन प्रवृत्तेरसंभवात् अश्नु ७१
ते अश्नूव्याप्तौसंघाते च अश्नभोजने अश्नोरशचेतियुः रशनादेशः यद्वारश्नाति रशशब्दे सौत्रः वहुलमन्यत्रापीति युच् तालव्यमध्या दंतमध्यापि रसशब्दे रस आस्वाद
नेचुरादिः वहुलमितियुच् एणासश्चंध्यति वायुच् तालव्या अपिदंत्याश्च शवरशवलशूकराः रशनापिजिह्वायामितिविश्वः रसनंनिस्वने नादेरसनां कांचिजिह्वयोरित्य
जयधरसनंस्वदनं वाथ रसना कांचिजिह्वयोः रसनं चापि रास्नायामितिविश्वप्रकाशः एवमुभयत्रसाधुः १०८ सारमुत्कृष्टसनमस्यषणसंभक्तौ घः सहारसनेनास्यपुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादेरभसः पंच स्त्री कटिभूषणस्य स्त्रीत्वविवक्षितं पुंकटिभूषणे स्त्रीकट्यां वस्त्रग्रंथने इति स्वामी एकयष्टिर्भवेत् कांची मेखला त्वष्टयष्टिका रसना षोडश ज्ञेयाः कभ
लापः पंचविंशकः इति मेदस्लिहनविंवक्षितः पुंसां कट्यां चेत् कांची शृंगेः स्खलति खलसंचये अ च पृषोदरादिः शृंखली पुंश्चली कांच्यां लोहरज्जौ च बंधने एकं पादस्यां
गरमिव यद्वा पादस्य वांगं वा दांगं द्युति दायति द्यति वा दो अवखंडने दैप शोधने वा देङ् पालने वा आतोनुपेति कः तुलां तुलया वा कोटयति कुट प्रतापने चुरादिः अच
इः तुलाकारं कोटिरग्रमस्य तुलाकोटिर्मानभेदे ऽनुदे स्यान्नूपुरेऽपि चेति हेमः मंजति मजि ध्वनौ सौत्रः बाहुलकादीरन् गंभीरादयश्चेतीरन्निति मुकुटोऽपाणिनीयो
गंभीरादिगणाभावात् नुवर्ने नूयते वा णू स्तुतौ सप दादिः नु विपुरति पुर अग्रगमने इगुपधेति कः मंजीरोऽस्त्री स नूपुर इति रभसः चत्वारि १०९ हंसद्वकायति अन्ये च पी
तिडः हंसरवरूव इति कन्वा पादस्य कटकः वलयः द्वेष्वपि पर्याया इत्येके किंचित् किणं करोति किणशब्दात् तत्करोतीति ण्यंतात् दच गौरादिः कंकणीति स्वामी कंकनं क

पादांगदं तुलाकोटिर्मंजीरो नूपुरोऽस्त्रियां १०९ हंसकः पादकटकः किंकिणी क्षुद्रघंटिका त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ११०
वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजं १११ अनाहतं निष्प्रवाणि तंत्रकं च नवाम्बरे ॥

किणतौ घञ् कं के गता वणति अण शब्दे अच गौरादिः णकं ध्वादि यद्वा कं सुखं कणति कण शब्दे अच घंटेव इवे इति कन् यद्वा घंटयति घंटति घटि दीप्तौ ण्वुल्
क्षुद्रा चासौ घंटिका च कंकणः स्यात् प्रतिसरः कंकणी क्षुद्रघंटिकेति भागुरिः द्वे घुघुरा इत्यस्य त्वगादि वस्त्रस्य योनिः कारणं एकं वक्ष्यमाणानि तंत्रकांतानि दश ११० व
ल्कस्य विकारः तस्य विकार इत्यण् क्षुमाया विकारः प्राग्वत् क्षौमादि वाल्कः क्षौमं दुकूलं जांशुके शाणजे तसीजे फलस्य विकारः कर्पासाः बदरायाश्च विकारः फलं अव
यवे चे सण तस्य फले लुक् कर्पासस्य बदरस्य च विकारः प्राग्वदण् फालं तु वसने फाल उ स्तुतौ लौ चंद्री रोपकरणे पुंस्त्रि शाकरसीरिणोरिति विश्वः कोशसंभूतं कोशा
ड्ढूरं कोमर्वरं कोरमनुष्योऽण चेत्यण् मृगरोमजमित्यत्र मृगशब्देन पशुमात्रं ग्राह्यं तेन कंबलाद्यपि रांकवं १११ न आहतं प्रोयते नया वेत्रु तं तु संताने करोति स्फुटनि
र्गताप्रवाणी तंतुवायशलाकाऽस्मात् निष्प्रवाणि श्वेति साधुः तंत्रादचिरापहृतं तंत्रादचिरापहृत इति साधुः नवं च तदंबरं च चत्वारि छेदभोगक्षालनरहितवस्त्रस्य ॥

धौतयोः प्रक्षालितयोर्वस्त्रयोर्द्वयम् उद्गम्यते ऽभिलप्यते गम्लृ गतौ अनीयर् युगमित्यविवक्षितं ११२ पत्त्रेषु कृता ऊर्णा पत्त्रोर्णा ल्युट् अत्र अर्श आद्यच् पत्त्रोर्णं धौतकौशेयं पत्त्रोर्णः शो
णकद्रुमे इति हेमः धाव्यते स्म धावु गतिशुद्ध्योः क्तः धौतं च तत्कौशेयं च द्वे प्रक्षालितकौशेयमेव पत्त्रोर्णं ख्यमित्यन्ये बहु मूल्यमस्य महत् धनं मूल्यमस्य द्वे बहुमूल्यवस्तुनः।
क्षौति क्षूयते वा टु क्षु शब्दे अर्तिस्तुसुखिति मन् क्षौमम मदे दुकूले स्यात् क्षुमाया विकारः क्षौममिति स्वामी पर्यायान्तराभिधानाय पुनरभिहितं दुष्टं कूलति कूल आवरणे इगुप
धेति कः पृषोदरादिः द्वे पट्टवस्त्रस्य निवीयते स्म व्येञ् संवरणे क्तः संप्रसारणं हलि निवृतमिति तु स्वामी प्राव्रियते स्म वृञ् वरणे क्तः द्वे ११३ दश्यते दंश दशने भिदादि अङ् दशा
वर्तिमवस्थायां वस्त्रान्तभूम्नि पुंस्त्रियोरिति रभसः वस्यते वस आच्छादने वसस्ते हनादेश्चुरादिः चुरादीनां णिज्वा वेमेस्ति वस्तिर्द्वे नेति रुहे नाभ्यधोभूम्नि दशा सु च द्वे व
स्त्रान्तावयवानां दीर्घस्य भावः गुणेति ष्यञ् आयम्यते नेन घञ् आयमनं वा आयाति वा या प्रापणे अर्तिस्तुसुखिति मन् आनह्यते नेन णह बंधने घञ् आरोह इति क्वचि
त्पाठः आरुह्यते नेन घञ् आरोहस्य वरोहे च वरायोषित्कटावपि आरोहणं गजारोहे दीर्घले च समुच्छ्रये त्रीणि परिणह्यते नेन घञ् विशालस्य भावः तल् द्वे पनहा

तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगं ११२ पत्त्रोर्णं धौतकौशेयं बहुमूल्यं महाधनं क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु ११३ स्त्रियां
बहुत्वे वस्त्रस्य दशाः स्युर्वस्त्रयोर्द्वयोः दैर्घ्यमायाम आनाहः परिणाहो विशालता ११४ पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ ॥

तिरस्य जातस्य ११४ पटते पठ गतौ वाहुलकादत् भूतपूर्वं पट भूतपूर्वे चरट् पटच्चर पटदित्यव्यक्तशब्दं चरति सर्वप्रातिपदिकेभ्यः क्विब्वा चारे शत्रन्ता न्चरट्
जीर्णं च तद्वस्त्रं च द्वे नज्यते ओलज्जी व्रीडे वाहुलकात् नन् स्वार्थे कन् नक्तकं मुखमस्मात् पृषोदरादित्वान्मलोपः क्वचित् लक्तक इति पाठः लक्यते स्म लक आस्वाद
ने क्तः स्वार्थे कन् किरति क्षणोति वा कृ विक्षेपे कृ हिंसायां वा करोति वा विच् कर् चासौ पटश्च पृषोदरादित्वात् कर्पटः शाकंध्वादिः द्वे प्रस्वेदादिमार्जनार्थे हस्तस्य वस्त्र।
खंडस्य स्वामी तु द्वे वद्रव्यं येन पूयते तत्र रूढायमित्याह मुकुटस्तु मलिनत्वादि दुष्टजीर्णवस्त्रखंडस्य वस्यते ऽनेन वा वस आच्छादने ष्ट्रन् आच्छाद्यते नेन वा
ल्युट् वस्यते नेन वा वसेर्णिदित्यस्तुन् चिल्यते नेन वा चिल वसने घञ् गौरादिः कल्य चेलडितिदित्वनिपातनाद्वा चेलो धमे त्रिषु नपुंसकं तु वसने इति विश्वः ॥ ७२

CC-0. In Public Domain. Digitization by eGangotri

वस्यतेऽनेन वा ल्युट् वसनं छादने वस्त्रे अंशुः सूत्रादिसूक्ष्मांशौ किरणे च इति मेदिनी अंशून् कायति कः यद्वा अंशुभिः काशते काशृ दीप्तौ अन्येष्वपीति डः अंशुकं शुक्लवस्त्रे
स्यादुत्तमात्रोत्तरीययोः इति रभसः ४२ ११४ शोभनं चेलमेव स्वार्थे कन् स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्तन्तेऽपि पटति पट गतौ पट विस्तारे वा अच् यद्वा पत्यते
नेन पट भासने खनो घ चेति घो घित्वादन्यस्मादपि हलश्चेति घञि संज्ञापूर्वकत्वाद् वृद्ध्यभावः क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति घञ्विषये पुंसीति घो वा घ
ञर्थे क इति मुकुटः तन्नपरिगणनात् पटश्चित्रपटे वस्त्रेऽस्त्री प्रियालद्रुमे पुमान् अस्त्रीति चित्रपटद्वयोरदर्शनादिति स्वामिवचिंसः उक्तमेदिन्यामस्त्रीति दर्शनात्
पटोऽस्त्री कर्पटः शाटः सिचयः प्रोतलक्तकाः इति रभसः १ शोभनं वस्त्रस्य वरं श्रेष्ठं वरणं वा अश्नुते इन् वराशिर्नेतितास्लव्यान्ते शाब्दिकः वराशिः स्यात् खरुव
रो वराशिः स्थूलशाटक इति दन्त्यान्तेषु रभसः शटति शट रुजादौ ण्वुल् स्थूलश्चासौ शाटकश्च वराशिर्नेसन्त्वयः २ स्थूलपटस्य चत्वारः एकार्थाः इत्येके निचीयते चुल
समुच्छ्राये चुरादिः घञ् यद्वा चोड्यते चुड संवृतौ चुरादिः घञ् डलयोरेकत्वं निचुलोऽपि निचुलस्तु निचोले स्यादिज्जलाख्यमहीरुहे निचोलं तु नपुंसकमिति र

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकं ११५ सुचेलकः पटोऽस्त्री ना वराशिः स्थूलशाटकः निचोलः प्रच्छदपटः समौ रल्लककंबलौ ११६
अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा ११७॥

९ भसः स्त्रियां निचोली त्वपीति राजदेवः प्रच्छद इति प्रच्छ
द्यते वा छद संवरणे अच् घो वा प्रच्छाद्यतेऽनेन वा चुरादिण्यन्तात् घः छादेर्घेऽद्व्युपसर्गस्य इति ह्रस्वः प्रच्छदश्चासौ पटश्च १ डोलिकाद्यावरणपटस्य स्त्रीपि धानपटस्य वुर
के निरव्यात स्यत्यन्ये येन तूलशय्यादि प्रच्छाद्यते तस्येति स्वामी रमते क्विप् गमादीनां क्वाविति मलोपः तुक् लाति क्विप् रश्चासौ लाश्च स्वार्थे कन् केऽण इति ह्रस्वः
यद्वा रमलं संपदादित्वात् क्विप् रत् क्रीडालक्यतेऽनेन लक आस्वादने घः रल्लं लाति वा कुन् रल्लकः कंबले स्मृतः तथैव कंबलमृगे इति हेमः कं वाति कं व्यते वा कं वगतौ वृ
षादित्वात् कलच संज्ञापूर्वकत्वान्न लोपो न कंबलः कृमिसास्नयोः नागप्रभेदे प्रावारे वैकल्प्ये कंबलं जले इति हेमः २ ११६ अन्तरे भवं गहादित्वाच्छः उपसंवीयते
ऽनेन वा व्येञ् संवरणे डुधाञ् धारणे कर्मणि ल्युट् इति ल्युट् अधोदेहभागस्यांशुक चत्वारि परिधानवस्त्रस्य प्रावियतेऽनेन वृञ् वरणे वृणोतेराच्छादने इति घञ् उपसर्गस्य घञि

... University, Balmeeki Campus, Kathmandu

अ॰ टी॰ संवीयतेनेन ल्युट् संव्यानं छदनं अंशुके इति विश्वमेदिन्यौ उत्तरस्मिन् देहभागे भवं गहादित्वाच्छः पंचापरि वस्त्रस्य चान्यवेनेवा चुलसमुच्छ्राये अच् घोवा अस्त्र श्चोलः गौ
टी॰ रा॰ रादि॰ चोली कूर्परः स्यात्कफोणौ च जानुन्यपि च पुंस्ययं कूर्परे स्यते कूर्परो स्यतेत्र वा कूर्परे आसेवा असु क्षेपणे आस उपवेशने वा घञ् पृषोदरादिः स्वार्थे कन् कूर्पासस्त्वर्द्धं
७३ चोलक इति हारावली आप्रपदीनकं चुकस्य स्त्रीणां कंचुलिकाख्यस्य द्वे इति स्वामी नितरां शीर्यते हिमानिलावत्रानेन वा शृहिंसायां शृवायुवर्णनिवृतेष्विति घञ् उपस
र्गस्य घञीति दीर्घः एकं ११८ उरोरुहं अर्द्धं नपुंसकमिति समासः अर्द्धोरो काशते अन्येभ्योपीति डः चंडा कोपनांच र स्त्रियमतति कुन् अर्द्धोरुकं वरस्त्रीणां वासश्चंडातकः
स्मृत इति पुंस्कांडे वोपालितात् पुंल्लिंगोपि एकं लंहगा इति ख्यातस्य प्रपदात्ता आप्रपदं प्राप्नोति आप्रपदं प्राप्नोतीति खः यदा प्रपदं प्राप्नोति तदा प्रपदीनं एकं पादा
ग्रपर्यंतलंबमानवस्त्रस्य ११९ वितन्यते घञ् वितानो यत्तउल्लोचे विस्तारे पुन्नपुंसकं क्लीवं दृष्टत्वविशेषे स्यात्त्रिलिंगो मंदे तुच्छयोः उद्गूर्द्धं लोचति लोचृ भासने उद्गूर्द्धं लोच्य
ते वा लोचृ दर्शने अच् घञ्चा कुत्वं न निष्ठायामनिट इति वचनादस्य तु तत्र सेट्त्वात् द्वे चंद्रवा इति ख्यातस्य दूष्यते दुष वैकृत्ये ण्यंतात् चो यत् दोषो णौ वि न्यूः दूष्यं त्रि

संव्यानमुत्तरीयं च चोलः कूर्पासकोऽस्त्रियां नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ११८ अर्द्धोरुकं वरस्त्रीणां स्याच्चंडातकमंशुकं॥
स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ११९ अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि प्रतिसीराजवनिका स्यात्तिरस्करिणी च सा १२०
परिकर्म्माङ्गसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा॥ ११ षुदूष्यल्पीयक्षौवंवस्त्रे च तन्द्वे आद्येन कुटरपटकुटीपटवासादिग्रहः एके वस्त्रगेहस्य प्रतिसिनोति प्रा

तिषायते वा षिञ् बंधने शुसिचिमीनां दीर्घश्चेति रक् जवन्यस्यां जुः सौत्रो गतौ वेगे च ल्युट् स्वार्थे कन् यमनिकेति वा पाठः यमयति यम उपरमे ल्युट् कन् तिरस्करोति ति ७३
रस्क्रियतेनया वा ग्रह्यादित्वाण्णिनिः निपातनात् ह्रस्वाभावः संज्ञापूर्वकत्वात् वा द्विनीयेन ल्युट् स्त्रीलिंगव्यवधानपट्याः कनातन इति ख्याताया: १२० क्वचित् पर्यंकिका
परिकरः पर्यंकश्चावसविथका अचलं त्वंशुकान्ते नीवी सारसनमुच्चयः परिमल्लवर्जनार्था क्रिया परिकर्म स्नानोद्वर्तनादि प्रतिकर्मेति क्वचित् पाठः अंगं संस्क्रि
यतेनेन घञ् द्वे शरीरशोभाधायककर्मणः मार्जनं मृजूशौचालंकरणयोः चुरादिर्वा आवादित्वात् क्तिन् तितुत्रेति नेट् णिलोपः वा हलकान्तेरित्यन्ये ण्यासश्रंथो युच्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मार्जनो लोध्रः शाखिनि मार्जनं शुद्धिकरणे मार्जना मुरजध्वनौ इति हेमः भिराद्यङ् त्रीणि अंगोच्छनादिनांगनिर्मलीकरणस्य उद्वर्त्तते नेन वृतु वर्त्तने एयंतः ल्युट् उत्साद्य
ते नेन षद्लृ विशरणे द्यो एयंतः ल्युट् उत्सादनं संमुत्वे ख्यो द्वर्त्तनो द्वाहनेषु चेति हेमः द्वे उद्वर्त्तनद्रव्येणांगनिर्मलीकरणस्य आप्लवनं प्लुङ् गतौ विभाषाङि रुप्लुवोरिति वा घञ्
पक्षे ऋदोरप् १२१ स्नाने शौचे भावे ल्युट् त्रीणि चर्चनं चर्च अध्ययने चिंतिपूजिकथी त्यङ् चर्चा स्याच्चर्ममुंडायां चिंतास्थासकयोरपीति हेमः धात्वर्थनिर्देशे ण्वुल् चर्चिका
स्वार्थे ष्यञ् तिष्ठति ष्ठा गतिनिवृत्तौ बाहुलकात्सः स्वार्थे कः स्थासकः पुंसि चार्चिक्ये जलादेरपि बुद्बुदे इति विश्वः त्रीणि चंदनादिना देहविलेपनस्य प्रबुद्धिः बुध अव
गमने भावे ल्युट् अनुपूर्वाद्भावे घञ् द्वे गात्रगंधस्य प्रयत्नेनोद्बोधनस्य यथा कस्तूरिकादेर्मर्दनादिना पत्राकाराले खा शाकपार्थिवादिः पत्रार्थेः गुलिः अंगुलिव्यापारः समे
स्त्रियां द्वे स्तनकपोलादौ रचितस्य केसरादिना तिलकविशेषस्य १२२ तमालपत्त्रमिव तनोति क्रमितात तमालपत्त्रं तापिच्छे तिलके पत्रके पि चेति विश्वः तिलस्नेहने तेलति वा ति
लगतो क्वुन् तिलको ऽश्वद्रुमभिदोः पुंड्रके तिलकालके तिलकं रुचके लोम्नीति हेमः चित्रयति चित्रचित्रक्रियायां क्वुन् चित्रं करोति वा अन्येभ्योपीति डः चित्रकं तिलके

उद्वर्त्तनोत्सादने द्वे समे आप्लाव आप्लवः १२१ स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनं अनुबोधः पत्रलेखा पत्रांगुलिरिमे समे १२२॥
तमालपत्रतिलकचित्रकाणि विशेषकं द्वितीयं च तुरीयं च न स्त्रियामथ कुंकुमं १२३ काश्मीरजन्माग्निशिखं वरं बाल्हीकपीतनं ॥

नान्तव्याघ्रमिदं चु पादिषु विधिनष्टि शिष्टा विशेषणे ण्वुल् विशेषको स्त्री तिलके विशेषेण तरिस्त्रिषु तमालस्तिलके खड्गे इति विश्वात् तमालो पि द्वितीयं तिलकं तुरीयं विशे
षकं च स्त्रियां न भवतः किंतु पुंनपुंसकयोः चत्वारि कुंकुम मिति शब्दोस्ति वा व्यलेनास्य अर्थः आद्य च यद्वा कुकयते कुक आदाने बाहुलकादुमक् आच्छीत्यत्र तुमिति
योगविभागात्तुम् १२३ कशति कष्यते वा कश शब्दे कशेर्मुट्चेति रन् गंभीरादयश्चेति मुकुट एतत्सूत्रादर्शनमूलकः काश्मीरजन्मास्य काश्मीरं कुंकुमेपि स्यादं कं पुष्क
रमूलयोः अग्निशिखशिखाकेसरोऽस्य अथाग्निशिखमुद्दिष्टं कुसुंभे कुंकुमेपि च व्रियते वृञ् वरणे ग्रहवृदृनिश्चिगमश्चेत्यप् वरो हतौ विटजामातरि श्रेष्ठे देवतादेरभीप्सिते वरं तु घुसृणे किं।
चिदिष्टे इति हेमः कश्मीरजं वह्निशिखं वाल्हीकं पीतनं वरमिति वाचस्पतिः वल्हते वल्ह प्राधान्ये वा बाहुलकादीकन् वल्हीके देशे भवं कच्छादिभ्यश्चेत्यण् वाल्हीकं वाल्हि

अ॰ टी॰ चंपिशुनं वरमिति हलायुधाच्चार्न्वपि पीतं करोति तत्करोतीति ण्यंता ह्मुः यद्वा पीयते पीङ् पाने वाहुलकात्ततन् गुणाभावश्च पीतनं पीतदारुहरिकुंकुमे हरितालेच पुमानि

टी॰ रा॰ मानके मतः स्यादिति सगत्यर्थेति क्तः रक्तं नील्यादिरंजितेकुंकुमे सृज्यनुरक्ते प्राचीनामलकेऽरुणोऽपीति हैमः संकोचनि संकुच्यते वा यद्वा संकोचयति संकोच्यते वा कुच

७४ संपर्चने कौटिल्य प्रतिष्टंभविलेखनेषु अच् घञ्वा संकुचतीति मुकुटो नसम्पट् कुचसंकोचनइत्यस्य कुटादित्वेनाचि गुणाभाव प्रसंगात् संकोचोभीनभेदे चवंधेऽक्लीवंतु

कुंकुमेइतिविश्वमेदिन्योपि शति पिश अवयवे सुधिपिशिमिथिभ्यः किदित्युनन् पि[illegible]नं कुंकुमेपिच कपिवक्त्रेच काकेनासूचकक्रूरयोस्त्रिषुपृक्कायां पिशुना स्त्रीस्यात्तद्धा

तिधीयते वाडुधाञ् धारणेदोसुसुधागृधिभ्यः क्रन् धुमाद्येतीत्वं धीरो धैर्यान्विते [illegible] वुधेऽक्लीवंतु कुंकुमे लोहितं चतच्चंदनं च लोहितमपि लोहितं रक्तगोशीर्षेकुंकुमेचकु

चंदनेएकारव्शकेसरइतिख्यातस्य १२४ रक्ष्यते नया वालक्ष्यतेनयावारक्षपालने लक्षदर्शनेगुरोश्च हलइत्यः प्रज्ञाद्यण अजादित्वाट्टाप् अतएवलाक्षायां रक्षत्ते

रक्षतिरुद्र जायते फलिपाटीति उः तोमारेफः यत्तु वाहुलकात्तुगत्वाभावश्चेति मुकुटः सउक्तसूत्रास्मरणमूलकः योति यूयते वा अच् क्तादेर वायवएव प्रज्ञाद्यण

रक्तसंकोचपिशुनं धीरं लोहितचंदनं १२४ राक्षालाक्षा जतु क्लीवे यावोऽलक्तो द्रुमामयः लवंगं देवकुसुमं श्रीसंज्ञमथ जायकं १२५ कालीयकं

यावो लक्तेपाकभिदीतिहैमः नलज्जते स अलक्षी वीडे वाहुलकात्तन् यद्वा नलक्यते स अभक्षत्वात् क्तः यद्वा नर १२६ च कालानुसार्य्यं चाथ समार्थकः॥

क्तोऽस्मात् कपि लकादित्वाल्लत्वं द्रुमाणामामयः षट् महावरइति ख्यातस्य लुवी तिलूयते वा तरत्यादिभ्यश्चेत्यंगाच् देवानां कुसुमं कुसुमेषु देवइव राजदंतादिः देवयो

ग्यं कुसुमं वा शाकपार्थिवादिः श्रियः संज्ञाः संज्ञायस्य त्रीणि जयतिगंधांतरं जि अभिभवेण्वुल् १२५ कालस्यवर्णस्येदं वृद्धाच्छः स्वार्थेकन् क्वचित्कालेयमिति पाठः क

लेरिदं सर्वत्राग्निकलिभ्यामितिढक् कालीयकं च कालेयं वर्णकं कांतिदायकमिति व्याडिः अनुसृियते सुगंधो एयत् कालेन वस्तुनानुसार्यं कालानुसार्य्यं शै ७४

लेयकालीयधूम्रपादुमे इति विश्वमेदिन्यो त्रीणि सुगंधद्रव्यभेदस्य वंशाइवइवेतिकन् क्वचिद्वंशिकेति पाठः वंशस्य त्वक्ठन् न गुरुपस्माद्वा कुसुंवुरुक धान्या

कमगुरुर्वा पुंसि लघुनामचेतिवीपालितः अगुरुर्जोंगकेलघो

CC-0. In Public Domain. Digitization by eGangotri

शिंशिपापामिति हेमः राजानमर्हति अर्ह प्रशंसायामित्यच् राजार्हं लोंगके ल्लीवं राज्ययोग्येः भिधेयवदिति विश्वः लुह्यते लुह गार्द्धे घञ् रो हति अचरलयोरैक्यं वा लूनोहद्
निमुकुटस्त्वपालिनीयः लोहाख्यी शास्त्रकलहे जोंगके सर्वतैजसे कृमिभिर्जन्यते अन्येभ्योपीति डः जुंगति जुंग्यते वा जुगि वर्जने कुनू पृषोदरादिः वाहुलकाद्दुणो वा राजार्हव
शिकं नतं वनद्रुमः परमदावंशाकं लोहनामकमिति वाचास्पतिः अगुरुप्रवरं लोहं क्रिमिजग्धमनार्थकमिति शाश्वतः षडगुरुणः १२६ कालं च तदगुरु च कालागुर्वपि अगु
रुरुच्यते इति सुभूतिः द्वे कालागुरुणः मल्लिकापुष्पस्येव गंधो यस्या उपमानाच्चेनीत् यदगुरु मल्लिगंधि तत् मंगल्या स्यात् मंगले साधुः तत्र साधुरिति यत् मंगल्यः स्यात्त्रायमा
लाश्वत्थविल्वमसूरके स्त्रियां शम्यामधः पुष्पीमिसि शुक्लवचासु चरोचनायामयोदध्निल्लीवं शिवकरे त्रिषु इति विश्वमेदिन्यौ एकं यस्मान् धूपायति धूपसंतापे आयाद
यआर्द्धधातुके वा कर्मण्यण् सर्जस्य सालस्य रसः न राति दुःखं वाहुलकाद्धकुराल इति स्वामी अरालः सर्जवक्रयोरिति रालः सर्वरसोऽराला धूपको वह्निवल्लभ इति च
रभसः सर्वे रसा येन रस आस्वादने दन्तः एयंतः घञ् अज्वा सर्वरसा यस्मिन्वा १२७ नानाकृतिगंधत्वात् बहूनि रूपाण्यस्य बहुरूपः स्मरे विट्ठो सरटे घृणके शिवे इति

वंशाकागुरुराजार्हलोहकृमिजजोङ्गकं १२६ कालागुर्वगुरुः स्यात्तु मङ्गल्या मल्लिगंधि यत् यक्षधूपः सर्जरसो रालसर्वरसावपि १२७
बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ तुरुष्कः पिण्डकः सिल्हो पावनोऽप्यथ पायसः १२८ श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ॥

हेमः पंचरालस्य वृकधूपस्तु सरलद्रवकृत्रिमधूपयोः कृत्रिमश्चासौ धूपश्च स्वार्थे कन् तुनोर्ति तुर त्वरणे वाहुलकादुसगुणभावश्च स्वार्थे कन् तुरुष्कः सिल्हके ।
म्लेच्छजातौ देशान्तरेपि चेति विश्वमेदिन्यौ पिण्डते पिडि संघाते अच् स्वार्थे कन् पिंड इति पिडि गताविति मुकुटश्चिंत्यः पडि गतावित्यात्मनेपदिषु पाठात् पिण्डो वोले वले
सांद्रे देहागारैकदेशयोः देहगात्रे निवापे च गोलसिल्हकयोरपि ओद्र पुष्पे च पुंसि स्यात् क्लीवमाजीवनायसोः पिंडीतु पिंडतगरेऽलावूखर्जुरभेदयोः स्त्रियामिति मि
हश्रीतौ अंतर्भावितण्यर्थः वाहुलकात्कुपृषोदरादिः यवनदेशभवः तत्र भव इत्यण् याव्यते वा पोते ण्यंता ल्युट् चत्वारि लोहवान इति ख्यातस्य पय एव प्रत्याघण
पयसो विकारो वा तस्य विकार इत्यण् कृष्टे स्यात्पायसः क्लीवे श्रीवासपरमान्नयोः १२९ सरलद्रवः श्रीपिष्टादधिक्षीरघृताढ्य इति रभसः श्रियो वासः श्रीवासो वृक
धूपस्यात् पंकजे मधुसूदने श्री श्चासौ वासश्चेति वा श्रीर्वेशरचनाशोभाभारती सरलद्रव इति विश्वः वृकः स्यात्कृत्रिमेनेकधूपेपि सरलद्रव इति रभसः ॥ ॥

Sanskrit University, Balmeeki Campus, Kathmandu

धूप्यते नेन धूपसंतापे घञ् वृकनामा धूपः श्रीकपार्थिवादिः श्रियः सरलद्रवस्यापि घृतस्त्रूर्णेन जनितत्वादितिमुकुटः अन्ये तु श्रीसंज्ञकः श्रियो वा वेष्टो निर्यास इत्याहुः सरलस्य देवदारोर्द्रवः पंच सरलद्रवस्य मृगस्य नाभिः मृगस्य मदः कसति गंधो ऽस्याः कसगतौ खर्जूरादित्वादूरः पृषोदरादिः मृगनाभिर्मृगमदो मृगः कस्तूरिकापि चेति माधवः मृगोपि मदोपि मदोरे तस्मिक स्तूर्यामिति मेदिनिः मुख्यगदू स्त्रियेनाभिः पुंसि प्राण्यंगके द्वयोः चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति रभसान्नाभिरपि त्रीणि कोलति कुल संख्याने ण्वुल रलयोरेकत्वात्कोरकमपि कोरकोस्त्री कुड्मलेस्यात्कक्कोलकमृणालयोः १२९ कंकं ते त्रककलोः स्ये संपदादिः कोलति ज्वलादित्वाण्णककृचन नू कोलंच स्वार्थे कन् कोशीफलमस्य त्रीणि फल कर्पूरस्य गह्वलाद्यति ख्यातस्य किरति कृणाति वा करति करोति वा कृ विक्षेपे हिंसायां वा कृत्र डुकृञ् करणे वा विचपूर्य ते पूरी आ प्यायने इगुपधेतिकः कर्चासौ पूरश्च कल्पते कृप् सामर्थ्ये खर्जूरादित्वादूर इति स्वामिमुकुटौ तच्चिंत्यं कृपो रोल इति लत्वस्य दुर्वारत्वात्तु वाहुलकाद्वा तदभावो वो

मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकं १२९ कंक्कोलकं कोशफलमथ कर्पूरमस्त्रियां घनसारश्चंद्रसंज्ञः सिताभ्रो हिमवालुका १३०॥

गंधसारो मलयजो भद्रश्रीश्चंदनोस्त्रियां तैलपर्णिकगोशीर्षे हरिचंदनमस्त्रियां १३१॥ ९ ध्यः घनो दृढः सारो ऽस्य घनः सांद्रे दृढे दार्ढ्ये इति विश्वः घन स्य सार इव वा शीतलत्वात् शितांभ्राकारत्वाच्च घनसारस्तु कर्पूरे दक्षिणावर्तपारदे इति हैमः चंद्रस्य संज्ञा यस्य सितं श्वेसं वंधनं वा चद्रं वा अभ्रमति अभ्रगतौ कर्मण्यण् सितं शैत्यमभ्रमयतिस्व संबद्धमिति वा शुक्लत्वान्नु सिताभ्रमिव वा सिताभ इति वा पाठः सिता आभा स्य हिमा चासौ वालुका च रेणुकावर्णकर्पूरं चंद्रभस्म हिमाह्वयमिति त्रिकांड शेषः पंच १३० गंधवान् सारः स्थिरभागो ऽस्य गंध एव वा सारो ऽस्य मलये जातः सप्तम्यां जनेर्डः भद्रा श्रीरस्याः सिजामंतरेभद्रो वाच्यवच्छेष्ठसाधु नोरिति विश्वः चंदयति चदि आल्हा दने ण्यंतः स्युट् वेधको मालयस्तु स्याच्छ्रीखंडो रोहिणश्च स इति त्रिकांडशेषः चत्वारि तिलपर्णो वृक्षभेदः जातानतत्र जातः स्वणऽीप स्वार्थे कन् केण इति ह्रस्वः तैलपर्णी मलयजे श्री वासे सिल्हके पि च गोः शीर्षमिव तैलपर्णगोशीर्षो गिरी आकरो वस्यति स्वामी हरेरिंद्रस्य चंदनं हरिः कपिलवर्णश्चंदनं हरिचंदनमस्त्री स्यात्त्रिदशानां महीरुहे नपुंसकं तु

गोशीर्षज्योत्स्नाकुंकुमयोरपि चंदनविशेषाणामेषु कपृथक् १३१॥ ७५

तिलस्येव पर्णान्यस्याः पाककर्णेति ङीष् यद्वा तिलपर्णी नदी आकरोस्याः पत्रमेवांगमस्य पत्त्रेषु अंगति वा अगि गतौ अच् पत्त्रांगं नद्वयो भूर्जे पद्मके रक्तचंदने रंजयति
रंजरागे ण्यंतः युच् ल्युट् वा रंजनो रागरंजने रंजनं रक्तचंदने रक्तं च तच्चंदनं च निर्गंधत्वात् कुत्सितं चंदनं कौचंदनमिव वा कुत्सितान्यचंदनान्यस्मात् वा कुचंदनं च पत्त्रांगे द्व
भे रक्तचंदने इति विश्वमेदिन्यौ चत्वारि रक्तचंदनस्य जात्याः कोशः जातिरपि जातिर्जाती फलेपि चेति रभसः कोशा अप्रकृते पेश्यां पात्रे जातिकोशेपि इति च फलमपि फ
लं लाभे जातिकोशे वा लग्रेफलकेपि चेति रुद्रः द्वे जाइफल इति ख्यातस्य १३२ कर्पूरादिभिः समभागैः यक्षप्रियः कर्दमः कर्पूरागुरुकस्तूरीकक्कोललघुतृणानि च एकीकृतमि
दं सर्वं यक्षकर्दम इष्यत इति व्याडिः कुंकुमागुरुकस्तूरी कर्पूरं चंदनं तथा महासुगंधमित्युक्तं नाम नो यक्षकर्दम इति धन्वंतरिः एकं गात्रमनुलिप्यते यया करणे ल्युट्
वर्त्यते वृतु वर्त्तने ण्यंतः अचरः वर्तिर्भेषजनिर्माणे नयनांजनलेखयोः गात्रानुलेपनादीपदशादीपेषु योषिति वर्णं करोति ण्वुल् विलिप्यते नेन लिप उपदेहे ल्युट् चत्वा
रि गात्रानुलेपयोग्यस्य पिष्टघृष्टसुगंधद्रव्यस्य द्वौ द्वौ भिन्नार्थौ वित्येके गात्रानुलेपनी वर्तिर्विगंध्यथ विलेपनं वर्णकं चाथ विच्छित्तिः स्त्री कषायो गरागक इति रभसात्

तिलपर्णीतु पत्त्रांगं रञ्जनं रक्तचंदनं कुचन्दनं चाथ जातीकोशजातीफले समे १३२ कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः गात्रानुलेप
नी वर्तिर्वर्णकं स्याद्विलेपनं १३३ चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनं ३४ माल्यं मालास्रजौ
मूर्ध्नि केशमध्ये तु गर्भकः प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकं १३५॥ ((आ घद्वयमुक्तार्थमेव वर्णकादिद्वयं घृष्टचंदनादिलेपमात्रस्य १३३ चूर्ण प्रेरणे घ

ञ् चूर्णो धूलौ क्षारभेदे चूर्णानि वासयुक्तिषु वासे सुगंधीकरणे योगा उपायाः हूपटवासादि क्षोदस्या भाव्यते स्म भु वोव कल्कन इति ण्यंतात् क्तः भावितं वासिते प्राप्ते इति हेमः वा
सयतेस्म वस स्नेहनादौ चुरादिः क्तः वासितं भावितेरु नेरु इति हेमचंद्रः द्वे द्रव्यांतरभावितस्य मंगल्यधूपादिभिर्वस्त्रादीनां नाम्नूत्वादीनां यः संस्कारः तत् अधिकं वास्यते वास उप
सेवायां चुरादिः ल्युट् एकं १३४ मूर्ध्नि शिरसि इदमतं त्र मन्यत्रापि माला भवत्येवमल्यते मलधारणे ण्यत् घञ् यद्वा मालायाः चतुर्वर्णादि घञ् मालाति वा माल्यं कुसुमत
स्रजौ माला तु पंक्तौ पुष्पादि दामनि सृज्यते सृजति वा सृज विसर्गे ऋत्विगिति क्विन् त्रीणि गर्भ इव वर्द्वे इव कन् एकं शिखातो लंबमानम् प्रभ्रष्टंतु प्रवृत्तं भ्रंशु अ

माल्यमेवकंगदूंडूलंवमानं प्रालंवते लवि अवस्रंसने अच् ऋजुल्वितुं शीलमस्य सुपीतिणिनिः एकं विशिष्टः कक्षोस्मादिक स्यमुरस्तत्रभवं तत्रभवरूत्यण स्वार्थे कनयद्रसि
उपवीतवत्तिर्यक्क्षिप्तं तत् एकं शिखाक्षिप्तं माल्यं आपीडयति पीड अवगाहने अच् शिंखति शिखिगतो वाहुलकात् आगमशास्त्रस्यानित्यत्वान्न नुम् द्वे शिखास्थमालस्य
३६ रचप्रतियत्ने अदंतः चुरादिः एयास श्रंथो युच् परिस्यंदनं स्यदि किंचिच्चलने भावे घञ् अधिकरणे वपरिष्यन्द इति वा पाठः स्यंदृ प्रस्रवणे द्वे शिल्यादिरचनायाः आभो
जनं प्रागवत् घञ् आभोगो वारणेच्छत्रे पूर्णतायत्नयोरपीति विश्वमेदिन्यौ परितः पूर्यते स्म पूरी आप्यायने गत्यर्थेति क्तः रदाभ्यामिति निष्ठानत्वं परिपूर्णस्य भावः नल
द्वे उपधीयते शिरोत्र डुधाञ् करणे तिल्युट् उपवृह्यते त्रानेन वा वृह वृद्धौ वृह उद्यमने वा घञ् द्वे शिरोनिवेशनस्य शय्यते त्र शीङ् स्वप्ने संज्ञायां समजेति क्यप् अयङ् यी
त्ययङ् शय्यास्याच्छयनीयेपि गुंफनेपि च योषितीति क्तत्पल्युट् इत्यधिकरणेनीयर् ल्युडपि शयने सुरते निद्राशय्ययोश्च नपुंसकं त्रीणि तूलिकादेः १३७ मंचते मचि

प्रालम्बमृजुलम्बि स्यात्कंठाद्वैकक्षकं तु तत् यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ १३६ रचना स्यात्परिस्यन्द आभोगः परिपू
र्णता उपधानं तूपवर्हः शय्यायां शयनीयवत् १३७ शयनं मञ्चपर्य्यङ्कपल्यङ्काः खट्वया समाः गेंदुकः कंदुको दीपः प्रदीपः पीठमासनं १३८

धारणे छाद्यपूजनेषु अच् परितोः क्वते अकिलक्षणे घञ् परेश्च घांकयोरिति वा लत्वं पल्यंको मंचपर्य्यकवृषीपर्यस्तिकासु चेति विश्वः खट्यते निद्रालुभिः खट कांक्षा
यां अशूप्रुषीति क्वन् चत्वारि पल्यंकस्य गाते गाङ् गतौ विच् गच्छन्निंदुरिवरूवार्थे कन् गेगगाने रूंदुरिवेति वा कंद्यते कदि आह्वाने दनेच वाहुलकादुः कं सुखं ददाति
रव्यातस्येत्यन्ये दीप्यते नेन दीपयति वा दीपी दीप्तौ इगुपधत्वात्कः घञ् अच् वा अन्योपसर्गनिवृत्यर्थः प्रदीपस्तु स्नेहाशः कज्जलध्वजः दशाधनो गृहमणिर्दीपातिला १६
करूत्यपि शिखातरुर्दीपवृक्षो ज्योत्स्नावृक्षो थलोचक इति त्रिकांडशेषः द्वे पठंत्यत्र पिठ हिंसासंक्लेशनयोः हलश्चेति घञ् वाहुलकाद्दीर्घः पीयते त्र वा पीङ्
पाङ् पाने वाहुलकात् ठक् विष्टरः पीठमस्त्रियामिति त्रिकांडशेषः आस्यते त्र आस उपवेशने करणेतिल्युट् द्वे १३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समुद्गच्छति अन्येष्वपीति डः स्वार्थे कन् संपुट्यते पुट संश्लेषणे क्वुन् संपुटः स्यात् प्रतिगृह्णाति विभाषा ग्रह इति णः पक्षेऽच् प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे यो
ग्यभ्यो विधिवद्देये पतद्ग्रहे च ग्रहांतरे इति विश्वः पततो ग्रहः द्वे पीकदानीति ख्यातायाः प्रसाध्यते नया साध संसिद्धौ ल्युट् प्रसाधनी तु कंकत्यां सिद्धौ वेग प्रसाधनी
ति विश्वमेदिन्यौ कं कते ककि गतौ बाहुलकादतच् गौरादिः स्वार्थे कन् केण इति ह्रस्वः पट्टाकस्य शिरसा काम्यं कं ध्यादिः कं केषु तनोति क्वुन् कंकतिका किलौ ल्ये इति मुकु
टस्लन्न तस्या निदित्वादात्मनेपदित्वाच्च कंकती तु प्रसाधनीति स्त्रीकांडे अमरमाला कंकतं तु प्रसाधनमिति क्लीबकांडे च द्वे कंकहीति ख्यातायाः पिष्टमतं · तिकर्मण्यण्
पटो वास्यते येन वास उपसेवायां चुरादिः घः स्वार्थे कन् पटं वासयति कर्मण्यण् स्वार्थे कः द्वे बुक्क इति ख्यातस्य १३९ दर्पयति दृप हर्षणमोचनयोः पर्यंतः नंद्या
दिः दृप संदीपने चुरादिर्वा आदर्शो दर्पणः प्रोक्तः इत्यमरमाला मंकते मकि मंडने मकुर दुरादिति साधुः द्रुमे कुलालदण्डे मकुर इत्यन्ये मुच्च मोक्षणे मुंचति ज्योति

समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः प्रसाधनी कङ्कतिका पिष्टातः पटवासकः १३९ दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकं इति नृ
वर्गः ६ सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ॥ ९९ अत्र पक्षे मुकुरो द्युकारः मुकुरः स्यान्मुकुरवद्दर्पणे बकुलद्रुमे कुलालदंडे मकुर इत्यन्ये आदृश्य
ते रूपमत्र दृशिर् प्रेक्षणे हलश्चेति घञ् आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि त्रीणि व्यंजत्यनेन अज गतिक्षेपणयोः करणे ल्युट् वा याविति पक्षे वी नव हुलतणीति
वा वीभावो न तालस्येव वृंतमस्य तालेकरतले वृन्तमिव बंधनमस्य वृंतं प्रसवबंधे स्यात् घटधाराकुचाग्रयोरिति विश्वः द्वे इति श्रीनृवर्गविवरणम् ६ संतन्यते त
नु विस्तारे क्तिन् संततिः स्यात् पंक्तौ गोत्रयारं पर्ये च पुत्रपौत्राणां गूयते गुङ् शब्दे ष्ट्रन् गोत्रा भूगव्ययो गोत्रः शैले गोत्रं कुलाख्ययोः जन्यते जनी जन जनने वा ण्यन्तः
कर्मणि ल्युट् जननं वंशजन्मनोः कूयते कुङ् शब्दे बाहुलकात् लक् कौ लति वा कुल संस्त्याने इगुपधेति कः कुं भूमिं लाति वा कौ लीयते वा लीङ् श्लेषणे अन्ये
ष्वपीति डः कुलं जनपदे गोत्रे सजातीयगणेऽपि च भवने च तनौ क्लीबं कंटकार्यो पथो कुली अभिजन्यते कर्मणि घञ् णिलोपस्य स्थानिवत्वात् जनिवध्योश्चेति निषेधाद्वृद्धिर्नः पट्टा
अभितो ऽभिमुखो वा जनो जन्मात्र भवेदभिजनः ख्यातौ जन्मभूम्यां कुलध्वजे कुलेऽपि च पुमान् अन्वीयते इण् गतौ इण् गतौ वा एरच् उप्यते॥ ॥ ॥

Digitization by eGangotri

वशकांतो घञ् आच्छीनद्योरित्यत्रनुमिति योगविभागान्नुम् यद्वा वन्यते वनसंभक्तौ वाहुलकात् शः वमति भृवमिकुभ्य इति शगिति मुकुटः तन्न उक्तसूत्रस्यो ज्वलदन्तारि घ दर्शनात् वंशोवेणौ कुले वर्गे पृष्ठाद्यवयवेपि चेति विश्वमेदिन्यौ अन्ववाप्यते अयगतौ घञ् संतन्यते घञ् संतानः संततौ गोत्रे स्यादपत्ये सुरद्रुमे कर्तृकरणाधिकरणेष्वपि विग्रहः संभवति आदेतनोतेश्चेति णः अन्यत्र हलश्चेति घञ् नववर्ण्यते वर्णौ प्रेरणौ घञ् वर्णयति वा अच् वर्णो द्विजादि शुक्लादि यशो गुणकथासु च स्तुतौ ना न स्त्रियां भेद रूपाक्षर विशेषणे एकं १ विप्रश्च क्षत्रियश्च विट् च शूद्रश्च चत्वार एव वर्णाः चतुर्वर्णादीनामिति स्वार्थे ष्यञ् राज्ञो वीजयितुं शीलमस्य वीजव्यजने अदन्तः सुपीति णिनिः यद्वा राज्ञा वीजे राजवीजमस्यास्ति इनिः वंशे भवः दिगादित्वाद्यत् राज्ञो वंश्यः राजवंशे साधुर्वा तत्र साधुरिति यत् हद्वीज्यते अचो यत् यद्वा वीजमस्यास्ति अन्यत्रापि दृश्यत इति यत् वीजे भवः साधुर्वा कुले संभवति अच् कुले संभवोस्य वा यद्वा संभवत्यस्मात् ऋदोरप् कुलस्य संभवः द्वे २ महच्च तत् कुलं च महाकुलस्यापत्यं महाकुलादञ् खञौ महत्कुलमस्येति विग्रहे तु हृस्वादिरपि कुलस्यापत्यं कुलात् खः अपूर्वपदादन्यतरस्यां यड्ढकञौ कौलेयकः सारमेये कुलीने कुल्यं स्यात् कीकसे व्यष्टद्रोणी

वंशोन्ववायः सन्तानो वर्णाः स्युर्ब्राह्मणादयः १ विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतं राजवीजी राजवंश्यो वीज्यस्तु कुलसंभवः॥
२ महाकुलकुलीनार्यसभ्यसज्जनसाधवः ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ३ आश्रमोस्त्री द्विजात्यग्रजन्मभूदेववाडवाः॥ ॥

सूर्प्यामिषेषु च कुल्या पयः प्रणाल्यां च नद्यां जीवंतिकौषधौ कुलोद्भवे कुलहिते त्रिषु मान्ये पुनः पुमान् अर्यते ऋगतौ ऋहलोर्ण्यत् सभायां साधुः सभाया यः संश्वासो जनश्च सज्जनं तु रथे स्त्री वप्रपरक्षणघंटयोः वाच्यलिंगः कुलीने स्यात् कल्पनायां च याधिति साध्नोति धर्मं षाधसंसिद्धौ कृवापेत्युण् साधुर्वार्द्धुषिके चारौ सुजने चाभिधेयवत् षट् कुलीनस्य ब्रह्मवेदस्तदध्ययनार्थं व्रतमप्युपचाराद्ब्रह्म चरितुं शीलमस्य व्रते इति सुपीति णिनिः यद्वा ब्रह्मतपो ज्ञानं वा चरत्यर्जयत्यवश्यं आवश्यके तिणिनिः गृहदाराः संत्यस्य इनिः वनमेव प्रस्थो वनस्य वा प्रस्थः प्रदेशः वनप्रस्थे भवः तत्र भव इत्यण् भिक्षणशीलः भिक्षयाज्ञायां सनाशंसभिक्ष उः चत्वारो वयवा यस्य संख्याया अवयवेतयप् चतुरवयवसमुदाये ३ आश्राम्यंत्यत्रानेनवा श्रमु तपसि घञ् नोदात्तोपदेशस्येति वृद्धिर्नः यद्वा आसमंतात् श्रमोत्र स्वधर्मसाधनक्लेशात् आश्रमो ब्रह्म ७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विजातीजन्मनीयस्य मातुरग्रे विजननं द्वितीयं मौंजिबंधनात् द्विजातिर्विप्रांडजयोश्च पुल्लिंगः अग्रे आदौ जन्मास्य अग्रान्मुखाद्वा जन्मास्य अग्रजन्मा द्विजश्रेष्ठभ्रातरि ब्रह्मणि स्मृ
त इति विश्वः भुवो भुवि वा देव इव बडवाकुंभदास्यश्वास्त्रीविशेषाद्विजन्मनामिति रभसः वडवायां जातः तत्र जात इत्यण् वाड व इव वाडवं वाड्र आप्लाव्ये घञ् वालनं वलनि
रूपणे चुरादिर्वा घञ् डलयोरेकत्वं· वाडोस्यास्ति अन्यत्रापि दृश्यते इति वः वाडं वाति वा कः वाडवं करणे स्त्री णीं घोटिकौघे नपुंसकं पाताले नास्त्रियां पुंसि ब्राह्मणे वडवान
ले इति विश्वमेदिन्यौ विप्राति· प्रा पूर्त्तौ आतश्चोपसर्गे इति कः उप्यते त्र वाडुवप् ऋज्रेंद्रेति साधुः विपाति विपति वा विप क्षेपे ब्रह्मणोपत्यं न स्यापत्यमित्यण् अन्निति टिलो
पोन ब्रह्माधीते वा तदधीते तद्वेदेत्यण् ब्रह्म जानाति वा शेष इत्यण् वर्णज्येष्ठः कचो द्विजः मैत्रः पुनरुक्तजन्मा वेति त्रिकांडशेषः सूत्रकंठः पुमान्विप्रः षट्· असौ विप्रः
षट्कर्माण्यस्य इज्याध्ययनदानानि याजनाध्यापने तथा प्रतिग्रहश्चैतैर्युक्तः षट्कर्मा विप्र उच्यते एकं षट्कर्मणो विप्रस्य वेत्ति विद् ज्ञाने लटः शतुर्विदेः शतुर्वसुर्वा
विद्वान् ज्ञानिनि धीरे च विद्वानध्यात्मवेदक इति धरणिः विद्वानात्मविदि प्राज्ञे पंडिते चाभिधेयवदिति विश्वः विप्रकृष्टं निश्चिनोति· चेतति चिंतयति वा· पृषोदरादिः

विप्रश्च ब्राह्मणोसौ षट्कर्मा यागादिभिर्युतः ४ विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पंडितः कविः ५

दोषं जानाति· आतोनुपेति कः अस्ति· शतः श्नसोरल्लोपः सन्साधौ धीरप्रशस्तयोः मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियां सुष्ठु ध्यायति ध्यै चिंतायां ध्यायतेः क्विपि संप्र
सारणं कौ तिधर्मादि कुशब्दे कवते वा कुङ् शब्दे विच् गुणः कोर्वेदस्य विदः वेत्ति इगुपधेति कः यद्वा कवि वेदे विदायस्य विदा ज्ञाने च निर्दिष्टा मनीषायां च योषिति· बुध्यते।
बुध ज्ञाने इगुपधेति कः बुधाबुधज्ञपंडिताः धियं राति रा दाने आतोनुपेति कः धियं ईरयति वा ईर गतौ ण्यन्तः अण् धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुंकुमे स्त्रियां श्रवण
तुल्यायां· मनीषास्यास्ति· व्रीह्यादित्वादिनिः· जानाति इगुपधेति कः ज्ञो ब्रह्मबुधविद्वत्सु एवं प्रज्ञः प्राज्ञ इति पाठे तु प्रज्ञास्यास्ति प्रज्ञाश्रद्धेति णः प्रज्ञस्तु पंडिते वाच्यलिंगो
बुद्धौ तु योषिति संख्या विचारणास्य मतुप् षएढः षएढे धिषि स्त्रीसानुपं ड्यते नया पडि गतौ गुरोश्चेति अः पंडाजातास्य तारकादित्वादितच् यद्वा पंडते स्म गत्यर्थे
ति क्तः इट् कवते कौति वा कुङ् शब्दे कु शब्दे वा अच इः कवृ वर्णे इति मुकुटश्चिंत्यः तस्यौष्ठ्यांतत्वात् कविशब्दस्य तु दंत्यौष्ठ्यादिषु पाठात् कविर्वाल्मीकिकाव्ययोः सू
रौ काव्यकरे पुंसि स्यात्खलीने तु योषिति ५॥

धीरस्यास्तिमतुप्‌ धीमान्‌ पंडितेचद्वहस्पतौ सूते सूयतेवा षूङ्‌ प्रसवे षूङ्‌ प्राणिगर्भविमोचनेवा सूङः क्रिः एतेन सुवती जिविगृह्णन्‌ स्वामीप्रत्युक्तः उक्तनिर्देशात्‌ संभवात्‌ सुनोतेः
सुत्रोदीर्घश्चेति रिदीर्घो विनिवद्वन्मुकुटोपि उज्ज्वलदत्तादिष्वस्यादर्शनाच्च केचित्तुसूरोर्कहलयोः पुंसि मूरः सूर्योस्त्युपास्यनयास्य अतइनोनांतमाहुः प्रशस्तं कृतंक
र्मास्यइनिः कृतमनेनवा इष्टादिभ्यश्चेतीनिः कृती स्यात्पंडितेयोग्येइतिहेमः कर्षति कृषविलेखनेक्तिच्वाहुलकाजिर्वासंज्ञापूर्वकत्वान्नगुणः कृष्टिः स्यादाकर्षस्त्रीवु
धेपुमान्‌ रंतिदेवोपि आकर्षत्वेस्त्रियांकृष्टिर्भवेन्नातु विपश्चितीति लब्धोवर्णः स्तुतिर्येन विचष्टे चक्षिङ्‌ व्यक्तायांवाचि अनुदात्तेतश्चहलादेरितियुच्‌ असनयो
रितिवहुलंतल्लीतिवाख्यात्‌ नदूरान्‌ दूराद्वापश्यति दृशिरप्रेक्षणे ग्रहादित्वाण्णिनिः सुपीतिवा एवंदीर्घदर्शी दूरदृक्कोविदः सूरिरिक्षितेरभसः द्वाविंशतिः छंदोधीते
वेत्तिवाश्रोत्रियंश्छंदोधीते इतिवाश्रोत्रियन्‌ निपात्यते पक्षेतदधीतेतद्वेदेत्यण्‌ द्वेसंपूर्णशाखाध्यायिनः ६ उपेत्याधीयतेस्मात्‌ इङः श्चेति घञ्‌ अध्यापयति ण्वुल
पः सोऽध्यापकः निषेकोगर्भाधानमादिर्यस्यसीमंतोपनयनादेस्तस्यकर्ता गृणातिधर्मादिगिरत्यज्ञानंवागृणात्वेदनिगरणोवा कृग्रोरुच्चेत्युः गुरुस्त्रिलिंग्यांमहतिदुर्जरालघु

धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः दूरदर्शी दीर्घदर्शी श्रोत्रियश्छांदसौ समौ ६ उपाध्यायोऽध्यापकः सस्यान्निषेकादि कृद्गुरुः
मंत्रव्याख्याकृदाचार्यआदेष्टात्वध्वरेव्रती ७ यष्टा च यजमानश्च ससोमवति दीक्षितः इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान्‌ ॥ ८ ॥

घुनोरपिपुमान्निषेकादिकरेपित्रादौ सुरमंत्रिणि मनुश्च निषेकादीनि कर्माणि यः करोति यथाविधिसंभावयति चान्नेन स विप्रो गुरुरुच्यते एकं मंत्रस्यवेदस्यव्याख्या
नंकरोति क्विप्‌ तुक्‌ आचर्यते चरगतौ ण्यत्‌ मनुः उपनीयतु यः शिष्यं वेदमध्यापयेद्द्विजः सांगं च सरहस्यं च तमाचार्यं प्रचक्षते हे आदिशत्यृत्विजो यागे स्वेष्टसंपादनाय प्रेरयति
दिश अतिसर्जने तृच्‌ आदिष्टीतिपाठे आदिष्टमनेन इष्टादिभ्यश्चेतीनिः व्रतं भोजनादिनियमोस्यास्ति अतइनिः यद्वाव्रतयति व्रतान्‌ भोजनतन्निवृत्त्योरितिणिच्‌ व्रतेइति
णिनिः क्रस्येन्विषयस्यकर्मण्युपोतिसप्तमी ७ यजतेतृच्‌ पूङ्‌ यजोः शानन्‌ शानच्‌ त्रीणि सत्रीसोमपानवतियागे आदेष्टा सन्‌ दीक्षतेस्म दीक्षमौं ड्यप्योपनयनादेशगत्यर्थेति
क्तः यद्वादीक्षाजातास्यतारकादीतच्‌ एकं इज्याशीलमस्य इज्यांशीलतिशीलयतिवा शीलसमाधौ शीलिकामीतिणः पुनःपुनः भृशंवायजते क्रियासमभिहारे इतियङ्‌ यजजपदशांय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यज्वा दृह स्यतिसवनामयोगेनेष्टवान्स न् स्थानंस्थः सुपिस्था इत्यत्र स्थ इति योगविभागात्कः घञर्थे वास्थस्यपतिः स्थपतिः कंचुकिन्यपि जीवेष्टियाजकेशिल्पिभेदेनासत्तमेत्रि
षु एकं सोमस्यपीतं सोमपीतमस्यास्तिइनिः स्वामीनुपानंपीथं पनृतुदिवचीनि थक् घुमास्थेतीत्वे सोमस्यपीथमित्याह इष्टादिभ्यश्चेतीनिरितिमुकुटः सोमंपिबंति आतोनुपेतिकः
दीर्घपाठे तु क्विप् सर्ववेदायं दीक्षितस्तुतत्कालं द्वैसर्वस्वंदक्षिणायत्र विश्वजिदादौ सयेनेष्टः कृतः सर्वं वेदयति विद्लृलाभे ण्यंतः सर्वविंदतिवा असुन् एकं ८ अन्ववोचत् उ
पयिवानितिसाधुः अनूचानो विनीतेस्यात्सांगवेदविचक्षणे इति विश्वः शिक्षाद्यंगषट्कोपेते प्रोच्यतेल्युट् प्रवचने विदस्तत्र अधीतमनेन इष्टादिभ्यश्चेतीनिः क्तस्येन्विषयस्येति
सप्तमी एकं गुरोः सकाशाल्लब्धा प्राप्तानुज्ञा आज्ञा येन समावर्ततेस्म गत्यर्थेतिक्तः गुरुकुलवासान्निवृत्तस्यैकं सुत्वान् सुञ् अभिषवे सुयजोर्ङ्वनिप् तुक् अभिषवः वभृथस्नाने एकं
१० गुरुदोषाच्छादनं छत्रं तच्छीलमस्य छत्रादिभ्योणः अंते समीपे वस्तुं शीलमस्य सुप्यजातौ णिनिः शयवासवासीष्वकालात् अलुक् अंतेवासी शिष्येपि चंडालेप्यंतगोचापीति विश्वः हे मचंद्रोपि शि
ष्यते शासु अनुशिष्टौ एतिस्तुशास्वृदृजुषः क्यप् शास इदङ्हलोः शासिवसीतिषः त्रीणि शिक्षामधीयते तद्वेत्यधीते इत्यण् शिक्षायाः इमेतत्रभवावायद्वा शिक्षालभने शैषेइत्यण् प्रथ

सगीष्पतीष्ट्या स्थपतिः सोमपीथीतु सोमपाः सर्ववेदाः सयेनेष्टो यागः सर्वस्वदक्षिणः ८ अनूचानः प्रवचने साङ्गेधीती गुरोस्तु यः लब्धानुज्ञः समावृत्तः

सुत्वात्वभिषवे कृते ९ छात्रान्तेवासिनो शिष्ये शैक्षाः प्राथमकल्पिकाः एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ११ सतीर्थ्यास्त्वेकगुरवश्चितवा

नग्निमग्निचित्॥ ॥ ११ मकल्पः आद्यारंभः प्रयोजनं येषां ते प्रयोजनमितिठक् यद्वा प्रथमकल्पमधीयते विद्यालक्षणकल्पांताच्चेतिठक् कल्पः शास्त्रे

विधौन्याये द्वे प्रथमारब्धवेदानां ब्रह्मवेदस्तदध्ययनं व्रतमप्युपचाराद्ब्रह्म एकस्मिन् ब्रह्मणि व्रताचरणं येषां ते मिथः परस्परं समानं ब्रह्मचरंतिव्रतमितिणिनिः चरणे
ब्रह्मचारिणीतिसमानस्यसः एकं ११ समाने तीर्थे गुरौ वसंति समानतीर्थेवासीतियत् तीर्थ्यये इति समानस्य सः एको गुरुर्येषां ते द्वे अग्निमचैषीत् चित्रञ् चयने अग्नौचेरितिक्विप् भू
तेक् एकं एकं परंपरया आगतः ततआगत इत्यण् चतुर्वर्ण्यादित्वात्ष्यञ् पारंपर्यश्चासावुपदेशश्च तस्मिन् अनंतावसथेतिहेतिरः इत्येवं हकिल हे यत्तुमुकुटेनोक्तं पू
र्वेचपूर्वतराश्चेति द्वंद्वेपरोवरपरंपरपुत्रपौत्रमनुभवतीतिनिर्देशात् परंपरादेशविधानात् तापिपरंपरा॥

अ·ही· तदुक्तं विनापि प्रत्ययं परंपराभावो दृश्यते इति तेश्चिंत्यं सन्नियोगशिष्टन्यायेन खप्रत्ययसंनियोग एव परंपरादेशविधानात् परंपराशब्दस्य त्वव्युत्पन्नत्वात् तदुक्तं अस्ति हि प
टी·रा· रंपराशब्दोऽव्युत्पन्नं प्रातिपदिकमिति यद्वा परं पिपर्ति पचाद्यच् श्वपचजारहरेतिवत् पृषोदरादिः १२ उपज्ञानं आतश्चोपसर्गे इत्यङ् यथा उपदेशं विना श्लोकनिर्मा
७८ णं वाल्मीकेरुपज्ञानं एकं उपक्रम प्रथमं क्रमणं क्रमु पादविक्षेपे भावे घञ् नोदात्तोपदेशेति न वृद्धिः यथा मानेनंदस्य प्रथमारंभ उपक्रमः सः उपक्रमस्तूपधायां ज्ञात्वारंभे
च विक्रमे चिकित्सायां एकं ज्ञात्वा प्रथमारंभस्य द्वे इज्यतेनेन वा इयज देवपूजादौ यजयाचेति नङ् यज्ञः स्यादात्मनि मखे नारायणे हुताशयोरिति हेमः सूयते सोमोऽत्र षुञ्
अभिषवे ऋदोरप् यद्वा सूयते त्रानेन वा षूप्रेरणे अप् घो वा सवो यज्ञे सुसंधाने इति हेमः न ध्वरति ध्वृ कौटिल्ये अच् अध्वानं राति वा आतोनुपेति कः अध्वरः सावधाने ।
स्याद्वसुभेदे क्रतौ पुमान् इज्यतेऽनेन वा इयजेर्घञ् सप्तभिः छंदोभिरग्निजिव्हाभिर्वा तन्यते यद्वा तानि सप्ततन्यंते त्रसितनिगमीति तुन् मखंति देवा अत्रानेन वा म
खगत्यौ हलश्चेति घञ् संज्ञापूर्वकत्वान्न वृद्धिः यद्वा क्वचिदपवादविषयेप्युत्सर्गोभिनिविशत इति घञ् विषयेपि पुंसीति घः करोति क्रियते वा कृञः कतुः क्रतुर्यज्ञे

पारंपर्योपदेशे स्यादैतिह्यमितिहाव्ययं १२ उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारंभ उपक्रमः यज्ञः सवोध्वरो यागः सप्ततंतुर्मखः क्रतुः १३ पाठो हो
मश्चातिथीनां सपर्यातर्प्पणं बलिः एते पंच महायज्ञा ब्रह्मयज्ञादिनामकाः १४ समज्यापरिषद्गोष्ठी सभासमितिसंसदः ॥ ॥ ॥

सुत्तौ पुंसि सप्त २३ पठनं पाठनं वा भावे घञ् पाठश्च पठने ख्यातो वृद्धकर्णोऽनुयोषिति इति विश्वः हवनं हु दानादनयोः अर्तिस्तुसुहुस्त्रिति मन् अतिथीनामदृष्टपूर्वाणां गृहमाग
तानां सपर्यणं सपर पूजायां कंड्वादिभ्यो यक् अप्रत्ययात् सपर्या पूजा तृप्यते तृप प्रीणने भावे ल्युट् वलनं वल दाने इन् बलिर्दैत्योपकारयोः करे चामरदंडे च गृहदारुप्रांशयोः त्व
क्तं कोचगंधके चेति हेमः मनुः अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं महांतश्च ते यज्ञाश्च ब्रह्मयज्ञः आदिर्येषां तानि ब्रह्मयज्ञादी ७८
नि नामानि येषां ते १४ समजंत्यस्यां अजगतौ संज्ञायां समजेति क्यप् क्यपि चेति वीभावो न परितः सीदंत्यस्यां षद्लृ विशरणादौ संपदादित्वात् क्विप् सदिरप्रतेरिति षत्वं बाहुलकात्
परेरंतलोपः परिषच्च गावो नेकावाचस्तिष्ठंत्यस्यां घञर्थे कः अंबांबेति षत्वं गौरादिङीष् गोष्ठी सभासंलापयोः स्त्रियां सह भांत्यस्यां भा दीप्तौ भिदादित्वादङ् समाना भांत्यस्यामिति वा ॥

CC-0. In Public Domain. Digitization by eGangotri

समानस्येति योगविभागात्सभायाइति निर्देशाद्वा समानस्य सः सभा सामाजिके गोष्ठ्यां द्यूतमंदिरयोरपि सभ्यं तस्यां रुणगतोक्तिन् सह विद्यमाना मिलितैर्वा भिन्तिं प्रभास्यामिति वा स
मितिः संपदायेस्यात्सभायां संगमेपि च संसीदंत्यस्यां असुन्नव १५ प्रांचति अंचुगतिपूजनयोः ऋत्विगिति क्विन् प्राग्वंशो गोत्रं स्थूणा वात्र हविःशालायाः पूर्वभागे यजमानादी
नां स्थित्यर्थे गेहे प्राग्वंशश्चद्वावर्तते एकं सदसि साधवः तत्र साधुरिति यत् विधिं द्रष्टुं शीलं येषां ते सुपीति दृशेर्णिनिः न्यूनाधिकविचारका ऋत्विग्विशेषाः एकं सभायां सीदंति
सत्सूद्विषेति क्विप् सभां स्तृणंति स्तृञ् आच्छादने कर्मण्यण् सभायां साधवः सभायायः समाजं समवयंति समवायान् समवैतीति ठक् समाजं रक्षंति वा रक्षतीति ठक् च त्वा
रि १६ अध्वरमिच्छति सुप इति क्यच् कव्यध्वरपृतनस्येति लोपः क्याच्छंदसीत्युः यद्वा नध्वरति ध्वृ कौटिल्ये विच् अध्वरं यातिपोति वा मितद्वादित्वात् डुः अपष्ठ्वादिरिति मुकु
टश्चिंत्यः गणाभावात् उद्गायति साम गैशब्दे तृन् तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ जुहोति नप्तृनेष्टृत्वष्टृहोतृपोतृ इति साधुः यजुश्च सामानि च ऋच च श्च चार्थे द्वंद्वः
समासांतविधेरनित्यत्वादक् पूरित्यकारो न यजुः साम चो विदंति सत्सूद्विषेति क्विप् यजुर्विदध्वर्युः सामविदुद्गाता ऋग्वित् होता ऋत्विग्विशेषाणां क्रमादेकैकं अग्नी

आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः १५ प्राग्वंशः प्राग्हविर्गेहात्सदस्या विधिदर्शिनः सभासदः सभास्तारः सभ्याः सामाजिका
श्चते १६ अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते १७ वेदिः परिष्कृता भूमिः समे स्थंडिलचत्वरे॥

निंधे ञि इंधी दीप्तौ क्विप् नलोपः अग्नीदृत्विक् अग्नीधः स्थानं अग्नीधः शरणे रण् भं च आग्नीध्रं स्थानं तात्स्थ्यात् सोपि स्फायितंचीति रक् नलोपोऽग्नीध्र इति मुकुटः तन्न
स्फायायादिष्विंधेरपाठात् अस्मदुक्तप्रक्रियायाः सत्वाच्च आग्नीध्र आद्यो येषां ते ब्रह्मोद्गातृहोत्रध्वर्युप्रास्तण्णाच्छंसि अच्छावाकनेष्ट्रादीनां षोडशानां धनैर्हेतुभिः वरणीः
करणैर्वा व्रियंते वृङ् संभक्तौ ण्यत् कप्रतृज एव ऋतौ यजति ऋत्विगिति साधुः यजंति ण्वुल् त्रीण्यावृत्ताः कुर्वंति येयत्र मृत्विजो याजकाश्च ते इति कात्यः इति मते द्वे याज
कस्तु गंजेराज्ञो याज्ञिके पीति विश्वः १७ विद्यते शोधनेन ज्ञायते विचार्यते प्राप्यते वा लृपिबिरुषविरुहहि दृतीतीन् यद्वा वेदयति वेद्यते वा विदनिवासादौ चुरादिः अचइः
वेदिः स्यात्संडिते पुमान् स्त्रियामंगुलिमुद्रायां स्यात् परिष्कृतभूतले परितः कृता संस्कृता संपरिभ्यामिति सुट् परिनिवीति षत्वं एकं॥

स्थलं तस्मिन् स्थलस्थाने । मिथिलादयश्चेति साधुः चत्वं तस्मिन् चत्वे याचने कृगृशृवृञ्चतिभ्यः ष्वरच् । चत्वरं स्थण्डिलं ग्रामणीयागार्थं संस्कृतभूमेर्द्वयं यज्ञार्थं परिष्कृतायाः अ
निर्मोन्ततायापन्न भूमेरिति मुकुटः चषति चष्यते वा चष भक्षणे सानसिवर्णसीति साधुः यूपस्याग्रे कृतः कटकाकारः द्वे कुंभ्यते ऽनया वा कुवि च्छादने । चिंतिपूजिकथीत्यङ् सु
गहना निविडा वृत्तिर्वेष्टनं एकं १८ यूपस्याग्रं तरति मनिन् द्वे निर्मथ्यते मंथविलोडने ण्यत् निर्मन्थ्यं च तद्दारु च ऋच्छति ऋ गति प्रापणयोः अर्तिसृधृधमीत्यनिः अर ।
णिर्वह्निमंथनाद्वयोर्निर्मथ्यदारुणि एकं दक्षिणाग्निः दिक्संख्ये संज्ञायामिति समासः मुकुटस्तु दक्षिणायादिशोऽग्निः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावे दक्षिणाग्निरित्या
ह तन्न संज्ञात्वेन दिक्संख्ये इत्यनेन सूत्रोदाहरणत्वात् तत्र च समानाधिकरणेनेत्यधिकारात् गृहपतिना संयुक्तः गृहपतिसंयुक्ते ञ्यः आहूयतेऽग्नौ एष्यते प्रक्षिप्यते वा हवि
रत्र कृत्यल्युटो बहुलमित्यधिकरणेऽनीयर् यद्वा आहवनमर्हतीति तदर्हतीति छः क्वचित्तु त्रयाणां द्वंद्वः पच्यते त्रीणि त्रिविधाग्नेः १९ त्रायन्ते सदा संधुक्षणेनाभिता यद्वा त्रायंते

चषालो यूपकटकः कुंबा सुगहना वृतिः १८ यूपाग्रं तर्म निर्मन्थ्यदारुणि त्वरणिर्द्वयोः दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः १९ अग्नि
त्रयमिदं त्रेता प्रणीतः संस्कृतोऽनलः समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिनः २० यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते तस्मिन्ना
नाय्योऽथाग्नायी स्वाहा च हुतभुक्प्रिया २१ ऋक्सामिधेनी धाय्या च या स्यादग्निसमिंधने ॥

१९ त्रा आहुतयः त्राभिरिता त्रित्वमितेति वा पृषोदरादिः त्रेता
युगेऽग्नित्रये चेति हैमः एकः प्रकर्षेण नीतः प्रणीत उपसंपन्ने कृते क्षिप्ते प्रवेशिते संस्कृताग्नौ चेति हेमचंद्रः एकं सम्मुह्यतिसमूह्यते वा वहप्रापणे उहवितर्के वा परिचीयते उप
चीयते अग्नौ परिचाय्योपचाय्यसमूह्या इति साधवः प्रयोगोऽस्त्येषां ते अग्नौ प्रयोक्तव्या अग्निनामानीत्यर्थः २० दक्षिणाग्नित्वेन संस्क्रियते आनीयते आनाय्योऽनित्ये इ ८०
ति साधुः यस्तु प्राग्वैश्यकुलयोनिः स आनेयः एकं अग्नेः स्त्री वृषाकप्यग्नीत्यैङीप् सुष्टु आहूयंते देवा अनया अन्येभ्योपीति डः स्वाहाऽस्त्यस्यां वा अर्श आद्यच् हुतभुजः प्रि
या त्रीणि २१ समिधामाधानी समिधामाधाने षेण्यण् षित्वात् ङीष् यस्य हलः इति यलोपः धात्र्धीयते पुष्यतेऽग्निरनया पाय्यसान्नाय्यधाय्येति साधुः अग्नेः समिंधने सम्
दीपने या ऋक् तत्र द्वे गायंतं त्रायते आतोनुपेति कः गोरादिः यद्वा गानं गायः भावे घञ् युक् गायेन गानेन त्रायते ॥ ॥ ॥ ॥

त्रिङ्-रक्षलोसुपीतियोगविभागात्कः मूलविभुजादित्वकल्पनमपार्थकं तस्यानाकारांतार्थत्वात् गायत्री द्रुपदादेवी छंदोभित्खदिरेसुचप्रमुखपदेनउष्णिक् अनुष्टुप् बृहती
पंक्तिस्त्रिष्टुप्जगत्यतिजगतीशक्वरीत्यादिषडक्षरपादागायत्री एकाक्षरवृद्ध्या वोध्यं चंदते चदि आल्हादने दीप्तौ च चंदेरादेश्छः इत्यसुन् प्रथमप्रमुखेचोभे प्रधाने च
प्रकीर्तिते इत्यजयः एकं पच्यते कर्मणि घञ् हव्यं च तत्पाकश्च यद्वा भावे घञ् पचनं पाकः हव्यस्य पाकः अनवस्त्रावितांतरूष्मपाके ओदनश्चरुरिति याज्ञिकाः चर्यते भक्ष्य
ते चर गतौ भक्षणे च भृमृशीतृचरीत्सरुः मीमांसके रपित्रि इत्युवर्धिकरणे त्नपरत्वं चरुशब्दस्याभ्युपगतं उणादिभ्यो यदिति सूत्रे कैयटस्तुस्थालीवाची चरुशब्दः
नात्स्थाल्यामोदने भाक्त इत्याह विश्वप्रकाशे तु चरुर्भांडे च हव्यान्ने इत्यनेकार्थतोक्ता अथ पुमान् चरुर्हव्यान्नभांडयोरिति मेदिनी च स्वामी तु चर्यते रंध्यते ऽस्यां इति स्था
ल्यपि चरुः हव्यस्य पाको ऽत्रेत्याह एतेन केचित्तु पच्यते ऽत्रेति हलश्चेति घञ् पाकं व्युत्पाद्य हव्यपाकस्थाल्यादिरुच्यते अन्यत्रौपचारिक इत्याहुस्तदसदिति मुकुटः प्र
युक्तः प्रयोगदर्शनमपि सूपपादमनेकार्थतायां एकं २२ आमिष्यते मिषु सेचने वाहुलकात्सक् यद्वा आमक्षति मक्ष रोषे संघाते च अच् पृषोदरादिः शृते क्वथि

गायत्रीप्रमुखं छंदो हव्यपाके चरुः पुमान् २२ आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः धवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा २३ पृ

ततमे च पयसि दध्नो योजनात् या स्यात् यत्तु आङ्पूर्वान्मिहेर्दीर्घश्चेति स उपधादीर्घत्वं चेति दीर्घमध्यं मुकुट ॥ षदाज्यं सदध्याज्ये परमान्नं तु पायसं॥
आ च ख्यौतश्चिंत्यं उज्ज्वलदत्तादावदर्शनात् एकं धूयते ऽनेन धूञ् कंपने धूविधूनने वा अर्तिलूधूसूखनि इत्रः धुवतेः कुटादित्वेन ङित्त्वाद्गुणाभावादुवङ् धुवित्र
मित्येके एकमप्येः संधुक्षणाय मृगत्वचा रचितस्य व्यजनस्य २३ पर्षति पृष्यते वा पृषु सेचने वर्तमाने पृषदिति साधुः पृषच्च तदाज्यं च यद्वा पृषद्भिः सहितमाज्यं
दध्ना सहिते घृते पृषातकं सदध्याज्ये पृषदाज्यं तदुच्यते एकं दधिमिश्रितघृतस्य परमं च तदन्नं च सन्महदिति समासः यद्वा परमानामुत्तमानामन्नं पयसि संस्कृ
तं संस्कृतं भक्षा इत्यण् पयसेति तु मुकुटस्य प्रमादः तत्रोद्धृतमित्येतस्येत्यनुवृत्तेः पायसः श्रीवासे पायसं परमान्नके इति हेमः पायसः क्लीवे श्रीवासपरमान्नयोः द्वे हू
॥ यते देवायेन हूयते प्रक्षिप्यते वा हुदानादनयोः अचो यत् कुयते पितृभ्यः कुशब्दे अचो यत् कव्यवर्णोपारदुपधा॥ ॥ ॥

दितितु मुकुटस्य प्रमादः तस्य चित्ररूपपरस्य प्रकृतेः न्वयासंभवात् श्वित्रा वर्णे नीलवर्ण इत्यादाविव वर्णस्य रूपार्थकत्वात् देवानामिदं पितॄणामिदं तस्येदमित्यण् पित्र्यमिति
पाठे पितरो देवता यस्य वा यत्पितृत्रितयन् देवान्नं हव्यं पित्रन्नं कव्यं पानि पिबत्यनेन वा ष्ट्रन् नदादिभ्यः ष्ट्रन्निति मुकुटश्चिन्त्यः नादृग्यासूत्रादर्शनात् पात्रमयत्रे त्रिषु क्लीवं स्रुवादौ राज
मंत्रिणि तीरद्वयांतरे योग्ये स्रवति घृतादिकं स्रु स्रवणे स्रुवः कः घञर्थे क इति मुकुटश्चिन्त्यः स्रुवः क इति प्रतिपदोक्तस्य सत्वात् आदिना चमसोलूखलमुसलस्फ्यादि स्रुवो
होमपात्रविशेषः ह्लकी मूर्वयोः स्त्रियां २८ ध्रुवति ध्रुव स्थैर्ये इगुपधेति कः यद्वा ध्रु स्थैर्ये अच कुटादित्वान्डित्वं उवङ् ध्रुवः पुं को हरे विष्णौ वटे चोत्तानपादजे वसुयोगभिदोः पुंसि
ध्रुवं खेऽजस्रतर्कयोः स्त्री मूर्वायां शालपर्ण्यां गीतिस्रुग्भेदयोः स्त्रियां स्थिरे नित्ये निश्चिते च ध्रुवं क्लीवं प्रकीर्तितं उपविभर्ति उपभृत् भृञ् क्विप् जुहोति जुहुतिमभिजुहोतीनां द्वे चेति क्वि
प्दीर्घश्च स्रवति स्रु स्रवणे स्रुवः कः स्रुवः पुमान् च्चिक्केति स्रवतेश्चिक प्रत्ययः स्रुक् चांताण्णे च स्रुचो विशेषाः स्त्रियः स्त्रीलिंगाः स्रुच स्रुपुल्लिंगः मुकुटस्तु अन्येभ्योपि दृश्यत इति
क्विप् दृशिग्रहणाद्विध्यंतरोपसंग्रहणार्थात् धातोश्चुगागम इति व्याख्यत् तन्न चिक्केति सूत्रस्य जागरूकत्वात् क्विवविधानाच्च यदपि स्रुव इति बहुवचननिर्देशाद्ध्

हव्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकं २८ ध्रुवोपभृज्जुहूर्नातु स्रुवो भेदाः स्रुचः स्त्रियः उपाकृतः पशुरसौ योभिमंत्र्य क्रतौ हतः २९
परंपराकं शमनं प्रोक्षणं च वधार्थकं॥

हुत्वमित्रिलद् पिन भेदापेक्षया स्रुचः षष्ठं पतत्वात् यदपि ध्रुवासाहचर्यात् ह्वयोः स्त्रीत्वमेवेति तदपि न स्त्रिय इति विशेषवि
धः सत्वात् यथा स्रुव इति रूपभेदात् पुंस्त्वसिद्धेनेति पुंस्त्वविधिः तथा स्त्रिय इति स्त्रीत्वविधिर्बोध्यः न च स्रुचो विधानाभावे षष्ठ्यनुवादः कथं चंडांशुः पारिपार्श्वकाः स्रु
च्यातु वृद्धये त्यादिवदुपपत्तेः स्त्रिया इत्यस्य षष्ठ्यंतत्वकल्पने व्यर्थं क्वचित् स्रुव इति षष्ठ्यंत पाठः स्रवति क्विचि प्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं चेति क्विप् दीर्घो यज्ञ
पात्राणां पृथक् उपाक्रियते स्म कृञ् हिंसायां क्तः उपाकृतो ध्वरे हते पशौ नोपद्रुते त्रिष्विति विश्वमेदिन्यौ अभितो मंत्रयित्वा मंत्रिगुप्तभाषणे क्त्वा ल्यप् हतः हंतुमारब्धः ए
कं क्रतावभिमंत्रितपशोः २५ अकनेआकः परंपराया आकं अक कुटिलायां गतौ भावे घञ् अंचते घेञ्वा यद्वा परमतिशयेऽव्ययं परंपरः श्रेष्ठ आकोस्यास्मादृ षा
मेभ्यो वेल्युट् शमनं शांति वधयोः शमनः श्राद्धदेवने इति विश्वमेदिन्यौ शमनस्तु यमे शमनं शांतिसिंहयोरिति हैमः शसनमिति स्वामी॥

शसु हिंसायां ल्युट् शसनमित्यन्ये पसखंडने प्रकृष्टमुक्षणं उक्षसेचने ल्युट् प्रोक्षणं सेकवधयोरिति हैमः वधो हिंसार्थो ऽस्य त्रीणि यज्ञार्थपशुहननस्य प्रमीयते स्म प्रमीतः मीङ् वा हिंसायां उपसंपद्यते स्म पद गतौ कर्तरि कर्मणि वा क्तः प्रमीतं वाच्यलिंगं स्यात् प्रोक्षिते ऽपि मृते ऽपि चेति विश्वः उपसंपन्नमुद्दिष्टं निहते च स्वसंस्कृते इति विश्वहेमचंद्रौ प्रोक्ष्यते स्म उक्षसेचने क्तः प्रोक्षितं निहते सिक्ते इति रभसः त्रीणि यज्ञे हतस्य पशोः २६ संनीयते स्मेति णीञ् प्रापणे पाय्यसान्नाय्येति साधुः हूयते ऽग्नौ शुचौ तौसिः सान्नाय्यं हविर्विशेषः द्वे हुतं प्रक्षिप्तं वषडिति मंत्रोपलक्षणं वषडेमंत्रेण कृतं प्रक्षिप्तं द्वे हुतस्य अवभ्रियते ऽनेन डुभृञ् भृञ् भरणे वा अवे भृञ इति कुथन् दीक्षायां अंतः प्रधानकर्मसमाप्तौ क्रियमाणो यागः तत्र इष्टिविशेषः तस्यैकं तस्य यज्ञस्य क्रियामर्हति अर्हति अर्ह इत्यच् यज्ञमर्हति यज्ञर्त्विग्भ्यामित्यत्र तत्कर्माहतीत्युपसंख्यानात् घः एकं क्रतुक्रियां संपादनयोग्यस्य द्विजद्रव्यादेः २७ त्रिष्विति यच्छ्रियान्वितं इष्टं यागे च दाने च वांछिते ऽपि प्रयुज्यते इत्यजयः क्रतुश्च यज्ञः कर्म च दानादि तदिष्टशब्दवाच्यं यजनं नपुंसके भावे क्तः एकाग्निकर्म हवनं त्रेतायां यच्च हूयते अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते इति मनुः इष्टमाशंसिते ऽपि स्यात् पूजिते प्रेयसि त्रिषु सप्ततंतौ पुमान्

वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते २६ सान्नाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतं दीक्षान्तो ऽवभृथो यज्ञे तत्कर्मार्हं तु यज्ञियं २७ त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादिकर्मणि अमृतं विघसो यज्ञशेषभोजनशेषयोः २८ त्यागो विहापितं दानमुत्सर्जनविसर्जने० ॥

क्लीबे संस्कारे क्रतुकर्मणि एकं खातं पुष्करिणीखननमादिर्यस्य देवालयारामादिनिर्माणस्य खातादि च तत्कर्म च क्रिया तस्मिन् पूरणं पूर्यते स्म वा पृ पालनपूरणयोः भावे कर्मणि वा क्तः न ध्याख्येति निष्ठानत्वं न पुष्करिण्यः सभा वापी देवतायतनानि च आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् इति स्मृतिः पूर्तं त्रिषु पूरिते स्यात् क्लीबं खातादिकर्मणि एकं अमृतमिव अमृतसाधनत्वात् विशिष्टैरद्यते अद भक्षणे उपसर्गेद इत्यप् घञपोश्चेति घस्लृ अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते अयाचिते च मोभ स्रिचनाधन्वंतरिदेवयोः यज्ञस्य शेषो होमावशिष्टाज्यपुरोडाशादि देवपितृतिथिगुर्वादिभुक्तस्य शेषः तयोः क्रमेणैकैकं २८ त्यजनं त्यज हानौ घञ् त्यागो दाने च वर्जने विहायनं हाको ण्यंताद्भावे क्तः दत्तं दाञो भावे ल्युट् सृजेश्च दानं गजमदे त्यागे पालनच्छेदशुद्धिष्विति विश्वमेदिन्यौ विसर्जनं परित्यागे दाने संप्रेषणे ऽपि चेति हैमः वि

अ·टी·
टी·रा·
८२

स्पर्शः स्पर्शोस्पर्शनो मारुते पुंसि दाने स्पर्शनं नपुंसकमिति विश्वः पदगतो णत्वं ततः प्रतिपादने तु दाने प्रतिपत्तौ प्रबोधने इति विश्वः २९ दिशः अतिसर्जने दुवपूह् जीवर्जने हंतिदुरितं
मनया हंतेरंहश्चेत्यतिः अंहतिस्त्यागरोगयोरिति हैमः त्रयो दश मृतार्थे यदर्थे नन्नित्यसमासः तत्र तद्देहश्चतस्याहरिति वा राजाहेति टच् तद्देहे प्रेतदिने देहादूर्ध्वं उर्ध्वं
देहः राजदंतादिः उर्ध्वदेहे भवं अध्यात्मादित्वाट्ठञ् अनुशतिकादित्वादुभयपदवृद्धिः केचिदुत्तरपदवृद्धिं नेच्छंति प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यंते प्रत्यहं दीयमानस्य जलपिण्डादेः एकं तद्देहदानमिति पाठे तु समासांतविधेरनित्यत्वान्न टच् ३० पितृभ्यो दानं नुप्यते निवपनं वाडुवप् कर्मणि भावे वा घञ् सपिंडदानादूर्ध्वं पितृनुद्दिश्य दानस्य श्रद्धात्रास्ति प्रज्ञाद्यणः तेषां पितॄणां कर्म शास्त्रविधानेन एकं अनु अनु आह्रियते ह्ञ् हरतेऋहलोर्ण्यत् मासे भवं कालाट्ठञ्
पिडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति मनुः द्वे पंचदश मुहूर्तात्मकस्य दिनस्याष्टमो भागः कुत्सितं तपति तप संतापे संज्ञायामिति खच् अनव्ययस्येति नुम
यद्वा कुं भुवं तपति आगमशास्त्रस्यानित्यत्वान्न मुम् दिवसस्याष्टमे भागे मंदीभवति भास्करे स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयमिति शातातपः कुतप यो स्त्रियां द्वे हि

विश्राणनं वितरणं स्पर्शनं प्रतिपादनं २९ प्रादेशनं निर्वपनमपवर्जनमंहतिः मृतार्थे तद्देहे दानं त्रिषुस्यादौर्ध्वदेहिकम् ३० पितृदानं निवापः स्यात् श्राद्धं तत्कर्म शास्त्रतः अन्वाहार्यं मासिकेंशोष्टमोह्नः कुतपोस्त्रियां ३१ पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा सनिस्त्वध्येषणा याच्ञाभिशस्तिर्याचनार्थना ३२ षट्तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि॥ ९९ त्रेवाद्येच्छागजकंबलेकुशे दिनस्याष्टमांशे नासूर्ये कुतपौ
पुनः विट् शारिकायां एकं ३१ इष्यरनिच्छार्थस्य युच् परेर्वा पक्षे क्तिन् परीष्टिः परिचर्यायां प्राकाम्येऽन्वेषणे स्त्रियामिति विश्वः गवेषमार्गणे चुरादिः ण्यन्तात् युच् चत्वारि धर्माद्यन्वेषणस्य सनन सनं षणु दाने रून् अध्येषणं इषेः प्राग्वद्युच् द्वे गुर्वाद्याराधनस्य गुर्वादेः प्रार्थनया क्वचिदर्थे नियोजनस्येति स्वामी याचनं टुयाचृ याच्ञायां यजयाचेति नङ् अभिशंसनं शंसु स्तुतौ याचने च क्तिन् अभिशस्तिः पुनर्लोकापवादे प्रार्थिते पि चेति हैमः स्वामी तु अभिषसनं षसस्वप्ने क्तिन् सुषामादित्वात् पूर्वपदादिति
वाषत्वमित्यवोचत् याचेश्चुरादिण्यंतात् ण्यासेति युच् एवमर्थयाच्ञायां युच् चत्वारि याचनस्य ३२ आगन्तुपर्यंताः षट् अर्घाय इदं पादाभ्यां चेति यत् अर्घार्थजले पादा

८२

CC-0. In Public Domain. Digitization by eGangotri

अतिथेर्न्यः अतिथौ साधुः पथ्यतिथीति ढञ् एकैकं ३३ अवेशो अगृहे भवः अध्यात्मादित्वाट्ठञ् वेशो वेश्या गृहेगृहे नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा आगच्छति सितनिगमीति तुन् अततिक्रतन्यज्ञीतिरथिन् अध्वनीनोतिथिर्ज्ञेय इति स्मृतिः अतिथिः कुशपुत्रे स्यात् पुमानागंतुकेपि चेति विश्वमेदिन्यौ त्रिकांडशेषोपि प्राघुणस्त्व तिथिर्द्वयोरिति त्रीणिगृहागतस्य पूजनं पूज पूजायां विंति पूजी सङ् नमस्करणं नमो वरिवसितिक्यच् अप्रत्ययादित्यकारः चायनं चायृपूजानिशामनयोः चायेः क्ति निचिभावो निसंवाच्यः कंड्वादौ सपर् पूजायामिति पठ्यते अप्रत्ययात् अर्चपूजायां गुरोश्च हल इत्यः अर्ह पूजायां चुरादिः एयासश्रंथेति युच् षट् पूजनस्य ३४ वरिवसः करणं वरिवसशब्दः पूजार्थः नमोवरिवइति क्यच् अप्रत्ययात् शुश्रूषणं श्रु श्रवणे सन्नंतः अप्रत्ययात् परिचरणं परिचर्या परिसर्येति परिचर्यानिपात्यते परिच्चर्या नुपसर्येष्टिरिति भागुरिः उपासनं आस उपवेशने एयासेतियुच् उपासनमिति पाठे ल्युट् उपासनं शराभ्यासेप्युपास्ता वासनेपि चेति विश्वमेदिन्यौ चत्वारि से वायाः व्रजगतौ व्रजयजोरितिक्यप् अटनं परिचर्या परिसर्यामृगयाटस्यानामुपसंख्यानमित्यटाट्यानिपातितानाल्युट् अटाप‍र्यटनं भ्रमरूतिरत्नकोषाट्टापि त्री

कमाद्दातिथ्यातिथेये अतिथ्यर्थेत्र साधुनि ३३ स्युरावेशिक आगंतुरतिथिर्नागृहागते पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ३४॥
वरिवस्या तु शुश्रूषा परिचर्य्याप्युपासनं व्रज्याटाट्या पर्यटनं चर्य्यात्वीर्य्यापथे स्थितिः ३५ उपस्पर्शस्त्वाचमनमथमौनमभाषणं आनुपूर्वीस्त्रि

एयट नस्य चरणं गदमदचरयमश्चेति यत् यद्वा परिचर्येसत्रपरीत्यस्या विवक्षणाच्चर्येति साधुः ईर्यते ज्ञायते ईरगतौ एयत् ९ यांवावृत्परिपाटी अनुक्रमः ३६॥
ईर्यायाः पंथाः ऋक्पूरित्यः ईर्यापथे ध्यानाद्युपायेपरिव्राजकादीनां स्थितेरेकं ३५ उपस्पर्शनं स्पृश स्पर्शे घञ् उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि चमु अदने।
ल्युट् यद्वा उपस्पृश्यंते वारीएयत्र हलश्चेति घञ् आचम्यतेंऽभोत्र अधिकरणे ल्युट् द्वे मुनेः कर्म भावो वा इगंताच्चेत्यण् नभाषणंभाषव्यक्तायांवाचि भावे ल्युट् द्वे पू
र्वपूर्वानुक्रमेणवा वीप्सायांयोग्यतायांवा अव्ययीभावः अनुपूर्वभावः वर्णदृढादिभ्यश्चेतिष्यञ् षित्वान्ङीष् हलस्तद्धितस्येतियलोपः स्त्रियांवेति पक्षे क्लीव
ता आवर्तनमत्र वा वृतु वर्तने संपदादित्वात् क्विप् परिपाटनं पटगतौ स्वार्थेएयंतः अचइः द्विवचनत्वान्नयण् अनुक्रमणं क्रमु पादविक्षेपे घञ् नोदात्तोपदेशेति न

अ॰ टी॰ पर्ययणं इण् गतौ परावनुपात्यय इण् इति घञ् पर्यायः प्रकारः वसरे क्रमे इति विश्वः भेदित्र्यौपं चक्रमस्य अतिक्रम्य पतनं पत्लृ गतौ घञ् पर्ययणं इण् गतौ एरच् उपगन स्यातिक्रम्यायनं ए

टी॰ रा॰ रच् त्रीणि क्रमोल्लंघनस्य नियमनं यमः समुपनिविषु चेत्यप् नियमो यंत्रणायां च प्रतिज्ञानिश्चयेत्नेनियते वृङ् वृञ् वा पृषिरंजिभ्यां कित् इत्यतच् वा हलः कादत्रौ यिकित्वान्न गुणः यद्वा ॥

८३ व्रजेत्यनेन स्वर्गे गोचरसंचरेति घः पृषोदरादिः द्वे व्रतमात्रस्य उपवास आदिर्यस्य कृच्छ्चान्द्रायणप्राजापत्यनक्तभोजनादेः तदुपवासादि व्रतं पुण्यमेव संज्ञायां कन् एकमुपवा

सादेर्विहितव्रतस्य ३७ उपवसनं वसस्तंभे भावे क्तः अनेकार्थत्वादभोजने वृत्तिः प्रज्ञादित्वाण्णि औपवस्तं क्वचिदौपवस्त्रमिति पाठः उपवसति तृच् उपवसुरिदं कर्म तस्येदमित्यण् उप

वसनं वस निवासे घञ् भावे क्तः उपोषितं उपोषणं तु उष दाहे इत्यस्य द्वे भोजनविरहस्य विवेचनं विचिर् पृथग्भावे घञ् विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोः पृथगात्मा

यस्य सः तस्य भावः तल् द्वे प्रकृतिपुरुषादिभेदज्ञानस्य ब्रह्मणो वेदस्य तपसो वा वर्चः ब्रह्महस्तिभ्यां वर्चस इत्यच् वृत्तं चाचारः अध्ययनं च गुरुमुखादेरात्मस्य ग्रहणं तयोर्ऋद्धिः द्वे अ

पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ॥ नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकं ३७ औपवस्तं तूपवासो विवेकः पृथगात्मता स्याद्ब्रह्मव

र्चसं वृत्ताध्ययनर्द्धिरथाञ्जलिः ३८ पाठे ब्रह्माञ्जलिः पाठे विप्रुषो ब्रह्मबिन्दवः ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ ३९ मुख्यः स्यात्प्र

थमः कल्पोऽनुकल्पस्तु ततोऽधमः संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ४० ॥ ११ ब्रह्मणः अंजलिः एकं वेदपाठकाले कृतस्यांजलेः वेदपाठे मुखान्निर्गता विंद

वः ब्रह्मणो विंदवः एकं ध्यानं प्रत्ययैकतानता च योगश्चित्तवृत्तिनिरोधश्च तयोरासनं यद्वा ध्यानस्य योग उपायः ध्यानमेव योगो वा तस्यासनं स्वस्तिकसिद्धपद्मादि ब्रह्मणः सं

बंधि आसनं एकं कल्पते नेन वा कृपू सामर्थ्ये अच् घञ् वा कल्पः शास्त्रविधौ न्याये संवर्ते ब्रह्मणो दिने वेधनं विधविधाने इगुपधात्किदिति इन् विधिर्नानियतौ काले विधाने

परमेष्ठिनि यद्वा विधानमनेन वा चाञ् उपसर्गे घोः किः क्रमणमनेन वा घञ् नोदात्तोपदेशेति न वृद्धिः क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेपि च त्रीणि विधानस्य ३९ मुखमि

व शाखादिभ्यो यः व्रीहिभिर्यजेतेति यथा एकमाद्यविधेः अनुहीनः कल्पः प्रादिसमासः व्रीह्यभावे नीवारैरिति यथा एकं गौणविधेः संस्कार उपनयनं पूर्वं यत्र तत् श्रुतेर्ग्र

॥ ॥ हणं उपाक्रियते नेन ल्युट् एकं वेदपाठारंभविधिविशेषस्य ॥ ४० ॥ ॥ ८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पारश्योर्ग्रहणं यस्य सः। अभिमुखीकरणार्थं वादनं वंदनं वदवाक् संदेशयोः चुरादिः ल्युट् आभिमुख्येन वाद्यते आशीः कार्यते अनेनेति वा ण्यंतात् वदेः करणे ल्युट् द्वे नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कारस्य भिक्षणशीलः भिक्षयाच्ञायां सनाशंसभिक्षउः परित्यज्य सर्वं व्रजति व्रजगतौ परौ व्रजेः षः पदांत इति क्विप् दीर्घश्च पदांतविषयषत्वं च विणितिनु। स्वामिनः प्रमादः उणादौ विणोऽप्रकृतत्वात् कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीते कर्मंदकृशाश्वादिनिः पराशरस्य गोत्रापत्यं गर्गादिभ्यो यञ् पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीते पाराशर्यशिलालिभ्यामिति णिनिः मस्कनं मस्करः गतौ वाहुलकाद् अरः मस्करो ज्ञानं गतिर्वा अस्यास्ति मस्करमस्करिणौ वेणुपरिव्राजकयोरिति इनिः यद्वा मस्करो वेणुरस्यास्ति इनिः यद्वा माकृत कर्माणि शान्तिः शीलमस्य मस्करमस्करिणौ वेति साधुः यद्वा मुकुर इव शुद्धमंतःकरणमस्यास्ति प्राग्वन्निपातः यद्वा मंकते मकि मंडने वाहुलकाद् अरः आगमशास्त्रस्यानित्यत्वान्न नुम् मकरो निधिभेदो वा अस्यास्ति प्राग्वन्निपातः पंच संन्यासिनः ॥४१॥ तपोऽस्यास्ति तपः सहस्राभ्यामिति विनिः अण् च तपस्वी तापसे चानुकंपे त्रिषु तयोर्विति मांसिका कटुरोहिण्योरिति विश्वः परिकांक्षितुं शीलमस्य कांक्षि कांक्षायाम् परिवर्जने सुप्यजाताविति णिनिः पृषोदरादिः यद्वा पारमस्यास्ति इनिः पारिव्रस्य ज्ञानं कांक्षति त्रीणि तपस्विनः वाचं यच्छति यम उपरमे वाचियमोव्र

समे तु पादग्रहणमभिवादनमित्युभे भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥४१॥ तपस्वी तापसः पारिकांक्षी वाचंयमो मुनिः तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः ॥४२॥ ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतव्रती ॥

ते इति खश् वाचंयमपुरंदरौ च मन्यते मनज्ञाने मनेरुच्चेतीनिः मुनिः पुंसि वसिष्ठादौ वंगसेनतरौ जिने इत्युक्तो नवतिनः तपसः क्लेशं सहते षह मर्षणे अच् तपःक्लेशस्य सहः दाम्यति स्म दमु उपशमे गत्यर्थेति क्तः यस्य विभाषेति नेट् अनुनासिकस्येति दीर्घः वा दान्तेति स्वामिनः प्रमादः तस्य णिजन्तात्कर्मक्तान्तविषयत्वात् दांतस्तु दमितेऽपि स्यात् तपःक्लेशसहेऽपि च द्वे तपःक्लेशसहस्य वर्णः स्तुतिरस्यास्ति वर्णी ब्रह्मचारिणीति इनिः वर्णी स्यात्लेखने चित्रकरेऽपि ब्रह्मचारिणीति विश्वमेदिन्यौ ब्रह्म वेदाध्ययनव्रतं चरति तच्छीलो वा व्रते इति सुपीति वा णिनिः द्वे ॥४२॥ ऋषन्ति मजानंति ऋषी गतौ इगुपधात्किदिति नीन् स्त्रियां वा ङीप् ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयं सत्यं वचो येषां द्वे स्नाति स्म ष्णा शौचे गत्यर्थाकर्मकेति क्तः संज्ञायां कन् स्नाताद् इदं समाप्ताविति कनिति मुकुटः तन्न उक्तवचनादर्शनात् आप्लवते प्लुङ् गतौ पचाद्यच् आप्लवश्चासौ व्रती च ॥ ॥ ॥

अ॰ टी॰
रा॰ टी॰
८४

आप्लुतव्रतीतिपाठे गत्यर्थेति क्तः मुकुटस्तु आप्लव आप्लुतं वा स्नानं तत्राव्रतीति नियमस्नायीत्याह द्वे समावर्तवेदव्रतस्याश्रमांतरमगतस्य इंद्रियाणां ग्रामः निर्जित इंद्रियग्रामो येन तेय मनं यमु उपरमे भावे क्तः मलोपः यतमुपरमणमस्तीति नित्यं वा येषां अत इनिः यतं ते यती प्रयत्ने इन् यमेस्त्रिषु इति तल्लयाल्लीनो यः यतिः स्त्री पाढविच्छेदे निकार यतिनोः स्त्रियां अत्र पक्षे यमः क्तिन्नपि सुवचः त्रीणि निर्जितसर्वेन्द्रियस्य ४३ स्थंडिले शेते व्रतं इति णिनिः स्थंडिलाच्छयितरि व्रत इत्यण् द्वे अनास्तृतभूमिशायिन व्रतिनः रजस्तमोभ्यां विगताः निरादय इति समासः विगते रजस्तमसी येभ्य इति वा द्वयमतिगच्छंति अन्येष्वपीति डः द्वे निवृत्तरजस्तमोगुणानां ४४ पवते पुनाति वा पूङ् पवने वा अशित्रादिभ्य इत्रोत्रौ पवित्रं धर्म कुशे ताम्रे पयसि च क्लीवं मेध्ये स्यादभिधेयवत् प्रयच्छति स्म यमेरकर्मकत्वात् कर्तरि क्तः यद्वा प्रयतते यती प्रयत्ने अच् पवते स्म पूङ् पवने गत्यर्थेति क्तः पूतं त्रिषु पवित्रे च शठिते वहुलीकृते त्रीणि पापं सनोति सन् निवाषणु दाने षणसंभक्तौ वा त्रमंतानुडः पृषोदरादिः मूर्द्धन्यमध्यः कवर्गद्वितीयमध्यपाठेनु पाखंडयति खडि भेदने अच् पालनाच्च त्रयीधर्मः पा शब्देन निगद्यते तं खंडयंति ते यस्मात् पाखंडास्तेन हेतुना सर्वाणि चनानि लिंगानि च सर्वेषां लिंगानि वा॰ स

यनिर्जितेंद्रियग्रामा यतिनो यतयश्च ते ४३ यः स्थंडिलेव्रतवशाच्छेते स्थंडिलशाय्यसौ स्थांडिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः ४४
पवित्रः प्रयतः पूतः पाखंडाः सर्वलिंगिनः पालाशो दंड आषाढो व्रते राम्भस्तु वैणवः ४५ अस्त्री कमंडलुः कुंडी व्रतिनामासनं वृषी॥ ॥

वीलिंगानि संतियेषां अत इनिः द्वे आषाढी पूर्णिमा प्रयोजनमस्य विशाखाषाढादण् मंथदंडयोरिति अण् आषाढो व्रतिनां दंडे मासे मलयपर्वते स्त्री पूर्णिमायां पलाशस्य विकारः पलाशादिभ्यो वेत्यत्र व्रते ब्रह्मचर्ये एकं रंभस्य वेणोर्विकारः प्राग्वदत्र रंभाकदल्यप्सरसोर्ना वेणौ वानरांतरे इति विश्वः द्वे मचंद्रो व्रत इत्येव अन्यत्र वैणव एव एकं ४५ कस्य प्रजापतेर्जलस्य वा मंडः सारः तं लाति लभते वा मितद्वादिः मंड नं मडि भूषायां घञ् कस्य मंडं भूषां लाति वा कुणति कुण शब्दोपकरणयोः त्रमंतानुः जानपदेति ङीष् कुंड मग्न्यालये मान भेदे देवजलाशये कुंडी कमंडलौ जारात् पतिवत्नीसुते पुमान् पिठरे तु नना सुतायां तु जातिलक्षणो ङीष् द्वे वृवंतः सीदंत्यस्यां अन्येभ्योपीति डः पृषोदरादिः वर्षति सुखं वा वृषु सेचने इगुपधेति कः गौरादिः मूर्द्धन्यांतः अतसी वृसी मांसीति दंत्यांते षु चंद्रगोमिदर्शनाद्दंत्यांत तापि एकं ब्रह्मचर्याद्यासनस्य अजिनेति अ

८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचचरति चर्यतेवा चरणंतो मनिन् चर्म कृत्तो चफलके कृत्यते कृत्ती छेदनेक्तिन् कृत्तिश्चर्मत्वचामूर्जे कृत्तिकायां द्वयं स्त्रियां त्रीणि भिक्ष्यते भिक्षया ज्ञायां गुरो श्वेत्यः भि
क्षाणां समूहः भिक्षादिभ्योण् एकं ४६ सु अतीव आवृत्त्या अध्ययनं इङ् श्वेति घञ् स्वार्थमध्ययनं वा जपनं जपमान सेच व्यध जपोरित्यप् द्वेवेस्वाध्ययनस्य सवनं सुञ् अभिष
वे संज्ञायां समजेतिक्यप् ऋदोरप् उपसर्गादिति षत्वं ल्युट् च भवेदभिषवः स्नाने मद्यसंधानयोरपि सवनं त्वध्वरे स्नाने सोमनिर्दलनेपि च सेतिसुत्या त्रीणि सोमलताकंडन
स्य सर्वाणि एनांसि मानसादिपापानि पध्वंसयितुं शीलमस्य सुपीति णिनिः जप्यते जपमानसेचयोरदुपधादिति यत् अघं मर्षति मृष सहने सहनमभिभवः यद्वा मृष्य
ति ल्युट् स्त्रियां दित्वान्ङीप् एकं ४७ दर्शे अमावास्यायां क्रियमाणत्वात् उपचारात् दर्शशब्देन याग उच्यते पक्षांतेऽव्योदर्शने च दर्शः सूर्येंदुसंगमे पौर्णमास्यां भवः संधिवेलाघण
पौर्णमासः पुमान् यज्ञभेदे स्त्री पूर्णिमा तिथौ पक्षांतयोरमावास्यापौर्णमास्योः पृथग्भिन्नौ न तु पर्यायः क्रमेणैकैकं यच्छति अनेन वा यमनं वा पचाद्यच् यमः समुपनिविषु
चेत्यप् वा यमो न्यलिंगो यम जेनाकर्के शमने शनौ शरीरसाधनापेक्षनित्यकर्मणि संयमे शरीरमात्रेण साध्यं यावज्जीवं कार्यं सत्यास्तेयाहिंसादि यत्तस्यैकं ४८ यत्कर्म नि

अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदम्बकं ४६ स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणं ४७॥
दर्शश्च पौर्णमासश्च यागौ पक्षांतयोः पृथक् शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ४८ नियमस्तु स यत्कर्म नित्यमागंतुसाधनं उपवीतं यज्ञ
सूत्रं प्रोद्धृते दक्षिणे करे ४९ प्राचीनावीतमन्यस्मिन्निवीतं कंठलम्बितम्॥ ५० यं न तु यावज्जीवं कर्तव्यं आगंतुभिः कादाचित्कैः कामनया समयविशेषा

दिभिः साधनैः साध्यमुपवासस्नानजपादि तन्नियमः प्रागवत् नियमोयं व्रतयां च प्रतिज्ञानिश्चये व्रते एकं प्रोद्धृते वहिष्कृते सति वामस्कंधार्पितं यज्ञस्य सूत्रं यज्ञार्थं धृतं सूत्रं
वा शाकपार्थिवादिः उपवीयते स्म अजगति क्षेपणयोः अजेर्व्यघञपोः वीगत्यादिषु वा क्तः यद्वा उपाङ्जति स्म उपवेति स्म वा गत्यर्थेति क्तः द्वे ४९ प्राचीनं प्रदक्षिणमावीयते
तेस्म प्रागवत् अन्यस्मिन् वामे करे प्रोद्धृते सति एकं विपरीतधृतयज्ञोपवीतस्य निवीयते स्म प्रागवत् निअधोभावे वीतं गमनमस्य वा निवृत्ति प्रकृतेराधस्त्योभावविन्यासे कंठालंबि
तं एकं करद्वयेवहिष्कृते सति ऋजुभावेन स्थापितयज्ञसूत्रस्य अंगुलीनामग्रे देवानामिदं तस्येदमित्यण् देवो देवतास्य वा सास्य देवतेत्यण्॥ ॥ ॥

दैवो देवता अस्य वा साऽस्य देवतेत्यण् देवाद्यञञाविति यञ्वा एकं स्वल्पांगुल्योः कनिष्ठिकयोरधोभागे कः प्रजापतिर्देवतास्य कस्येदित्यण् इदंतादेशश्चतस्येदमित्यण् इति मुकुट
श्चिंत्यः कायः क इति देवते मूर्त्तौ संघे लक्ष्स्वभावयोः मनुष्यतीर्थ कायं स्यात् एकं ५० अंगुष्ठतर्जन्योः पितरो देवता अस्य वा वाय्वृतुपित्रुषसो यत् पितॄणामिदं पैत्रं तस्येदमित्यणिति मु
कुटः एकं द्विः स्वधारणे ब्रह्मा देवतास्य सास्य देवतेत्यण् ब्राह्मोऽजाताविति साधुः एकं ब्रह्मणो भावः भुवो भावे इति क्यप् तत्स्वभाव त्वतल्लौ युनक्ति युजिर् योगे इगुपधेति
कः युजेन सह तेन सहेति बहुव्रीहिः वोपसर्जनस्येति सहस्य सः यद्वा योजनं युक् संपदादित्वात् क्विप् सहयुजा सयुजस्तस्य सयुजो वा भावः ब्राह्मणादित्वात् ष्यञ् ब्रह्मणः
सायुज्यं त्रीणि ५१ देवस्वभावः देवभूयमादिर्यस्य देवत्वं देवसायुज्यं तद्वद्ब्रह्मभूयादिवत् त्रिरूपी कं तत्स्यनेन वा कृती छेदने कृतेश्छः कृचेति रकृ छोंतादेशश्च कृच्छ्रमा
ख्यातं मामभीलेयाय सांतपनादिनोः सम्यक् तपनमत्र प्रज्ञाद्यण् यद्वा संतपति ल्युट् तस्येदं कर्मण्यण् गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं एकरात्रोपवासश्च कृच्छ्रं सांत
पनं स्मृतं आदिना चांद्रायणप्राजापत्यपराकादिग्रहः एकं सम्यक् न्यासः आत्यंतिकस्त्यागः तदुक्तेः नष्टानेः भोजने प्रकृष्टमयनं इणगतौ एरच् अयगनो वा घञ् प्रायो

अंगुल्यग्रे तीर्थं दैवं स्वल्पांगुल्योर्मूले कायं ५० मध्येऽगुष्ठाङ्गुल्योः पित्र्यं मूले त्वांगुष्ठस्य ब्राह्मं स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ५१ दे
वभूयादिकं तद्वत् कृच्छ्रं सांतपनादिकं संन्यासवत्यनशने पुमान्प्रायोऽथ वीरहा ५२ नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना व्रात्यः सं
स्कारहीनः स्यादस्वाध्यायो निराकृतिः ५३ धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ॥ ९ मरणानशने मृत्यौ वा कृत्स्नतुल्ययोः एकं वीरोऽग्निस्तं हंति क्विप् यथा
नष्टोऽग्निर्यस्य इत्यग्न्याधानादिनाय स्याग्निहोत्रिणः निर्नष्टस्तस्य कुहनं कुह विस्मापने चुरादयंतः ण्यास श्रंथो युच् मिथ्याः तत्त्वे ईर्यापथस्याचारभेदस्य कल्पना संपादना कुहनायाम
जलं स्यादिति रत्नकोशः कुहना दंभचर्यायामीर्ष्यालो कुहनस्त्रिषु एकं दंभेन कृतध्यानमौनादेः अर्थलिप्सया मिथ्या धर्माश्रयणस्य वा शरीरायासजीवी व्याधादिव्रातः स इव ८५
व्रात्यादिभ्यो यः यद्वा व्रातमर्हतीति दंडादिभ्यो यः संस्कारैर्गर्भाधानादिभिरुपनयनादिभिर्वा हीनः द्वे न स्वाध्यायो वेदाध्ययनमस्य आकृतेरध्ययनचेष्टाया निर्गतः द्वे वेदाध्य
यनरहितस्य चत्वार्येकार्थानीत्येके ५३ धर्मस्य ध्वजश्चिह्नं धर्मो ध्वज इव वा धर्मध्वजोऽस्यास्ति इनिः लिंगमाश्रमादिचिह्नं धारणं वृत्तिर्जीविका हेतुर्यस्य द्वे ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिक्षाचर्य्यजटादिधारिणः अवकरणं कृविक्षेपे हिंसायां वा भावे क्तः अवकीर्णं विक्षिप्तं व्रतं हिंसितं वा अनेन इष्टादिभ्यश्चेतीनिः क्षतं खंडितं व्रतमस्य द्वे खंडितब्रह्मचर्य्या
देः ५४ अभिसर्वतः सायंतनेन कर्मणा निश्चयेन मुक्तः॥ अभिसर्वं सायंतनं कर्म निश्चयेन मुक्तं येन वा अभिसर्वतः उदति सूर्ये येन इतं गतं प्रातस्तनं कर्म्मास्मात् एकैकं परिविं
दति ज्येष्ठं परित्यज्य भार्यां लभते विद्लृ लाभे तृन् तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ एकं ज्येष्ठे विवाहरहिते कृतदारपरिग्रहस्य कनिष्ठस्य ५५ परिवर्जनं विंदति लभतेति
च तस्य परिवेत्तुर्ज्यायान् ज्येष्ठः एकं परिवेत्तुर्ज्येष्ठभ्रातुः विशिष्टं वहनं घञ् उपयमनं यमः समुपनिविषु चेत्यप् चाद् घञ् परिणयनं एरच् पाणेः पीडनं ग्रहणं कृत्वो
गाच्चेति समासः षट् ५६ व्यवायनं इण् गतौ वयगतौ वा एरच् घञ् वा ग्रामे भवः ग्रामादि यखञौ ग्राम्याणां जनानां धर्मः मिथुनस्य कर्म प्राणभृज्जातीत्यञ् युवादित्वा
द्वाऽण् नितरां धुवनं हस्तपादादिचालनमत्र रमणं नपुंसके भावे क्तः अनुदात्तोपदेशेति मलोपः पंच त्रयाणां वर्गः समूहः धर्मश्च कामश्च अर्थश्च तैः कृत्वा एकं चतुर्णां

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ५४ अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमं परिवेत्तानुजोनूढे ज्येष्ठे दारपरिग्रहात् ५५ प
रिवित्तिस्तु तज्ज्यायान्विवाहोपयमौ समौ तथा परिणयोद्वाहोपयमाः पाणिपीडनं ५६ व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतं त्रिवर्गो धर्मका
मार्थैश्चतुर्वर्गः समोक्षकैः ५७ सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ५८ इति ब्रह्मवर्गः॥ मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ॥

वर्गः मोक्षेण सहितैर्धर्मकामार्थैः कृत्वा उपलक्षितो वा एकं ५७ बलेन सहितैर्धर्मादिभिः चत्वारि भद्राणि श्रेष्ठान्यत्र द्वंद्वे यद्वा चत्वारि भद्राणि दिक्संख्ये संज्ञायामिति
समासः भद्रो वाच्यवच्छ्रेष्ठसाधुनोरिति विश्वः एकं जनीं वधूं वहंति संज्ञायां जन्या इति यदंतो निपातितः वरस्य जामातुर्ये स्निग्धास्ते तत्पक्षाः वयस्यादयः जन्यो वरवधूज्ञा
तिप्रियभृत्यहितेषु चेति विश्वः ५८ इति ब्रह्मवर्गविवरणम् मूर्द्ध्न्यभिषिक्तः राज्यदानसमये मूर्द्ध्न्यभिषिच्यते तत्प्रभवत्वात्सर्वोपि मूर्द्धाभिषिक्तः राज्ञोऽपत्यं राज
श्वशुराद्यत् ये च भावकर्मणोरिति प्रकृत्या यद्वा राजति राजृ दीप्तौ राजेरन्यः बाहुभ्यां जातः पंचम्यामजातौ विति डः वाह्वोर्जातो वा सप्तम्यां जनेर्डः बाहुजः क्षत्रियेवी
रे स्वयंजाततिलेपि चेति विश्वमेदिन्यौ क्षदति क्षद संवरणे सौत्रः ष्ट्रन् क्षतात् त्रायते वा एषोदरादिः क्षत्रस्यापत्यं क्षत्राद्घः विशेषेण राजति सत्सूद्विषेति क्विप् पंच क्षत्रि

Digitization by eGangotri

राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यात् पृथिव्या ईश्वरः सर्वभूमिपृथिवीभ्यामणञ् आ विति वर्त्तमाने तस्येश्वरः इत्यञ् पार्थिवो नृपतौ भूमिविकारे पार्थि
वीति च पार्थिवा स्त्रियां पृथिव्या विकृतौ त्रिषु क्ष्मां बिभर्त्ति क्विप् तुक् क्ष्माभृदिति पाठे क्ष्मां भुनक्ति पालयति क्विप् नॄन् पाति पा रक्षणे आतो नुपतिकः भुवं पाति महीं क्षि
यति क्षि निवासगत्योः महीं क्षयति वा क्षि क्षये च यियोः क्विप् तुक् सम्राज्ञः १ संलग्नोऽन्त एकदेशो यस्याः आदिश्यो धातुजस्येति समासः समन्तायाः स्वदेशाव्यवहितभूमेरि
मे राजानः तस्येदमित्यण् प्रणताः अशेषाः सामन्ताः स्वदेशानन्तरराजाः यस्य अधिकईश्वरः एकं सर्वसंनिहितनृपवशकारिणः चक्रे भूमंडले राजमंडले वा वर्त्तितुं शी
लमस्य सुपीतिणिनिः चक्रं गणे चक्रवाके इति विश्वः यद्वा चक्रं सैन्यं वर्तयितुं सर्वभूमौ चालयितुं शीलमस्य अवश्यं वा चक्रं वर्तयति आवश्यके तिणिनिः सर्वभू
मेरीश्वरः तस्येश्वर इत्यण् अनुशतिकादिः सार्वभौमस्तु दिग्नागे सर्वपृथ्वीयताव पीति विश्व मेदिन्यौ द्वे समुद्रपर्यन्तभूमीश्वरस्य मंडलस्य भूम्येकदेशस्य ईश्वरः।

राजाराट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः १ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः चक्रवर्ती सार्वभौमो नृपोन्यो मंडलेश्वरः २ ये
नेष्टं राजसूयेन मंडलस्येश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकं ३ राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् मंत्री धीसचि
वोमात्यो न्ये कर्मसचिवास्ततः ४ महामात्राः प्रधानानि पुरोधास्तु पुरोहितः॥ ८८ स्यान्मंडलं द्वादशराजके च देशे च बिंबे च कदंबके चेति विश्वः एकं
२ सम्यग्राजति सम्राडिति क्विप् मो राजि समः क्वौ एकं सार्वभौमविशेषस्य केचित्तु पृथक् त्रीणि नामान्याहुः राजसूयकर्त्ता सम्राट् द्वादशराजमंडलस्येश्वरोपि सम्राट् सर्व
नृपतीनां शासकोपि सम्राट् राज्ञां राजन्यानां च समूहः गोत्रोक्षोष्ट्रोरभ्रेति वुञ् एकैकं ३ मंत्रो गुप्तभाषणमस्यास्ति अत इनिः यद्वा वश्यं मंत्रयते मन्त्रि गुप्तभाषणे आव
श्यके तिणिनिः धिया धियां वा सचिवः सहायः धीप्रधानः सचिवो वा अमा सह समीपे वा भवः अव्ययात्त्यप् त्रीणि ततो धीसचिवादन्ये कर्मसु सचिवाः सहायाः एकं ४॥ ८६
मात्रा कर्णविभूषायां वित्ते माने परिच्छदे महती मात्रा येषां ते प्रकर्षेण धीयंते डुधाञ् धारणपोषणयोः कृत्यल्युट इति कर्मणि ल्युट् प्रधानं स्यान्महामात्रे प्रकृतौ परमा
त्मनि प्रज्ञायामपि च क्लीबमेकत्वे नूतमसंदेति क्लीबत्वं पुंल्लिंगोपि महामात्रः प्रधानः स्यादिति पुंस्कांडे वोपालितात् महामात्रः समृद्धे चामात्ये हस्तिपकाधिपे द्वे प्रधानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रीणि कर्मसहायानामित्येके पुरोग्रे धीयते पुरसि चेति धात्रो सिः पुरोधीयते स्म क्तः द्धातेर्हिः द्वे ऋणदानादीन्यष्टादश विवादस्थानानि व्यवहाराः तेषां द्रष्टरि निर्णेतरि प्रच्छ
नं क्विब्वचिप्रच्छि श्री त्युणादिसूत्रेण क्विब्दीर्घौ संप्रसारणाभावश्च विवचनं घञ् प्राड्विवाकश्च प्राड्विवाको प्रश्नविवेकावस्य स्तः अर्श आद्यच् प्रश्नविचारयोः कुशल इत्यर्थः
विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः विचारयति येनासौ प्राड्विवाक स्ततः स्मृतः अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोरिति विश्वः पश्यति ण्वुल् अक्षाणां व्यवहाराणां
दर्शकः द्वे धर्माध्यक्षस्य ५ प्रतिहरणं घञ् उपसर्गस्य घञीति वा दीर्घः प्रतीहारी जनवारणमस्त्यस्य अर्श आद्यच् मुकुटस्तु प्रतिहाराभिमुख्येनाभिमुखं जनानप्र
तिहरति बहिः प्रापयति ज्वलिति कसंतेभ्यो ण इति व्याख्यत् तन्न ज्वलादिपाठात् ज्वलादेराकृतिगणत्वाभावाच्च प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिती
ति विश्वमेदिन्यौ द्वारं पालयति कर्मण्यण् द्वारि तिष्ठति सुपीति कः द्वारि तिष्ठति स्म गत्यर्थाकर्मकेति क्तः द्वाःस्थित दर्शक इति व्यस्तसमस्तं नामस्या दर्शको दर्शयिता प्रतीहा
रेपि दर्शक इति रुद्रः द्वारयोर्द्वाः स्थिता दर्शीति रभसः पंच द्वारपालस्य अवश्यं रक्षंति रक्षपालने आवश्यके णिनिः रक्षिणां वर्गः अनीकेनानीके वा तिष्ठति सुपीति कः

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ५ प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षाधिकृतौ समौ ६
स्थायुकोऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः ७ अंतःपुरे त्वधिकृतः स्यादंतर्वंशिको जनः ॥

अनीकस्थो रणगजे हस्तिशिक्षाविचक्षणे राजरक्षिणि चिन्हे च वीरमर्दनकेपि चेति विश्वमेदिन्यौ द्वे रक्षकगणस्य अधिगतो संव्यवहारं अध्यादय इति समासः प
द्वा अध्यक्षति अक्षूव्याप्तौ अच् अध्यक्षोधिकृते प्रोक्तः प्रत्यक्षेत्वभिधेयवत् अधि अधिकं उपरि वा क्रियते स्म क्तः द्वे व्यापारितस्य ६ स्थातुं शीलमस्य लषपतपदस्थे
त्युकञ् एकमेक ग्रामाधिकृतस्य गोपायति गुपूरक्षणे आयादय आर्द्धधातुके वा अच् गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि ग्रामस्याधिकृते पुंसि सारिवास्त्रियोर्ष
धौ स्त्रियां एकं बहुग्रामाधिकृतस्य भूरिणि सुवर्णे नियुक्तः तत्र नियुक्त इति ठक् कनकस्याध्यक्षः द्वे सुवर्णाधिकृतस्य रूप्यः स्यात्सु दरेत्रिषु आहतस्वर्णरजतेच नपुं
सकं रूप्यस्याध्यक्षः निष्के हेम्नि नियुक्तः प्राग्वत् टंककपतिर्नैष्किको रजताध्यक्ष इति रभसः द्वे टंककादिशालायां नियुक्तस्य ७ अंतरभ्यंतरो वंशो गृहं अंतर्वंशे नियुक्तः

संज्ञापूर्वकत्वान्नवृद्धिः यद्वा अंतर्वंशो स्यास्तिअतइनिठनौ एकमंतःपुराधिकृतस्यजनस्य सुष्ठुविदंतंविद्वांसमपिलांतिवशवर्तिनंकुर्वंतिसुविदल्लाःस्त्रियःतासामिमे
रक्षकाः तस्येदमित्यण् कंचुकश्चोलकोस्त्येषांइनिः कंचुकीजोंगकतरोमहल्लेपन्नगोविदेइतिहेमः तिष्ठंत्येषुपुरुषाःघञर्थेकः स्थानां दाराणांपतयःपालकाःस्थपतयः
एवंचतुर्वर्णादित्वात्स्वार्थेष्यञ् स्थपतिः कंचुकिन्यपिसुविदंतिइगुपधेतिकः सुविदाएव प्रज्ञादित्वात्स्वार्थेण् यद्वासुवेदनंसंपदादित्वात्क्विप् सुविद्सुज्ञानमस्त्येषां
षांतेज्योत्स्नादित्वादण् यद्वा सुविदश्चतुराःस्त्रियस्तासामिमेरक्षकाः तस्येदमित्यण् चत्वारिराज्ञांस्त्र्यगारेवहीरक्षाधिकृतस्य ८ शाम्यतिस्त्रीश्राभावात् शमउपशमेशमे
ढःशण्ढःक्लीवस्तुकंचुकीतिरभसः शंढःस्यात्पुंसिगोपतौ आकृष्टांडेवर्षवरेतृतीयप्रकृतावपिवृणोतिवरतिवाहृञवरणेवरआवरणेवाअच् वर्षस्येरेतःपातस्यवरः येलस्य
सत्वाःप्रथमाःक्लीवाश्चस्त्रीस्वभाविनः जात्यानदुष्टाःकार्येषुतेवैवर्षवराःस्मृताः द्वे अत्संतान्तर्महल्लकानांसेवने सेवृसेवनेण्वुलसेवकस्वप्रवासेनावाच्यलिंगोनुजीवि
नि अर्थीसन्निहितः स्यात्तिअर्थाच्चासन्निहितेइतीनिः अर्थीपुमान् याचकेस्यात्सेवकेचविवादिनि अनुजीवितुंशीलःसुपीतिणिनिः श्रीलिशानयति शाद्वशानतनेएयंतः

सौविदल्लाःकंचुकिनःस्थापत्याःसौविदाश्चते ८ शंढोवर्षवरस्तुल्यौसेवकार्थ्यनुजीविनः विषयानंतरोराजाशत्रुर्मित्रमतःपरम् ९ ३
दासीनःपरतरः पार्ष्णिग्राहस्तुपृष्ठतः रिपौवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः १०॥ ((रुशातिभ्यांकुन् बहुलमन्यत्रापीतिणिलुक् शदेर्जश्चा इयश्चे
तिरुःहृस्वश्चेतिमुकुटस्तन्न उकारीत्यानिर्वाहात् एकंस्वदेशाव्यवहितदेशस्यराज्ञःमेघतित्रिमिदास्नेहनेअमिचिमिदिशसिभ्यःक्रः इतिक्तेतिमुकुटः तन्नगुणप्र
संगात् सूत्रस्यसत्वाच्च मित्रंसुहृदिसद्गुणेसूर्येपुंसिस्त्रियांगंधद्रव्येदैत्यांतरेपुमान् अतः शत्रोःएकं अतिशायितःपरःपरतरःउदासेआसउपवेशने· लटः शानचईद्
दासइतिईत्वएकंशत्रुमित्राभ्यांपरस्यराज्ञः पार्ष्णिपश्चात्पदंगृह्णातिकर्मण्यण् सैन्यपृष्ठेपुमान्पार्ष्णिःपश्चात्पदजिगीषयोरितिविश्वः एकंजिगीषोःपृष्ठभागस्थि
तस्यराज्ञःरपतिरोषंरयव्यक्तायांवाचिरपेरिचोपधायाइतिकुः वीरस्यकर्मभावोवायुवादित्वात्नवैरमैथुनिकयोरितिनिर्देशात् वाऽणवैरमस्यास्तिइनिःसपत्नीवव्यस
पत्नइतिनिर्देशादकारः इयर्तिविरोधंऋगतौअचइः द्वेष्टिद्विषअग्नीतोद्विषोऽमित्रेइतिशतृद्वेषशीलःक्रुधमंडार्थेभ्यश्चेतियुच दुष्टंहृदयमस्य सुहृद्दुर्हृदौमि

CC-0. In Public Domain. Digitization by eGangotri

द्विष्टद्विपविरुद्धः पक्षोऽस्य पक्षो मासार्द्धके पार्श्वग्रहे साध्यविशेषयोः विविधः पक्षोऽस्य वा न हितमस्मात् अमति गच्छति अम गत्तौ रोगे वा अमेर्द्विषति चिदितीत्रन् दस्यति दसु उपक्ष
येयजिमनिशुंधिदसिजनिभ्यो युच् वाहुलकात् रन् दशाभावः शातयति रुशातिभ्यां क्रुन् शत्रुरेव प्रज्ञाद्यण् अभिहन्तुं शीलः सुपीति णिनिः द्वेष्ट्यभियाति रमित्र इति रत्नकोशः
तत्राभियातेः क्तिच् वाहुलकात् निर्वा पिपर्ति रोषं पूपालनपूरणयोः अच् न राति सुखं रा दाने क्तिच् तिर्वा प्रतिकूलमर्थयितुं शीलः अर्थ याच्ञायां सुपीति णिनिः परिदोषाख्याने
पंथयितुं शीलः णिनिः पथि गतौ चुरादिः परिशब्दे च प्रकृते दोषाख्याने निरसने पूजाव्याप्त्योश्च भूषणे तु नविंशतिः ११ वयसा तुल्यो नौ वयइति यत् स्निह्यति स्निह प्रीतौ म
त्ति वृद्धिपूजार्थेभ्यश्चेति चाद्वर्तमाने क्तः समानं वयोऽस्य ज्योतिर्जनपदेति समानस्य सः त्रीलिङ्गो तुल्यवयसः मेद्यति ञिमिदा स्नेहने अमिचिमिदिशसिभ्यः क्त्रः घ्नन्तीति मुकुटश्चिं
त्यः समानः ख्यायते लोकैः समाने ख्यः स चोदात्त इतीण स च डित् टिलोपः नो व्योर्य लोप इति अनुवर्तनात् यलोपः समानस्य सभावः शोभनं हृदयमस्य सुहृत् हृद्दृशाविति सा
धुः त्रीलिङ्गो सख्युर्भावः कर्म वा सख्युर्यः सप्तभिः पदैरवाप्यते साप्तपदीनं सख्यमिति साधुः द्वे सख्युर्धर्मकर्मणोः अनुपम्य रोधनं रुधिर आवरणे घञ् अनुगम्य वर्तनं क्विना

द्विड्विपक्षाहितामित्रदस्युशात्रवशात्रवः अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः ११ वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् सख्यंसा
सप्तपदीनं स्यादनुरोधोनुवर्तनं १२ यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चारश्च गूढपुरुषश्चाप्तः प्रत्ययितस्त्रिषु १३ सांवत्सरो ज्योतिषिको दै

राधनं द्वे आराध्यादेरिष्टसंपादनस्य १२ अर्हति अर्ह पूजायां अच् योयोऽर्हो यथार्हवर्णः रूपमस्य वर्णः स्याद्द्विजादरूपयोरिति धरणिः प्रकर्षेण वज्ञगणकावपि
निधीयतेऽनेय मन्त्र उपसर्गे घोः किः प्रणिधिर्ना खले चरे अपसर्पति सृप्लृ गतौ अच् चरति चर गतौ अच् चरो स्याद् द्यूतभेदे च भौमे चारे त्रसे चले प्रज्ञाद्यणि चारोऽपि स्पशति स्प
श बाधनस्पर्शनयोः अच् स्पशः स्यात्संपराये च प्रणिधावपि पुंस्ययं चारः पियालवृक्षे स्यात् द्गतौ वंधायसर्पयोः गूढश्चासौ पुरुषः स च चारस्य हलकारा इति ख्यातस्य आप्यते
स्म आप्लृ व्याप्तौ क्तः प्रत्ययो विश्वासः संजातोऽस्य तदस्य संजातमितीतच् प्रत्ययः शपथेरं घे विश्वासाचारहेतुष्विति विश्वः द्वे विश्वासाधारस्य १३ संवत्सरं वेत्ति नदधीते तद्वेद इ
त्यण् ज्योतिर्नक्षत्रादिप्रतिपादको ग्रन्थः क्रतेग्रन्थे इत्यण् संज्ञापूर्वकत्वान्न वृद्धिः ज्योतिषमधीते वेद वा ॥

CC-0. In Public Domain. Digitization by eGangotri

अ·टी· कनृवृष्यादीनि ठक् देवं प्राक्तनं शुभाशुभं कर्म जानाति आत्तोनुपेतिकः गणयति गणसंख्याने ण्वुल् मुहूर्तमधीते वेद वा प्राग्वहण् ठको ज्ञानमस्यास्ति इनिः कृतान्तं वेत्ति
रा·टी· उक्थादिठक् अष्टौ १४ तंत्रं सिद्धान्तमधीते वेद वा प्राग्वत् ठक् ज्ञातः सिद्धान्तो येनं इत्यार्थ ज्ञातुः सत्रमस्यास्ति इनिः सत्रमाच्छादने यज्ञे सदादाने च कैतव इति विश्वः
८९ गृहस्य पतिः द्वे सदान्नादिदानकर्तुर्गृहस्थस्य लिपिं करोति दिवाविभानिशा ट: एवं लिबिकरोपि अक्षरैर्वित्तः तेन वित्त इति चणप् एवमक्षरचुञ्चुरपि लिखति लिख अ
क्षरविन्यासे शिल्पिनि ष्वुन् एवुल्वा चत्वारि १५ लिख्यते स्म क्तः अक्षराणां विन्यासः लिखितं च अक्षरविन्यासश्चानयोः समाहारः तस्मिन् कर्मधारयो वा लिप्यते लि
प उपदेहे इकृकृष्यादिभ्यः इगुपधात्कित् इति नवा किं लिपिलिबिवली इति लिंगानुशासनवो वा लिबिः सौत्रो धातुरिति मुकुटः द्वे चत्वार्येव नामानीति केचित् लिखिताक्षर
संस्थाने इत्येकमेव पदमित्यन्ये संदेशं वाचिकं हरति हरतेरनुद्यमनेऽच् द्रवति दुगतौ दुतनिभ्यां दीर्घश्चेति क्तः पक्षा दूयते स्म दूङ् परितापे गत्यर्थेति क्तः द्वे दूतस्य भा

स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि १४ तान्त्रिको ज्ञातसिद्धान्तः सत्री गृहपतिः समौ लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके १५ लि
खिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी १६ अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि स्वाम्यमात्य
सुहृत्कोशराष्ट्रदुर्गबलानि च १७ राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च॥

८९ वः कर्म वा दूतवणिग्भ्यां चेति यः ब्राह्मणादित्वात् ष्यञि दौत्यमपि केचि
त् दूत्यं तद्भागकर्मणी इति पाठमन्यन्ते तत्र दूतस्य भाग कर्मणी इतियत् १६ अध्वानमलं गच्छति अध्वनो यत्खौ आत्माध्वानौ खे ये चाभावकर्मणोरिति टिलोपो न अध्वानं ग
च्छति अंतान्यंता ध्वे निड: पंथानं नित्यं गच्छति पथोण् नित्यं स्त्रियां पांथा पथः ष्कन् षित्वात् ङीष् पथिकी पंच स्वामी राजा पुरोहित इति श्रीधरः अमात्यो मंत्री सुहृन्मित्रं कोशो
भंडारः राष्ट्रं देशः पर्वतादि दुर्गाणि बलं सैन्यं १७ राज्यस्य राजकर्मणोऽङ्गानि साधनानि प्रकृष्टं कुर्वन्ति राज्यं क्तिच् पौराणां नागराणां श्रयन्ति श्रीयन्ते वा वहिश्रीतिनिः ए ८८
कमुख्याः सजातीयसमूहाः कामंदकीये स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते पौरश्रेणिभिः सहाष्टाङ्गमपि राज्यमिति दर्शि
तं द्वे संधानं उपसर्गे घोः किः विग्रहं विविधं वा ग्रहणं ग्रह वृद्धित्यप् यात्यत्र ल्युट् आसनं आस उपवेशने ल्युट्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विप्रकारं संख्यायाविधार्थे धाहित्रो द्वैधमुत्र आश्रयणं श्रिञ्सेवायां एरच् १९ एतानिषड्गुणा शब्दवाच्यानि शक्यते जेतुमनयस्त्रियां क्तिन् शक्तिशब्दवाच्याः भवत्यने नश्रिणीभुवइति घञ् प्रकृष्टोभावः उक्तं हि कोषदंडवलंप्रभुशक्तिरिति उत्सहतेनेन षहमर्षणे हलश्चेति घञ् उक्तं हि विक्रमंबलमुत्साहशक्तिरिति संध्यादीनां सामादी नांचयथावत्स्थापनं नतुज्ञानवलं मंत्रशक्तिः पंचांगमंत्रो मंत्रशक्तिरित्यन्ये क्षयणं क्षिक्षये एरच् अष्टवर्गस्यापचयः क्षयः उपचयोवृद्धिः वर्द्धनं वृधुवृद्धौ क्तिन् अपच य उपचयाभावः स्थानं कृषिर्वणिक्पथो दुर्गं सेतुः कुंजरवंधनं खन्याकरबलादानं शून्यानां चनिवेशनमित्यष्टवर्गाः त्रयाणां वर्गः १९ प्रतापयत्यनेन तपसंतापे ण्यं तः पुंसीति घः प्रतप नंवा भावे घञ् भवत्यनेन श्रिणीभुवइति घञ् प्रभवनं वा भावे घञ् प्रकृष्टोभावः अधिक्षेपापमानादेः प्रयुक्तस्य परेणायत्प्राणात्ययेप्यसहनं तत्तेजः समुदात्हृतमिति भरतः कोशोधनं दंडोदमः सैन्यं च ताभ्यां जातं पंचम्यामिति डः हेमप्रतापस्य भेदनं भिदिर्विदारणे घञ् शत्रोरमात्यादीनामुपायेन परस्तो विश्लि व्यात्मसात्करणं भेदः दमनं दमुशमनायां अमंताड्डुः दंडः शान्तिः सामनं सामसांत्वप्रयोगे वाहुलकात्मनिन् यद्वा स्यति रोषमनेन वा षोअंतकर्म्मणि सांनिभ्यां मनिन्

संधिर्नाविग्रहो यानमासनं द्वैधमाश्रयः १९ षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां १९ स
प्रतापः प्रभावश्च यत्तेजः कोशदंडजं भेदो दंडः सामदानमित्युपायचतुष्टयं २० साहसं तु दमो दंडः साम सान्त्वमथो समौ ॥ ॥

निणविनिमनिन् मुकुटस्तु सामन्सीमन् हेमन् इत्यादिना निपात्यत इत्याह तन्न उज्ज्वलदत्तादिभिस्तादृशसूत्रादर्शनात् प्रियवचनादिनाक्रोधोपशमनं साम परस्परो पकाराणां दर्शनं गुणकीर्तनं संबंधस्य समाख्यानमायत्यासंप्रकाशनं वाचापेशलयासाधुतवाहमितिचार्पणं इति सामविधानज्ञैः साम पंचविधं स्मृतं संधनस्य परेभ्यः प्र तिपादनं दानं उपायतेनेन हलश्चेति घञ् उपायः सामभेदादौ तथैवोपगतौ पुमान् उपायानां चतुष्टयं अन्यत्र सप्तोपायाः उक्ताः सामदानं च भेदश्च दंडश्चेति चतुष्टयं मायो पेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः २० सहसि वले भवं तत्र भव इत्यण् साहसं तु दमे दुष्कर कर्मणि अविमृश्यकृतौ धार्ष्ट्ये इति हेमः दमनं दमु शमनायां घञ् नोदा त्तोपदेशेऽजिनवृद्धिः दमः स्यात्कर्दमे दंडे दमने दमथेपि चेति हेमचंद्रः अमंताड्डुः दंडः सैन्ये दमे यमे मानव्यूहग्रहभेदे च अश्वे कोणे नुचरे मथि प्रकांडे लगुडे कोणे चतुर्थोपायगर्व

Digitization by eGangotri

अ॰ टी॰ टी॰ रा॰ ८८

त्रीणि दंडस्य सांत्वनं सांत्वसामप्रयोगे अदन्तः एरच् घञ् वा भेदो धर्म्मविशेषस्यादुपजापे विदारणे उपांशु जपनं जपव्यक्तायां वाचि जपमानसे च घञ् हे उपधीयते शुद्धि
ज्ञानमत्र डुधाञ् आतश्चोपसर्गे इति सङ् आद्येन कामार्थभयग्रहः एकं राज्ञा धर्म्मार्थकामभयैरमात्यादेः परीक्षणस्य २१ निःशलाकां ताः पंच अविद्यमानानि षड् क्षीण्य
त्र अषडक्षाशितंगवलंकर्मेति खः स्वार्थे एकं द्वाभ्यामेव कृतस्य मंत्रस्य विविचंति जना अत्र विचिर् पृथग्भावे घ्यौ व्यार्थत्वात् क्तत्यर्थत्वाद्वा क्तोधिकरणे चेति क्तः विविक्तं त्रिषु
संपृक्ते रहः पूत विवेकिषु विगतो जनो स्मात् छद्यते स्म छद अपवारणे क्तः आगमशास्त्रस्यानित्यत्वान्नेट् छन्नं तु रहसि क्लीवं छादिते वाच्यलिंगकं मुकुटस्तु वा दान्तशां
तेति निपातेनादित्याह तन्न णिजंतस्य निपातनात् शलाका शारिका मदनशारिकेति पर्यायः शल्यं श्वाविच्छलाका स्याच्छवो मदनशारिकेति ताल्व्यादी रभसः निर्गता
शलाकाभ्यस्मात् शलाकाया निर्गतो वा तथा शब्दः समुच्चये रहस्यते रहस्यागे असुन् यद्वा रमंते त्र देशो ह चेत्यसुन् हों तारेफश्च रहसलैर होगुह्यो रभसोपि रहो निधुवने
पि स्याद्रहो गुह्ये नपुंसकमिति २२ उपगताः अंशवः किरणा अत्र उपांशु जपभेदे स्यादुपांशु विजने व्ययं अलिंगे ह्रे अव्ययसप्तम्येकांतस्य रहो भवं दिगादित्वाद्यत् रहस्यास्त्री

भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणं २१ पंचत्रिषषड् क्षीणोयस्तृतीयाद्यगोचरः विविक्तविजनच्छन्ननिःशलाकास्तथा रहः २२ रह
श्चोपांशु चालिंगे रहस्यं तद्भवे त्रिषु समौ विश्रंभविश्वासौ भ्रेषो भ्रंशो यथोचितात् २३ अभ्रेषन्यायकल्पास्तु देशरूपं समंजसं॥ ॥

न दीर्भेदगोपनीये भिधेयवत् एकं विश्रंभणं श्रंभु विश्वासे दंत्यादिस्तालव्यादिश्च घञ् विश्रंभः केलिकलहे विश्वासप्रणयेपि च विश्वसनं श्वस प्राणने घञ् हे यथोचिता
त् यथाप्राप्तात् भ्रंशोऽधः पतनं भ्रेषृ चलने भ्रेषणं घञ् एकं २३ भ्रेषादन्यः नियमेन ईयते परिन्यायो न्रीणोरिति घञ् कल्पनं कृपू सामर्थ्ये घञ् लत्वं कल्पः शास्त्रविधौ न्यायेसं
वर्तें त्र क्षणे दिने दिश्यते दिश अतिसर्जने घञ् दिशो रूपमस्य दिश्यमानस्योचितस्य रूपं यद्वा देशनं घञ् प्रशस्तं देशनं वा प्रशंसायां रूपप् समप्रगंजोऽत्र अच्प्रत्ययान्त्वेत्यत्रा
जितियोगविभागादच् यद्वा संगतमंजसा तत्त्वमत्र ह्रस्वो नपुंसकस्येति ह्रस्वत्वं पंचोचितस्य युजिर् योगे क्तः युक्तो युक्ते पृथग्भूते क्लीवं हस्तचतुष्टये उपयंत्यनेन एरच् उपाय ८८
एव उपायाद्ध्रस्वश्चेति ठक् ह्रस्वश्च लभ्यते पारदुपधादिति यत् लभ्यं युक्ते च लब्धुं येभजते फलमत्र ब धाति भज सेवायां ताच्छील्येति चानश् शानञ् वा अभिनीयते स्मणीञ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तः अभिनीते न तुल्यं न्याय्यं अभिनीतं संस्कृतं च न्याय्ये चामर्षणे त्रिष्विति रुद्रः अभिनीतस्त्रिषु न्याय्ये संस्कृतोऽमर्षिणोरपि २४ न्यायादनपेतं धर्म्मपथ्यर्थेति यत् युक्ता दयः षट्
त्रिषु षट् न्यायागतस्य संप्रधारणं धृञ् धारणे ण्यंतः ण्यासेति युच् अर्थे उपधाख्यायां संपूर्वः ल्युट् द्वे इदमुचितमेवेति निश्चयस्य अवालंबने कार्यमवलंब्य वदनमत्र वद
नं घञ् निर्देशः कार्यादेशः घञ् एवं निदेशः शासे ल्युट् २५ क्तिन्नावादिभ्य इति क्तिन् बाहुलकात् निः शास्तिः आज्ञाप न ज्ञा अवबोधने आतश्चोपसर्ग इति अङ् षट् आज्ञा
याः संतिष्ठतेऽनया सम्यगवस्थानं वा प्राग्वदङ् मर्यंतिसीमार्थेऽव्ययं तत्र दीयते प्राग्वदङ् धारयति धर्मं नद्यादित्वात् ल्युः : युज्वातिष्ठत्यत्र बाहुलकादधिकरणे क्तिन् स्था
नं वा स्थागापेति क्तिन् चत्वारि न्याय्यपथ्यस्थितेः एति इण् गतौ इण आगः पराधे चेत्यसुन् आगादेशश्च अगति अगगतौ वस्य गिभ्यां णिदित्यसुन् इति सुभूतिः तन्न उज्ज्व
लदत्तादिषूक्त सूत्रादर्शनात् आगोऽपराधे पापे स्यात् सांतं क्लीवं अपराधनं राधसंसिद्धौ घञ् मन्यते मनज्ञाने कमिमनिजनीति तुः मंतुः पुंस्यपराधेपि मनुष्येपि प्र
जापतौ त्रीणि उन्पूर्वात् द्यते भावे ल्युट् वंध वंधने भावे ल्युट् २६ द्वौ पादौ परिमाणमस्य पणपादेति यत् पद्यत्यतदर्थ इति पद्भावः प्राण्यंगस्यैव पादस्य तत्र ग्रहणात्

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् २४ न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनं अववादस्तु निर्द्देशो निदेशः शासनं च सः २५ शिष्टि
श्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः आगोपराधो मन्तुश्च समे तूद्दानबंधने २६ द्विपाद्यो द्विगुणो दंडो भागधेयः करो बलिः ॥

एकमपराधे शास्त्रेण बोधितदंडाद्विगुणदंडस्य भाग एव नाम रूपेति धेयः कीर्यते कृविक्षेपे ॠदोरप् करो वर्णोपलेपादौ रश्मौ प्रत्ययशुंडयोः प्रज्ञाद्यण् कारो वधे नि
श्चये च बलौ रत्नेयतावपीति विश्वः बल्यते बल बंधे दाने इन् बलिर्दैत्यप्रभेदे च कर चामरचंडयोः उपहारे पुमानस्त्री जरयाश्लथचर्मणि गृहदारुप्रभेदे च जठराव
यवेपि च त्रीणि कर्षकादिभ्यो राजग्राह्यभागस्य घट्टादौ देयं शुल्कं शुल्क अतिसर्जने घञ् शुल्कं घट्टादिदेयस्याहराद्यर्थग्रहे स्त्रियां मुकुटस्तु शुल्लति प्रतिबंधोने
न शुल्क वल्को ल्का इति निपातनात् साहतन्न उज्ज्वलदत्तादिषु शुल्क वल्कोल्का इति पाठस्यादर्शनात् धातुपाठे शुल्क धातोर्दर्शनाच्च आदिना गुल्मप्रतोल्यादिग्रहः एकं
भाष्यिपते रस्स भृञ् भरणे डुभृञ् धारणपोषणयोर्वा क्तः प्रदिश्यते दिश अतिसर्जने॥

अ॰ टी॰ क्रियत्ल्युट् इति कर्मणि ल्युट् द्वे देवताभ्यो मित्रादिभ्यश्च दीयमानस्य २७ उपेयते उपाय्यते वा इण् गतौ अयगतौ वा कर्मणि ल्युट् उपगृह्यते ग्रह उपादाने ल्यप् उपह्रियते घञ् उ
टी॰ रा॰ पदीयते डुदाञ् दाने आतश्चोपसर्गे इत्यङ् चत्वारि उपढौकनस्य षड् प्युपढौकनस्येत्यन्ये उपायनमुपग्राह्यं प्राभृतं चोपदा स्त्रियामित्यमरमालायुतकं योनिसंबंधस्त
९० त्रभवं तत्र भव इत्यण् युतयोर्वरवध्वोर्वेदं तस्येदमित्यण् युतकं युगलेयुक्ते संशयेपि चेति रभसः युतकं संशयेयुगे नारीवस्त्रांचलेयुक्ते चलनार्थे च यौतके आदि
नात्र नभि ह्यादि ग्रहः सुदीयते डुदाञ् घञ् युगागमः ह्रियते कर्मणि ल्युट् हरणं यौतकादीनां द्वे ऽद्ध ते हना वपि यौतकं यौतुकं चतदिति वाचस्पतिः मध्यमपि
द्वे कन्या दान काले व्रतमिह्यादौ च दीयमान द्रव्यस्य २८ स चासौ कालश्च तदेत्यस्य भावः द्वे वर्तमानकालस्य आयसंते वयमुपरमे क्तिन् आयास्य निवा याते र्वा हुल
काद्भुतिः आयति सुस्त्रियां दैर्घ्ये प्रभावाऽग्गामिकालयोः एकं संदृष्टौ प्रत्यक्षे भवं अध्यात्मादित्वा ठञ् एकं व्यापारानंतरंजायमानस्य फलस्य उदर्क्यते अर्कस्तवने घञ्
उदर्च्यतेवा अर्च पूजायां उदच्यतेवा अचगतौ घञ् उदर्क एष्यत्कालेतत्फलेमदनकंटके एकं भाविनः कर्मफलस्य २९ वन्हिश्च तोयं चादिर्यस्य भयहेतुत्वाद्भयं आदि

घट्टादिदेयं शुल्कोस्त्री प्राभृतं तु प्रदेशनं २७ उपायनमुपग्राह्यमुपहारस्तथोपदा यौतकादि तु यद्देयं सुदायो हरणं च तत् २८ तत्काल
स्तु तदात्वं स्यादुत्तरः काल आयतिः सांदृष्टिकं फलं सद्य उदर्कः फलमुत्तरं २९ अदृष्टं वन्हितोयादि दृष्टं स्वपरचक्रजं महीभुजामहिभयं स्व
पक्षप्रभवं भयं ३० प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकं॥ ११ नाहुता प्राप्नोजलं व्याधिर्दुर्भिक्षं मरकस्तथा अतिवृष्टिरनावृष्टिर्मूषकाः शलभादयो

गृह्यंते अदृष्टहेतुकत्वाद् दृष्टं एकमप्यादिकृतस्य भयस्य द्वयते सम क्तः स्वश्च परश्च स्वपरौ तयोश्चक्रे सैन्ये ताभ्यां जातं पंचम्यामजा ताविति डः एकं स्वपरसैन्यात् पर
राष्ट्रजाच्चौराटविकादेः परचक्रादाहविलोपादेर्भयस्य अहिरिव गृहस्थत्वा दाहृताकारत्वाच्च स्वस्य पक्षए वाहिः अहेर्भयं स्वपक्षात् प्रभवति पचाद्यच् एकं स ९०
सहाय्याज्जातभयस्य भयमिति पूर्वाभ्यामपि संबध्यते निजोथ मैत्रश्च समाश्रितश्च संबंधतः कार्यसमुद्भवश्च भृत्या गृही तो विविधोपचारैः पक्षं बुधाः सप्तविधं वदं
ति ३ प्रकर्षायकरणं डुकृञ् प्राचरिङ् प्रक्रिया तृत्यादने स्यादधिकार प्रकारयोरिति हेमचंद्रः अधि आधिक्यस्य करणं घञ् द्वे राज्ञां छत्रधारणादिव्यापारस्य चम

चमरं चामरे स्त्री तु मञ्जरी मृगभेदयोः प्रज्ञाद्यण् वा अज्ञादित्वाट्टाबपि चामरा चामरं बालव्यजनं रोमगुच्छकमिति रभसः चमरश्चामरे दैत्ये चमरी तु मृगान्तरे इति हेमः चा
मरं चामरापि च दंडबालव्यजने प्रकीर्यते स्म कॄ विक्षेपे क्तः संज्ञायां कन् प्रकीर्णकं चामरे स्याद्विस्तरे नातुरंगभेदे नृपस्यासनं भद्रं च तत्तदासनं चेति हैमस्याद्विकृतराजा
सनस्य हैमविकारो नृपासनं सिंहाकारमासनं सिंह इव वासनं एकं सुवर्णकृतराजासनस्य ३१ छादयति अनेन वा छद अपवारणे ण्यन्तः इस्मन्त्रन्क्विषु चेति ह्रस्वः
आतपात्त्रायते आतो नुपेतिकः द्वे तत्र छत्रं नृपस्य लक्ष्म एकं राजच्छत्रस्य भद्रस्य भद्रो वा कुंभः पूर्णः कुंभः द्वे बिभर्ति जलं डु भृञ् शृंगारभृंगारौ चेति साधुः कनकस्या
लुः संज्ञायां कन् द्वे सुवर्णकृतजलपात्रस्य ३२ निविशन्ते अत्र विश प्रवेशने हलश्चेति घञ् निवेशः सैन्यविन्यासे न्यासे रंगविवाहयोरिति हैमः शिबन्त्यत्र शिव गतौ वा
हुलकात् किरच् अतर्द्वत्वं च क्लीबे द्वे आगंतुवसैन्यवसतेः सज्यते अनेन सत् शोभनं जन्यते वा अनेन षस्ज गतौ जनी प्रादुर्भावे वा ल्युट् द्वे सैन्यरक्षणाय नियुक्तप्रहरि
कादिन्यासस्य पदातीनां समूहः भिक्षादिभ्योण् हस्तिनश्च अश्वाश्च रथाश्च पादातं च सेनांगत्वादेकवद्भावः सेनायाः अंगं चत्वारोऽवयवा यस्य संख्याया अवयवे

नृपासनं यत्तद्भद्रासनं सिंहासनं तु तत् ३१ हैमं छत्रं त्वातपत्रं राज्ञस्तु नृपलक्ष्म तत् भद्रकुंभः पूर्णकुंभो भृंगारः कनकालुका ३२ निवेशः शि
विरं षंडे सज्जनं तूपरक्षणं हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयं ३३ दंती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः मतङ्गजो गजो नागः कुञ्जरो
वारणः करी ३४ इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः ॥

११ तय प् नाविकाटविकादीनां पदातावंतर्भावः नौकानां रथ्येष्वंतर्भावः महिष्यादीनां गजा
श्वांतर्भाव इति मुकुटः एकं ३३ अतिशयितौ दंतावस्य इनिः दंत शिखात् संज्ञायामिति वलच् वले इति दीर्घः हस्तः शुंडास्यास्ति हस्ताज्जातावितीनिः एवं करी च द्वौ रदाव
स्य अनेकेन करेण मुखेन च पिबति सुपीतिकः द्वाभ्यां पिबति प्र खल्कः मतंगात् इषेर्जातः पंचम्यामजातावितिडः गजति गज मदने अच् न अगः नगो भवो वा अण् नागो मतंग
जे सर्पे पुन्नागे नागकेसरे क्रूराचारे नागदंते मुस्तके वारिदेपि चेद्देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः नागं रंगे सीसपत्रे स्त्री बंधेकरणांतरे इति हेमः अतिशयितः कुंजो
हनुरस्य खमुख कुंजेभ्यो रः कुंजरोऽनेकपे कोशे कुंजरा धातकी दुमे पाटल्यां चेति हेमचंद्रः वारयति शत्रुबलं ल्युः वारणं प्रतिषेधे स्याद्वारणस्तु मतंगजे इति विश्वः करोस्यास्ति

मिजपेरित्यच्‌हलदंतादित्यलुक्‌ पद्मं बिंदुजालकमस्त्यस्य इनिः पंचदशा हस्तिनः यूथस्य हस्तिवृंदस्य नाथः यूथं पाति आतोनुपेति कः द्वे यूथमुख्यहस्तिनः मद
स्रानां वृनोत्कटो मत्तः मदेन कलते कल शब्दसंख्यानयोः अच्‌ मदे सति कलो ध्वनिर्यस्येति वा द्वे अंतर्मदस्य हस्तिनः कल्यति कल गतिसंख्यानयोः कलते वा कलभ
शब्दसंख्यानयोः मृशृशलिकलिगर्दिभ्योऽभच्‌ कलभं भाषते वा अन्येभ्योपीति डः करभो मणिबंधादिकनिष्ठांतोष्ट्रसुते करिणः शावकः द्वे ३५ प्रकर्षेण भिद्यते स्म
ऽः गर्ज गर्जे मर्जे शब्दे अकर्मकत्वात्कर्तरि क्तः गर्जो जातोस्य तारकादित्वादितच्‌ गर्जितं वारि वा हादि ध्वनौ नाम मत्तकुंजरे इति विश्वमेदिन्यो माद्यति स्म मदो हर्षश्चा
स्य तृतः नध्यास्येति निष्ठानत्वाभावः त्रीणि जातमदस्य उद्वृत्तं वांतं मदं वमनमस्मात्‌ उद्वांत उद्गीर्णो निर्मदद्विपे इति हेमः मदान्निर्गतो मदोस्माद्वा द्वे गतमदस्य ह
स्तिनां समूहः अचित्तहस्तिधेनोष्ठक्‌ गजानां समूहः गजसहायाभ्यां चेति तल्‌ द्वे करोस्त्यस्याः इनिः ऋन्नेभ्यो ङीप्‌ धेनुरिव इवे प्रतिकृतौ कन्‌ स्याद्धेनुका करिण्यां च धेनावपि पुं
सि स्तनवविशेषे उश्यते वशा कांतौ वशिरण्यो श्रेत्यपूवष्टिवा अच्‌ वशा नार्यां वंध्यगव्यां हस्तिन्यां दुहितर्यपि नालव्य शाव षावंध्यासुताजोषास्त्रीगवीकरिणीषु चे

मद्दोत्कटो मदकलः कलभः करिशावकः ३५ प्रभिन्नो गर्जितो मत्तः समावुद्वांतनिर्मदौ हास्तिकं गजता वृंदे करिणी धेनुका वशा ३६ गंडः

कटो मदो दानं वमथुः करशीकरः कुंभौ तु पिंडौ शिरसस्तयोर्मध्ये विदुः पुमान्‌ ३७॥ ८९ तिस्रः ल्यांतेषु विश्वास्त्रीणि ३६ गंडति गडि वदनैकदेशे अच्‌ गंडः

स्यात्‌ पुंसि खड्गिनि ग्रहयोगप्रभेदे च वीध्यंगे पिपटे पि च चिन्हवीरकपोलेषु हयभूषणबुद्बुदे कटति कटेव र्षावरणयोः अच्‌ कटः श्रोणौ द्वयोः पुंसि कलिंजे ति श
येशावे समये गजगंडे पिपिप्पलीतु कटी मता द्वे गजगंडयोः माद्यत्यनेन मदो हर्षे मदो नुपसर्गे इत्यप्‌ मदयति वा अच्‌ मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः द्यत्यनेन
दो अवखंडने ल्युट्‌ दानं गजमदे यागे पालनच्छेदशुद्धिषु द्वे मदपतनस्य वम्यते टु वमु उद्गिरणे द्वितोऽथुच्‌ वमथुर्वमनेकासे मातंगकरसीकरे इति हेमः करस्य शी
करः द्वे शुंडान्निर्गतजलस्य कुंभुवस्तुंभति उंभ पूरणे कर्मण्यण्‌ शकंध्वादिः कुंभो राश्यंतरे हस्तिमूर्द्धांशे राक्षसांतरे कार्मुके वारनार्यां च घटे ऽस्त्री वेत्रगुग्गुलौ पिंडने पि
डि संघाने अच्‌ पिंडो बाले वलसांद्रे देहागारैकदेशयोः देहमात्रे निवापे च गोलसिल्हकयोरपि ओंड्र पुष्पे च पुंसि स्यान्नस्त्री बमाजीवनायसोः पिंडी तु पिंड तगरे ऽलावूखजूं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवगृह्यतेऽङ्कुशेन ग्रहः ग्रह इति रूपम्। अवग्रहो वृष्टिरोधे प्रतिबंधे गजालिके रुद्रोऽपि गजालिके वृष्टिरोधे प्रतिबंधेऽप्यवग्रह इति एकं ईष्यते ईष उंछे ईषगतिहिंसादानेषु वा ईषेः कि द्ब्रस्वश्चेती कन् धात्वोर्ह्रस्वश्च ईषा लांगलकीलिका सेव इवे प्रतीतिक निरीषादिरपि अक्षिकूटकं चक्षुर्गोलकं एकं अपांगस्यापांगो वा देशः निर्यात्यनेन करणे ल्युट् निर्याणं वारणापांगदेशो मोक्षे ध्वनिर्गमे एकं कर्णस्य मूलं चूल्यतेऽनया चूल समुच्छ्राये संज्ञायामिति ण्वुल् चूलिका नाटकसांगे कर्णमूले च हस्तिनां एकं ३८ अधःकुंभौ त्राधःकुं भो वा बाहित्थं वातु कुंभाधः इति भागुरिः स च ललाटाधोभागः अवश्यं वहति आवश्यके णिनिः सतिष्ठत्यत्र घञर्थे कः पृषोदरादित्वात् ससस्य तः एकं प्रतिमीयतेऽनेन नमीत्र हिंसायां मिनाति मिनोती स्यात्वं करणे ल्युट् प्रतिमानं प्रतिच्छाया गजदंतांतरालयोरिति रुद्रः एकं बाहित्थाधोभागस्य दंतमध्यस्य आस्यतेऽत्र ल्युट् आसनं द्विरदस्कंधे पीठे यात्राविवर्तने इति विश्वमेदिन्यौ स्कंध एव देशः द्वे पद्ममिव इवे प्रतीतिक न् पद्मकं स्यात् पद्मकाष्ठविंदुजालकयोरपि विंदूनां जालकमिव द्विरदस्य मुखादिस्थविंदुसमू हस्य ३९ पक्षपत्यनेन पक्षपरिग्रहे चुरादिः पुंसीति घः पक्षस्य पक्ष एव वा भागः पार्श्वस्य पार्श्वमेव वा भागः द्विरदपार्श्वस्य दंतसंबंधी भागो वा शाकपार्थिवादिः एकमग्रभाग

अवग्रहो ललाटं स्यादीषिका त्वक्षिकूटकं अपाङ्गदेशो निर्याणं कर्णमूलं तु चूलिका ३८ अधःकुंभस्य बाहित्थं प्रतिमानमधोऽस्य यत् आसनं स्कन्धदेशः स्यात्पद्मकं बिंदुजालकं ३९ पक्षभागः पार्श्वभागो दन्तभागस्तु योऽग्रतः द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् ४० तोत्रं वैणुकमालानं बन्धस्तम्भेऽथ शृंखले॥ ११ स्य पूर्वा च पश्चात् च पूर्वपश्चात् जंघेन जंघे च पूर्वपश्चा जंघे आदी यस्य सः पूर्वपश्चाज्जंघादिश्चासौ देशश्च पूर्वजंघाभागो गात्रं पश्चाज्जंघाभागोऽवरं गात्रं तेनेन गाङ् गतौ यद्वा एत्यनेन रण गतौ वहुलं तत्रणीति गादेशः ष्ट्रन् अवरयति रात्रने आतश्चोपसर्गे इति कः यद्वा न वृणोति त्रियते वा वृञ्चरणे अच् गृह वृद्धित्यपवा गात्रावरे पूर्वपश्चात्पादयोः परिभाषिते इति भागुरिः गात्रं गजाग्रजंघादिभागेष्वंगे कलेवरे अवरं गजांत्यजंघादिदेशे च चरमे त्रिषु केचिदाहुः अष्टीवद्वामादू र्ध्वमवरमधस्तु गात्रमिति गजांत्यजंघादिदेशो वरं स्याच्चरमे त्रिष्विति रुद्रः द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावरे तेनेति रभसः अपरापवर्गादिमध्या च अपरं नूतनाई स्यात्पश्चा द्भागे च दंतिनामिति विश्वः क्रमेणैकैकं ४० तुद्यतेऽनेन तुद व्यथने दाम्नीति ष्ट्रन् तोत्रं तुद्यते जनेन वैणुके पि च वेणुना निर्वृत्तः निर्वृत्ते क्षसूत्रादिभ्य इति ठक् इसुसुक्तांतात्कः

अ·टि· लीङ् श्लेषणे अधिकरणे ल्युट् बंधस्य बंधनस्य स्तंभः इव स्य स्तम्भस्य शृंगं प्राधान्यं खलति स्खल संचलने संचये च अंतर्भावितएयर्थः अच् यद्वा शृंगात् प्राधान्यात् खलत्यनेन नपुंसो
टी·रा· निघः भिदाद्यङ् पृषोदरादिः शृंखला पुंस्कटीकांच्यां लोहरज्जौ च बंधने अंध्यतेनेन अदि बंधने अंदूः हूंभू इति कूः स्वार्थे कः अंदूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च स्वार्थिकाः
८२ प्रकृतितो लिंगवचनान्यतिवर्तंतेपीति पुंस्त्वं यद्वा विनयादित्वात् ठक् इसुसितिकादेशः केण इति ह्रस्वः निर्गतो गडः सेचनमस्मात् कठिनत्वात् निगलति वा गल अदने अच् डल
योरेकत्वं त्रीणि बेडीति ख्यातस्य अंक्यतेनेन अकि लक्षणे सानसि वर्णसीति साधुः सरति अंतर्गच्छति अनया वा सृ गतौ सृवृषिभ्यां किदिति निः तालव्यो ष्मादिरपि शृणाति शृ
हिंसायां शृणिः पृश्निपार्ष्णीति साधुः शृणिरंकुशा वाचीच काशश्च तृणवाचक इति शब्दभेदः आरक्षमग्नमवमत्य सृणिं शिताग्रमिति तु माघस्य प्रमादः सृणिः स्त्रीत्वात् हे ४१
दूष्यते नया दुष वैकृत्ये एयंतः दोषे णौ वित्यूत् अचो यत् दूष्यं त्रिषु दूषणीये क्लीबं वस्त्रे च तद्गृह चूष्यते पीयते पृष्ठमांसेनादइस्य ताभीयते चूष पाने कर्मणि घञर्थे क इति मुकु
टः कक्षेभवा शरीरावयवाद्यत् कक्ष्या इहनिकायां स्यात् कांच्यां मध्येभबंधने हर्म्यादीनां प्रकोष्ठे च कार्यहेतौ प्रयोजने व्रियतेनया वृञ् वरणे वा हुलकादत्रन् यद्वा वरं त्रायते त्रै

अन्दुको निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः स्त्रियां ४१ दूष्या कक्ष्या वरत्रा स्यात्कल्पना सज्जना समे प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ४२

ङ पालने आतोनुपेति कः त्रीणि गजस्य मध्यबंधनस्य कल्पनं क्लृप् सामर्थ्ये एयंतं एयास श्रंथे ति युच् एवं षस्ज गतौ अथ कल्पना करिणः सज्जनायां स्त्री क्लीबं क्लृप्तौ च क
ल्पने सज्जनं तु रथे क्लीबमुपरक्षणघट्योः वाच्यलिंगं कुलीनेस्यात् कल्पनायां च योषिति द्वे पल्याणाद्यारोपणेन सज्जीकरणस्य प्रकर्षेण वीयते स्यां वी गत्यादिषु वीज्यात्वरि
भ्यो निः प्रवेणिः स्त्री कुथा चे एयोः कृदिकारादिति वा ङीष् आस्तीर्यतेनेन वा स्तृञ् आच्छादने कर्मणि करणे वा ल्युट् व्रियतेनेन वृञ् वरणे कृवृदृशिभ्यो नः यद्वा वह र्वी वर्णः
संत्यस्य अर्भूः आद्यचूर्वर्णः खर्ले व्रते स्तुतौ रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणभेदे गीतक्रमे चित्रे यशस्तालविशेषयोः अंगरागे च वर्णं तु कुंकुमे इति हेमः परिस्तूय
ते छत्र स्तुञ् स्तुतौ अर्तिस्तुसुखिनि मन् यद्वा परिगतः स्तोमात्रवर्णस्तोमवत्त्वात् नयतत् क्रियायुक्ता इति परेः स्तौति प्रत्यनुपसर्गत्वान्न षः कुष्णाति कुथ रीषो अच् द इह दृशेति निर्देशात् क्वचि
दक्त्वित्यपि न लोपः यद्वा कुं थत्यस्य शोभां कुथि हिंसायां आगमशास्त्रस्यानित्यत्वान्नुम् न इगुपधेति कः यद्वा कुष्यति कुथ पूतीभावे इगुपधेति कः कुथः स्त्रीपुंसयोः वर्णकंबले पुंसि वर्हि

वेतिअजतिस्म वा युद्धादिकर्मणः वी गत्यादौ अजगतौ वा गत्यर्थेतिक्तः नसारो वलमस्य वीतमसारं गजेस्यादंकुशकर्मण्यसारं तुरगे च हस्ती च अश्वश्च सेनांगत्वादेकत्वं एकं वा
यंतेः नयान्नृत्र् एयंतः वसिवपियजी तीत्रङीष्वा वारीस्याद्गजबंधन्यां कलस्यामपि योषिति वारि वा गगजबंधन्योः स्त्रीक्लीवेः स्वुनि वालुके वध्यतेऽस्यां बंधबंधने गजस्य बंधनी द्वे
गजबंधनशालायाः घोटते घुटपरिवर्तने एवुलपचाद्यचि घोटोपि घोटसैंधववगंधर्वा हयवाजितुरंगमाः इतिरभसः पिबतिपापाने क्तिच् घुमास्थेती त्वंपीतिर्नाश्वेस्त्रियां पाने वी
त्तिरितिपाठे वी गत्यादिषु वेति क्तिच् तोरणं तुरत्वरणे घञर्थे को वाहुलकात् घञ्वा संज्ञापूर्वकत्वान्नगुणः तुरेण त्वरया गच्छति अन्येभ्योपीति डः तुरगी वा श्वगंधायां तुरग
श्चितं वाजिनोः अश्नुते अशूव्याप्तौ अशूपृषिलटीति क्वन् तुरेण गच्छति गमेश्चेति खच् खच्च वा डित् अरुर्द्विषेतिमुम् ४३ अवश्यं व्रजति व्रजगतौ आवश्यके णिनिः यद्वा वा
जाः पक्षाः अभूवन्नस्य इनिः वाजी वाणाश्वपक्षिषु उह्यते नेन वा वहप्रापणे करणे वा घञ् वाह्यते वा एयंतः अच् वाहनेवा वा ल्युट्प्रत्यये अच् वाहो भुजे पुमान्मानभेदा
श्ववृषवा युष्ठञ् ऋच्छति ऋगतौ अन्येभ्योपीति वनिप् मुकुटस्तु सापदि पत्वमीति वनिवित्याह तन्न तत्र क्वनिपो विधानात् गुणाभावप्रसंगात् यद्वा अर्वति अर्वगतौ वाहु

वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी घोटके वीति तुरगतुरङ्गाश्वतुरङ्गमाः ४३ वाजिवाहार्वगंधर्वहयसैंधवसप्तयः॥ ९ लकान्कनिन् मुकुटस्तु

वाहुलकाद्वनिप् राल्लोप इत्याह तन्न वनिब्विधौ वाहुलकस्यानुपयोगात् अन्येभ्योपीति वनिपः सर्वेभ्यः सिद्धत्वात् उणादिषु वनिपो दर्शनात् कौमल्लादेकिति अनुना
सिके च राल्लोपस्य विहितत्वेन वनिपि तदसंभवात् लोपं विनापि रूपसिद्धेश्च अर्वातुरंगमे पुंसि कुत्सिते वाच्यलिंगकः गंधमर्वति अर्वगतौ कर्मण्यण् शकंध्वादिः नभश्चरे तु
गंधर्वो मृगभेदे तुरंगमे पुंस्कोकिले गायने च अंतराभवदेहके हयति हयगतौ अच् हिनोति वा हिगतौ अच् सिंधुप्रभवः तत्रभव इत्यण् सैंधवास्तु सिंधुदेशोद्भवे हयेमणि
मंथेः पीतिहेमः सपति सेनायां समवैतिषपसमवाये क्तिच् वाहुलकात् तिर्वा त्रयोदश अजनं अजगति क्षेपणयोः घञ् आजे न क्षेपेणानेयाः प्रापणीयाः आयता वा अश्वं कु
लीनमाजानेयं शावं किशोरं त्र्युवत इतिनामझाला शक्तिभिर्भिन्नहृदयाः स्खलंतश्च पदे पदे आजानंति यतः संज्ञामाजानेयास्ततः स्मृता इत्यश्वशास्त्रं कुलस्यापत्यानि कु
लात्खः द्वे विनीयंते स्म णीञ् प्रापणे क्तः सुशिक्षिताः विनीतः सुवहाश्वेस्याद् णिज्यपि पुमान् स्त्रि युजिते द्रिये ऽपनीते च निभृते विनयान्विते साधुवहनशीलाः वह प्रापणे

अ॰ द्वि॰
टी॰ श॰
८३

॥ ८३ ॥

मुकुटस्तु साधुकारिणि चेति णिनि रित्याह तन्न एवं सति णिनिनागतार्थत्वात् साधुशब्दस्य प्रयोगो न स्यात् ५४ वनायुषु देशेषु जाताः सप्तम्यां जनेर्डः प्रज्ञाद्यण् वा आ
जानेयः कुसजो वनायुजः पारसीक उक्त इति रत्नकोशः पारसीकदेशोद्भवाः कोपधाच्चेत्यण् कंबोजेषु भवाः तत्र भव इत्यर्थे कच्छाद्यण् वल्हिकदेशे भवाः कोपधाच्चेत्यण् वाल्ही
कं वाल्हिकं धीरहिंगुनोर्नाश्वदेशयोरिति त्रिकाण्डशेषात् दीर्घमध्योपि एते हयविशेषाः प्रत्येकं भिन्नाः वा नायुजः पारसीक उक्त इति रत्नकोशात् श्वेताश्वं ककोरव्यं वनायुजमपि
पारसीकं त्विति नाममालायाश्च द्वयोः पर्याय इत्यपरे याति यायोः किद्द्वे चेति कुः ययुः पुमानश्वमेधतुरगे च तुरंगमे अश्वमेधाय हितः अश्वमेधाच्छ च ३ जवनशीलः जु इति सौ
त्राधातुः गतौ वेगे च जु चंक्रम्यति युच् जवेन वेगेनाधिकः जवनं तु स्यद इति वेगे हयेनावेगिनि त्रिषु ३ अधिकवेगस्य ५५ प्रशस्तमतिशयितं वा पृष्ठमस्य अन्येभ्योपीति यत्न स्थूलस्य
रं तस्य द्रमित्यण् रलयोरेकत्वं स्थौरं बलमस्यास्ति इनिः स्थौरी पृष्ठ्यः पृष्ठवह इति वोपालितः २ भारवाहिनोश्वस्य करोति क्रियते वा कृ दाधेति कः कर्कः कर्केतत्त्व न्हो शुक्लोश्वेद
र्वेतोघटे एकं शुक्लाश्वस्य रथं वहति तद्वहति रथयुगप्रासंगमिति यत् रथ्या रथो घवि शिखावर्तनी शुचयोषिति रथ्य वोढा रथस्य पुल्लिंगः एकं रथं वा हकाश्वस्य कशांति कशाशब्दे किंचि

आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः ५४ वनायुजाः पारसीकाः काम्बोजा बाल्हिका हयाः ययुरश्वोऽश्वमेधीयो जवनस्तु जवाधिकः ५५ पृ-
ष्ठ्यः स्थौरी सितः कर्को रथ्यो वोढा रथस्य यः बालः किशोरो वाम्यश्वा वडवा वाडवं गणे ५६ त्रिवर्षाश्वीनं यदश्वेन दिनेनैकेन गम्यते कश्यं तु मध्यमश्वा-

तृशावनि वाशुगन्तो शवगन्तो वा किशोरादय इति साधुः एकं वामयति टु वमु उद्गिरणे स्वार्थे ण्यन्तः अच् मितां ह्रस्व इत्यत्र चेत्यनु ((नां हेषा ह्रेषा च निःस्वनः ५७॥
वृत्तेर्न ह्रस्वः गौरादिः यद्वा वं वरुणममतीति नाम्यन्ते वा अमगत्यादिषु कर्मण्यण् घञ्वा मुकुटस्तु वमत्युद्गिरति गर्भं ज्वलितीति णः इत्याह तन्न नोदात्तोपदेशस्येति वृद्धि
निषेधात् वामी शृगाली वडवा ३ समीकरभीषु च अश्वाजातिः अजादित्वाट्टाप् बलं सामर्थ्यमतिशयितमस्याः अन्येभ्योपीति वः डलयोरेकत्वं बलं वातिवा आतो
नुपेति कः बलेन व्रजति वा अन्येभ्योपीति डः वडवा द्विजयोषिति अश्वायां कुंभदास्यां च नारीजात्यंतरेपि च त्रीणि वडवायाः वडवानां समूहः खंडिकादिभ्यश्चेत्यञ् वाडवं
करणोस्त्री णां घोटिकौघे नपुंसकं पातालेनाग्नि स्त्रियां पुंसि त्रासेण वडवानले ५६ अश्वेन एकाहेनातिक्रम्यते अश्वस्यैकाहगम इति खञ् एकं अश्वादेः ताडनी ताडनं वा कशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निगलत्यनेन गल अदने हलश्चेति घञ् निगिरत्यनेन वा गृ निगरणे उन्योर्ग्र इति घञ् अचि विभाषेति वा लः गलस्योद्देशः समीपभागः घण्टाबंधसमीपस्थो निगालः कीर्तितो बु धैः तस्मिन्नेव मणिर्नाम रोमजः शुभकृन्मतः इत्यश्वशास्त्रे द्वे ग्रीवायाः समीपभागस्य अश्वानां समूहः केशाश्वाभ्यां यञ्छावन्यतरस्यां अनुदात्तादेरञ् इति मुकुटस्तन्न कुने ल त्वेनाश्वशब्दस्याद्युदात्तत्वात् तस्य समूह इत्यण् द्वे अश्ववृंदस्य आस्कंदनं स्कंदिर् गतिशोषणयोः स्वार्थे ण्यंतः भावे क्तः आस्कंदः संजातोस्य तारकादित्वादितच् एवमितरत्र लोपा भावश्चानुपपन्नः धोरणं धोर्ऋ गतिचातुर्ये भावे क्तः स्वार्थे कन् अथ धौरितकं धोर्यं धारणं धौरितं च तदिति वाचस्पतिः वृद्धिमत्पाठे प्रज्ञाद्यण् वा ध्यः रेचनं रिचिर् विरेच ने ण्यंतः क्तः वल्लनं वल्ग गतौ क्तः प्लवनं प्लुङ् गतौ क्तः प्लुतमश्वस्य गतौ प्लुतं प्लुतिर्मात्रके इति हैमः ४८ अमूरश्वानां पंच गतयः धार्यतेऽश्वा अत्रानया वा धृञ् धारणे ण्यंतः भिदादित्वादङ् गतिविशेषाणामेकं घोणते घुण भ्रमणे अच् प्रोथति प्रोथृ पर्याप्तौ अच् प्रोथोस्त्री हयघोणायां नाकट्यामध्वगे त्रिषु द्वे अश्वभ्रमणस्य कवते कुङ् शब्दे अच् वः

निगालस्तु गलोद्देशो वृंदे त्वश्वीयमाश्ववत् आस्कंदितं धौरितकं रेचितं वल्गितं प्लुतं ४८ गतयोऽमूः पंच धारा घोणा तु प्रोथमस्त्रियां कविका तु खलीनोस्त्री शफं क्लीवे खुरः पुमान् ४९ पुच्छोऽस्त्री लूमलांगूले वालहस्तश्च वालधिः त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ५० यानं चक्रिणि युद्धार्थे शतांगः स्यंदनो रथः।

स्वार्थे कन् यद्वा कुत्रादिभ्यो वुन् टाप् इत्वं खे मुखबिले लीनः द्वे वडि आलीख्यातायाः शफ्यते शफति फण गतौ अन्येभ्योपीति डः पृषोद रादिः शफं मूले तहलानां स्याद्गवादीनां खुरेपि च खुरति खुर छेदने इगुपधेति कः खुरः कोलदले शफे द्वे ४९ पुच्छति पुच्छ प्रमादे अच् पृषोदरादिः पुच्छभाण्डेति निपातनाद्वा इगुपधत्वात्कोवेति मुकुटश्चिंत्यः अंतरंगत्वात् तु कित्सति इगुपधत्वाभावात् पुच्छः पश्चात्प्रदेशः स्याल्लांगूले पुच्छमिष्यते इति हैमः लूयते लूञ् छेदने वाहुलकान्मक् लगति लगि गतौ खर्जिपिंजादिभ्य ऊरोलचौ प्रज्ञाद्यण् लांगलं पुच्छशेफयोरिति हैमः त्रीणि वालो नाकुंतले श्वस्य गजस्यापि च वालधौ वालः हस्त इव दंशादित्वारकत्वात् वाला नां हस्तः समूहो वा वाला धीयंते त्र कर्मण्यधिकरणे चेति किः द्वे केशवल्लांगूलमात्रस्य उपावर्तते स्म वृतु वर्तने लुठति स्म लुठ प्रतिघाते अकर्मकत्वात् क्तः द्वे श्रमशांत्यर्थं पुनः पु नर्भूमौ लुठितस्याश्वस्य ५० यात्यनेन नया प्रापणे करणेति ल्युट् चक्रमस्यास्तीति इनिः युद्धायेदं तस्मिन् शतमंगान्यवयवा॥

Public Domain. Digitization by eGangotri

यस्य स्यंदते स्यंदू प्रस्रवणे· चलने च। चलनशब्दार्थादकर्मकाद्युच् स्यंदनं तु स्तुतो नीरेति निर्देशान्नारथेऽस्त्रियां रमंतेऽत्रानेन वा रमि कुषिनी रमिकाशिभ्यः क्थन् सलोपः रथः पुमानवयवे
स्यंदने वेतसेपि च त्रीणि पुष्परथः पुष्पेयात्रोत्सवादौ रथो वा अंतस्थमध्यः पकारमध्यपाठे तु सुकुमारत्वात्पुष्पमिव रथ इति विग्रहः एकं युद्धं विना यात्रासेवादौ सुखभ्रमणार्थ
स्य रथस्य ५१ कर्णो साध्यास्त्रवणक्रियाउपचारात्कीर्णः कर्णोस्यास्तीति इनिः कर्णी चासौ रथश्च शब्दमात्रेण रथो न तु वस्तुतो रथः यद्वा सामीप्यात्कर्णशब्देन स्कंधो लक्ष्यते कर्णः
स्कंधः सोऽस्यस्य वाहकत्वेन स्कंधवाह्यस्स चासौ रथश्च अन्येषामपीति दीर्घः प्रोच्यतेऽनेन वा वह प्रापणे ल्युट् डीयतेऽनेन डीङ् विहायसा गतौ ल्युट् हयनमिति पाठे हयग
तौ ल्युट् त्रीणि पुरुषस्कंधवाह्यस्य यानविशेषस्य डोलेति ख्यातस्य अनिति चीत्करोति अनयाणेने असुन् करणेऽसुन् इति मुकुटः तन्न करणत्वासंभवात् कर्तृत्वोचिता
च्च शक्नोति भारं वोढुं जीवयितुं वा नद्युक्तं शकटः शाकिनी गावो यानमास्कंदनं वनं अनूपः पर्वतो राजा दुर्भिक्षे नव वृत्तय इति शल्कुशंकौ शकादिभ्योऽटन् द्वे गम्यतेऽनया

असौ पुष्परथश्चक्रयानं न समराय यत् ५१ कर्णीरथः प्रवहणं डयनं च समं त्रयं क्लीबेऽनः शकटोऽस्त्री स्याद्गंत्री कंबलिवाह्यकं ५२ शिबिका या
प्ययानं स्याद्दोला प्रेंखादिकाः स्त्रियां· उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ५३ पाण्डुकंबलसंवीतः स्यन्दनः पाण्डुकंबली रथे काम्बलवास्त्रा
द्याः कंबलादिभिरावृते ५४ त्रिषु द्वैपादयो रथ्या रथकट्या रथव्रजे॥

११ घृतपिबान्तोऽस्य कंबलः सास्नास्यास्तीति इनिः कंबलिभिर्वृषैरुह्यते ण्यत् स्वार्थे क
न् द्वे शकटिकायाः ५२ शिवैव संज्ञायां कन् यद्वा शिवं करोतीति तत्करोतीति ण्यंतात् ण्वुल् याप्यैरधमैर्वाह्यं यानं द्वे पालकीति ख्याताया: दोलयति दोल्यते वा दुल उत्क्षेपे चुरा
दिः अच् घञ् वा प्रेंख्यते इंखि गतौ घञ् दोला प्रेंखः पुमान् प्रेंखा निः त्रीणि रथारोहणीति रत्नकोशः आदिना शयनखट्वावाल्यादि दोला द्वे हिंदोलेति ख्याताया: डोलीति ख्याताया
वा द्वीपिनो व्याघ्रस्य च विकारः प्राणिरजतादिभ्योऽञ् द्वैपेन वैयाघ्रेण च चर्मणा परिवृतो रथः द्वैपवैयाघ्रादन् व्याघ्रचर्मवेष्टितरथस्य द्वे ५३ पांडुकंबलेन परिवृतो रथः पांडुकं
बलादिनिः स्यात् पांडुकंबलः श्वेतप्रावारस्य आवभेदयोः कंबलेन वस्त्रेण च प्रावृतो रथः परिवृतो रथ इत्यण् आदिना चामसौम दौकूलादिग्रहः ५४ रथानां समूहः खलगो
रथादिनियत् रथ्या रथांशे रथवोढरि रथ्या तु रथसंघाते प्रतोल्यां पथि चक्रे इति हैमः इनित्रकट्यच् च रथानां व्रजः त्रीणि रथसमूहस्य धूर्वेति धुर्वी हिंसायां० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्राजभासेतिक्विप् राह्लोपः वोरिति दीर्घः यानस्य मुखं पुरोभागः द्वे वोढुर्बंधनस्थानस्य रथस्यांगं अपकीर्यते स्वस्थानेक्षिप्यते कृविक्षेपे ऋदोरप् अपस्करो रथांगमिति साधुः द्वे
चक्रभिन्नस्य रथावयवस्य पपक्रियते गतिरनेन घञर्थे कः कृञादीनां के द्वे इति द्वित्वं चक्रः कोके पुमान् क्लीबं त्वजे सैन्य रथांगयोः राष्ट्रे दंभांतरे कुंभकारोपकरणे त्वयोः जला
वर्तिपि रथस्यांगं रथांगं नद्वयोश्चक्रे नाचक्रांगावि हंगमे द्वे तस्य चक्रस्यांतो भूस्पर्शिभागः नयति रथं नियोमिः नेमिर्नातिनि शोकूपत्रिकचक्रांतयोः स्त्रियां प्रधीयते ऽनेन डुधा
ञ् उपसर्गे घोः किः द्वे पिंड्यते ऽरायस्यां पिडि संघाते हलश्चेति घञ् गौरादिः स्वार्थे कन् नन्तं ते ऽरा अत्र नह्यं बधुनेन होभः इतीन् हस्य भः यद्वा नभ्यते क्षेपणे णभ हिंसायां इञ्
जादिभ्यः नाभिर्मुखनपे चक्रमध्यस्त्रियां पुमान् द्वयोः घ्रालिम्नतीके स्यात् स्त्रियां कस्तूरिकामदे द्वे रथचक्रमध्ये मंडलाकाराया अक्षस्य नाभिक्षेप्यस्यांते कीलके अ
णातिअणश्चेद् इन् एवं अलिरालिवद् क्षाग्रकीलेस्याद्गिनसोमयोः विश्वोपि अलिरालिवदक्षाग्रकीलाश्विसीम सुद्वयोरिति द्वे ५६ रथस्य गुप्तिरावरणं त्रियतेरथोनेन
जृवृञ्भ्यामूथन् वरूथं चर्मवेष्टनोः द्वे परप्रहरणाभिघातरक्षार्थं रथसन्नाहवदावरणस्य कुवते कुङ् शब्दे वाहुलकाद्वरच् कुयादिः कूवरस्त्रि युचारो नाकुञ्ज के

धूः स्त्री क्लीबे यानमुखं स्याद्रथाङ्गमपस्करः ५५ चक्रं रथांगं तस्यांते नेमिः स्त्री स्यात्प्रधिः पुमान् पिंडिका नाभिरक्षाग्रकीलके तु द्वयोरणिः ५६
रथगुप्तिर्वरूथो ना कूवरस्तु युगन्धरः अनुकर्षो दार्वधःस्थं प्रासंगो ना युगाद्युगः ५७ सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणं॥ ९९ स्त्री युगंधरे कूयते ऽरति

स्वामी युगं वोढुर्बंधनकाष्ठं धारयतीति संज्ञायां भृतॄवृजीति खच् अरुर्द्विषदिति मुम् द्वे युगकाष्ठबंधनस्थानस्य अनुकृष्यते कृषविलेखने घञ् नांतोप्ययं अनुकर्षनाऽस्तत
लद्राविति वोपालितान् अनुकर्षो रथाधःस्थदारुणस्यप्यनुकर्षते एकं रथस्याधस्तलभागदारुणः प्रसज्यते षंज संगे घञ् उपसर्गस्येति दीर्घः रथावंगयुगादन्यद्युगं द्वे
वभानां दमनकाले यद्रा सज्यते तस्यैकं स्वामी तु प्रासंगो नानंतियुगान् रथादिः तस्य युगः नेत्याह अन्यत युगात् युगांतरं यद् वध्यते तस्येत्याहुः युगं द्वितीयं प्रासंग इति कात्यः ५७ सर्वं
हस्य अश्वरथादि दोलांतं वाहयति वहेः स्वामी ण्यंतात् कर्तरि ल्युट् अन्ये तु वहत्यनेनेन करणे ल्युट् वाहनं माहितादिति निपातनाद्दीर्घ इत्याहुः यांत्यनेनेन करणे ल्युट् या
नं स्याद्वाहने गतौ युज्यते ऽनेन वा युजि रुचोर्यत् युग्यं च पत्रे इति कश्यप तो निपातः पतंत्यनेनेन पत्लृ गतौ दाम्नीति ष्ट्रन् पत्रं तु वाहने पर्णे स्यात् पक्षेशरपक्षिणोः धोरति अनेन धोरय

धोर्ऋ गतिचातुर्थे ल्युः ल्युट् वा पंचवाहनमात्रस्यैव विनीतकानामिदं यद्वा विनीयते स्म क्तः संज्ञायां कन् प्रज्ञाद्यण् परंपरया यद्वा स्वं वहति शकटं यथा रूढं तस्यैकं ५८ आधोरयंति ल्युः हस्तिनं यांति या रक्षणे आतो नुगिति वाः स्वार्थे कन् हस्तिनमारोहंति कर्मण्यण् निषीदंत्यवश्यं वद्धं विशरणादिषु आवश्यके णिनिः यद्वा निषादयंत्युपवेशयंति हस्तिनं ग्रस्त्यादित्वाद्वा वश्यके वा णिनिः चत्वारि नियच्छति अंतर्भावितण्यर्थो वा यमु उपरमे तृच् प्राजति अजगत्यादौ तृच् अंतर्भूतण्यर्थो वा वलादावार्द्धधातुके वेव्यतेरिति वीन प्राजयतीति स्वामिमुकुटोक्तं चिंत्यं णिचि वीभावस्य नित्यत्वात् प्राजयितेति रूपप्रसंगाच्च यदपि वा नुवृत्ते वीभावो नास्तीति स्वामिनोक्तं तदपि चिंत्यं हस्त्यारोहो वानुवृत्तेर्दर्शनात् यच्छति तृच् सुवति गमयति स्म आश्वान् सुप्रेरणे गत्यर्थत्वात् क्तः सूतस्तु सारथौ तद्दिणि क्षत्रियाद्ब्राह्मणीसुते वंदिपारदयोरिति विश्वमेदिन्यौ क्षदति क्षदृ संवरणे सौत्रः तृन् नत् चौ शंसि क्षदादिभ्यः संज्ञायां चानिटो मुकुटस्तु नप्तृ नेष्टृ त्वष्टृ इति तृजित्याह तन्न नप्त्रादिषु क्षत्तुरग्रहणात् यदपि क्षदस्थैर्ये हिंसायां चेत्यतस्तृच् तृन्वेत्युक्तं तदपि न उक्तपाठस्यादर्शनात् खदस्थैर्ये इति पाठदर्शनाच्च सरत्यश्वान् सृगतौ अंतर्भावितण्यर्थः सर्तेर्णिच्चेति घथिन् सरथस्यापत्यं वा ५९ सव्ये वामे तिष्ठति

परंपरावाहनं यत्तद्वैनीतकमस्त्रियां ५८ आधोरणा हस्तिपका हस्त्यारोहा निषादिनः नियंता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ५९ सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः ६० भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ६१

सव्ये स्थः ष्ठं दसौ तृन् डिच्च स्थास्थिन् स्थूणामिति वक्तव्यात् षत्वं स्थास्थिन् स्थूनामिति पाठे तु सुषामादित्वात् षत्वं हलदंतादित्यलुक् कृष्णेष्ठ इत्यदंतोपि प्राजिता दक्षिणस्थश्च सादी सारथिरुच्यते सूतः क्षत्ता नियंता च यंता सव्येष्ठ एव चेत्यमरमाला दक्षिणे तिष्ठति सुपीतिकः रथं कुटुंबयति तच्छीलमस्य कुटुंब धारणे सुपीति णिनिः यद्वा रथ एव कुटुंबमस्यास्ति इनिः तस्य अष्टौ रथो अस्यास्ति इनिः स्यंदनमारोहंति रुह बीजजन्मनि प्रादुर्भावे च अण् द्वैरथारूढस्य योद्धुः अश्वमारोहंति आग्वत् सीदत्यवश्यं षद्लृ विशरणादौ आवश्यके तिणिनिः सादी तुरंगमातंगरथारोहेषु दृश्यते इत्यश्ववार इति ख्यातस्य ६० भटति भट भृतौ परिभाषणे वा अच् भटः स्यात् पुंसि वीरे चा विशेषे पामरस्य च युध्यते युध संप्रहारे अच् तृच् त्रीणि सेनां रक्षंति कर्मण्यण् रक्षतीति ठक् सैनिकः सैन्यरक्षे च स्यात् सेनासम

सहस्रंवलानिसंतियेषांतपःसहस्राभ्यांविनीनी अणचेतिहैमसहस्रसंख्याकेनगजादिनावलवतःपरिघोसेनांतेतिष्ठतिसुपीतिकःपरिलश्चरतिअचहैसेनायांणत्वोदं
उकारिणःप्रयाणेसामंतस्यापकर्षकस्येत्यन्येरथगजादेःचक्रपादादिरक्षकस्येतिकेचित्सेनांनयतिणीञ्प्रापणेसत्स्विति क्विप्सेनानीःस्यात्पुमान्कार्तिकेयेसे
नापतौपुमान्वाहिन्याःपतिःहैसेनापतेः ६२ कंच्यतेकचिदीप्तिवंधनयोःवाहुलकादुकः कंचुकोवारवाणेस्यान्निर्मोकेकवचेपिचवर्द्धीयकगृहीतांगस्थितवस्त्रेच
चोलकेकंचुकौप्रधिभेदेऽथवाणंवारयतिवृणोतिवावृञ्वरणेण्यंतोवाकर्मण्यण्राजदंतादित्वाद्वापरनिपातःयद्वावारमाच्छादकंवानमस्यपूर्वपदादितिणत्वंहै
चोलकाकृतिसन्नाहस्यसारंसनोतिषणुदानेकर्मणःक्षेपत्वविवक्षायामच्यद्वासारंवलमस्यतेदीप्यतेनेनअसगतिदीप्त्यादानेषुकरणेतिल्युद्शकंध्वादिःसा
रसनमप्युरस्त्रेत्रतनुत्रिणामेखलायांचविश्वोपिसारसनंमेखलायामुरस्त्रेचतनुत्रिणामितिअधिकमंगात्हैकंचुकदाढर्यार्थमध्यकायेनिवद्धस्यकचित्तुसा
रसनाधिपांगेइतिपाठःपल्कान्तःअधिपांगंसारसनमितिदुर्गोपितस्यसारसनंह्येयंधियांगंचनिवंधनंशीर्षस्यप्रतिकृतिःइवेतिकन्शीर्षकंसुखमस्माद्वा ६३

वलिनोयेसहस्रेणसाहस्रास्तेसहस्रिणःपरिधिस्थःपरिचरःसेनानीर्वाहिनीपतिः ६२ कंचुकोवारवाणोस्त्रीयत्तुमध्येसकंचुकः वध्नंति
तत्सारसनमधिकाङ्गोथशीर्षकं ६३ शीर्षण्यंचशिरस्त्रेथतनुत्रंवर्मदंशनं उरश्छदःकंकटकोजगरःकवचोस्त्रियां ६४ आमुक्तःप्रति
शिरसेहितंशरीरावयवाद्यत्येचनद्धितेइतिशिरसःशीर्षन्नादेशःयेचाभावेतिटिलोपोनशीर्षण्यंशीर्षरक्षणे ९९ मुक्तश्चापिनद्धश्चापिनद्धवत्० ॥
शीर्षण्योविशदेकचेइतिहैमःशिरस्त्रायतेत्रैङ्पालनेआतोनुपेतिकःत्रीणिटोपइतिख्यातस्यतनुंत्रायतेशृगवत्वृणोतिदेहंवृञ्वरणेमनिन्दंश्यतेनेनदंशि
दंशनस्पर्शनयोःकरणेतिल्युट्दंशनंवर्मनुषोरितिहैमःउरश्छाद्यतेनेनछदअपवारणेपुंसीतिघःछादेर्घेद्वितिह्रस्वःकंकतेककिलौल्येशकादिभ्योऽट
नस्वार्थेकःयद्वाकंसुखंकटतिकटेवर्षावरणयोश्चमूलविभुजादिकोवाजगतिगृह्यतेप्रातियदिकाद्वात्वर्थेइतिणिचवाहुलकादरःजागर्तिअचूपृषोदरादिर्वाज
गरःकंकटोयोगःसन्नाहःस्यादुरश्छदइतिगोपालितःकंवातंवंचतिवंचुगतौअंतर्भावितण्यर्थोवामूलविभुजादिकःकवचोगर्दभाण्डवत्सन्नाहेपर्पटेपचसप्तसन्नाह

स्य ६४ आमुच्यते स्म मुच्लृ मोक्षणे क्तः प्रतेरपि अपिन
ह्यते स्म णह बंधने क्तः वष्टि भागुरिरल्लोपः॥

Domain. Digitization by eGangotri

अ·टी· टी·रा· ९६

चत्वारि परिहितकवचादेः सन्नह्यति सन्नह्यते स्म वा अकर्मकत्वात् कर्त्तरि कर्मणि वा क्तः सन्नद्धो वर्मितो व्यूढे वर्मणा न ह्यते स्म सत्यापेति णिचू णा विष्टवदिति टिलोपः व र्म संजातमस्य वा तारकादित्वादितच् सज्जा सि पञ्जगतौ अचू अथ सज्जः स्यात् सन्नद्धे समृते त्रिषु दंशः संजातोऽस्य इतच् यद्वा दश्यते स्म दशि दंशनात् क्तः व्यूढो धृतः कं कटो येन पंचधृतसन्नाहस्य ९५ आमुक्तादयो व्यूढकंकटान्ताः कवचिनां समूहः तत्र कवचिनश्च एकं धृतसन्नाहानां गणस्य पादाभ्यामततीति अतसातत्यगमने। अज्यति भ्यां पादे चेतीत्र पादस्य पदाज्यातिगो पहते षितिपदः एवं पदाजिः मुकटस्तु इत्वजादिभ्य इतीत्याह तन्न स्त्रियामकर्त्तरि च कारके भाव इत्यधिकारे तस्य विहितत्वेन अजतीति विग्रहस्य विरुद्धत्वात् पद्यते पदगौ तौ बाहुलकात्तिः निच्या पत्तिः सेनाभित्यद्रयोर्गतौ इति हेमः पादाभ्यां गच्छति अन्येभ्योपीति डः पादस्य तिप दः पदातिरेव विनयादित्वात् ठक् पादाभ्यामततीति बाहुलकादिको वा पदादिः कद्रि तिक्कचित्पाठः पादाभ्यामवति अवरक्षणादौ वा हुलकादिकः यद्वा पादेनाऽऽवो रक्षणं तत्र नियुक्त इति ठक् ९६ पद्भ्यां गच्छतीति पादेन समानार्थः पच्छ एव पदिङः पादाभ्यां चरति पर्यादिभ्यष्ठन् इकेचरतीति पद्भ्यां चः पादातश्शब्दोप्यत्र यदाति पत्ति पादातपादावि

सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकंकटः ९५ त्रिष्वामुक्तादयो वर्मभृतां कावचिकं गणे पदातिपत्तिपदगपादातिकपदाजयः ९६ पद्गश्च प
दिकश्चाथ पादातं पत्तिसंहतिः शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ९७ कृतहस्तः सुप्रयोगविशिखः कृतपुंखवत् अपराद्धपृषत्को
सौ लक्ष्याच्युतसायकः ९८ धन्वी धनुष्मान्धानुष्को निषंग्यस्त्री धनुर्द्धरः॥ ९९ कपदाजय इत्यमरमालायत्नु मुकुटेनोक्तं मूलं विमुजादित्वात् पादातमिति तन्न

पादाभ्यामततीति विग्रहे णपचाद्यचा गतार्थत्वात् स्वपदातीनां समूहः भिक्षादिभ्योण् पत्तीनां संहतिः द्वे शस्त्रमाजीवति उपजीवति जीवप्राणधारणे कर्मण्यण् कांडानि शस्त्रा णि पृष्ठे यस्य काण्डस्पृष्ट इति मुकुटः स्पृष्टंग्रहितं कांडं शस्त्रं येन वाऽहिताग्न्यादिष्विति परनिपातः आयुधेन जीवति आयुधाच्छ च चात् ठक् चत्वारि शस्त्रजीविनः ९७ कृतोऽभ्यस्तो ह ९६
स्तो यस्य शोभनः प्रयोगोऽस्य सुप्रयोगो विशिखोऽस्य कृतोऽभ्यस्तः पुंखयुक्तः शरो येन त्रीणि सम्यक् तच्छराभ्यासस्य अपराद्धः पृषत्को बाणोऽस्य लक्ष्याद्विध्यात् च्युतो भ्रष्टः सायको यस्य एकं लक्ष्याभ्रष्टशरस्य ९८ धन्वा तु मरुदेशे नाक्लीवं चापे स्थलेपि च धन्वास्यास्ति व्रीह्यादित्वादिनिः धनुरस्यास्ति मतुप् तसौमत्वर्थे इति भत्वं धनुः प्रहरणमस्य त
दस्य प्रहरणमिति ठक् इषुमुक्तान्तकः निषंगोऽस्यास्ति इनिः अस्त्रं प्रहरणे चापे इति विश्वः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्रमस्यास्तीति इनिः धरति धनुर्धारणे अच् धनुषो धरः षट्‌ कांडो बाणोऽस्यास्तीति मतुप् कांडवान् काण्डीरः नीरचौ कांडसंवेतरुस्कंधेवाणेः वसरनीरयोः कुत्सिते वृक्षभिन्नाडीरं
दीरहसिनस्त्रियां द्वे बाणधारकस्य शक्तिः प्रहरणमस्य शक्तियष्ट्योरीकक् शाक्तिकः यष्टीकः इति द्वे शक्तिधरस्य द्वे ६९ यष्टिः प्रहरणमस्य परश्वधः परशुः प्रहरणमस्य पारश्वधिकः यष्टिश्च
परश्वधश्च हेती तयोः एकैकं निस्त्रिंशः प्रहरणमस्य प्रहरणमिति ठक् असिः हेतिर्यस्य द्वे खड्गायुधस्य प्रास कुंतश्च प्रहरणमस्य प्रागवत् एकैकं ७० चर्मास्यास्तीति ब्रीह्या
दित्वादिनिः फलकं पाणौ अस्य द्वे फलकधारकस्य पताकास्यास्तीति ब्रीह्यादित्वादिनिः वैजयंत्यस्यास्तीति ब्रीह्यादित्वाट्ठन् यद्वा वैजयंत्या चरति चरतीति ठक् द्वे ध्वजधारकस्य अनुप
श्चात् प्लवते प्लुङ्गतौ अच् सह अयते एति वा अय गतौ इण् गतौ अच् अनु चरति चरेष्टः अभितः सरति अच् चत्वारि सहायस्य ७१ पुरो गच्छति अन्येभ्योपीति डः अ
ग्रे सरति पुरोग्रतोग्रे षिति टच् प्रतिष्ठते गच्छति आतश्चोपसर्ग इति कः प्रष्ठोग्रगामिनीति षः प्रष्ठस्त्रिषु स्वैगेश्रेष्ठे पुंसि चैवांडिको षधौ अग्रतः सरति पुरः सरति पुरोगच्छ

स्यात्कांडवांस्तु काण्डीरः शाक्तीकः शक्तिहेतिकः ६९ याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ नैस्त्रिंशिकोऽसिहेतिः स्यात्समौ प्रासिककौंतिकौ
७० चर्मी फलकपाणिः स्यात्पताकी वैजयंतिकः अनुप्लवः सहायश्चानुचरोभिसरः समाः ७१ पुरोगाग्रेसरप्रष्ठाग्रतः सरपुरःसराः पुरोगमः
पुरोगामी मन्दगामी तु मंथरः ७२ जंघालोतिजवस्तुल्यौ जंघाकरिकजांघिकौ ॥ ७९ तिअच् गमश्चेति खच् वा मुम् अजातावितिणिनिः समाग्रेसराणां मे
दं गच्छति तच्छीलः प्रागवत् मंथति पादौ मथि हिंसासंक्लेशनयोः बाहुलकादरन् मंथं राति वा आतोनुपेति कः मंथरः कोशफलयोर्वाच्यमंथनयोः पुमान् कुसुम्भान द्वयोर्मंथो
पृथौ चक्रेभिधेयवत् द्वे शनैर्गमनशीलस्य ७२ अतिशयिता जंघास्य सिध्मादित्वाल्लच् पिच्छादित्वादिलच् जंघिलोपि प्रज्ञालप्रज्ञिलौ तुल्यौ जंघालजंघिलादयः इति वाचस्पतिः
अतिशयितो जवो वेगो यस्य द्वे अतिवेगवतः जंघाश्लाघ्यत्वादुपचाराद्वातिर्जंघा सेवकरो राजदेयो भागः आकरः श्रेष्ठा वा जंघाकरो यस्यास्तीति ठन् जंघेव करी हस्ती पक्षे तिवा जंघा
भ्यां जीवति वेतनादिभ्यो जीवतीति ठक् द्वे जंघाजीविनः तरो वेगोऽस्यास्ति असमायनि विनिः तरस्वी शूर वेगिनोः त्वरते ञित्वरासंभ्रमे ञीतः क्तः त्वरा संजातास्येति वा इतच् त्वरिते
विगतद्रुतोः अतिशयितो वेगोस्य इनिः प्रजवति जुसो त्रो वेगे गतौ च प्रजोरिनिः जुर्चंक्रम्येति युच् जवनं तु स्यद् वेगि हयेना वेगिनि त्रिषु ॥ ॥ ॥

अ॰ को॰ टी॰ रा॰ ८७

अत्र पुंल्लिंगस्तु भवेद्दोरोचो ऽद्रपुष्पेजवा मत्ता षट्लिंगवन्मा त्रस्य ७३ जेतुं शक्यः जिजये अभिभवे वा शक्रि लिङ्गेति शक्याव चोयत् स्यप्यजय्यो शक्यार्थ एकं शक्यार्थाद्न्यत्र
अर्हे कृत्य तृचश्चेति योग्यतायामचोयत् एकं जेतुं योग्यस्य जयनशीलः तृन्प्रज्ञाद्यण् द्वेजयवतः ७४ अमित्रस्याभिमुखं लक्ष्णतो नाभिप्रती इत्यव्ययीभावः अभ्यमित्रम
लंगामी अभ्यमित्राच्छ च चाद्यत् खो त्रीणि सामर्थ्येन शत्रूणां संमुखं गच्छतः ऊर्जस्तु कार्तिको त्साहवलेषु प्राणे नेपि च अतिशयित ऊर्जो स्यास्तिज्यो त्स्नातमिस्रेति वल
च् विनी ऊर्जं शक्यो दंतः सांतश्च आद्वेसणि पिनिपात्यः मुकुदस्तु ऊर्जो शब्दमा वंतपठित्वा ह्रस्वत्वं चेत्याह तन्न उक्तमेदिनी कोशविरोधात् ऊर्जस्याति शयः ऊर्जाति शयेनान्वि
तः ऊर्जवलप्राणनयोः भावेघञ् गुरोश्चेत्यप्रत्ययेन वंतोपि संभवति परं तु नियातनेसन ग्रास्वो ह्रस्वत्वस्यापि निपातनीयत्वेन गौरवप्रसंगात् इति कारस्त्व सुन्नंतं मन्यते
नत्तुन सम्यक् असायेति सिद्धत्वेन निपातनस्य वैयर्थ्य प्रसंगात् त्रीणि वलाति शायिनः ७५ प्रशस्तमतिशयितं वा उरोयस्य विशालत्वात् सुनूपमादुपधेति वः कयइति वत्व

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ७३ जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति ७४ सोभ्य
मित्रो भ्यमित्री यो प्यभ्यमित्रीणः इत्यपि ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जाति शयान्वितः ७५ स्यादुरस्वानुरसिलो रथिनो रथिको रथी कामं
गाम्यनुकामीनो त्यन्तीनस्तथा भृशं ७६ शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरः॥ ७७ मितिनुमुकुटस्य प्रमादः सस्यरूपत्वाभावात् पिछादित्वादिल

च् उरसा वलं लक्ष्यते इति स्वामी हे विपुलो रसः रथोऽस्यास्तिमेधारथाभ्यामिरन्निनचो अत इनिठनौ स्वामी तु मेधारथाभ्यां सुपी तिणिनिः कामस्य सदृशं यथार्थे व्ययीभावः अनु
कामं गामी आवारपारे ति खः हृय येष्टं गमनशीलस्य अंतस्यात्ययः अत्यये ऽव्ययीभावः अत्यंतं गामी अवारे ति खः भृशं गामी स्यन्त्वयः एकमतिगमनशीलस्य ७६ शूरयति शूर
वीर विक्रान्तो अच् शूरः स्याद्याद्वेभटे वीरयति वीरो रसविशेषे पुंसुत्तरे सुभटे त्रिषु स्त्री सुरा क्षीर काकोली नामलक्ये लवालुके यति पुत्रवती रंभाविदारी दुग्धिकासु च म ८७
लपूक्षीर विदार्योः क्लीवं शृंगयां न तेपि चे ति पवर्गतृतीयादिः विक्रामति स्म क्रमुपादविक्षेपे गत्यर्थेति क्तः त्रीणि शूरस्य जयनशीलः तृन् ग्लाजिस्थश्च क्स्नुः जिष्णुर्नावासवेर्जुने जि

संयुगे रणे साधुः प्रतिजनादिभ्यः खञ् एकं युद्धकुशलस्य शस्त्राजीवादयः सांयुगीनांताः ७७ ध्वजाः संत्यस्यां इनिः वाहाः संत्यस्यां सिनोति षिञ् बंधने क्त हृसृधृसिद्रुपत्यनिस्वपिभ्यो नि
त्रिति नः सह इनेन वा प्रियंते पृङ् व्यायामे बाहुलकात्तनन् गुणाभावश्च पृतना तु स्त्रियां सेनामात्रसेनाविशेषयोः अनीकं रणोस्ति प्रयोजनत्वेनयस्याः अनीकिनी स्त्रियां सेनामात्रसे
नाविशेषयोः चमति शत्रून् चमु अदने चमितनीति ऊः चमितनिवधिभ्य ऊ इति मुक्तुटः तन्न तादृशसूत्राभावात् चमूः सेनाविशेषे च सेनामात्रे च योषिति वरूथाः संत्यस्यां इनिः वल
ति वलप्राणने अच् पद्मा वलते वल संवरणे संचलने च सेनेव चतुर्वर्णादित्वात् ष्यञ् क्रियते नेन घञर्थे कः के कृञादीनामिति द्वित्वं अनित्यनेन अनप्राणने अनिहृषिभ्यां कि
च्चेतीकन् अनीको स्त्री रणे सैन्ये एकादश सेनायाः ७८ व्यूह्यते ऊह वितर्के घञ् व्यूहः स्यात् बलविन्यासे निर्माणे द्वंद्वे तर्कयोः बलस्य सेनायाः विन्यासो विभज्य स्थापनं द्वे व्यूहस्य भेदा विशे
षाः यदाह कामंदकिः तिर्यग्वृत्तिस्तु दंडः स्याद्भोगोन्वावृत्तिरेव च मंडलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः इति दंडवदवस्थानं दंडः अन्योन्यानुगतावृत्तिर्भोगः सर्पशरीरवदवस्थानं मंडलः
गजादीनां विजातीयैरमिश्रितानां स्थानमसंहतः शकटमकरपताकासर्वतोभद्रदुर्जयादयोपि प्रतीयमासा रखतिभग्नान्सुगतोऽस्यंतः अच् व्यूहस्य पार्ष्णिः पृष्ठभागः पार्ष्णिः

सांयुगीनो रणे साधुः शस्त्राजीवादयस्त्रिषु ७७ ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः वरूथिनी वलं सैन्यं चक्रं चानीकमस्त्रियां ७८ व्यूहस्तु
वलविन्यासो भेदा दंडादयो युधि प्रत्यासारो व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः ७९ एकेभैकरथा त्र्यश्वा पत्तिः पंचपदातिका पत्यङ्गैस्त्रिगुणैः सर्वैः
क्रमादाख्या यथोत्तरं ८० सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः॥ ८१ स्यादुन्मदस्त्रियांस्त्रियां द्वयोः सैन्यपृष्ठेपादग्रं व्यधरपिचेति विश्वमेदिन्यौ द्वे व्यूहस्य पृष्ठभाग

स्य सैन्यस्य पृष्ठे धनुःशतद्वयांतरे स्थितं सैन्यं प्रतिगृह्यते तेनेन ग्रहवृद्धिस्य प प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे योग्येभ्यो विधिवद्देये तद्ग्रहे च ग्रहांतरे एकं सैन्यस्य पश्चाद्भ्रि
न संघातस्यानीकस्य ७९ एक इभो यस्यां एको रथो यस्यां त्रयो श्वाः यस्यां पंच पदातयो यस्यां पद्यते पन्यते वा पदगतौ पत्ति गतौ तिः स्त्रियां क्तिन् क्तिच् वा पत्तिर्ना पदके स्त्रियां गतौ वेकरथे
भिकत्र्यश्वपंचपदातिकेति भरतः एको रथो गज एको नराः पंच पदातयः त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ८० तिस्रः पत्तयः सेनामुखं त्रिभिः सेनामुखैर्गुल्मः त्र
यो गुल्माः गणः त्रयो गणा वाहिनी तिस्रो वाहिन्यः पृतना तिस्रः पृतनाश्चमूः तिस्रश्चम्वोऽनीकिनी दशानीकि॥

अ·टी·

टी·रा·

९८

न्याः क्षौहिणी सेनायामुखमुपक्रमः गुडतिगुड्यते वा गुडरक्षायां वाहुलकान्मः डलयोरेकत्वं गुल्मः सेनाघट्टभिदोः सैन्यरक्षणसंभिदोः स्तंबेऽस्त्रियामामलकैलावल्लीवस्त्रवेश्मसु गं ण्य नेगणयति वा गणसंख्याने घञ् अन्वागणाः प्रमथसंख्यो घेचंडी सैन्यप्रभेदयोः ऊहः समूहोऽस्त्यस्याः ऊनिः अक्षाणामूहिनी पूर्वपदादिति णत्वं अक्षादूहिन्यामिति वृद्धिः यत्तु सर्वेषामक्षाणामिंद्रियाणामूहः सविकल्पकं ज्ञानमक्षोहः सोऽस्त्यस्याः ऊनिः अकृतव्यूहा इति परिभाषया गुणं वाधित्वा वृद्धिरिति मुकुटेनोक्तं तन्न ऊहिनीशब्देन विग्रहे वृद्धेश्चरितार्थत्वात् अपवादो ह्यन्यत्र चरितार्थश्चेत् दानरंगेण स वाध्यते यथा सर्वेऽदृइहेत्यत्रापवादोपि सवर्णदीर्घो गुणेन वाध्यते अक्षौहिण्यामित्यधिकैः सप्तत्याष्टभिः शतैः संख्या युक्तानि सहस्राणि गजानामेकविंशतिः एवमेव रथानां तु संख्यानां कीर्तितं बुधैः पंचषष्टिसहस्राणि षट्शतानि दशैव तु संख्यातास्तु रगास्तज्ज्ञैर्विना रथ्यतुरंगमैः नृणां शतसहस्रं तु सहस्राणि नवैव तु शतानि त्रीणि चान्यानि पंचाशच्च पदातयः इति संपदनमनया वा पदगतौ संपदादित्वात् क्विप् ॥८१॥ स्त्रियां क्तिन् संपत्तिः साकल्यांतवचने स्थितिनि ईशान्त्राधिकारे वा सहृयन्यायः क्वचित् प्रवर्तते श्रीयते सर्वैः श्रिञ् सेवायां क्विब्वची त्युणादिसूत्रेण क्विप् श्रीर्वेषरचनाशोभाभारतीसरलद्रुमेलक्ष्म्यां त्रिवर्गसंपत्तौ वेषोपकरणो

अनीकिनी दशानीकिन्य क्षौहिण्यथ संपदि ॥८१॥ संपत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ ॥८२॥ धनुश्चापौ धन्वशरासनकोदंडकार्मुकं॥

मतौ इति विश्वमेदिन्यौ लक्ष्यतेऽलक्ष्यदर्शने लक्षेर्मुट् चेती प्रत्ययः लक्ष्मीः श्रीः शोभा संपत्तिः प्रियंगुष्विति हेमचंद्रः चत्वारि धनोत्कर्षस्य विपदं नमनया वा संपदादि क्विप् क्तिन् एवमापद् आपत्तिः श्रीणि आयुध्यंते नेन युध संप्रहारे घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थं प्रह्रियते नेन करणे ल्युट् शस्यते नेन शसु हिंसायां दाम्नीशसेति ष्ट्रन् अस्यते असु क्षेपणे असनि वा असर्दी क्षोष्ट्रन् चत्वारि प्रहरणमात्रस्य ॥८२॥ धनति धनशब्दे अर्त्ति दृवपीत्युस् धनुः पियालेनान स्त्री राशिभेदे शरासने धनुर्द्वेरित्रिषु चप्रस्य वंशभेदस्य विकारः अवयवे चप्राण्योषधीत्यण् उदंतोपि धनति भृमृशीत्युप्रत्ययः स्त्रियामपि शराचापो धनुः स्त्री स्यादिति त्रिकांडशेषात् धन्वति धविगतौ अंतर्भूतण्यर्थः कनिन्यु वृषीति कनिन् धन्वा तु मरुदेशे नाक्लीवं चापेऽस्त्र्यपि च शरा असंते नेन असु क्षेपणे करणे निक्रु ल्युट् कोटतेकुट अनृतभाषणे वाहुलकाद्दंड नृपुषोदरादिः कौति विच् कोर्वशो दंडोऽस्य वा कोदंडः कार्मुके रेशभेदम्॥ ९८

CC-0. In Public Domain. Digitization by eGangotri

तलयोरथीति हेमचंद्रः कर्मणे प्रभवति कर्मण उकञ् कार्मुकः वंशो कार्मुकमिष्वासे कर्मरे इति हैमः इष्वते वाणा अस्यतेनेन हलश्चेति घञ् इष्वासो धन्व धन्विनोरिति हैमः सप्त कालोयम इव पृष्ठमस्य कालवर्णं वा पृष्ठमस्य कालपृष्ठं कर्णचापे पुंसि कं कविहंगमे इति हैमः एकं कर्णस्य धनुषः ८३ कपिर्हनूमान् ध्वजो ध्वजे वा यस्य गांडिर्ग्रंथिरस्यास्ति छोरिकारादिति वा ङीष् गांडय जगादिति वः अत्र संहितया ह्रस्वदीर्घयोर्ग्रहः जिह्मो धनुषि कोदंडे गांडी वं गांडिवं तथेति शाश्वतः कोदंडे धनुर्मात्रेपि दृष्टं अर्जुनधनुषः कोट यते नया कुट प्रतापने चुरादिः अचइः कोटिः स्त्री धनुषोऽग्रेऽसौ संख्याभेदप्रकर्षयोः अटतिगुणोत्र अटगतौ वा कुलकादनिः वा ङीष् द्वे धनुषो न्यस्य गुध्येते बाहुयाभ्यां गुध परिवेष्टने हलश्चेति घञ् गोधा तलनिहाकयोः तलति तल प्रतिष्ठायां अच् तलश्चपेटे ताल ह्रो तलं ज्याघातवारणे त्सरौ स्वभावाधरयोस्तंत्री घाते च सव्यतः व्यक्तिद्वया द्वित्वं तलं स्वरूपेऽनूर्द्धेऽस्त्री क्लीबं ज्याघातवारणे ज्याया गुणस्य घातस्य वारणे द्वे ८४ लसते स्म लस श्लेषणक्रीडनयोः कर्मणि क्तः आगमशास्त्रस्यानित्यत्वान्नेट् स्वार्थे कन् धनुषो मध्यं द्वे मूर्वाया विकारः अवयवे च प्राण्योषधीसपञ्जि नाति ज्या वयोहनौ अन्येभ्योपीति डः शिंक्ते शिजि अव्यक्ते शब्दे आवश्यको ण्यनिर्णिनिः गुण्यते गुण आमं

इष्वासोप्यथ कर्णस्य कालपृष्ठं शरासनं ८३ कपिध्वजस्य गांडीवगांडिवौ पुंनपुंसकौ कोटिरस्याटनी गोधे तले ज्याघातवारणे ८४ लस्तक
स्तु धनुर्मध्यं मौर्वी ज्या शिंजिनी गुणः स्यात्प्रत्यालीढमालीढमित्यादि स्थानपंचकं ८५ लक्ष्यं लक्षं शरव्यं च शराभ्यास उपासनं॥ ॥

त्रणे घञ् अज्या गुणो ज्यासूत्रतंतुगुरज्ञो सत्वादौ संध्यादौ शौर्यादौ भीमइंद्रिये रूपादावप्रधाने च दोषान्यस्मिन्विशेषणे इति हैमः चत्वारि प्रत्यालीढं लिह आस्वादने नपुंसके भावे क्तः एवमालीढं प्रत्यालीढं तु चरणन्यासभेदेऽशिते त्रिषु आलीढपदविन्यासशिते त्रिष्विति विश्वमेदिन्यौ तत्रोर्द्धस्य वामपादप्रसारे दक्षिणपादसंकोचे आद्यं विपर्ययेऽत्यं आदिना समपदविशाखमंडलग्रहः वितस्त्यंतरेण स्थिते पादद्वये विशाखः भरतस्त्वाह वैष्णवं समपादं च वैशाखं मंडलं तथा प्रत्यालीढमथालीढं स्थानान्येतानि षोडशेति पंच धन्विनां स्थानभेदानां ८५ लक्ष्यते लक्ष आलोचने घञ् लक्षं व्याजशरव्ययोः अचो यत् शरवे हिंसायहितं उगवादिभ्यो यत् यदा शरान् व्ययति व्येञ् संवरणे संप्रसारणाभ्योऽङः आन इति कः संप्रसारणे यणादेशो चेति मुकुटः त्रीणि वेका इति ख्यातस्य शरस्य शरमोक्षस्याभ्यासः उपपूर्वे अस॥

क्षिणत्ते आसउपवेशनेवा भावेल्युट् उपासनेमासनेशुश्रूषायांशराभ्यासेपीतिहैमः हे पर्षति पृषुसेचनेलटः शत्रुसंज्ञापूर्वकत्वान्नगुणः यद्वावर्तमाने पृषत्वृहन्महा
दिति साधुः स्वार्थेकन् वर्णनेवणशब्दे घञ् वाणः शब्दोस्त्यस्य अर्श आद्यच् वाणः स्याद्रोसनेदेसभेदे केवलकांडयोः वाणोनुवाणमूल्येस्त्रीनीलझिंट्यां पुनर्द्वयोः विशिष्टाविशि
खाग्रमस्य विशिखाखनित्रिकायां रथ्यायां विशिखः शरे इति हैमः जिह्मस्याभावः अजिह्मं ऋजु गच्छति अन्येभ्योपीति डः खेगच्छति अन्येभ्योपीति डः खगोऽर्के ग्रहपक्षिषु
उपसंपन्नमुद्दिष्टं निहते वसुसंस्कृते इति विश्वः द्वे पाकेन संस्कृतस्य व्यंजनादेः प्रयस्यते स्म प्रयसु प्रयत्ने क्तः सुष्ठु संस्क्रियते स्म क्तः संपरिभ्यामिति सुट् द्वे द्रव्यांतरसंस्कृ-

तस्य पक्वस्य ५५ पिच्छोऽस्यास्तीति पिच्छादित्वादिलच् पिच्छा तु शाल्मलीवेष्टे मंडे चाश्वपदामये इति विश्वः विजनं विजिः ओविजी भयचलनयोः इगुपधात्किदितीन्

विजिं लाति ला आदाने आतोनुपेति कः द्वे मंडयुक्तभक्तजलस्य युक्तव्यंजनयोः संमृज्यते स्म मृजूशुद्धौ कर्मणि क्तः शोध्यते स्म शुध शुद्धौ ण्यन्तात् कर्मणि क्तः द्वे चिक्कणांचि- ११२

क्कणतो संपदादित्वात् क्विप् चिक्कं कणतीति कण शब्दे मूलविभुजादित्वात् कः यद्वा चिक्कनम् घञ् चिक्कस्य अणं अण शब्दे अच् शकंध्वादिः चिंत्यते चिती संज्ञाने चितेः कणः कश्चे-

ति मुकुटस्त्वयाणिनीयः मसृणति मसी परिणामे वा हुलकादृणः यद्वा समृणोति मृण गतौ इगुपधेति कः पृषोदरादिः मसृणोऽकर्कशे स्निग्धे त्रिषूमायां तु योषितीति विश्वः

ष्विङ् प्रीतौ गत्यर्थेति क्तः वा दुहेति घः त्रीणि भाव्यते स्म भुवो वकल्कने इति चुरादिर्ण्यंतात् क्तः भावितं वासितं प्राप्ते इति विश्वः वास्यते स्म वास उपसेवायां क्तः वासितं नाकदिलीनार्यो वासि
तं भाविते इति हेमः हूयाहि नहिं ग्वादिर्गंधस्य व्यंजनाः ५६ ईषत्पक्वं आङीषदर्थे इति समासः पोलति पुलमहत्वे ज्वलादित्वाण्ण भावे घञ्वा पोलेन निर्वृत्तः सुतंगमादित्वादिञ् अ
भ्यूषसा हचर्या तुसि अभ्यूषति अभ्युष्यते वा उषरुजायां इगुपधेति कः घञ्वा नोकाहरितोयवो भ्युष इति वोपालितः हरखादिरपि तत्र उषदाहे इति धातुर्वोध्यः अस्मादेवाचि अभ्यो
षोपीस्येके त्रीणि हरितयवादेर्भर्जितस्य लज्यंते लज भर्जने घञ् पुंसि बहुत्वे लाजः स्याद्दार्द्रतंडुले नपुंसकमुष्णी रेथ स्त्रियां पुंभूम्नि चाक्षते क्षणनं क्षणुहिंसायां नपुंसके भावे क्तः
न क्षतं येषां ते चो भिन्नक्रमः अक्षता श्च पुंभूम्नीत्यर्थः मुकुटस्तु ते क्षतमीति पठित्वा क्षणुहिंसायां कर्मणि क्तः क्षतं खंडितं न क्षतम क्षतमिति विगृह्य ते नित्यपुल्लिंगाः नित्यबहुवचनांता
श्चाक्षतमिति व्याचख्यौ अक्षतं नहयोः पंडेलाजेषु त्रिष्वहिंसिते यवेपि क्वचित् हे भृष्टव्रीत्यादेः केचित्तु अखंडतंडुला अक्षता इत्याहुः प्रथते प्रथप्रख्याने पृथुक पाका इति सा
धुः पृथुकश्चिपिटेर्भके इति हेमचंद्रः नासिकायानतं इनच्पिटच्चिकचि चेति पिटच् नेश्चिरादेशः चिपिटमिव संज्ञायां इवे इति वा कन् द्वे चिविडा इति ख्यातस्य द्वघनिडुधा

चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते ५६ आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः ५७॥
पूपोऽपूपः पिष्टकः स्यात्करंभो दधिसक्तवः॥ ११ न धाष्ट्वस्य ज्यतिभ्यो नः बहुवचननिर्देशाद्भूम्नि धाना भृष्टयवे क्रूरे धान्याके चूर्णे सक्तुषु इति हेमः भृष्टश्चासौ य
वश्च द्वे ५७ पवनं पूः पूञ् पवने सपदादिक्विप् पुवं पातिपिबति वा आतोनुपेति कः मुकुटस्तु पुनातिपूपः नीपादयश्चेति पः किदितितन्न तादृशसूत्रस्यापाणिनीयत्वात् न पू
प्यते पूपी विशरणे वा हलकात्यः वलिलोपः यद्वा अपुवं पाति पिबति वा पिष्टस्य विकारः संज्ञायामिति कन् पिष्टको घृतपूपादौ नेत्ररोगांतरे पिचेति विश्वः त्रीणि केन जलेन रभ्य
ते मिश्रीक्रियते केन वायुना वा नीयते रभि रनेकार्थः अकर्त्तरि चेति घञ् रभेरशब्लिटोरिति नुम् स च ते षच समवाये सितनिगमीत्यादिना तुन् दध्युपसिक्ताः सक्तवः अ
न्ने न व्यंजनमिति समासः शाकपार्थिवादिर्वा करंबइति पाठे केन जलेन रवते रविशब्दे अच् यद्वा किरति कीर्यते वा कृविक्षेपे कृकादिकडिकटिभ्योऽबच् द्वे ॥

Public Domain. Digitization by eGangotri

वुभक्षि भसदीप्तो वा हुलकात्सः छंदसि बहुलमितीत्वं त्राह्मणाभिस्सा इति भाष्यप्रयोगाल्लोकेपि यद्वा भेदनं भितुसंपदादिः भिदं स्यति षो अन्तकर्मणि आत्तोनुपे
त्रिकः पृषोदरादिः मुकुटस्तु भ्यस्यते भक्ष्यते भ्यस भये भक्षणार्थः भ्यसेः संप्रसारणं सश्चेत्याह तदपाणिनीयं भज्यते स्म भज सेवायां कर्मणि क्तः भक्तमन्ने तत्परे चेति
हेमचंद्रः अद्यते अद भक्षणे अदेर्नुम् धौ चेत्युसुन् अंधयति वा अंध दृष्ट्युपघाते असुन् अद्यते स्म क्तः अन्नात्स इति निपातनात् हुह लं नलीति वा नञ्जग्धिः अ
न्नं भक्ते च भुक्ते स्यादिति विश्वः उनत्ति उंदी क्लेदने उंदेर्नलोपश्चेति युचुर्दते अनेन वा उद हृक्षी डायां करणे ल्युट् पृषोदरादिः ओदनं न स्त्रियां भक्ते वलायामो
दनी स्त्रियां दीदिवि सहितोऽस्त्रीत्यन्वय इति सुभूतिः दीव्यत्यनेन दिवु क्रीडायां दिवो द्वे दीर्घश्चाभ्यासस्येति क्विन् स इति विशेषणात्पुंसीति स्वामी हव्यादयश्चेति क्वि
न्निति मुकुटस्त्वपाणिनीयः दीदिविः पेषणे प्रोक्त अन्ने स्याच्चतरस्त्रियामिति विश्वः षट् ४८ भिस्सा टीकते टीकृ गतौ अन्येभ्योपीति डः ड्याप्योरिति ह्रस्वः दृस्व
तस्मक्तः कुत्सिता दग्धा दग्धिका कुत्सिते इति कन् द्वे दग्धौदनस्य रसश्चा स्रावग्रश्चास्स्याग्र इति वा अग्रो रस इति राजदंतादिर्वा सर्वस्य रसस्याग्रः मंडते मंड्यते वा

भिस्सा स्त्री भक्तमंधोन्नमोदनोऽस्त्री स दीदिविः ४८ भिस्सटा दग्धिका सर्वरसाग्रे मंडमस्त्रियां मासराचामनिस्रावा मंडे भक्तसमुद्भवे ४९ ॥
यवागूरुष्णिका श्राणा विलेपी तरला च सा गव्यं त्रिषु गवां सर्वं गोविड्गोमयमस्त्रियां ५० ॥

९ मडि भूषायां अच् घञ् वा मन्यते वा मनः स्नाने जमं वाड्डः मंडः पुंचा
गुले शाकभेदे स्त्री वं तु मस्तुनि आमलक्यां स्त्रियां मंडा था स्त्रियां सारपिच्छयोरिति विश्वः द्वे मास्यते मसी परिणामे एयंतः बाहुलकादरन् मीः श्रीः सरत्वत्रैवि वा सृ गतौ
पुंसीति घः आचम्यते चमु अदने अकर्तरीति घञ् वृद्धिः निस्राव्यते स्रु गतौ ण्यंतः एरच् घञ्वा विस्राव इति मुकुटः भक्तात्समुद्भवतीत्रीणि ४९ योति यूयते वा यु मिश्रणे
सृ युवचिभ्यः न्युजा जागृजकुच इति आगूच् उष्णेव त्राः स्वार्थे कोऽसि के संज्ञायां मिति कन् श्रायते स्म श्रा पाके कर्मणि क्तः संयोगादेरातः इति निष्ठानत्वं विलिंपति लिप १९३
उपदेहे पचाद्यच् गौरादिः तरणं तरः तॄ प्लवनादौ ऋदोरप् तरं लाति आतोनुपेति कः पंच लपसीति ख्याता याः गोरिदं गोपयसोर्यत् वांतो पि प्रत्यये सर्वं भवति विका
रावयवादिः गव्यं नपुंसकं ज्यायां राग द्रव्येप्यथ स्त्रिया गो समूहे नृलिंगस्तु मो दुग्धादौ च गो हिते गोर्विट् गोः पुरीषं गोश्च पुरीष इति मयट् द्वे ॥ ५० ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कीर्यते हृ विक्षेपे कृ तृष्णामीषन्निति ईषन् एकं दुह्यते सम तः दुग्धं क्षीरे पूरिते चेति हेमचंद्रः क्षयणं क्षीष हिंसायां संपदादिः क्षियं ईरयति ईरगतौ एयंतः कर्मण्यण घस्म
ते वा घस्ल अदने घसेः किच्चेति रन् गम हने सुप धा लोपः खरि चेति चर्त्वं शासि वसीति षत्वं क्षीरं पानीय दुग्धयोरिति हेमः पीयते पीङ् पाने पयते वा पय गतौ असुन् पयः
क्षीरे च नीरे चेति हेमः श्रीलि पयसो विकारः गौ पयसोर्यत् आज्यं च दधि चादिर्यस्य आदिनात क्रनवनीतं च एकं तृप्यंत्यनेन तृप प्रीणने अ घ्ना दयश्चेति त्रप्समितिनि
पातदूति मुकुटः द्रप्समिति स्वामी पठति दृप्यं सनेन दप हर्षादौ अनुदात्तस्य चेत्यम् बाहुलकात् सः द्रप्सं द्राक् पानीयमिति सर्वानंदः द्रप्सं दध्यघनं तथेति नाममाला
पातद् इति मुकुटः द्रप्समिति स्वामी पठति दर्प्यं सनेन दप हर्षादौ अनुदात्तस्य चेत्यम् बाहुलकात् सः द्रप्सं द्राक् पानीयमिति सर्वानंदः द्रप्सं दध्यघनं तथेति नाममाला
घनाल्क ठिनाद्दध्नः एकं दगडा इति ख्यातस्य केचित्तु द्रप्सस्थाने सरं पठंति सरति सृगतौ अच वाणदूप्सो सरावितिगणौ त उपरिस्थवमानमिति व्याचक्षते पथा
घ्रियते घृ सेके अंजि घृषि भ्यः क्तः घृतमाज्यं वृदीप्रे घिवितिहेमचंद्रः आअज्यते ऽनेन अंजूव्यक्त्यादौ अंजेः संज्ञायामिति क्यप हूयते हु दानादौ अर्चिशुचि हुसृपिच्छा
दिच्छ हिंभ्य इसिरिति सिः हविः सर्पिषि होतव्ये इति हेमः सर्पति सृप्लृ गतौ इसिः चत्वारि नवं च तन्नीतं च विशेषणानामिति समासः नवं च तदुद्धृतं च एकं अ कृतानां

नतु शुष्कं करी पोस्त्री दुग्धं क्षीरं पयः समं पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् ५१ घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतं नतु हैयंगवी
नं यद्द्योगोदोहोद्भवं घृतं ५२ दंडाहतं कालशेयमरिष्टमपि गोरसः नक्रं तूदश्विन्मथितं पादांबर्द्धांबुनिर्जलं ५३ मंडं दधिभवं मस्तुपीयू
षोभिनवं पयः

ग्नि संयोगस्य नवोद्धृतस्य दुह्यते इति दोहः कर्मणि घञ् गवां दोहः ह्योगोदोहः ह्योगोदोहादुद्भवति अच् तस्य हैयंगवीनं संज्ञायामिति निपा
तः एकमेकरात्रपर्युषितादुग्ध उत्पन्नस्य घृतस्य ५२ दंडेन मथ्ना आहतं विलोडितं कर्तृकरणे इति समासः कलश्यां मंथपात्रे भवं दृतिकुक्षीति ढञ् न रिष्टमक्षेमं यस्मा
त् अनेके ति समासः अरिष्टमशुभे तक्रे सूतिकागार आसवे शुभे मरणचिन्हे इति विश्वः गोरसस्य दुग्धस्य विकारत्वादुपचारात् चत्वारि घोलस्य तं चतितं च्यते वा ते
चु गतौ स्का पितं चीति रक्न्यकादिः एकं चतुर्थांशजलघोलस्य उदके नश्वयति वर्द्धते टु ओ श्विगति वृद्ध्योः क्विप तुक् उदकस्योदः संज्ञायां उदश्वित इति निर्देशाद् सं
प्रसारणं एकमर्द्धजलघोलस्य मथ्यते स्म मथि विलोडने क्तः एकं निर्जलघोलस्य ५३ दध्नो भवति मस्यते मसी परिणामे सितनीतितुन् एकं चमत्निः सृत दधिजलस्य २

नेनवापीयूषीतीपा
स्य उपरिभागस्नेन्यपीप्यते अ
बोधप्रन मुकुटः सुपेयूषमिति पठति तत्र बाहु॥

Digitization by eGangotri

अ॰ टी॰ लकाद्गुणः पतुपीयते इदं पीडु पाने अन्येभ्योपि दृश्यत इति विच् पेः पानकर्त्तायूषहिंसायामित्यत इगुपधत्वात्कः यूषो नाम्नायिता येर्यूष इति व्याख्यानं तन्न इदमिति कर्मनिर्देशा
टी॰ रा॰ योगात् कर्त्तरि विचो विधानात् इदमिति कर्तृनिर्देशश्चेत्तर्हि पानकर्तृनाम्नायितृ इति वक्तुं युक्तं पीयूषं समदिवसावधि क्षीरे तथामृते इति विश्वमेदिन्यौ एकं नव प्रसूतायाः
११४ गोः क्षीरस्य अशनस्येच्छा सुप इति काच् अशनायेति ईत्वाभावः अप्रत्ययादित्यः भोक्तुमिच्छा भुज पालनाभ्यवहारयोः धातोः कर्मण इति सन् स्त्रो धनं सुधबुभुक्षायां क्लिप
भागुरिमते टापि क्षुधा च त्रीणि ग्रस्यते ग्रसु अदने अकर्त्तरीति घञ् केन व लते वलनृप्तो अच् द्वे ५४ पानं पापाने स्त्रियां क्तिन् घुमेती त्वं समानापीतिः समानस्य छंदसीति सभा
वः सहपीतिर्वा सहस्य सः संज्ञायां तुल्यं च तत्पानं च द्वे बहुभिः संभित्य पानस्य अदनं अदभक्षणे क्ति न् वहुलं छंदसीति घस् घसिभसोर्हलि च तुपधालोपः झलो झलीति सलो
पः कषस्तथार्द्धो धः झलां जश् झशि पूर्वेति घस्यगः समानाग्धिः पूर्ववत् सहभोजनं सुप्सुपेति समासः द्वे उदकस्येच्छा अशनायावन् पानुमिच्छा पापाने धातोरिति सन् अप्रत्ययात् त
र्षणं त्रि तृष पिपासायां संपदादिः घञ्वा तृषा लिप्सा तृषोः स्त्रियामिति विश्वः चत्वारि अदनं अदभक्षणे क्ति न् अदो जग्धिः भुजेर्ल्युट ५५ जिमु अदने ल्युट् लिह आस्वादने

अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलः पुमान् ५४ सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनं उदन्या तु पिपासा तृट् तर्षो जग्धिस्तु भोज
नं ५५ जेमनं लेप आहारो निघसो न्याद इत्यपि सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितं ५६ कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितं॥

घञ् लेप इति पाठे लिप उपदेहे घञ् लेप सुलेपने अशने च सुरायां चेति हेमचंद्रः आहरणं हृञो घञ् न्यदनं अदेर्णो णिचे सप् णश्च घञ् यो श्चेति घस्लादेशः समसुहितस्य भा
वः ष्यञ् तृप प्रीणने ल्युट् क्तिनो त्रीणि फेलगतौ गुरोश्च त्यः पूर्वं भुक्तं पश्चात्समुज्झितं पूर्वकाल एकेति समासः द्वे भुक्तोत्सृष्टस्य ५६ कमनेकमु कांतौ घञ् विशेषेर्य घबाधित ११४
इति क्लीवत्वं काममं वाढे नुमतिरेतसोः कामः स्मर इच्छा कत्मेषु इति हेमः आप्लृ व्याप्तौ भावे क्तः एषणं इषु इच्छायां क्तः इष्टमाप्तं सितेतिपि स्यान्तृजिते प्रयसितत्रिषु समतं तत्तो पुमान्
इति क्लीवत्वं काममं वाढे नुमतिरेतसोः ... आप्लृ व्याप्तौ सन्नक्तः आपदत्यधामीत् अव्ययं विभक्ती त्यव्ययीभावः यट् इष्टाः नृनिकमस्य गोपाति पारक्षणे आतो नुपेति
क्लीवे संस्कारे क्रतुकर्मणीति विश्वः आप्लुमिष्टं आप्लव्याप्तौ सन् क्तः आपदत्यधामीत् अव्ययं विभक्तीत्यव्ययीभावः
कः गोपा गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि याम स्याधिकृते पुंसि सारिवारव्यौषधौ स्त्रियां॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मिति विश्वः गां पालयति पालरक्षणे कर्मण्यण् गोपालो नृपगोपयोः गोकीले मुशले हले गां संचष्टे चक्षिङ् व्यक्तायां वाचि चक्षिङः ख्याञ् समिख्य इति कः गां दोग्धि सत्सूद्विषे
ति क्विप् मूलविभुजादित्वात्को गोदुहोपि गोयगोदुहवल्लवा इति त्रिकांडशेषः आसमंताद्भिर्यरति आत इति कः आ अभिर् ईरयति वा ईरगत्यादौ पचाद्यच् वल्लनं वल्ल
संवरणे घञ् वल्लं वाति वाति वा यति वा वा गत्यादौ ओवै शोषणे वा आत इति कः वृ ५७ गोश्च महिषी च गोमहिष्यौ आदी यस्य तत् पादेर्वंधनमस्य पादवंधनमिति पाठे तु गो
महिष्यादिकं धनं यद्नामिदं तत्सेदमित्यण् गवादिया रवंवित्रमिति वा पालितः आदिना खरोष्ट्राविकादिग्रहः एकं गवामीश्वरः वहवो गावोऽस्य भूम्निमतुप्स्या
तेति मिनिश्च त्रीणि गवां कुलं गवां धनं समूहः गोकुले धनगोधने इति व्याडिः द्वे गोसंघातस्य ५८ आशितो भोजिता गावो यत्र अधडे ति खः मुमतुनिपातितः ए
कं पूर्वं गवां चरणस्थानस्य उक्षति उक्षसेचने श्वन्नुक्षन्निति कनिः वाहुलकात्कन्निति मुकुटस्तु एतत्सूत्रादर्शनमूलकः भंदति भदि कल्याणे ऋज्रेंद्रेति सा
धुः स्फायितंचीति रगिति तु मुकुटस्य प्रमादः भद्रः शिवे खंजरीटे वृषभे तु करंवके कारिजाति विशेषे नाली वे मंगलमुस्तयोः कांचने च स्त्रियां रास्ना हरिद्रा व्योमनदी

गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः ५७ गोमहिष्यादिकं पादवंधनं द्वौ गवीश्वरे गोमान् गोमी गोकुलं तु गोधनं स्याद्गवां व्रजे ५८ त्रिष्वा
शितंगवीनं तद्गावो यत्राशिताः पुरा उक्षा भद्रो वलीवर्द ऋषभो वृषभो वृषः ५९ आनड्वान् सौरभेयो गौ रुक्ष्णां संहतिरौक्षकं गव्या गोत्रा गवां व

पु च तिथिभेदे प्रसारिण्यां कटफलाः नं तयोरपि त्रिषु श्रेष्ठे च साधौ च नपुंसि करणांतरे वरणां वरईसायां संपदादेः इत्यश्च वर ((त्सधेनोर्वात्सकधैनुके॥ ६०॥
वर्ईवरौ तौ इदंता तिकः अतिशायितं वलमस्य अतइनिः वली चासौ ईवर्दश्च ऋषति ऋषी गतौ वर्षति वृषु सेचने ऋषिवृषिभ्यां कित् इत्यभच् इगुपधेति कोपि वृषभः श्रेष्ठ
वृषयोरिति विश्वः वृषो धर्मे वलीवर्दे संख्यापुराशिभेदयोः श्रेष्ठे स्यादुत्तरस्थश्च वासमूषक शुक्रले वृषामूषिकपर्ण्यां च ५९ अनः शकटं वहति अनसि वहेः क्विप् अस्य
नसोडश्च सुरभ्या अपत्यं स्त्रीभ्यो ढक् इतश्चानिञ् इति मुकुटस्य प्रमादः तत्र ह्यचइत्यनुवृत्तेः गच्छति गमेर्डोः गोः स्वर्गे च वलीवर्दे रश्मौ च कुलिशायुमानस्त्री सौरभे
यी दृग्वाणदिग्वाग्भूष्वप्सु भूम्नि चेति विश्वमेदिन्यौ नव उक्ष्णां समूहः गोत्रोक्षोष्ट्र इति वुञ् एकं गवां संहतिः खलगोरथादिनित्र कण्यचश्चेति यत्रौ द्वे वत्सानां समूहः गोत्रोक्षो
ष्ट्र इति वुञ् एकं धेनूनां समूहः अचित्तहस्तिधेनोष्ठक् एक ९९॥

महोक्षः सातुक्षा च॰ अचतुरेति साधुः एकं वृद्धश्चासावुक्षा च पूर्ववत् जरन् चासौ गौश्च पूर्वकालैकेति समासः गोरतद्धितलुकीति टच् द्वे जातश्चासौ उक्षा च॰ अचतुरेति सा-
धुः एकं अभृदम्यभावस्य तृणोति तृणभक्षणे ण्वुल् ६१ शकृत्करोति संवशकृन्तोरिन वदव्यक्तायां वाचि वृत्त्वदिहनिकमिकषिभ्यः सः वत्सः पुत्रादिवर्षयोः तर्णके ना-
रि सिल्ली वमिति विश्वः द्वे दमनार्हः दमु शमने अर्हे कृत्यतृचश्चेत्यर्थे पोरदुपधादिति यत् तनुर्वत्सः वत्सोक्षाश्वेत्यादिना तरच् द्वे वत्सभावमतीत्य द्वितीयं वयस्प्राप्तस्य
ऋषभस्य प्रकृतिः ऋषभोपानहोर्ञ्यः षण्डतायोग्यः एकं सनोति सन्यते वा षणु दाने अमंताड्डः वाहुलकान्नसत्वं षंडं पद्मादिसंघाते न स्त्री स्याद्गोपतौ पुमानिति मूर्द्ध-
न्यादौ डांते मेदिनिः शंढ इति पाठे शमेर्ढः शंढः स्यात्पुंसि गोपतौ आकृष्टांडे वर्षवरे तृतीयप्रकृतावपि गवांपतिः एषणमिट् इषु इच्छायां क्विप् इषाचरति अच् के-
चिदिचर इति पठंति एति तच्छीलः इण् शजीनि क्वरप् तुक् त्रीणि सांड इति ख्यातस्य ६२ वहति युगमनेन गोचरसंचरेति साधुः वहः स्यादृषभस्कंधे वाहे गंधवहे-
पि चेति विश्वः एकं सस्ति षस स्वप्ने रास्नासास्नेति साधुः गलस्य कंबलो नागराजे स्यात्सास्ना प्रावारयोः स्त्रियामिति विश्वः द्वे नसनं नस कौटिल्ये क्तः नसं कृतमस्य प्रातिपदि-

उक्षा महान्महोक्षः स्याद्वृद्धोक्षस्तु जरद्गवः उत्पन्न उक्षा जातोक्षः सद्योजातस्तु तर्णकः ६१ शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ ॥
आर्षभ्यः षंडतायोग्यः षंडो गोपतिरिट्चरः ६२ स्कंधप्रदेशस्तु वहः सास्ना तु गलकंबलः स्यान्नस्तितस्तु नस्योतः प्रष्ठवाड्युगपार्श्वगः ६३॥
युगादीनां तु वोढारो युग्यप्रासंग्यशाकटाः खनति तेन तद्वोढास्येदं हालिकसैरिकौ॥ ६४॥ ९९ कद्धात्वर्थ इति णिच् ततः कर्मणि क्तः नासिकायां भवा
शरीरावयवाद्यत् नस्तासिकायायत् तसश्छुद्रेधिति नसादेशः नस्यया नासारज्ज्वा उतः नस्तोत इति पाठ इति कश्चित् नस्यते कर्मणि क्तः नस्यया उतः द्वे नासारज्जुयुक्तस्य
प्रष्ठमग्रगामिनं वहति वहश्चेति ण्विः स्वामी तु पंचमं षष्ठं वा वर्षं वहतीति विगृह्य रेफरहितं पठति तत्र पृषोदरादित्वं बोध्यं युगस्य स्कंधकाष्ठस्य पार्श्वं गच्छति अन्ये- ११५
ष्वपीति डः द्वे दमनकाले कंठारोपितकाष्ठवाहस्य ६३ युगं प्रासंगं शकटं वा वहति तद्वहति रथयुगप्रासंगमिति यत् शाकटादण् क्रमेणैकैकं हलेन सीरेण वा
खनति तेन दीव्यति खनति जयतीति ठक् हलं सीरं वा वहति हलस्य सीरस्येदं हलसीराट्ठक् द्वे उक्तार्थे तु नाम्नी ६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहतीति वहः अच धुरो वहः धुरो यड्ढकौ खः सर्वधुरादिति योगविभागात् खः धुरं धारयति संज्ञायां भृतृवृजीति खच् खचि ह्रस्वः वाचंयमपुरंदरौ चेति चकारस्यानुक्त
समुच्चयार्थत्वात् क् अरुर्द्विषदिति मुम् पंच एकाचासौ धूश्च ऋक्पूरब्धूरित्यः एकधुरं वहति एकधुरा लुक् चेति खः एकधुराया वहः त्रीणि ६५ सर्वाचासौ धूश्च सर्वधुरां
वहति खः सर्वधुरादिति सर्वधुराया वहः द्वे खः गौरुस्त्राप्रियाद्रूला महीतिनिरुक्तं मत्या अपत्यं स्त्री स्त्रीभ्यो ढक् महते महपूजायां पुंसीति घः खनो घचेति वा महाया
अपत्यमिति तु स्वामी सुरभ्याः अपत्यं गच्छति गमेर्डोः वसति क्षीरमस्यां वसनिवासे स्फायितीति रक् वचिस्वपीति वस उः नरपरे तिषत्वाभावः उस्त्रार्जुन्युपचित्रयोः उस्त्रा
तु वृषभे प्रोक्तः किरणे च तथा पुमान् मान पूजायां नप्तृनेष्ट्रिति साधुः मातरौ गोजनन्यौ द्वे इति रुद्रः माता गोर्या दिजननी गोत्रा ब्रह्मण्यादिभूमिषिविति विश्वः शृंगं अस्त्यस्या
अत इनिः ६६ अर्जुनवर्णयोगात् अन्यतो ङीष् अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः मातुरेकसुतेपि स्याद्धवलेपुनरन्यवत् नपुंसकं तृणे नेत्ररोगे स्यादर्जुनी ग
वि उषायां वा हृदानद्यां क्वचिद्विस्याम पिच क्वचिदिति विश्वः न हन्यते हंति वा दातारं अध्यादयश्चेति साधुः रोहितवर्णयोगात् वर्णादनुदात्तेतिङीष्नोरोहिणीसो

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः उभावेकधुरीणैकधुरावेकधुरावहे ६५ सतु सर्वधुरीणो यो भवेत्सर्वधुरावहः माहेमी सौरभेयी गौ
रुस्त्रामाता च शृंगिणी ६६ अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ६७ द्विहायनी द्विवर्षा गौ
रेकाब्दा त्वेकहायनी चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी॥ ६८॥ ९९ मवल्केभेकं उरोमोमयोर्गवीति हेमचंद्रः नवनीचैश्चरति चरतीति ठक् अ
व्ययानामिति टिलोपः यद्वा निचिः कर्णशिरो देश इति रभसः ततः स्वार्थे कन् प्रशस्तं निचिकमस्याः ज्योत्स्नादिभ्य इत्यण् नैचिकी गोरुत्तमा तु निचिकी साप्रकीर्तिते
ति नाममाला एकं आदिना प्रमाणाऽवयवादिग्रहः शबलयोगात् अन्यतो ङीष् धवलयोगात् अनुदात्तत्वाभावान्न ङीष् मुकुटस्तु धवलीत्याह तन्न गौरादिङीष्
आदिना कृष्णा कपिला पाटलेत्यादयः प्रमाणादिभेदात् दीर्घा ह्रस्वा खर्वा वामनीत्यादयः अङ्गभेदात् पिंगाक्षी लंबकर्णी वक्रशृंगीत्यादयः ६७ द्वौ हायनौ यस्या
दामहायनेति ङीष् द्वे द्विवर्षे वयः प्रमाणमस्याः आर्हीय ष्ठक् अध्यर्द्धेति लुक् द्वे एकः अब्दो यस्याः एकः हायनो यस्याः ङीष् द्वे चत्वारोऽब्दा यस्याः चत्वारो हायना यस्याः

वष्टि वशा कान्तौ अच् वष्टि जनस्पृहायत्ते ष्यायत्तत्वप्रभुत्वयोः वशा नार्यां वंध्यगव्यां हस्तिन्यां दुहितर्यपीति हैमः वध्नाति वंधवंधनेण्यत् अघ्न्यादिरिति मुकुटः हे अवग
लितं तोकमपत्यं यस्याः स्रवद्गर्भो यस्याः हे संधानं दुधात्र् आतश्चोपसर्ग इत्यङ् संधा अस्त्यस्याः व्रीह्यादित्वादिनिः अवश्यं संधत्ते वा आवश्यक इति णिनिः संधिनी वृषभाक्रां
ताकालदुग्धा स्तयोः स्त्रियां एकं कृतमैथुनायाः विहंति गर्भं संश्चतृपदे हदिति साधुः गर्भमुपहंति सुप्यजाताविति णिनिः हे वृषयोगेन गर्भपातिन्याः ६९ प्रजने ग
र्भग्रहणे प्राप्तकाला उपस्त्रियते वृषेण सा गतौ उपसर्या काल्याप्रजने इति साधुः एकं गर्भग्रहणयोग्यायाः प्रष्ठं वहति वहश्चेति ण्विः वाह इति ङीषि प्रष्ठौही इति पा
टः प्रष्ठोदरादित्वात् इत्लोपः बाला चासौ गर्भिणी च हे प्रथमं गर्भं धृतवत्याः न चंडी सुसुखं करोति अच सुक्रियते वा ईषद्दुःसुष्विति खल् हे सुशीलायाः बह्वी सूतिर्यस्याः
परमिच्छति परैरिष्यते वा बाहुलकात् उः स्वार्थे कः हे बहुप्रसूतायाः ७० चिरं प्रसूता सुप्सुपेति समासः वष्कते वष्क गतौ बाहुलकात् अयन् वष्कयमस्त्रुणा वत्सः सोऽ
स्त्यस्याः वा अत इनिः ङीष् अट् कुप्वितिणत्वं पूर्वपदादिति मुकुटस्य प्रमादः समासाभावात् यद्वा वष्कयस्तरुणहायनो वत्स इति शाकटायनः तेन नीयते संपदादिः

वशा वंध्याऽवतोका तु स्रवद्गर्भाऽथ संधिनी आक्रान्ता वृषभेणाथ वेहद्गर्भोपघातिनी ६९ काल्योपसर्या प्रजने प्रष्ठौही बालगर्भिणी स्यादं
चंडी तु सुकरा बहुसूतिः परेष्टुका ७० चिरप्रसूता वष्कयिणी धेनुः स्यान्नवसूतिका सुव्रता सुखसंदोह्या पीनोध्नी पीवरस्तनी ७१ द्रोणक्षीरा
द्रोणदुग्धा धेनुष्या बंधके स्थिता समांसमीना सा या प्रतिवर्षं प्रसूयते ७२ ऊधस्तु क्लीबमापीनं समौ शिवककीलकौ ॥ सर्वतो क्विन्नर्थादिति
ङीष् गौरादित्वाद्वा पूर्वपदादिति णत्वं अत्र पक्षे इकाररहित उपांत्यः हे धीयते धेट् पाने धेट इच्चेति नुः धेन्वादयश्चेति मुकुटस्तु पाणिनीयः धेनुमात्र के दोग्ध्यामिति हैमः
नवं सूतं प्रसवो यस्याः शेषादिति कप् प्रत्ययस्थादिति इत्वं हे शोभनं व्रतमस्याः सुखेन संदुह्यते ण्यत् हे पीनमूधोऽस्याः ऊधसो नङ् बहुव्रीहेरूधसो ङीष् पीवरस्तनोऽस्याः
स्वांगाच्चोपसर्जनादिति ङीष् हे ७१ द्रोणपरिमितं क्षीरमस्याः द्रोणं दोग्धि दुहः कप् घश्चेति कप् घश्चान्तादेशः हे संज्ञायां धेनुष्येति साधुः एकं समायां समायां विजायते समांसमं
विजायते इति खः उत्तरपदे लोपाद्विभक्तेरलोपः पूर्वपदे यलोप एव एकं ७२ वहति उनत्ति वा वहप्रापणे उंदी क्लेदने असुन् ऊधसो नङिति निर्देशाद् धारेरूधः श्वेः संप्रसारणं चेत्य ११६

CC-0. In Public Domain. Digitization by eGangotri

आप्यायते स्म आप्यायी वृद्धो गत्यर्थेति क्तः प्यायः पी निष्ठायां आङ्पूर्वस्यां धूघसोरिति वा पीभावः ओदित श्चेति निष्ठानत्वं हेसी राशयस्य प्रपनिगात्र कंडूंशे तेन वा सर्वनि घृष्वेति साधुः स्वार्थे कः कील्यते कीलवंधे हलश्चेति घञ् स्वार्थे कन् हेवंधनकाष्ठस्य द्यति दो अवखंडने दीयते ऽनेन वा देङ् रक्षणे मनिन् संदीयते संपूर्वो दाणवंधने ल्युट् द्यते हनकालेपादवंधनरज्जोः पशुवंधनी रज्जुः शाकपार्थिवादिः दामे वप्रज्ञाद्यण् अन्निति प्रकृतिभावः टिड्ढेति ङीपू नियंसंज्ञेति ङीषा वेषनीति पाठ इति कश्चित् हे पशुवंधनरज्जोः ७३ विशाखा प्रयोजनमस्य विशाखावाषाढादिन्यण् वैशाखो मासभेदेपि मंथाने च प्रकीर्तितः मथ्यते ऽनेन हलश्चेति घञ् मंथो रवो मथिसाक्त वेनेत्ररोगेचेति हेमः मंथति वा हुलकादान च् ताच्छील्ये चानश्वा मुकुटेन तु परमे किदित्यनुवृत्तौ मंथ इत्यनेनानन् इत्युक्तं तन्न अनेनानन् विधानात् आनस्याविधानात्। यदपि मंथेः श्वानच् मंथान इति स्वामी त्युक्तं तदपि न मंथेः परस्मैपदित्वात् आत्मनेयदिभ्यः श्वानचो विधानात् मुकुप्रसंगाच्चानशपि नआगमप्राप्तस्या नित्यत्वं वा वोध्यं मथ्यते ऽनेन मंथ इति निः किन्तः यत्तु पथिमथ्यिभ्यामिन्निति मुकुटेनोक्तं तत् पाणिनीयं मंथस्य दंडः पंचकुठति कुठ गति प्रतिघाते वा हुलकात्करन् कुठश्चेत्यर इति मु

नपुंसि दाम संदानं पशुरज्जुस्तु दामनी ७३ वैशाखमंथमंथानमंथानो मंथदंडके कुठरो दंडविष्कंभे मंथनी गर्गरी समे ७४ उष्ट्रे क्रमेलकमयमहांगाः करभः शिशुः करभाः स्युः शृंखलका दारवैः पादवंधनैः॥७५॥

९९ कुटस्त्वपाणिनीयः कुटर इति पाठे तु कुटकौटिल्ये वाहुलकादरः दंडं। विष्कंभाति स्कंभु रोधने सौत्रः कर्मण्यण् वेः स्कभ्नातेर्नित्यमिति षत्वं हे मंथवंधनकाष्ठस्य गर्गरी मुखस्य मंथदंडधारककाष्ठस्य वा मथ्यते स्या करोति स्युट् गार्ग इति शब्दं राति आत इति कः गौरादिः गिरति वा गृनिगरणे वाहुलकाद्गर द्वे मंथनपात्रस्य ७४ ओषति उष्यते वा उष दाहे ष्ट्रन् संज्ञापूर्वकत्वाद्गुणाभावः उषिसुमृभ्यः किदिति ष्ट्रन्निति मुकुटस्त्वपाणिनीयः क्रामति क्रमु पादविक्षेपे विच् इलति इलगतौ एलयति वा इलक्षेपे ण्वुल् क्रमश्चासौ एलकश्च मीनाति मयते वा मीञ् हिंसायां मय गतौ वा अच् महांत्यंगानि अनेकमिति वहुव्रीहिः चत्वारि किरति कीर्यते वा कृविक्षेपे कृगृशलिगर्दिभ्यो ऽभच् करभो मणिवंधादिकनिष्ठांतो प्युष्ट्रतत्सुते एकमुष्ट्रशिशोः शृंखलं वंधनमस्य शृंखलमस्य वंधनं करभे इति कन् एकं दारुविकारशृंखलाप्रायवंधनयुक्तस्य करभस्य ७५॥

अजति अजगतौ पचाद्यच् अजी विभ्यामिति निर्देशान्नवी अजा द्यतप्टाप् अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे इति हैमः छ्यति छायते वा छो छेदने छापूखडिभ्यः
किदिति गन् जातेरिति ङीष् हेलम्भौ नि स्तंभुरोधने मूलविभुजादित्वात्कः पचाद्यचि तु नलोपो न स्यात् तुभ इति पाठे लोभं तनुभ हिंसायां स्तुभ इति पाठे स्तुभ हिंसायां इगुपधेति
कः बस्तयति बस्त अर्दने चुरादिः अच् छायते छो छेदने छो गुक् ह्रस्वश्चेत्यलच् स्वार्थे कः पंच मेहति मिह सेचने ष्ट्रन् उरभ्रमति भ्रमु चलने अन्येभ्योपीति डः पृषोदरादिः
यद्वा उना शंभुना रभ्यते रभ राभस्ये वाहुलकाद्दक् ऋच्छति अर्यते वा ऋगतौ अर्त्तेरुच्चेति क्युन् ऊर्णा अस्यास्ति ऊर्णायायुस् मिषति मिष स्पर्द्धायां अच् वर्षति वृष
सेचने सृवृषिभ्यां किदिति निः सृणि वेणि इति हृणि पार्ष्णि चूर्णि इति निरिति मुकुटस्त्वपाणिनीयः इलति एलयति वा इल गति क्षेपणयोः ण्वुल् डलयोरेकत्वं सप्त
१६ उष्ट्राणां उरभ्राणां अजानां च समूहः गोत्रोक्षा इति वुञ् प्रत्येकमेकैकं चक्रवद्भ्रमणं चक्रं तदस्यास्ति मतुप् आसंदीवदिति साधुः वलये उपहारापसंहितः छ
छदिरुपधीति ढञ् वलेरपत्यं वा इञ् श्वानित्र इति ढक् वालेयो गर्द्दभे पुंसि मृदौ बलिहृते त्रिषु इति विश्वः रासते रासृ शब्दे रासि बल्लिभ्यां चेत्यभच् गर्द्दति गर्द्द शब्दे

अजा छागी शुभच्छागवस्तच्छगलका अजे मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ७६ उष्ट्रोरभ्राजवृंदे स्यादौष्ट्रकौरभ्रकाजकं चक्रीवंतस्तु
वालेया रासभा गर्द्दभाः खराः ७७ वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ७८॥ ॥

द्रौ शृ शलि कलि गर्द्दिभ्योऽभच् गर्द्दभं श्वेतकुमुदे गर्द्दभो गंधभिद्यपि रासभे गर्द्दभी स्युद्जंतुरोगप्रभेदयोरिति विश्वः खं मुखविलमतिशयितमस्य खमुखेतिरः खरो रक्षो
तरेत्तीक्ष्णेड्डः स्पर्शे रासभेपि चेति हेमचंद्रः पंच ७७ विदेहेषु भवः धूमादित्वाद्वुञ् विदेग्धि वा दिह उपचये ण्वुल् प्रज्ञाद्यण् वैनिश्चितः देह उपचयोयस्येति वा वैदेहको वाणिज
के शूद्रा हैष्यासुतेपि चेति विश्वहेमचंद्रौ सार्थं वहति कर्मण्यण् निगमे भवः तत्र भव इत्यण् नैगमः स्यादुपनिषद्वणिजोरिति विश्वः संज्ञापूर्वकत्वाद्वृद्ध्यभावे निगमोपि नि ११७
गमो वणिजे पुर्यामिति विश्वः पणते पण व्यवहारे स्तुतौ च पणतेरिज्यादेश्च वः प्रज्ञाद्यण् वणिक् स्त्रियां वणिज्यायां पुमान् वाणिजके च करणांतरे इति विश्वः पण्यते प
ण व्यवहारे अवद्यपण्येति साधुः पण्यमाजीवो यस्य आपणो व्यवहारोऽस्यास्ति अत इति ठन् क्रयविक्रयाभ्यां जीवति वस्नक्रयविक्रयाट्ठन् अष्टौ ७८ ॥

विक्रीणाति डुक्रीञ् द्रव्यविनिमये तृच् विक्रयेण जीवति वस्नक्रयविक्रयाट्ठन् हे० क्रीणाति ण्वुल् क्रयेण जीवति ठन् हे० आह कस्य वणिजां कर्म ब्राह्मणादित्वात्ष्यञ् द्वे
वणिग्भ्यां चेति यः द्वे वणिक्कर्मणः मूलेनानाम्यं नौवयः इति यत् वसत्यत्र वा धाप्ट्रवस्यज्यतिभ्यो नः वस्नं वस्नो धने मूल्ये भूम्नि इति हेमचन्द्रः अवक्रीयतेऽनेन पुंसीति घः
एरजिति मुकुटः तन्न ल्युटा बाधात् त्रीणि ७९ नितरां इन्वति इ विप्रीणने अनित्यमागमशासनमिति ननुम् इगुपधात्कित् इति नक् कृदिकारादिति ङीष् निपूर्वाद्व्येञो
निश्चेति डिः कृदिकारादिति ङीष् य्वोर्यलोपः नेदीर्घः नीवी साह मुकुटः नीवी स्त्री कटिवस्त्रबंधने मूलद्रव्ये परिपणोऽपीति हेमः परिपण्यते वृद्ध्यर्थं प्रयुज्यते पुंसीति घः
मूलं च तद्धनं च त्रीणि लभ्यते डुलभष् प्राप्तौ अकर्तरीति घञ् अध्यारूढं अधिकमिति साधुः फलति फल निष्पत्तौ अच् फलं जातीफले सस्ये हेतूत्थे व्युष्टिलाभयोरि
ति विश्वः फलं हेतुकृते जातीफले फलकसस्ययोः त्रिफलायां च कंकोले शस्त्राग्रे व्युष्टिलाभयोः फली फलिन्यामिति हेमः त्रीणि परिवृत्य दानं क्वचित्प्रतिदानमिति पाठः परि
वर्तनं भावे घञ् उपसर्गस्येति दीर्घः निमानं मेङ् प्रणिदाने अचो यत् ईद्यति गुणः प्रज्ञाद्यण् चत्वारि अदन्ता वदन्तेति ख्यातस्य ८० उपनिधीयते डुधाञ् उपसर्गे घोः किः

विक्रेता स्याद्विक्रयिकः क्रायकः क्रयिकः समौ वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः ७९ नीवी परिपणो मूलधनं लाभोऽधिकं फ
लं परिदानं परीवर्तो नैमेयनिमयावपि ८० पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणं क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके ८१ विक्रेयं प
णितव्यं च पण्यं क्रय्यादयस्त्रिषु क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियां ८२ विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु ॥

न्यस्यते असु क्षेपणे कर्मणि घञ् द्वे निक्षेपस्य प्रतीपं दानं तस्यार्पणं द्वे स्वामिने निक्षेपार्पणस्य क्रीयते अचो यत् क्रय्यस्तदर्थे इति साधुः एकं ग्राहका गृह्णीयुरिति बु
द्ध्या आपणे प्रसारितस्य एकं हट्टे प्रसारणयोग्यस्य ८१ विक्रीयते अचो यत् पण्यते पण व्यवहारे तव्यत् व्यानीयरः अवद्यपण्येति साधुः त्रीणि विक्रेयक्रियाकर्मणः स
त्यस्य करणं सत्यापपाशेति णिजापुकौ भावे ल्युट् सत्यापना सत्याकृतिरिति स्त्रीकाण्डे वाचस्पतिः एयया सत्यं शपथेति युजपि घञ् कारे सत्यागदस्येति मुम् कृतिन् सत्यादश
पथे डाच् त्रीणि साईनिख्यातायाः ८२ विपणनं घञ् संज्ञापूर्वकत्वान्न वृद्धिः रुदनाद्य चनिघो वा विक्रयणं एरच् द्वे विक्रयक्रियायाः दृशां मित् दृश्यते वा० ॥

अ·टी·
टी·रा·
११८

दंशादशाने वाकुलकालकनिनदशाशब्दमभिव्याप्य आङ् मर्यादाभिविध्योः नपुंसकादिति पक्षेटच् न एकादिका नवदशापर्यंताः संख्याः संख्येये त्रिलिंगाश्च तेन एको वि
प्र इत्यादि भवति न तु विप्रस्यैक इत्यादि विंशतिरित्याद्या या आसं नाः संख्याः संख्येयसंख्ययोर्वर्तंते एकवचनांताश्च यथा विंशतिर्गावः गवां विंशतिः ८३ विंशत्यादीनां यदा सं
ख्यार्थस्तदा द्विवचनबहुवचने अपि स्तः यथा द्वे विंशती तिस्रो विंशतय इति तासु विंशत्यादिषु नवतिमभिव्याप्य स्त्रीलिंगाः यथा विंशत्या पुरुषैः कृतं विंशतिः कुंडानी
ति द्वौ पंचतौ पंक्ति विंशतीति साधुः पंक्तिर्दशा इत्यं छंदोदशसंख्यावलीष्वपीति विश्वः पंक्तेर्दशगुणोत्तरं क्रमात् शतसहस्रादि ज्ञेयं यथा दशपंक्तयः शतं दशशतानि सह
स्रं दशसहस्राण्ययुतमित्यादि ८४ यो तेर्वा हुलकाड्डावे कर्तरि वा तुन् यो तुः शोधनं शोधको वा तस्येदं रूढो विकारः मानेवयः मीयतेऽनेन माङ् माने पाप्यसान्नाप्येति सा
धुः मानमर्थो यस्य चत्वारि मानेभेदाना ह तुलेति तोल्यतेऽनया तुल उन्माने भिदाद्यङ् अतुलोपमाभ्यामिति निर्देशाद्गुणाभावः मष्यतेऽनेनमष हिंसायां हलश्चेति घञ् कः।
आद्यश्चासो माषकश्च शास्त्रीयत्वात् एकं ८५ अक्षति अक्षू व्याप्तौ अच् अक्षो रथस्यावयवे व्यवहारे विभीतके साय के शाकटे कर्षे ज्ञाने चात्मनि रावणेर अक्षंसौ वर्चं

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ८३ संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरं ८४
यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषकः ८५ ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयं सुवर्णबिस्तौ
हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ८६ तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः॥ ८७ लेनुत्येत्स्पीके स्यादिति हेमचंद्रः

कर्षेति कृषविलेखने अच् कर्षो नाकर्षेणेमा नपुंभेदेषु नपुंसकं द्वे पल तिपल गतौ अच् पलमुन्मानमांसयोरिति हैमः कर्षाणां चतुष्टयशोभनो वर्णः सु।
निर्वास्य कुद्रस्तु सुवर्णे स्वर्णे विस्तयोरिति लीवमाह सुवर्णो नास्वर्णे कर्षे सुवर्णं च मखां तरे स्त्री कृष्णागुरुणि क्लीवे कांचने हरिचंदने इति विश्वः विस्यते स्म विस
उत्सर्गे क्तः आगमस्यानित्यत्वान्नेट् द्वे कुरुषु विस्तः तस्य हेम्नः पले एकं ८६ तोलयति तुल उन्माने चुरादिः अच् अतुलोपमाभ्यामिति निपातनाद्गुणाभावः ति
जभावे तु द्गुपचेति कः तुला सादृश्यमानयोः गृहाणां दारुबंधाय पीठिकायामपीष्यते राशौ पलशते भांडे इति विश्वहेमचंद्रौ पलानां शतं एकं भ्रियते भृञ् भरणे

हस्तद्वितये फलानामपि वीवधः इत्यजयः भारः स्यात् द्वीवधे विंशोपलानां द्विसहस्रके आचीयते स्म चित्रं चयने क्तः भारैः दशभिः आचित इति रत्नकोषः आचितः शाकटो
न्मेषे फलानामयुतद्वये इति विश्वः एकं शाकटेन उह्यते शोषेइ इत्यण् एकं ८७ कर्षस्यायं तस्येदमित्यण् आपणनं पणो व्यवहारः दोनित्यं पणः इत्यप् खनो घचेति घो वा
कार्षस्य कार्षणो वा आपणः कार्षापणः स्त्री कार्षिके पणः षोडशिके पि च कर्षस्यायं अध्यात्मादित्वाट्ठञ् टेरजत रूप्यस्य नाम्नस्यायं अध्यात्मादित्वाट्ठञ् पण्यते
नेन पणो व्यवहारा दोनित्यं पणः इत्यप् पुंसीति घो वा हलश्चेति घञ् वा संज्ञापूर्वकत्वाद्वृद्ध्यभावः पणो वराटमाने स्यान्मूल्ये कार्षापणे ग्लहे क्रय्यधनादिके द्यूत
व्यवहारे नृ नौ धने एकं ताम्रकृतकार्षापणस्य तुलामानमुक्तं अंगुलिमानं च हस्तादिवृवर्गे उक्तं प्रस्थमानं त्वाह आढौ कते ढौ कृगतौ अच् एषोदरादिः आढकी च
तुवर्या स्त्री परिमाणे नरे त्रिषु एकं सर्वतोदशांगुलमानस्य द्रवति द्रुगतौ कृदृजृसिद्रुपन्यनिस्वपिभ्यो नित् इति नः द्रोणः स्त्रियामाढके स्याद्द्रोणकादि चतुष्टये पुमान् कृपी
पतौ कलसकाके स्त्री नीवृदंतरे स्त्रियं काष्ठांबुवाहिन्यां गवादिन्यामपीष्यते इति विश्वः खमाराति मूलविभुजादिः गौरादिः उह्यते नेन वहः प्रापणे हलश्चेति घञ् वा

आचितो दशभाराः स्युः शाकटो भार आचितः ८७ कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः अस्त्रियामाढकद्रोणौ खारी वाहो निकुंच
कः ८८ कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् पादस्तुरीयो भागः स्यादंशभागौ तु वंटके ८९॥ १ होश्यमानयोः वृषवाहा तु वाहो स्यादिति हेमचंद्रः

निकुंचति कुंच कौटिल्ये अच् स्वार्थिकः ८८ कुड्यते कुंडते वा कुडि दाहे वा हुलकात्कवचू प्रत्ययः अनित्यत्वान्न नुम् कुटप इत्यपि पाठ इति मुकुटः तत्र कुटकौ टि
ल्ये कुटेः कपन् प्रस्थीयते नेन घञर्थे कः प्रस्थो स्त्रियां मानभेदे सानावत्युच्चवस्तुनि आद्यर्थेन मानीभविकाप्रवर्तिकादिग्रहः वाहो विंशतिखारीभिर्भविका स्यादनेन तु
प्रवर्तकः पंचखारीभिः सस्यमाने प्रकीर्तितः पलप्रकुंचकं मुष्टिः कुडवस्तच्चतुष्टयं चत्वारः कुडवाः प्रस्थश्चतुः प्रस्थमथाढकं अष्टाढको भवेद्द्रोणो द्विद्रोणं शूर्पउच्यते सा
र्द्धशूर्पो भवेत्खारी द्विशूर्प्यो गोण्युदाहृता नाममेव भारं जानीयाद्वाहो भारचतुष्टयं पृथगेकैकमपद्यते पद गतौ पदरुजेति घञ् पादं तच्चिह्नयोः स्थानत्राणयोरंगवस्तुनोः श्लो
कपादे पि च क्लीवं पुंल्लिंगः किरणे पुनः पादो वुध्ने तुरीयांशे शैलप्रत्यंतपर्वते चरणे च मयूरे च एकं अंश्यते अंश विभाजने अदंतः कर्मणि घञ् अनेः पाणिनिलपाणिनीयः
अंशो विभाजने यो ऋणएकदेशोपि वस्तुन इति हेमचंद्रः भज्यते भज सेवायां कर्मणि घञ् भागो रूपार्द्धके भाग्येकदेशयोरिति हेमः वंट्यते वटि विभाजने कर्मणि घञ् स्वार्थेकः वै० २५

द्रविव द्रव्यं चभव्येइतिसाधुः द्रव्यं भव्ये धने स्यात् रीजतुद्रुमविकारयोः विनयेभेषजे रीत्यामिति हेमः विद्यते स्म विद्लृ लाभे वित्तो भोगप्रत्ययोरितिसाधुः वित्तं क्लीबं धने वाच्य
लिंगं ख्याते विचारितेस्वपतेः साधुः पथ्यातिथीतिढञ् रिच्यते रिचिर् विरेचने पात्रुतुदिवचिरिचीतिथक् वमिकाशीत्यादिनाथन्निति मुकुटस्तु पाणिनीयः ऋच्यते ऋच शब्दे वा
हुलकात् थन् धनति धन धान्ये अच् धनं तु गोधने वित्ते इति विश्वः वसति उष्यते वा ऽस्मिन् गुरोः वस निवासे शॄस्पृस्निहीति उः पद्यसि वसीत्यादिनाउरिति मुकुटस्तु पा
णिनीयः वस्ते वस्यते वा वस आच्छादने उः वसुर्मयूखाग्निधनाधिपेषु योक्त्रे सुरे स्याद्वसु हाटके च वृद्धौषधस्यामधनेषु रत्ने वसुस्मृतं स्यान्मधुरेन्यवच्चेति विश्वप्रका
शः हर्यति हर्य गतिकान्त्योः हर्यतेः कन्यन् हिरच् जिहीते भाग्यवंतम् ओहाङ् गतौ हो हिर्वेति अन्यप्रत्ययः हिरादेशश्चेति मुकुटस्तु पाणिनीयः हिरण्यं चेतनासिद्ध
न्ये शातकुंभवराटयोः अस्त्रयेमानभेदेस्याद्कुप्ये च नपुंसकं द्रवति द्रूयते वा द्रुगतौ द्रुदक्षिभ्यामिणन् द्रविणं न द्वयोर्वृत्तेकांचनेचपराक्रमेइतिविश्वः दिवं मनति म्ना अभ्यासे
आतोनुपेतिकः द्युम्नं वित्ते विलेऽपिचेति हेमचंद्रः अर्थ्यते अर्थ उपयाच्ञायां अकर्तरीति घञ् ऋच्छति अर्यते वा ऋगतौ उषिकुषिगार्तिभ्यस्थन् अर्थो विषयार्थनयोईन कारणे

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ८० स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते ताभ्यां यदन्यत
कुप्यं रूप्यं तद्द्वयमाहतं ८१ गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः शोणरत्नं लोहितकः पद्मरागोथमौक्तिके ८२ ॥ ११ वस्तुषु अभिधेयेचप्रव्रा

नां निवृत्तौ च प्रयोजने रातिसुखं रायते वा रा आदाने राते र्डैः राद्वयोर्विभवे स्वर्णे इतिरुद्रः विभवति अच् विभवो धननिर्वृत्योरिति हेमः त्रयोदश ८० कुष्यते कुश संश्ले
षणे कुष्यते कुषनिष्कर्षे अकर्तरीतिघञ् तालव्यामूर्द्धन्याश्चैते द्रव्याधिकारेकोशविशसे चेति शभेदः हेमं च रूप्यं च कृतं चाकृतं च घटिताघटिते द्वे गुप्यते गुपूरक्षणे
राजसूयेतिसाधुः एकं ताभ्यादेर्घातोः आहतं रूप्यमस्य रूप्या द्वा हतप्रशंसयोर्यप् आहतं तु मृषार्थके गुणिते ताडिते चापीति हेमः एकं ८१ गरुत्मतो जातत्वात्तस्येदमि
त्यण् मरकं तरत्यनेन तत् अन्येष्वपीतिडः अश्मनो गर्भः हरिद्वर्णो मणिः शाकपार्थिवादिः चत्वारि शोणं च तद्रत्नं च लोहितमेव लोहितान्मण्णा वितिकन् पद्ममिव
रागोऽस्य अनेकमन्येति समासः त्रीणि मुक्तैवविनयादिभ्यष्ठक् ८२ ॥

११९

मुच्यंते स्म मुच्लूमोक्षणे क्तः मुक्ता मौक्तिकं पुंस्त्र्योरिति हैमः द्रुविशिष्टो द्रुमः यद्वा विशिष्टे द्रौ वृक्षे भवः द्रुद्रुभ्यामिति मः प्रवलति वल प्राणने ज्वलितीति णः प्रवालोस्त्री किशलये वीणादंडे च विद्रुमे इति विश्वः द्रूरमते स्मिन् रम क्रीडायां बाहुलकात् क्तः पृषोदरादित्वात् रत्नं स्वजातिश्रेष्ठस्यापि मणौ इति हैमः मण्यते मण शब्दे इन् मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेपि चेति विश्वः अश्मजातौ मरकतादौ हे ९३ सुष्ठु वर्णोति क्षणुगतौ पचाद्यच् यद्वा अर्णनं घञ् शोभनः अर्णो गतिरनेन शोभनो वर्णोस्य सुष्ठु वर्ण्यते वा वर्णं वर्णमेण्यंतः एरच् कनति कनी दीप्तौ क्तः आदिभ्यो वुन् कनकं हेम्नि पुंसि स्यात्किंशुके नागकेसरे धत्तूरे कांचनारे च कालीयेचंपकेपि च हिनोति हीयते वा हिरण्यादेः मनिन् हरति हट दीप्तौ ण्वुल् हाटयति वा क्वुन् तप्यते अनेन तप संतापे कृत्यल्युटः इति अनीयर् शतकुंभे पर्वते भवं तत्र भव इत्यण् अनुशतिकादित्वात् स्वामी गंगाया अपत्यं शुभ्रादित्वाड्ढक् यद्गर्भे सुषुवे गंगा पावकाद्दीप्ततेजसं तदुल्बं पर्वते न्यस्तं हिरण्यं समपद्यत इति वायुपुराणे गांगेयः स्यात्तु मानभीष्मे क्लीबं स्वर्णकसेरुणोः बिभर्ति भरति वा मनिन् कर्वस्यनेन कर्व दर्पे मद्गुरादिः कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः कुर्बुरा कृष्णवृंतायां शबले पुनरन्यवदिति विश्वः ९४ चामीक

मुक्ताथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकं रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि च ९३ स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकं तपनीयं शातकुंभं गांगेयं भर्म कर्बुरम् ९४ चामीकरं जातरूपं महारजतकांचने रुक्मं कार्तस्वरं जांबूनदमष्टापदोस्त्रियां ९५ अलंकारसुवर्णं यच्छृंगीकनकमित्यदः

र आकरे भवं तत्र भव इत्यण् यद्वा चमनं चमु अदने इत्रजादिभ्यः अनाचमेरिति आ ङोः विवक्षितत्वाद्दृद्धिः कृदिकारादिति ङीष् चामीं करोति कृञो हेतिटः जातं रूपं यस्य यद्वा प्रशस्तं जातं प्रशंसायां रूपप् महच्च तद्रजतं च सन्महदिति समासः आन्महत इत्यात्वं कांचति कांचि दीप्तौ नंद्यादिल्युः पृषोदरादिरिति मुकुटस्तु चिंत्यः कांचिधातोरेव सत्वान्रोचते रुच दीप्तौ युजिरुचितिजां कुश्चेति मक् रुक्मं लोहे सुवर्णे चेति हेमचंद्रः कृतस्वरे आकरविशेषे भवं अण् कृताः पठिताः स्वरा यन तस्मिन्देशे इत्यण् जंबूरसस्य नदी भवं तत्र भव इत्यण् अष्टौ धातवः पदानि स्थानान्यस्य अष्टनः संज्ञायामिति दीर्घः यद्वा अष्टानामपदं एकोनविंशतिः ९५ अलंकारसंबंधि सुवर्णं शृंगिणामी शृंगी कनति कनी दीप्तौ क्वुन् शृंगीति पृथग्नाम वा स्त्री शृंगी मंडनसुवर्णमिति रत्नकोशः भूषणं कनकं ॥ ॥

शृंगीति नाम माला अल्पं शृंगं प्राधान्यं वा यस्याः गौरादिः स्त्री स्यात्काचिन्मृत्स्नास्यादीति वचनात् दुष्टो वर्णो यस्मिन्नेन वा दुर्वर्णं स्त्रिषु सद्वर्णे क्लीबमेणे यरूप्ययोः रज॥ नीति रज्यते वा रंजरागे पृषिरंजिभ्यां कित् रत्यतच् रजतं त्रिषु शुभ्रे स्यान्नक्लीवे हारे च दुर्वर्णं इति विश्वः रूपयति रूप्यते वा रूपरूपक्रियायां ण्यंतः अचो यत् रूप्यः स्यात्सु दृढे त्रिषु आहतस्वर्णरजतेरजते च नपुंसकमिति विश्व हेमचंद्रो खर्जति खर्ज व्यथने खर्जेपिंजादिभ्य ऊरोलचाविति ऊरः खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोः श्वेतते श्वितावर्णे अच् श्वेतो द्वीपाद्रिभेदयोः श्वेतावराटिकाकाष्ठपाटलाशृंजिनीषु च क्लीबं रूप्येन्यवत् पंच ९६ रीयते रिणाति वा रीङ् क्षरणे री गतिरेषणयोः स्त्रियां क्तिन् रीतिः स्त्रियां स्यंदप्रचारयोः पित्तले लोहकिट्टे च ऋगतौ भावे घञ् आरं कुट्यते कूट दाहे अच् आरकूटः स्त्रियां इत्युक्ता रीति सुरीति कोमलमिति रभसः द्रुपित लस्यतात्म्यति तम्यते वा तमु कांक्षायां अमितम्योर्दीर्घश्चेति रक् स्वार्थे कः ताम्रमिच मा दीर्घश्चेति रगिति मुकुट खलपाणिनीयः शुल्वति शुल्वगतौ उल्कादयश्चेति साधुः यद्वा शुल्वयति शुल्व्यते वा शुल्वमाने अच् घञे रज्वा शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ इति हेमचंद्रः म्लेच्छदेशो मुखमुत्पत्तिरस्य म्लेच्छस्य मुखमिवेति वा।

॥ दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ९६ रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकं॥
॥ शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुंबराणि च ९७ लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिंडं कालायसायसी॥

द्वे हेमरूप्ये अश्नुतेऽस्म अशुव्याप्तौ गत्यर्थेति क्तः अतिशयेन वरं उरुर्वा अतिशायने इष्ठन् प्रियस्थिरेत्युरोर्वर् वरिष्ठं ताम्रके क्लीबमिति टवर्गद्वितीयांते रुद्रः वरिष्ठं मरि चेपि च ताम्रे क्लीबं तित्तिरौ ना वरो रुत्तरयोस्त्रिषु इति विश्वः उंशब्दे भुवृण्णोतीष्ट्यारो संज्ञायां भृत् ह्वजीति खच् अरुर्द्विषदिति मुम् उत्कृष्टमुंबरं प्रादिसमासः उदुंबरस्तु देहल्यां वृक्षभेदे च पंडके तथैव कुष्ठभेदे पि ताम्रेपि स्यान्नपुंसकं प्रज्ञाद्यणि तु औदुंबरं भवेत्ताम्रे फलादौ यज्ञशाखिनः इत्यजयः षट् ९७ लोहति लुह्यते वा लुहगार्ध्ये अच् घञ्वा लू यते ऽनेन वा लूञ्छेदने बाहुलकात् हः रुह्यते रोहति वा रुह प्रादुर्भावे घञ्जवा कपिलिकादित्वाल्लत्वं लोहोऽस्त्री शस्त्रकलहे जोंगके सर्वतैजसे प्रज्ञाद्यणि लौहं शा स्यते ऽनेन शसु हिंसायां दाम्नीति ष्ट्रन् स्वार्थे कः तेजयति तिज्यते वा अनेन वा तिजनिशाने तिजेर्दीर्घश्चेति क्सः तीक्ष्णं सामुद्रलवणे विपलोहाजिमुष्कके क्लीबं यवाग्रजे पुं

सिंहिमानस्यापि नाखिश्रुपिंडनापिंडनाक्षिडम
संघाते ऽरूप पक्रापिंडजाकोत्ती॥

वलेसां द्रे देहागारैकदेशयोः देहमात्रे निवाये च गोलसिल्हकयोरपि ओड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः पिंडीतु पिंडतगरेऽलाबूखर्जूरभेदयोः कालंचतद्द्य
श्च अनोश्मायः सरसामिति टच् एणि अयते वा अमुन् अश्मनः सारः अश्मसारं च शास्त्रकमिति अमरमाला सप्तमंड ते मडि भूषायां खर्जूरादित्वाद् ऊरच् शिंघ्यते शिघि आघ्राणे
आणकोलूघूर्णिघि धातुभ्यः पृषोदरादिः सिंहमालयति वा सिंहानमिति पाठे सिंहवदनिति अन प्राणने अच् सिंहमानयति वा कर्मण्यण् तस्य लोहस्य मले ९८ तेजा
सो विकारः तस्य विकार इत्यण् यद्वा तेजोऽस्त्यस्य ज्योत्स्नादित्वाद् अण् एकं सर्वधातूनां कुं भूमिं श्यति शो तनूकरणे अन्येभ्योपीति डः जानपदेति ङीष् कुशी फालेपि वंशायामिति विश्वः
कुशो रामसुते द्वीपे पापिष्ठे योक्त्रमत्तयोः कुशी फाले कुशो दर्भे कुशा वल्ग्यां कुशं जले एकं क्षरति क्षर संचलने ज्वलीति णः क्षारः काचे रसे गुडे भस्मनि धूर्ते लवणे इति हे
मचंद्रः कचते कच बंधने दीप्तौ च अच् पृषोदरादित्वात् काचयतीति वा अच् काचः शिक्ये मणौ नेत्ररोगभेदे मृद्भेदे इति विश्वः द्वे चोपति चुप मंदायां गतौ चुपेरच्चोपधाया इति कलः
यद्वा चपनं चप शान्त्वने ततः एरच् चपं लाति ला आदाने कः चपलश्चोरके चले क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरांतरे मीने पिचपलात्तु स्यात्पिप्पल्यां विद्युति स्त्रियां

अश्मसारोथ मंडूरं सिंहानमपि तन्मले ९८ सर्वस्यात्तैजसं लोहं विकारस्त्वयसः कुशी क्षारः काचोथ चपलो रसः सूतश्च पारदे ९९।
गवलं माहिषं शृंगमभ्रकं गिरिजामले॥

॥ १ पुंश्चलस्यामपीति हेमचंद्रः रस्यते रस आस्वादने चुरादिदंतः एरच् रसयति धातून्वा अच् रसः स्वादे
जले वीर्ये शृंगारादौ विषे द्रवे बोले रागे गृहे धातौ तिक्तादौ पारदेपि च रसा तु रसनी पाठसल्लकी क्षितिकं गुग्गुशिवे(?) न सूयते स्म षूङ् प्रसवे क्तः सूतः सुसारथौ तक्ष्णि(?) क्षत्त्रि
याद्ब्राह्मणीसुते वंदिपारदयोः पुंसि प्रसूते प्रेरिते त्रिष्विति विश्वः पारं ददाति डुदाञ् दाने आतोनुपेतिकः पारत इति पाठे पारं तनोति तनु विस्तारे अन्येभ्योपीति डः रसेंद्रः पा
रदः प्रोक्तः पारतोपि निगद्यत इति तारपालः पारतः सुमनाक् पांडुः सूतः सुरहितो मलात् पारदः सुमनाक् पीतः सर्वे तुल्यगुणाः स्मृता इति शब्दार्णवः चत्वारि ९९ अ
लति अल भूषणादौ अच् गवामलं यद्वा गवनं गुङ् शब्दे ऋदोरप् गवं लाति कः एकं महिषशृंगस्य अभ्रति अभ्र्यते वा अभ्र गतौ क्वुन् अभ्रस्य प्रतिकृतिर्वा इवे
प्रतिकृतौ इति कन् गिरौ जातं जनी प्रादुर्भावे सप्तम्यां जनेर्डः अमति अम गतौ वृषादित्वात् कलच् न मलमस्येति गिरिजं गिरिजाबीजममलं गवलध्वजमिति वाचस्पतिः

Digitization by eGangotri

अ॰ ही॰ त्रीणि अज्यते नयनमनेन अंजनं ल्युट् स्रोतोजमंजनं प्राकपार्थिवादिः सुवीरदेशे भवं तत्र भव इत्यण् सौवीरं कांजिके स्रोतोंजने च बदरीफले नातुनी इति इ निवि
टी॰ रा॰ श्वः कपोतस्येदं कपोतवर्णत्वात् तस्येदमित्यण् कापोतं च तदंजनं च यमुनायां भवं अण् यद्वा यमुनाया इदं तद्धूतप्रयामत्वात् चत्वारि सुर्मा इति ख्यातस्य १०० तुत्थयति तुत्थ
१२१ ने वा तुत्थ आवरणे पचाद्यच् एरच् तुत्थं च तदंजनं च शिखिनो ग्रीवा शिखिग्रीवा अस्यास्ति अर्श आद्यच् तद्वद्वर्णत्वात् वितुद्यते स्म तुद व्यथने क्तः स्वार्थे कः मयूरस्य
प्रतिकृतिः इवे प्रतिकृताविति कन् मयूरं कायति वा सा दृश्यात् के शब्दे कः चत्वारि तूतिया इति ख्यातस्य कल्पते कृपू सामर्थ्ये वाहुलकाद् अरट् लत्वाभावश्च दार्वीदा
रु हरिद्रा तद्विकारोपि दार्वी अभेदोपचारात् स्वार्थे कन् तत् तुत्थं क्वाथोद्भवमावर्तितं स दकपर्यायं तुत्थं चास्य नामतुत्थं स्याद मृतासंगं कर्परी तुत्रमित्यपी ति रभसः त्रीणि
आवर्त्तेन निष्पन्नस्य कृत्रिमरसांजनभेदस्य रसजनभेदस्य रसजमंजनं प्राकपार्थिवादिः १०१ रसो गर्भे अस्य तार्क्ष्यशैले भवमभेदोपचारादिति मुकुटः त्रीणि स्वामी
तु तुत्थांजनादि पंच पर्यायानुक्त्वा दार्विका क्वाथोद्भवादि पंचकं रसवती पर्यायानाह गंधयुक्तोऽश्मा प्राकपार्थिवादिः गंधोस्यास्ति अर्श आद्यच् स्वार्थे कन् गंधि

स्रोतोंजनं तु सौवीरं कापोतांजनयामुने १०० तुत्थांजनं शिखिग्रीवं वितुन्नकमयूरकं कर्परी दार्विका क्वाथोद्भवं तुत्थं रसांजनं १०१ रस
गर्भं तार्क्ष्यशैलं गंधाश्मनि तु गंधकः सौगंधिकश्च चक्षुष्या कुलाल्यौ तु कुलत्थिका १०२ रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमांजनं ॥

क इति पाठे अत इनिठनाविति ठन् शोभनो गंधोस्य विनयादिठक् स्वार्थे आमोदे लेशयोर्गंधः स सुगंधक इति रभसः त्रीणि रसांजनस्य चक्षुर्वे हिता शरीरावयवाद्यत् च
क्षुष्यः केतकीपुंडरीकसंज्ञकयापरे कुलत्थिका सुभगयोः स्त्रियामक्षिहितेन्यवत् कुलमलति अलभूषणादौ कर्मण्यण् ङीष् च क्षुष्यांकुंभकारी च कुलाली च कुलत्थि
केति रत्नकोशः कुलत्थप्रतिकृतिः इवेति कन् यद्वा कुलेति ष्ठति सुपीतिकः स्वार्थे कन् पृषोदरादिः त्रीणि १०२ रीतेः पित्तलस्य पुष्पमिव तन्मलत्वात् पुष्पस्य केतुरिव ना १२१
शकत्वात् उदंत नपुंसकेषु पुष्पकेतु कुसुमांजनमिति रुद्रः पुष्पस्य प्रतिकृतिः इवेति कन् ततः स्वार्थेण् कुसुममिव कुसुमं नाशकं वा अंजनं चत्वारि रीतिकायां ध्मायमा ॥
नायां जातस्य मलस्य पिंजनं पिजि वर्णे घञ् निष्ठायामनिट इति वचनान्न कुत्वं पिंजवर्णविशेषरातिकः पिंजरोऽन्यांतरे पीते क्लीबं स्व ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्णं च पीतके पीतं वर्णं नयते नयगतौ णिच् क्वा अन्येष्वपीति डः पीतनं पीतद्रारुणि कुंकुमे हरिताले चेति विश्वः तालयति तत्स्यने वा तलप्रतिष्ठायां ण्यंतः अच् तालः कालक्रि
यामाने हस्तमानद्रुभेदयोः करास्फोटकरतले हरिताले त्सरावपीति हैमः तालः करतलेंगुष्ठमध्यमायां च सम्मिते गीतकालक्रियामाने करस्याले द्रुमांतरे वाद्यभांडे च
कांस्यस्य त्सरौ नालीजटौषधौ क्लीवं तु हरिताले स्यादिति विश्वः आलयति अलभूषणादौ अच् आलातिवा ला आदाने आतश्चोपसर्गे इति कः आलं स्यादनल्प ह
रितालयोरिति हैमचंद्रः हरितं वर्णमालाति आतोनुपेति कः स्वार्थे कः हरितालमलं तालवर्णकं नटभूषणमिति माधवः हरिताले तु कर्वूरं गोदंतो नटसंज्ञकइ
ति त्रिकांडशेषः पंच १०३ गिरौ भवं नद्यादिभ्यश्चेति ढक् अर्थ्यते अर्थ उपयाच्ञायां ण्यंतः अचो यत् अर्थादनपेतं वा धर्मपथ्येति यत् अर्थ्यो विपश्चिति न्याय्येत्रि घर्थ्यं तु शि
लाजत्वितियांतेरुद्रः गिरेरश्मनश्च जातं जनीप्रादुर्भावे पंचम्यामजाता विति डः गिरिजं त्वभ्रके पि स्याच्छिलाजतुनि शैलजे लोहेपि गिरिजा गौरी मातुलुंग्योश्च योषिति शि
लायाजत्विव षष्ठीतत्पुरुषः पंच वोलयति वुल मज्जने अच् वाति वा वा गति गंधनयोः पिंजादित्वा दूलच् गंधवान् रसोऽस्य राजदंतादित्वाद्रसगंधो पीति स्वामी प्राणि

पिञ्जरं पीतनं तालमालं च हरितालके १०३ गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु बोलगंधरसप्राणपिण्डगोपरसाः समाः १०४ डिण्डी
र गोब्धिकफः फेनः सिंदूरं नागसंभवं

ति अनेन वा अन प्राणने अच् हलश्चेति घञ् प्राणो ल्हमारु ते बोले काव्य जीवेनिलेवले पुंलिंगः पूरितेवाच्यलिंगः पुं
भूम्नि चासुषु पिंड ते पिडि संघाते अच् पिंडो द्वंद्वे जपापुष्पगोले बोलें गसिंहयोः कवलं पिंडं तु वैश्मैकदेशे जीवनायसोः वाले सा द्रे पिंड्यला वृखर्जूर्यां लगरे पिचेति हेम
चंद्रः गां जलं स्यति षो अन्तकर्मणि आतोनुपेति कः गोस इति मुकुटः गोप इति स्वामी गोः जलात् स्याति पारस्यो सुपीतिकः रसयति रस्यते अनेन वा रस आस्वादने अच्
गोपेउत्सन्नो रसोऽस्येति समस्तमपीति स्वामी षट्ठीर इति ख्यातस्य १०४ हिंडीति डिंडीति वा शब्दमीरयति ईर गतौ कंपने च अच् अणुवाहादिडारिर्वा पाठः अब्धेः कफ इव स्फा
यीवृद्धौ केनमीना विति सा धुः त्रीणि समुद्रफेनस्य स्यंदते स्यंदू प्रस्रवणे स्यंदेः संप्रसारणं चेत्पूरन् खर्जादित्वा दूरो वा हुल कात्संप्रसारणं चेति मुकुटो पाणिनीयः सिंदू
रस्तरुभेदे स्यात्सिंदूरं रक्तचूर्णके सिंदूरी रोचना रक्तवेल्लिका धातकीषु च नागं सीसं संभवोस्य हेतुर्नगे भवः तत्र भव इत्यण् नागं नपुंसके रंगे सीसके करणांतरे ॥

CC-0. In Public Domain. Digitization by eGangotri

नागः पुन्नागमातंगक्रूराचारिषु नोदने नागकेसरपुंन्नागनागदंतप्रभेदके देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः सिनोति षिञ् बंधने क्विप् अनिस्यता लतकु ईस्पति
षो अन्तकर्मणि आतो नुपेति कः सिच तदीसं च स्वार्थे कः योगे धातुसंबंधे रूढ सप्तमीतिसमासः उप्यते डु वप् बीजसंताने दृषिवपिभ्यां रन् वध्रे ति पाठ इति मुकुटः वर्द्धते
वृधु वर्द्धने रन् चत्वारि सीसेतिख्यातस्य त्रपते त्रपूष लज्जायां शृस्पृस्निहीस्युः रंगसीसकयोस्त्रपुरिति रुद्रः पिच्चयति पिच्चते वा पिच्च छेदने अचू पिच्चं टीकते टीकृ गतौ अ
न्येभ्योपीति डः पिच्चयति शाकादिभ्यो टञ्चा पिच्चटो नेत्ररोगे स्यात् क्लीवं सीसकरंगयोरिति विश्वः १०५ रंगति वंगति रगि वगि गतौ अच् रंगः सीसकरंगयोः वार्त्ताकेपि
च कार्प्पासे पुंभूम्नि नीवृदंतरे वंगः कर्पासवृंताके वंगो जनपदांतरे वंगं त्रपुणि सीसे चेति हेमः चत्वारि रांगेतिख्यातस्य पिचति पिचुमर्द्दने पचति वा मृगय्वादिः पिचु
र्नाकुष्टभेदे च कर्षे तूले खरांतरे इति विश्वमेदिन्यौ तूलयति तूल्यते वा तूल निष्कर्षे इगुपधेति कः घञ्चा तूलं स्याद् ब्रह्मदारुणि आकाशेप्यपि चौ न स्त्री इति विश्वः पि
चूल इति रभसात् संघातोपि द्वे रुद्रइतिख्यातस्य कमलादुत्तरं कुस्यति कुसस्ंश्लेषणे कुसेरुंभोमेदेतारइत्युंभः वाहुलकात्तगुणः कुसुंभं हेमनि महारजने च

नागः सीसकयोगेष्टवप्राणि त्रपु पिच्चटं १०५ रङ्गं वङ्गं अथ पिचुस्तूलोथ कमलोत्तरं स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि १०६ मेषकंब
लऊर्णायुः शशोर्णं शशलोमनि मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकं १०७॥ ((कमंडलौ वह्निवत् शिखाः स्य रज्यते नेन ल्युट् रजक रजनर

जस्सूपसंख्यानान्नलोपः रंजेः क्युन्वा महच्चतद्रजनं च सन्महदितिसमासः महारजनमुद्दिष्टं शातकुंभकुसुंभयोः चत्वारि कुसुंभेतिख्यातस्य १०६ मेषलोमकृतः कंब
लः शाकपार्थिवादिः ऊर्णास्यास्ति ऊर्णायायुस् ऊर्णायुर्नालक्षणाभंगे मेषकंबलमेषयोरिति विश्वः द्वे शशस्य ऊर्णा शशोर्णं कारणं करमितिचंद्रगोमिलिंगानुशासना
त् क्लीवत्वं शशस्य लोमहेमन्यते मनज्ञाने फलियादीतिसाधुः मधुपुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे वसंतदैत्यभिच्चैत्रे स्याज्जीवंत्यां तु योषितीतिविश्वमेदिन्यौ क्षुद्राभि
र्मक्षिकाभिः कृतं क्षुद्राभ्रमरेति अञ् क्षौद्रं तु मधुनीरयोरिति हेमचंद्रः मक्षिकाभिः कृतं संज्ञायामित्यण् आदिनाभ्रामरवारटयोतिकादिग्रहः त्रीणि मधुनउच्छिष्टं
॥ ७ ॥ ॥सिंचति सिच्यते वा सिच क्षरणे पानृतुद्विवचिरिचिभ्यस्थक् स्वार्थे कः द्वे मोमइतिख्यातस्य १०७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मनःशब्दवाच्याशिला शाकपार्थिवादिः मनसा गुप्ता कर्तृकरणे इति समासः मनःशब्देन हूयते कथ्यते ह्वेञ् शब्दे आतश्चोपसर्गे इति अङ् नागानां जिह्वेव स्वार्थे कः नेपाले भवा तत्र भव इत्यण् नेपाली मनःशिलायास्तु वहाहानवमाल्यपीति विश्वः कौनटति नट अवस्यंदने अच् गौरादिः यद्वा कुत्सिता नटीव गां दीप्तिं लाति कः गुड्यते वा गुड वेष्टने घञ् डलयोरैक्यं गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियां पत्रांजने मंडने चालिंजरे बालखेलने द्वयोर्लक्ष्म्यां पुमान् कंपे कंपयुक्तेभिधेयवत् सस्रय वानां क्षारः यवाग्राज्जायते स्म पंचम्यामिति डः १०८ पाके साधुः तत्र साधुरिति यत् त्रीणि यवक्षारस्य स्वर्जिकाक्षारः सर्जःक्षारः शाकपार्थिवादिः कपोतवर्णोस्यास्तिज्योत्स्नादित्वादण् सुष्ठु वर्चयति वर्चदीप्तौ क्वुन् सुवर्चलाया इदं तस्येदमित्यण् अथ सौवर्चलं सर्जक्षारे चलवर्णांतरे रोचके नेनहृचदीप्तावभिप्रीतौ च क्वुन् रुचको बीजपूरे च निष्कदंतकयोस्तयोः नद्वयोः सर्जिकाक्षारेप्यथ आभरणमाल्ययोः सौवर्चलेपि मंगल्यद्रव्येपि कटकेपि च समस्तसाजीक्षार इति ख्यातस्य त्वचो वंशात् क्षीरमस्याः गौरादिः रोचते नंद्यादिः वंशस्य रोचना त्वक्क्षीरी वंशजा शुभ्रवंशक्षीरी तु वैणवीति शाश्वतः द्वे १०९ शिग्रोर्जायते स्म पंचम्यामिति डः श्वेतं मरीचमिव द्वे शोभांजनबीजस्य सुरति सुर वेष्टने

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका नैपाली कुनटी गोला यवक्षारो यवाग्रजः १०८ पाक्योथ स्वर्जिकाक्षारः कापोतः सुखवर्चकः ॥
सौवर्चलं स्याद्रुचकं त्वक्क्षीरी वंशरोचना १०९ शिग्रुजं श्वेतमरिचं मोरटं मूलमेसवं ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ११० गोली
मीभूतकेशो नापत्रांगं रक्तचंदनं त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकं १११ इति वैश्यवर्गः॥ ९१ शकादिभ्योटन् इत्सोरिदं एकं ग्रंथ्येः प्रतिकृतिः इ

वेति कन् ग्रंथिकं पिप्पलीमूले गुग्गुलुग्रंथिपर्णयोः करीरे पुंसि देवज्ञे सहदेवाख्यपांडवे इति विश्वः पिप्पल्याः मूलं चटकायाः शिर इव शिरोपि शिरो नापि पिप्पलीमूले इति रभसः त्रीणि ११० गोलोमानामियं अण् संज्ञापूर्वकत्वाद्वृद्ध्यभावोपि गोलोमी श्वेतदूर्वायां स्याद्वचाभूतकेशयोरिति विश्वः भूतानां केश इव भूतः केशोस्य वा द्वे पत्राण्यंगेऽस्य पत्रांगं न द्वयो भूर्जे पद्मके रक्तचंदने इति विश्वः रक्तचंदनमिव रक्तसारत्वात् द्वे रक्तसार इव्यस्य त्रयाणां कटूनां समाहारः उषति उष दाहे ल्युट् त्रयाणां ऊषणानां समाहारः पात्रादिः विशेषेण ओषति उष दाहे अच् त्रीणि त्रयाणां फलानां समाहारः अजादिः तृफति तृफ तृप्तौ तृफश्चेति कलः त्रिफलात्

फलत्रिकेविस्त्रिकाउक्ताथः फलत्रिकालिके ७९ ॥१११॥
इतिवैश्यवर्गविवरणम्॥

अ॰ टी॰ ग्रोचतिशुचश्शोके शुचेर्रश्चेतिरक् दीर्घश्च शूद्रेरक् चान्तु उक्तं चेति सुभूतिरपाणिनीयः अवरोऽधमो वर्णोऽस्यावरश्चासौ वर्णश्चेति वा वृष्यते वर्षतीति वा वृषु सेचने वृषा ॥१८॥
टी॰ रा॰ दिभ्यश्चेति कलच् वृषं धर्मं लुनातीति वा लूञ् छेदने अन्येभ्योपीति डः वृषं लातीति वा कः जघन्यात् पादाज्जाताः जनी प्रादुर्भावे पंचम्यामजातौ विति डः जघन्यं मेहने स्त्री
१२३ वं चरमे गर्हिते न्यक्वत् चत्वारि संकीर्यंते सम्क्त विक्षेपे क्तः ऋत इद्धातोः रदाभ्यामिति नत्वं अंवष्टश्च करणश्च अंवष्टकरणौ आदीयमाने आदिना उग्रादिग्रहः एकं २
शूद्राच विट्‌च तयोः सुतः किरति कीर्यंते वा क्त्व बहुलमन्यत्रापीति युच् कृत्यल्युट इति वा करणं हेतुकर्मणोः वालवाटो हसले पेन नृत्यगीतप्रभेदयोः क्रियाभेदे इति
यस्त्रिकायसंवेशनेषु च कायस्थो साधने स्त्री वं पुंसि शूद्राविशोः सुते इति विश्वः वैश्याच द्विजन्माच तयोः सुतः अंबेति ष्ठनिष्ठा सुपीति कः अंवा वेति वत्वं वष्टो देशभे
देपि विप्राद्वैश्यासुतेपि च अंवष्टाप्यम्ललोण्यां स्यात्पाठायूथिकयोरपीति विश्वः शूद्रा च क्षत्रियश्च तयोः सुतः उच्यति उच समवाये ऋज्रेन्द्रेति निपातनात्साधुः उग्रः
शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे स्त्री वचा क्षुद्रयोः प्रोक्ता क्षत्रिया च विट्‌च तयोः सुतः मगध्यति मगध वेष्टने कंड्वादिः अच् पस्य हलेइति यलोपः मद्रादण् मा

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः आचंडालात्तु संकीर्णा अंवष्टकरणादयः १ शूद्राविशोस्तु करणोंवष्टो वैश्याद्विजन्मनोः शू
द्रा क्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः २ माहिष्योऽर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः ॥
३ रथकारस्तु माहिष्यात्करण्यां यस्य सम्भवः ॥

गधो मगधोद्भूते शुक्लजीरकवंदिनोः वैश्यतः क्षत्रियापुत्रे मागधी स्यात्तु पिप्पली यूथीभाषाविशेषश्चेतिहे
मचंद्रः २ अर्या च क्षत्रियश्च तयोः सुतः महिष्यां साधुः तत्र साधुरिति यत् स्वार्थेण् यद्वा मह्यते महतीति वा मह पूजायां अविमह्योष्टिषच् चतुर्वर्णादित्वात्स्वार्थे ष्य
त्र अर्या च शूद्रश्च तयोः सुतः क्षदति क्षद्यते वा क्षद संभृतौ संसिक्षदादिभ्य इति तृन् चौ अर्या स्वामिनी साच क्षत्रिया योग्यत्वात् तेन क्षत्रियायां च शूद्रजे इत्यनेनावि
रोधः क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ भुजिष्यातनयेपि स्यान्नियुक्ते वेधसोः पुमानसूयते स्म षूङ् प्रसवे क्तः सूतः पारदसारथ्योः प्रसूतेरितवदिषु चाप्यसा।
एयां क्षत्रियाज्जाते तक्ष्णीति हैमः विदेहेषु भवः तत्र भव इत्यण् विदेहस्यापत्यं वा जनपदेति अञ् स्वार्थे कः वैदेहको वाणिजके शूद्राद्वैश्यासुतेपि चेति विश्वः ३ माहि

रथं करोति कृत्र् कर्मण्यण् रथकारस्तु माहिष्यात्करणीजे च तक्षापि चंड इति चडि कोपे पति चंडिभ्यां मालन् प्रत्येकमेकैकं ४ करोति कृवापेत्युण् कारुस्तु कारकः शिल्पी विश्व
कर्मणि शिल्पिनीति हेमचंद्रः शिल्पमस्यास्ति अत इनिः शिल्पी तु वा च वक्ष्यकारो स्त्रियां कोल इत्यो मधो तक्षा च तंतुवायश्च नापितो रजकस्तथा पंचमश्चर्मकारश्च कारवः शि
ल्पिनो मताः द्वे श्रयति श्री यते वा श्रिस्सेवायां वहि श्रि श्रु ष्वि तिनिः श्रेणिः स्त्रीपुंसयोः पंक्तौ समाने शिल्पिसंहतौ एकं सजातीयशिल्पिसंघस्य कोलति कुल संस्त्याने वं वुष्वुच
कुन् कुलकं तु पटोले स्यात्संवद्ध श्लोकसंहतौ पुंसि वल्मीकका के द्व कुलश्रेष्ठेषु कथ्यते कुलिक इति पाठे कुलमधीनत्वेनास्यास्ति ठन् कुलिको नागभेदे स्याद्दुमभेदे
कुलसत्तमे कुलश्रेष्ठत्वमस्त्यस्य इनिः द्वे कारुसंघमुख्यस्य मालां करोति अण् मालास्यास्ति व्रीह्यादिभ्यश्चेति ठन् यद्वा माला शिल्पमस्य शिल्पमिति ठन् मालि
कामप्सरापुत्री ग्रीवालंकरणेपि च पुष्पमालेन दीभेदे पक्षिमात्रे तु मालिकः द्वे माली तिख्यातस्य ५ कुंभं करोति अण् कुंभकारो कुलस्थं च पुंसि स्याद्धटकारके इति
विश्वः कुं भूमिं लालयति लड विलासे अण् डलयोरैक्यं कुलमालाति वा कुलमलति वा कारत्योः कुल मालुनाति वा डः घूके कुलालः कक कुंभकुंभकारे जनांतरे द्वे पं

स्याच्चंडालस्तु जनितो ब्राह्मण्यां वृषलेन यः ४ कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः ५
कुंभकारः कुलालः स्यात्पलगंडस्तु लेपकः तंतुवायः कुविंदः स्यात्तुन्नवायस्तु सौचिकः ६ रंगाजीवश्चित्रकारः शस्त्रमार्जोसिधावकः पादूकृ
च्चर्मकारः स्याद्व्योकारो लोहकारकः ७

लमांसं तत्तुल्येन मृदादिना गंड इति वदने कदेशमिव करोति गडि वदनैकदेशे अच् लिंपति लिप उपदेहे ण्वुल् द्वे तंतून्वयति वेञ् तंतुसंताने ह्वावामश्चेत्यण् तंत्रवाय इति पाठे तंतवो वितन्यंते यस्मिन्तत्तंत्रं तद्वयति तंत्रवाय इति पाठांतरं तत्रडुवप अण् कुंभुवं कुत्सितं वा विंदति
विद्लृ लाभे गवादित्वाद् विंदेः संज्ञायामिति शः कुप्यति कुप क्रोधे कुपेर्वा व चेति किंदच् द्वे तुन्नं छिन्नं वयति वेञ् अण् सूचिः शिल्पमस्य शिल्पमिति ठक् द्वे रफूकारस्य ६ रं
गेण आजीवति जीव प्राणधारणे इगुपधेति कः रंग आजीवोस्येति वा चित्रं करोति दिवा विभानिशेति टः द्वे शस्त्रं मार्ष्टि मृजू शुद्धौ अण् असिं धावति धावु गतिशु
द्धोः अण् स्वार्थे कन् कृत्वा द्वे पद्यते अनया पद् गतौ णिच् कसिपद्यर्त्तेरिति उः यां कृकरोति क्विप् चर्म करोति अण् द्वे व्योइत्यव्ययं लोहबीजवाचीति श्रीभोजः व्यो करोति अण् लोहं क

... in Public Domain. Digitization by eGangotri

नाडीवं॰धमनिः स्त्री धमति ध्माधा॰स्वग्निसंयोगयोः नाडी मुक्तयो श्चेति स्वरूप॰शिल्पन व्यवसेनेति ह्रस्वः स्वर्णं करोति अण् कलाम् आदत्ते इति आत॰ मूलविभुजादित्वात्कः रुक्मं करोति अ
ण् स्वार्थिकः चत्वारि शं॰ शिल्पमस्य शिल्पमिति ठक् कं बुः शिल्पमस्येठक् शाश्वरिक इति निर्देशात्कादेशो नित्यः कंवो विकारोऽस्यास्तीति वाठन् हेश्वुल्वघट्टनं शिल्पम
स्य तात्मं कुट्टयति कुट्टच्छेदे अण् स्वार्थिकः हेः ८ तक्ष्णोतीति तक्षा तनूकरणे युवृषीत्यादिना कनिन् वर्द्धते वर्द्ध छेदने अच वर्द्धं कषति कष हिंसायां वा हलकाड्डिः त्वक्षति
त्वक्ष तनूकरणे तृच त्वष्टा पुमान् देवशिल्पि तक्ष्णो रादित्वमिध पिरथं करोति अण् काष्ठं तक्ष्णोति क्विप् पंचग्रामे धिसक्षमीति समासः अव डक्षतिस्वः ग्रामस्य तक्षा ग्राम
कौटाभ्यां च तक्ष्णः इति टच् हेकुत्यां भवः तत्र भव इत्यण् कौटश्चासौ तक्षा च टच् नाधीनः स्वार्थिकः एकं ९ क्षुरोस्यास्ति अत इनिः मुंडं करोति मुंडमिश्रेति णिच् ग्रहादि
त्वात् णिनिः दिवाकीर्तिरस्य दिवाकीर्ति सुपुंसि स्यात् नापित नाव सायययोरिति विश्वः नपियति स्नपिगतो गत्यर्थेति क्तः नअपितः निषेधार्थेन शब्देन सुप्सुपेति समासः यद्वा
नापनं आप्लृ व्याप्तौ घञ् नापो जातोऽस्य तदस्य संजातमितीतच् नखानामंतमवसातुं शीलमस्य षोन्तकर्मणि षेक्षये वा सुपीति णिनिः आतोयुकू पंचनिर्णेनेक्ति निजिर्

नाडिंधमः स्वर्णकारः कलादो रुक्मकारके स्याच्छांखिकः कांबविकः शौल्विकस्ताम्रकुट्टकः ८ तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतट्
ग्रामाधीनो ग्रामतक्षः कौटतक्षोनधीनकः ९ क्षुरि मुंडि दिवाकीर्ति नापितान्तावसायिनः निर्णेजकः स्याद्रजकः शौंडिको मंडहारकः १०॥
जाबालः स्यादजाजीवो देवाजीवस्तु देवलः स्यान्माया शांबरी मायाकारस्तु प्रातिहारिकः ११॥ ९ शुद्धौ ण्वुल् उपसर्गाद् समास इति णत्वं रजति रंज रागे क्वुन्
दृश्युंडा सुरापण्यमस्य तदस्य पण्यमिति ठक् मंडं सुराग्रं संहरति कर्मण्यण् स्वार्थिकः हे शौंडिकस्य १० जवमलति आलाति वा अलभूषणादौ अण् कोवाजाबालोऽजः
तस्यायं अजा आजीवो जीविकाऽस्य हे देवैराजीवितुं शीलमस्य सुप्यजाताविति णिनिः अर्दंतपाठे देवः आजीवोऽस्य देवान् जीविकार्थं लाति कः देवलक्षणयात त्वं लाति
वा हे विश्वं मातिय स्यां मितियस्यां मिमीते वा मा माने माङ् माने वा मा छासस्यिभ्यो यः मायांति वा आतोनुपेति कः मायास्याच्छांबरी वुद्धौ मीयः पीतांवरे सुरे शंवरारस्वरेत्य १२७
स्यायं तस्येदमित्यण् हे इंद्रजालादिमायायाः मायां करोति अण् प्रतिहरणं तन्त्र भावे घञ् प्रतिहारो व्याजः प्रयोजनमस्य प्रयोजनमिति ठक् हे इंद्रजालिकस्य ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिलालिना प्रोक्तं नटसूत्रमधीयते पाराशर्यशिलालिभ्यामिति णिनिः शिलूषस्य ऋषेरपत्यं अण् नटे बिल्वे च शैलूष इति तालव्यादिमूर्द्धन्यांतेरभसः जायया जीवंति जीवन्ना ५
ण धारणे इगुपधेति कः कृशाश्वेन प्रोक्तं नटसूत्रमधीयते कर्मंदकृशाश्वादिनिः भरतस्य मुनेः शिष्याः अण् संज्ञापूर्वकत्वाद्वा वृद्धिः यद्वा बिभर्ति स्वांगं डुभृञ् भृमृदृशीत्यत
च् विलावच्चोवा यत्नत्रोश्चेति लुकि भरता इति मुकुटः तन्न अबहुवचने च द्विप्रसंगात् पूर्वव्याख्याविरोधाच्च नटति नटनृत्तौ अच् रंगावतारी शैलूषो नटो भरत भारताविति वाच
स्पतिः षट् चारयंति कीर्त्तिं चारणाः णिजंतः नंद्यादिल्युः कुत्सितं शीलमस्येषां कुशीलवाः इति समासः अन्यत्रापि दृश्यत इति वः कुशीलं वांति वा वागत्यादौ कः द्वे वाद्यविशेष
स्य १२ मृदंगः तत्सहचरणाया तद्वादनं शिल्पमस्य शिल्पमिति ठञ् मुरजः शिल्पं येषां ठक् द्वे पाणिं वादयंति वादेर्णवंतात् इण् पाणिं हंति पाणिघताडघौ शिल्पिनि द्वे व
णुं धमंति ध्माशब्दादौ आतोनुपसर्गे कः वेणोर्विकारः ओरञ् वैणवं शिल्पमस्य ठक् द्वे वीणां वादयति वीणा शिल्पमस्य द्वे १३ जीवानामंतकः शाकुनान् हंति पक्षिमत्स्ये
ति ठक् द्वे वागुरया जालेन च चरति चरतीति ठक् द्वे वीतंसेन मृगयस्यादिबंधनोपायेन चरति कूटेन मृगादिबंधनयंत्रेण चरति मांसं पण्यमस्य तदस्य पण्यमि

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः भरता इत्यपि नटाश्चारणास्तु कुशीलवाः १२ मार्दंगिका मौरजिकाः पाणिवादास्तु पाणिघाः वेणु
ध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः १३ जीवांतकः शाकुनिको द्वौ वागुरिकजालिकौ वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयं १४ भृतको
भृतिभुक्कर्मकरो वैतनिकोपि सः वार्तावहो वैवधिको भारवाहस्तु भारिकः १५ विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः॥ १६ ति ठक् त्रीणि १४ भ्रिय

ते स्म भृतः क्षरणे कः स्वार्थे कः यद्वा भृतिं करोति तत्करोतीति णिजंतात् क्तः भृतिं वेतनं भुंक्ते क्विप् कर्म करोति कर्मणि भृतौ विति ठक् वेतनेन जीवति वेतनादिभ्यो जीव
तीति ठक् चत्वारि वार्तायावहः विवधं वीवधं वा वहति विभाषा विवधेति ठन् पक्षे ठक् द्वे कहारया इति ख्यातस्य भारं वहति अण् भारोस्ति वास्य वल्लेनास्य अत इनि
ठन् द्वे १५ विगतो वर्णो यस्य यस्माद्वा वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपपर्यायोतरे इति विश्वः पामानं राति कः यद्वा पाधर्मः म्रियते येन मृङ् पुंसीति घः निकृष्टामीरु
ष्मी चिनोति चित्र अन्येभ्योपि दृश्यते इति डः प्रकृतौ भवः अण् यद्वा प्रकृष्टम् कृतम् कार्यमस्य स्वजनेभ्यः पृथग्भूतो जनः शाकपार्थिवादिः ॥ ॥ ॥

निश्चयेनहीनः कुगतीतिसमासः अपकृष्टमपकृष्टेवासीदति यद्वा विशारणादौ अश्च जालयतिजलआच्छादने जालं करोति वा हुलकात्नमः नेड्वशि कृति जाल्मसुप मेरे असमीक्ष्यकारिणि चेति हेमः क्षुधं लाति कः स्वार्थिकः कुन्वा यद्वा क्षुल्लति क्षुद्यते वा क्षुदक्षोदे स्फायीतिरक् कपिलिकादिः यद्वा क्षुधा लक्ष्यते लक आस्वादने पुंसीति घः कवर्गद्वितीयादिरपि खुल्लकस्त्रिषु नीचेल्पे इति रभसात् खदनं खदहिंसायां संपदादिः पृषोदरादिः खुदं लाति कुन इना कामनत्तीर्यते नृऋदोरप् इतं गमनं करोति वा तत्करोतीति णिच् यद्वा इतेन ज्ञानेन स्त्रीयते ज्ञातिपदीकाद्वा त्वर्थ इति णिच् वाहुलकाद्दरः यद्वा इदत्वय्ययमपकर्षे द्विवचनेतितरप् इत्यप्रकर्षत्वान्नाम् इत्यादि भ्रियते भृत्र भरणे भृञो संज्ञायामिति क्यप् भृत्यः पोष्ये भृतो भृत्ये इति विश्वः दास्या अपत्यं ढ्च इति ढक् क्षुद्राभ्यो वेति ढक् च दंसयति दंस्यते वा दसि दोलो दंसेष्टट नो न आ च ताल व्यांत पक्षे दंशश्च यद्वा दासते दासृदाने घञ् गुप्यते गुपू रक्षणे ण्यत् स्वार्थिकः गोप्यं कायति वा कै शब्दे आतोनुपेति कः चेतयति चिट परप्रेष्ये कृञादि भ्यो वुन् नियुज्यते युजिर्योगे ण्यत् प्रयोज्य नियोज्यौ शक्यार्थ इति साधुः किंचित्कुत्सितं वा करोति दिवा विभेत्यत्र किं यत्तदृ हुध्विम च प्रेष्यते इषगतौ आभीक्ष्ण्ये वा

निहीनोपसदोजाल्मः क्षुल्लकश्चेतरश्च सः १६ भृत्ये दासेय दासेर दासगोप्यक चेटकाः नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः १७ पराचितपरिस्कन्दपरजातपरैधिताः मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः १८ दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च॥

ण्यत् प्राद्वहेति वृद्धिः भुङ्क्ते स्वामिच्छिष्टं भुज्यते वा हत्विभुजिभ्यां किष्यन् परिचरति चरगत्यादौ ण्वुल् एकादश १७ परेणाचितः चित्र चयने क्तः परिस्कंदति स्कंदिर्ग त्यादौ पचाद्यच् परैश्चेति वा षत्वं परस्माज्जातः परपोषितत्वात् पराजित इति पाठे परैः आजीयते स्म जि अभिभवे क्तः यद्वा परे या माजः क्षेपणं जातोस्य तारकादिः प रैः एधितः संवर्द्धितः चत्वारि ओदासीन्येन परपोषितस्य मंदते स्वपिति मदि स्तुत्यादौ अच् मंदा गी स्तोच मूर्खे च स्वैरे चाभाग्यरोगिणोः अल्पे च त्रिषु पुंसि स्यादृसित्ना त्यं तरेणानो इति विश्वः तुंदमुदरं परिमार्ष्टि मृजूशुद्धौ तुंदशोकयोरिति कः न लसति लस श्लेषणे अच् स्वार्थेष्यञ् शीतं करोति शीतो लाभ्यां कारिणीति कन् उष्णो दक्षः उष्णादन्यः उष्णो ग्रीष्मे पुमान् दक्षशीतयोरन्यलिंगकः षट् १८ दक्षते दक्ष वृद्धौ शीघ्रार्थे च अच् दक्षः प्रजापतौ हरवृषभे कुक्कुटे पटौ द्रुमे दक्षा तु मेदिन्या

चतेया चनेमं दिवाशिमथि चति च कंकिप्य उरच्च पेशनं पिशसमा धोघत्र पेशल्याति कः पेशो स्यास्ति सि ध्मा दिल्वा छ्ल्वा पाटयति स्त्रिजंतः फलिपाटीति साधुः एषुई स्रे चनीरो
गे चतुरे प्यभिधेयवत् पटोलेतु पुमान् क्लीवेऽत्र आलवणयोरपि सुष्टु उस्यानं उद्योगो स्य उच्छलं शीघ्रकारित्वमस्यास्ति अर्शआद्यच उ छ्लोग्रीष्मेपुमान् दस्य क्षीतयोरन्यलिं
गकः षट् चंडते चडिकोपे पतिचंडिभ्यामालञ् प्रज्ञाद्यणि चांडालो यौत्यके तन्न कुलालवरूडकर्मार निषादचंडालमित्रामित्रेभ्यश्छंदसीति वार्तिकेछंदस्यण् विधाना
ल्लोके तदभावात् प्लवते प्लुङ् गतौ अच प्लवः प्लवस्येनौ कपोतशब्देकारं दवेम्लेच्छजातौ भेकके तेलयोः क्रमनिम्नमहीभागेकुलके जलवायसे केवर्तेमुस्तकेगंधतृ
णेपिस्यान्नपुंसकं मतंमस्या पत्यमिवा दित्वादण् मतंगस्यापत्यं वा तस्येदमित्यण् दिवाकीर्तिरस्यदिवाअकीर्तिरस्येति मुकुटः अधार्मिकान् जनान् गच्छति जनेभ्यो गच्छ
तिवा गमश्चेतिखच् १९ निषीदति पापमस्मिन् षद्लृ विशरणादौ हलश्चेति घञ् निषादः स्वरभेदेपि चंडाले धीवरांतरे श्वानं पचति अच् न्यंक्वादित्वात् कुत्वे श्वपाकोपि
ग्रामादंते वसति सुप्यजातौ णिनिस्ताच्छील्ये निः शयवासेति अलुक् स्वार्थे अण् चांडालोपि पुत्त कुत्सितं पुण्यं वा पुमांसं वा कसति कसगतौ अच मूलविभजादिको वा पृषोदरा

चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः १९ निषादश्वपचावंतेवासिचांडालपुक्कसाः भेदाः किरातशबरपुलिंदाम्लेच्छजातयः २०

दित्पुक्कसः श्वपचेधमेरनिदर्शनात् पुक्कसोपि दश किरातादयस्त्रयो म्लेच्छजातयश्च चंडालभेदाः यत्तु म्ले २१व्याधो मृगवधाजीवो मृगयुर्लुब्धकोपि सः॥
च्छशब्दवाच्या इति मुकुटस्तन्न जातिपदवैयर्थ्यप्रसंगात् म्लेच्छा इत्येव वक्तुं युक्तत्वात् किरति कॄ विक्षेपे इगुपधेति कः अतति अतसातत्यगमने अच् किरश्चासौ अ
तश्च किरातो म्लेच्छभेदस्याद्गुर्निवेऽल्पतनावपि स्त्रियां चामरवाहिन्यां कुट्टनी दुर्गयोरपि शवति शवगतौ वाहुलकाद्रः शवं राति वा कः शवरो म्लेच्छदेशे चयानी
यिं शंवरेपिचेति विश्वः पोलति पुलमहत्त्वे कलिपुलिभ्यां किंदजिति मुकुटः पुलिंकः कथ्यते म्लेच्छ पुलिंदेपि निगद्यते इति तारपालः पुलिंदपत्र शवर इति रत्नको
षः म्लेच्छति म्लेच्छ अव्यक्ते शब्दे अच् म्लेच्छानां जातयो ऽवांतरभेदाः गोमांसमक्षको यत्तु लोकवाह्यं च भाषते सर्वाचार विहीनोसौ म्लेच्छ इत्यभिधीयते सूत्तसंहितायाम
मपि त्राल्लएयां वैश्यतो जातः सूतो भवति नामतः अस्यामनेन चौर्येण म्लेच्छो विप्रा अजायत इति २० विध्यति व्यध ताडने श्याद्व्यधेति णः मृगवधेनाजीवति इगुपधेति

अ॰टी॰ पुंसिगोमायोव्याघेचपरमेष्ठिनि लुभ्यतेस्म लुभगार्द्धेक्तः स्वार्थेसंज्ञायांवाकः चत्वारिकुलेभवः कुलकुक्षीतिढकञ् कौलेयकः सारमेयेकुलीनेपीतिहेमचंद्रः सरमा
टी॰रा॰ याअपत्यंस्त्रीभ्योढक् कोकतेकुक आदाने क्विप् कुरतिकुरशब्दे कः कुकूचासौकुरश्चकुक्कुरः सारमेयेनाग्निथिपर्णीनपुंसकमिति विश्वः मृगान् दशति दंश दशने अण् कः २१
२२६ शुनतिशुनगतौ कुन्भषतिभषपैशुन्ये कुन् श्वयति टुओश्विगतिवृद्ध्योः श्वन्नुक्षन्निति साधुः कुक्कुरस्तुशुनिश्वानः कपिलोमंडलः शुन इति वाचस्पतिः सप्त अलमर्कते अर्च्यते
वा अर्क स्तवने अण् अर्चपूजायां घञ् शकंध्वादिः अलर्कोधवलार्कस्यात् योगोन्मादितकुक्कुरे इति विश्वः योगोमत्ततायायोजातोऽस्यतारकादित्वादितच् यद्वा युज्यते स्म यु
गिवर्जने ण्यंतः क्तः अनित्यत्वान्नतुम् एकं मतश्शुनः विश्वकं सर्वं द्रवति द्रुगतौ मितद्र्वादित्वाड्डुः यद्वाविश्वकं दते कदिआह्वानेरोजत्वादिः विश्वकद्रुस्त्रिषुखलेध्वानाखेटशुनो
पुमान् मृगयायांकुशलः एकं सरति सृगतौ वा हुलकात् अमः शुनी गौरादिः ङीष् २२ विचष्टेविष्ठांचरतिचरगत्यादौ अच् मूलविभुजादिकोवाविषश्चरोवा एकंवर्कते वृ
क आदाने वा हुलकाद रन् वर्करः परिहारस्याच्छागे युवपशावपि इति विश्वः वर्करोमेषशावकइतिरक्षितः एकं तरुणपशुमात्रस्य आच्छिद्यंतेऽत्रलुब्धकैर्मृगाः छिदिर्द्वैधीकरणे घञ् आच्छोदनम्

कौलेयकः सारमेयः कुक्कुरोमृगदंशकः २१ शुनकोभषकः श्वास्यादलर्कस्तुसयोगितः श्वाविश्वकद्रुर्मृगयाकुशलः सरमाशुनी २२ वि
ट्चरः शूकरोग्राम्यो वर्करस्तरुणः पशुः आच्छोदनंमृगव्यंस्यादाखेटोमृगयास्त्रियां २३ दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्माकुरंगकः चौरै

दिः मृगाः व्यध्यंतेऽत्रव्यधगतौ अन्येष्वपीतिडः आखिद्यंतेऽत्रखिदत्रासेहलश्चेतिघञ् मृग्यंतेऽत्रमृगअन्वेषणेपरि॥ कागारिकस्तेनदस्युतस्करमोषकाः २४॥
चर्यापरिसर्यामृगयेतिसाधुः चत्वारिशिकारइतिख्यातस्य २३ दक्षिणेअरुरस्य दक्षिणेर्ममस्य दक्षिणेर्मालुब्धयोगे इति साधुः एकं चोरणम् चुरस्तेये अग्न्यपात
संज्ञापूर्वकत्वान्नगुणः चुराशीलमस्य छत्रादिभ्योणः चोरः पाटच्चोरपिस्याच्चौरपुण्योवधा वपीतिविश्वः पचाद्यच्चिचोरोपिएकमसहायमगारंप्रयोजनमस्य ठन् ऐकागारिक २२६
ह् चौरे इति साधुः स्तेनपत्तिस्तेनचौर्ये पचाद्यच् दस्यति दसुउपक्षये जनिमनिदसिभ्योयुः अनुनासिकयायुर्वोरित्युक्तत्वान्नानः दस्युश्चौरेरिपौपुंसीतिहेमः तत्करोति
किंयत्तद्बहुष्वितिअच् तद्दहतोः करपस्योरितिसुट् दलोपौ मुष्णाति मुषस्तेये ण्वुल् २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिरोद्धुं शीलमस्य रुधिर् आवरणे सुपीतिणिनिः परान् आस्कन्दितुं शीलमस्य स्कन्दिर् गत्यादौ सुपीतिणिनिः पाटयं श्चरति अच् पृषोदरादिः चौरजीर्णपटयोः पटच्चर इति नामानुशासने मल्यते मलधारणे इन् मलिं धृतं म्लोचति म्लुचु स्तेये मूलविभुजादित्वात् कः मलिम्लुचो मासभेदे चौरज्वलनयोः पुमानिति विश्वः द्वा । चौरस्य भावः कर्म वा मनोज्ञादित्वात् वुञ् स्तेनस्य कर्म भावो वा स्तेनाद्यन्नलोपश्चेत्यत्र स्तेनादिति योगविभागात् ष्यञ् स्तेयं स्तैन्यं च चौर्यं स्याच्चौरिका चोरिके स्त्रिया यामिति वाचस्पतिः चौरस्य कर्म ष्यञ् चत्वारि चौरकर्मणः लुप्यते लुप्लृ छेदने ष्ट्रन् लुत्रः ष्ट्रनि लोत्रमपि लोत्रमश्रुणि चोरिते इति विश्वः तस्य चोरस्य धने । एकं २५ वितंस्यते तसि अलंकारे घञ् उपसर्गस्येति दीर्घः वीतंसो वधनोपाये मृगाणामपि पक्षिणां तेषामेव च विश्वासहेतोः प्रावरणेपि चेति विश्वः ।

प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः चौरिकास्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धनं २५ वीतंसस्तूपकरणं बन्धने
मृगपक्षिणां उन्माथः कूटयंत्रं स्याद्वागुरा मृगबन्धनी २६ शुल्वं वराटकः स्त्री तु रज्जुस्त्रिषु वटीगुणः ॥ ❁ ॥

एकं मृगादिबंधनसाधनस्य उन्मथ्यते ऽनेन मथे विलोडने हलश्चेति घञ् उन्माथः कूटयंत्रे स्यात्सारथौ घातुके पुमान् कूटस्वरूपं यंत्रं द्वे मृगादिबंधन यंत्रस्य अवागुरते गुरी हिंसायां इगुपधेति कः वष्टि भागुरीत्यकारलोपः मृगो बध्यते ऽनया बंध बंधने करणेति ल्युट् वा तेर्भद्रादित्वाद्दण्गुकागम इति मुकुटस्त्वपाणिनीयः द्वे जालविशेषस्य २६ शुल्वते शुल्वयति वा शुल्व विसर्गे एयन्तः एरच् अज्वा रज्जुः शुल्वा वराटो नेति रत्नकोषात्स्यपि शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधावपि विश्वः वरं अटति अट गतौ कर्मण्यण् स्वार्थे कः स्वामी तु सुम्बवटाकर इति पठति सुपूजितैर्मीयते मीङ् गत्याम् एरच् वा हुलकाद्यण् सुमे पुष्ये साधुर्वा तत्र साधुरिति यत् वटवेष्टनमाकरोतीति पचाद्यच् सृज्यते सृज विसर्गे सृजेरसुम्च चात्सलोपः सृजेः कुरसुगाममश्चेत्यादि

Digitization by eGangotri

अ·टी· मुकुटस्तु पाशिनीयः स्त्रैवेयेष्वां गुणो योषिदिति विश्वमेदिन्यौ वटति वटवेष्टने अच् गौरादिः वस्यते वा खनो घञ्चेति घः वटीत्रिषु गुणो पुंसि स्यान्न्यग्रोधे
टी·ए· कपर्दयोः गुण्यते गुणः आमंत्रणे अदंतः एरच् गुणोमौर्व्यामप्रधाने रूपादौ सूदइंद्रिये त्यागे शौर्यादि संध्यादिसत्वाद्यावृत्तिरज्जुषु शुक्लादावपिवृक्षा
१२७ वपं च उद्घाट्यतेऽनेन वा घटसंघाते ण्यंतः ल्युट् घटीनां यंत्रं प्रहिः कूपात्सलिलं उद्धृत्यतेऽनेन हृ अर्हेट इति ख्यातस्य २७ वयन्ति अनेन वेमन् तु संताने वेमः सर्व
धातिस्मनिच् वपनं डुवप घञ् वापस्य दंडः वायदंड इति क्वचित्पाठः तत्र वेञो भावे घञ् आतो युक् वायस्य दंडः द्वे सूत्र्यते सूत्र वेष्टने अदंतः एरच् सीव्यतेऽ
नेन वा षिवु तंतुसंताने सिविमुच्योष्टेरूच्च चात्कित ष्ट्रन् च प्रत्ययः सूत्रं तु सूचनाकारि ग्रंथे तंतुव्यवस्थयोरिति हेमः नरि पुंसि तन्यते तनु विस्तारे सितनीति

उद्घाटनं घटीयंत्रं सलिलोद्वाहनं प्रहिः २७ पुंसि वेमा वापदण्डः सूत्राणि नरि तंतवः वाणिर्व्यूतिः स्त्रियौ तुल्ये पुस्तं ले ॰ ॥
प्यादिकर्मणि २८ पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ॰ ॥ ॥ ॥ ॥

तुन् सूत्रतंतुरिति हारावल्याः संहतोपि द्वे वाणनं वणः शब्दे चुरादिः अच् वः विशिष्टा ऊतिः वेञः ऊति यूती त्यादिना क्तिनि निपातितः द्वे वस्त्रादिवानस्य पु
स्यते पुस्त आदरादौ णिच् एरच् मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्मणा लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते लेप्यमादिर्यस्य तच्च तत्कर्म च आदिना
काष्ठपुत्तलिकादि एकं २८ पंचभिर्वर्णैरल्प्यते अलभूषणादौ घञ् स्वार्थे कन् टाप् प्रत्ययस्थादिति इत्वं संज्ञायामिति ण्वुलो संज्ञापूर्वकत्वान्न वृद्धिः पां १२७
चालिकेति पाठे पंचालदेशोभवा जनपदतदवध्योरिति वुञ् आदिवृद्धिः पांचालिका स्त्रियां वस्त्रपुत्रिकागीतिभेदयोः पुत्री वत्स वेति कन् यावादित्वा
द्धस्वा पुत्रिका पुत्तलिका दुहित्रोर्णव तूलिके नापुत्रेश्वर भेधूर्ते शेवृक्षस्य प्रभेदयोरिति विश्वमेदिन्यौ आदिना काष्ठनृच्छिलादिकृता द्वे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रस्याः संत्यस्यां मतुप् पाकस्य स्थानं महच्च तदनश्च अनसोपकरणं लक्ष्यते अनोश्मायः इत्यादिना टच् महदनोऽस्येति स्वामी तन्न अनोश्मायः इति तत्पुरुषसमासांता
पन्यासविरोधात् त्री लि पुरः पूजिता गोभूमिः पुरोगवी गोरतद्धितेति टच् तस्या अयं तस्येदमित्यण् यद्वा पुरः प्रथमं याच्यवस्तुषु गौर्नेत्रमस्य पुरोगुः गोस्त्रियोरिति ह्रस्वः
ततः प्रज्ञाद्यण् तस्याध्यक्षः ३ महानसाधिकृतस्य शोभना आपोऽस्मिन् ऋक्पूरित्यं कुसुयुभ्यश्चेत्यपो तकुत् सवतिरसंषु प्रसवादौ सु शृभ्यानि च्चेति सोदी
र्घश्च युक् सूनीकि च्चेत्यपाणिनीयं सूपं करोति कर्मण्यण् वल्लनं वल्लः संवरणे वल्लिः सौत्रो वा घञ् तौ भावे घञ् वल्लो स्यास्ति अन्येभ्योपीति वः वल्लं वाति वा आ
तो नुपेति कः वल्लवः सूपकारे स्याद्भीमसेने च गोदुहीति विश्वः २७ अरालं कुटिलं चरंति चरतीति ठक् अंधो भक्तं शिल्पं येषां शिल्पमिति ठक् सूदंति छागादीन् सूदहिं
सायां अच् कोवा सूदस्तु कथितः सूपकारे च व्यंजनांतरे इति विश्वमेदिन्यौ ओदनं शिल्पं येषां शिल्पमिति ठक् गुणयंते गुणनिमंत्रणे अदंतः अच् गुणो मोर्व्यामप्रधा
ने रूपादौ सूदे इंद्रिये त्यागे शौर्यादिसंध्यादिसत्वाद्या वृत्तिरज्जुषु शुक्लादावपि वुद्ध्यां च सप्त आद्यद्वयं व्यंजनकारस्येति स्वामी अपूपाः पण्यमस्य तदस्यपण्यमिति

समानौ रसवत्यां तु पाकस्थानमहानसे पौरोगवस्तदध्यक्षः सूपकारास्तु वल्लवाः २७ आरालिका आंधसिकाः सूदा औदनिका गुणाः आ
पूपिकः कांदविको भक्ष्यकार इमे त्रिषु २८ अश्मंतमुद्धानमधिश्रयणी चुल्लिरंतिका अंगारधानिकांगारशकट्यपि हसंत्यपि २९ ॥

ठक् कंदौ संस्कारं संस्कृतं भक्ष्यादूत्यण् कांदवं पण्यमस्य ठक् भक्ष्यं करोति कर्मण्यण् त्री लि इमे पौरोगवादयः २८ अश्मनोप्यंतोत्र शकंध्वादिः अश्मंतमशुभे चुल्ल्यां मर
णेऽनवधावपि क्षेत्रेपीति विश्वः अस्वंतेति पाठे असूनामंतोऽत्र उत् धीयतेऽत्र धान्त्रो ल्युट् उद्धानमुद्गतेवाच्यलिंगं चुल्ल्यां नपुंसकमिति विश्वः उध्मानमिति पाठे तु उत्
धमायते ध्मा शब्दाग्न्योः ल्युट् अधिश्रीयतेऽत्र श्रीत्र् पाके अधिकरणे ल्युट् ङीप् चुल्ल्यते तत्र चुल्ल भावकरणे इन् चुद्यतेऽत्राग्निरिति वा चुदप्रेरणे वा हुल कालिकू कृदिकारा
दिति वा ङीष् अंत्यतेत्र अति बंधने ण्वुल् अंतिकं निकटे वाच्यलिंगं स्त्री शोभनो पधौ चुल्ल्यां ज्येष्ठ भगिन्यां च नाट्योक्तौ कोर्थ्यते निकाप्येव अंगाराः धीयंतेऽस्यां धा
त्रो ल्युट् टिड्ढेति ङीप् कन् अंगाराणां शकटी हसंति हसे हसने लट् शतृ शप् श्यनोरिति नुम् हसंत्यंगारधान्यां च मल्लिकाशाकिनीभिदोरिति विश्वः २९ ॥

अ॰ टी॰ टी॰ श॰ १०८

रुत्यल्युट् इति ल्युट् टिड्ढेति ङीप् चत्वारि वोरसीति ख्यातायाः अंगति अगि गतौ अंगमियर्ति वा ऋ गतौ कर्मण्यण् अंगारमुल्मुके न स्त्री पुल्लिंगस्तु महीसुते इति विश्वः एकं लातं
लादाने कः न लातमस्य ओषति उष दाहे उल्मुक दर्वीति साधुः हु अद्दु दग्धकाष्ठस्य त्रयोपि पर्याया इति मुकुटः अंब्यतेऽत्र वा अवि शब्दे अंबरीष इति साधुः शिरीषादयश्च
ति त्वपाणिनीयं अंबरीषपुरुषो यरीष घमिति षभेदान्मूर्द्धन्यांतोयं अंबरीषं रणभ्राष्ट्रे क्लीबं पुंसि नृपांतरे नरकस्य प्रभेदे च किशोरे भास्करेपि च आम्रातकेन्नतापे
चानिमिषमत्स्यभेदयोः भृज्यतेऽत्र भ्रस्ज पाके भ्रस्जिगमिनमीति ष्ट्रन् दृष्ट्री है भर्ज्जनपात्रस्य स्कंदति स्कंदिर् गतिशोषणयोः स्कंदेः सलोपश्चेति कुः वेससपात्राप्यन्व
यः पक्षे स्त्री साहचर्यात् खिद्यते अस्यां अधिकरणे ल्युट् वा स्त्रियामित्यत्राप्यन्वेतीति मुकुटः हे करा ही इति ख्यातस्य ३० अलनं अलभूषणादौ इक् कृष्यादिभ्यः
इन्वा अलि सामर्थ्ये जरयति जृणाति वा जॄष् वयोहानौ जृ वयोहानौ वा अण् अच् वा मरणेति मरणशब्दे सर्वधातुभ्य इति इन् स्वार्थे कः संज्ञायां को वा हेमाट इति
ख्यातस्य कर्कणम् कर्क हासे घञ् कर्कं राति रा दाने आतोनुपेति कः गौरादिः कर्करी भांडभेदे नार्यणे काठिन्ये त्रिष्विति विश्वः आलुनाति लूञ् छेदने क्विप् हु

हसन्त्यप्यथ न स्त्री स्यादंगारोऽलातमुल्मुकं क्लीबेंऽबरीषं भ्राष्ट्रो ना कंदुर्वा स्वेदनी स्त्रियां ३० अलिंजरः स्यान्मणिकः कर्कर्यालूर्गलंति

स्वपाठे आलाति ला आदाने मितद्वादित्वात् डुः आलुर्गलंतिकायां स्त्री क्लीबं मूले च मेलके इति विश्वः गलंतिग ((का पिठरः स्थाल्युखा कुंडं कलशस्तु त्रिषु द्वयोः
लत् अदने शता उगितश्चेति ङीष् शप् श्यनोर्नित्यमिति नुम् कन् स्वार्थे त्रीणि करवनीति ख्यातायाः कं दीर्घतप क्वनि ष्काश न साधु न स्वेन्यके पेठतीति पिठ वंधे इगुपधेति कः
पिठराति रा आदाने आतोनुपेति कः तिष्ठत्यत्र ओदनादिः ष्ठा गतिनिवृत्तौ स्था च तीत्यालच् स्थलत्यत्र वा स्थल स्थाने ज्वलादिणः जातेरिति ङीष् स्थाली भाजनभेदेपि स्थाली स्यात्
पाटलो ख्ययोः ओखति उख गतौ इगुपधेति कः मूर्द्धन्यपाठे उष दाहे कुंडयति कुडि रक्षायां अच् कुणति कुण शब्दोपतापयोः कुणादिभ्यः किदिति डः इति मुकुटः तन्न उक्तसूत्रा
भावात् क्वादेः किदिति सूत्रस्य सत्त्वात् कुंडमग्न्यालये मानभेदे देवजलाशये कुंडी कमंडलौ जारात्पतिवत्नीसुते पुमान् पिठरे तु न ना इति विश्वः चत्वारि आ इन्नादिपचनपा
त्रस्य केन जलेन लसति लस श्लेषणे क्रीडनयोः पचाद्यच् तालव्यपाठे कलशा वति शु गतौ अन्येभ्योपीति डः तालव्या अपि दंत्याश्च शांव शूकर पांशवः कलशः शंवलं चैव जिह्वायांर

१०८

CC-0. In Public Domain. Digitization by eGangotri

घटते घटचेष्टायां अच् स्त्रियां घटी घटः समाधिभेदे नाशिरः कूटकुटेषु च घटी घटनगोष्ठी भघटनासु चयोषितिकुटति कुटकौटिल्ये इगुपधेति कः नियतं पिबंत्यनेन घञ् । र्थेकः कुटनिपावस्त्री चत्वारि घटस्य शरणां शृहिंसायां अदोरप् शृणोतिवा अच् शरं शराह्वः वति अवरक्षणादौ अण् अज्वादंत्यादिरपीति मुकुटः वर्द्धते वृधु वृद्धौ ल्युनच शप मुक संज्ञायां कन् द्वे अर्ज्यते अर्ज अर्जने अर्जेर्ऋज् चेति ईषन् ऋचीषमिति पाठ इति कश्चित ऋच शब्दे वा हुलकात्कीषन् पच्यते अत्र करणेति ल्युट् पिष्ट स्य पचनं द्वे ता वा इति ख्यातस्य कम्यते कमुकांतो आयादय इति णिङ् वृत्तवादिह्नि कमिकषिभ्यः सः कंसो स्त्री तैजसद्रव्ये कांस्यमानेपरं तु नापीयते इति यानं ल्युट् क्षीरादिपानस्य भाजनं द्वे ३२ कुत्सितं तन्यते तनु विस्तारे वाहुलकात् कुः टिलोपश्च कौ तिवा कु शब्दे वाहुलकात् कू सुकच् कुत्वाडुपजितिनिर्दिष्टाहाक्तान्ते श्रमेणः स्नेह स्य तैल घृतादेः पात्रं द्वे सेतिनिर्दिष्टा कुतूः स्त्रीलिंगः अल्याकुतूः कुत्वात् डुपच् एकं आ उप्यते त्र डुवप बीजतंतुसंताने ल्युट् भडिकल्याणे सुखेच अच् पृषोदरादिः भणति वा भण शब्दे त्रमंताडुः प्रज्ञाद्यण् भांड मूले वणिग्वित्ते तुरंगाणां च मंडने नदीकूलद्वोपमध्ये भूषणे भाजनेपि चेति पाति पारक्षणेपि वत्यनेन वा पापानेष्ट्रन्

घटः कुटनिपावस्त्री शरावो वर्द्धमानकः ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनं ३२ कुतूः कृत्तेः स्नेहपात्रं सैवाल्पाकुतुपः पुमान् सर्वमाव पनं भांडं पात्रामत्रे च भाजनं ३३ दर्विः कंविः खजाका च स्यात्तर्दूर्दारुहस्तकः अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका ३४॥ ॥

अमति अम गत्यादिषु अमिनक्षियजिवधिपतिभ्योऽत्रन् भाजयति भाज पृथक्कर्मणि ल्युट् स्फूर्त्यादिपिठरादि च सर्वमावपनादि शब्दवाच्यं पंच ३३ दृणाति दृविदारणे दृदभ्यां विन् कृदिकारादिति ङीषि दर्वी च कम्यते कमुकांतो वा हुलकाद्विन् खजति खज मंथे खजेराकः एतत्साहचर्यात्पूर्वयो स्त्रीत्वं त्रीलिकर छुलीति ख्या तायाः तरति तॄप्लवन तरणयोः त्रोदुट्टेति डुः दुडागमश्च तर्दति तृणत्ति वा तर्द हिंसायां उतृदिर् हिंसानादरयोरिति वा वाहुलकादुः हस्तामति कृतिः द्वे प्रतिकृता विति कन् दारुणो हस्तकः एतत्साहचर्यात्पूर्वः पुंसि द्वे शपति धातुक्षय कारित्वात् शोन नूकरणे वा हुलकात्कन् शक्नोत्यनेन वा भोक्तुं शक्लृ शक्तौ हलश्चेति घञ् शाको द्वीपांतरेपि च शक्तो द्रुमविशेषे च पुमान् हरितके स्त्रियामिति विश्वः हरितो वर्णोस्यास्ति अर्शआद्यच् स्वार्थे कन् हरति ह्रियते वा हृञ् हरणे हृश्याभ्यामितन् कन् शीकयते शीक ते शीकृ सेचने वा हुलकाद्रुग् ह्रस्वो गश्च शिनोति शिञ् निशाने जंबा दयश्चेति साधुरिति वा शिग्रुर्नाम शाकमात्रे च शोभांजने महीरुहे इति विश्वमेदिन्यौ त्री

अ·टी· कडति कडमदे क्रकारिकडिगडिभ्यां ऽ वचूडलयोरेकं केनलं वतेवा लविअवस्रंसनेअच् कलंकं शाकभेदे पिस्याद्दृंडशारयोः पुमानहेशाकनालस्यवेसनं
टी·रा· विसप्रेरणे घञ् वेसंप्रेरणं वारयति वृणोति वा वृञ् वरणे कर्मण्यण् उपस्करोति व्यंजनेन समवैति कृञ् अच् समवाये चेति सुट् देसंस्कारार्थे दीयमानस्याहिङ्ग्वादेः
१९० हिंगुजीरकहरिद्राधान्याकशुंठीसर्षपादेरिति मुकुटः चित्रकं पिप्पलीमूलं पीप्पलीचव्यनागरम् धान्याकं रजनी श्वेततंडुलाश्च समांशकाः वेसवार इति ख्याताः धा
न्यादिषु नियोजयेत् इत्यात्रेयसंहिता विंशतिः पलानि हरिद्रायाः दशपलानि धान्याकस्य पंचपलानि शुद्धजीरकस्य पलसार्द्धद्वयं मेथिकायाः एतच्च तुष्टयं भर्जितमेव
ग्राह्यं त्रीणि पलानि मरीचस्य अर्द्धपलं रामठस्य एतत्सर्वमेकत्र संयोज्य संमर्दितं वेसवार इत्युच्यते इत्यन्ये तिम्यति तिम आर्द्रीभावे अनीकादयश्चेति साधुः चकतृप्तौ
प्रतीघाते च चकिरम्योरुच्चोपधाया इति रक् चुक्रं वृक्षाम्ले चांगेर्यां स्त्रीपुंसम्लेऽम्लवेतसे इति विश्वः वृक्षस्याम्लं त्रीणि चूके इति ख्यातस्य वल्ली विशेषस्येत्यन्ये वेल्लनं वे
ल्लचलने घञ् वेल्लं जायते जनी अंतर्भावितण्यर्थः अन्येभ्योपीति डः ऽप म्रियते विषमनेन मृङ् प्राणत्यागे वा हलकादीरिचः ह्रस्वमध्यमपि कोलति कुल संस्त्याने

कडंवश्च कलंवश्च वेसवार उपस्करः तिंतिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लनं ३५ मरीचं कोलकं कृष्णमूषणं धर्मपत्तनं जीरको जर

कृञादिभ्यो वुन् ण्वुल् वा कर्षति कृष विलेखने कृषेर्वर्णे इति नक् कृष्णः सत्यवतीपुत्रे वायसे केशवेर्जुने कृष्णा स्याद्द्रौपदीनी((णोऽजाजीकणां कृष्णे तु जीरके
लाकणाद्राक्षासु योषिति मं च केवाच्यलिंगः स्यात् क्लीवे मरिचलोहयोरिति विश्वः उषति उष दाहे ल्युट् ह्रस्वपाठे उष दाहे संज्ञापूर्वकत्वाद्गुणाभावः उषणं मरी
चे क्लीवं कणायामूषणा स्मृता धर्मपत्तने जातं तत्र जातः इत्यण् संज्ञापूर्वकत्वान्न वृद्धिः षट्जवति जुस्सोत्रः जोरी चेति रक् जिनाति वा ज्यावयोहानौ ज्य
श्चेति रक् संज्ञायामिति कः जरयति जॄष वयोहानौ नंद्यादिल्युः जरणं हिंगुनि स्मृतं जरणो जीरके पिस्यात् कृष्णसौवर्चलेपि चेति विश्वः अजमजति अज ग
तिक्षेपणयोः कर्मण्यण् ङीप् वहुलं तणीति वीनुं कणाति कण शब्दे अच् कणा जीरकं कुंभीरमक्षिकापिप्पलीषु च कणोऽतिसूक्ष्मे धान्यांशे इति विश्वः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्वेपेटति पिटसंघाते क्वुन् एवुल् अत्त्व पिटकस्त्रिषु विस्फोटे मंजूषायां पुनः पुमान् पेटकः पुस्तकादीनां मंजूषायां कदंबके इति च विश्वः पेडेति मुकुटः तत्र पिंड ते पिंडि सं
घाते अच् अनित्यत्वान्न नुम् पीडेति स्वामी तत्र पीडयति पीड अवगाहे अच् मज्जति अत्र वा टुमस्जो शुद्धो मस्जेर्नुम्विन्यूष न यत्नु हि जकार इति मुकुटः तन्न मस्जेर
न्त्यात्पूर्वो नुमिति वार्तिक विरोधात् चत्वारि पेटीति ख्यातायाः मुकुटस्त्वादद्वयेमापीति ख्यातायाः अंत्यद्वयं मंजूषेति ख्यातायाः इत्याह विहंगस्य वृत्ति कृतिः इवे प्र
तिकृतावितिकन् विहायसा गच्छति वा गमश्चेति खच् विहायसो विहच खच्च वा डिद्वा वाच्यः यावादित्वात्कन् मुकुटस्तु विहंगमेति पठति द्वे भारस्य यष्टिः द्वे
का चडीति ख्याता याः ताम् आलंवितुं शीलमस्य लवि अवस्रंसने सुपीति णिनिः स्रंसते ऽस्मात् स्रंसु अधःपतने स्रंसः शिकुटूकि च्वेति यत् धातोः शिरादेशो यतः
कुट् शक्नोति वोढुं अध्यादिरिति मुकुटस्त्वेतत्सूत्रादर्शन मूलकः कच्यते ऽत्र कच वंधने हलश्चेति घञ् काचः शिक्यमणौ नेत्ररोगभेदे मृद्‌तरे इति विश्वमेदिन्यौ

पिटकः पेटकः पेटा मंजूषाथ विहंगिका २९ भारयष्टिस्तदालंवि शिक्यं काचोथ पादुका पादूरुपानत्स्त्री सैवानुपदीना

पदायता ३० नध्रीवध्रीवरत्रा स्यादश्वादेस्ताडनी कशा चांडालिकातु कण्डोलवीणा चंडालवल्लकी ३१ ॥

द्वे पद्यते ऽनया पदगतौ णिलकसि पद्यर्तेरिति ऊः स्वार्थिकन्वा पादेउपनत्द्यते यादमुपनह्यति वा णह वंधने संपदादित्वात् क्विप्वेति वा क्विप् नहिवृतीति दी
र्घः त्रीलिपदस्यानुयस्य चायाम इत्यव्ययी भावः अनुपदं पादायामप्रमाणमस्य वहा अनुपदं सर्वे ति खः एकं ३० नह्यते ऽनया णहवंधने दाम्नीति ष्ट्रन् वर्द्धते वृधु वर्द्ध
ने वृधिवपिभ्यां रन् गौरादित्वान्ङीष् व्रियते ऽनया वृञ्वरणे वृत्रश्चिदित्यत्रन् त्रीणि चर्ममयरज्जोः ताड्यते ऽनया तड आघाते ण्यंतः ल्युट्कशति कश शब्दे क
शिगति शासनयोर्वा अनित्योनुम् अच् आदिना उष्ट्रगर्दभ चौरादिग्रहः एकं चंडालस्येयं तस्येदमित्यण् टिड्ढेति ङीप् स्वार्थे कन् चंडालेन कृता वा कुलाला
दिभ्यो वुञ् चांडालिका किन्नरायां भुमायामोषधीभिदि कंडते कडि मदे वाहुलकादोलच् कटोल इति पाठे तु कटति कटेवर्षादौ कपिगडीति ओलच् कडिकपी
ति मुकुटस्त्वपाणिनीयः कंडोलस्य चंडालस्य वीणा चंडालस्य वल्लकी त्रीणि किंगरीति ख्यातायाः ३१॥

अ॰ टी॰ स्वल्पो नाराचो वा । णभेदः गौरादिः । इष्यते ऽनया इषगतौ ल्युट् कः हे सुवर्णतुलायाः शाण्यते शाण दाने अकर्तरीति घञ् श्यति वा शो तनूकरणे बाहुलकात् णः पुं
टी॰ रा॰ सि स्यात् च्छाणो माषचतुष्टये लोहादीनां चानिकषे शाणी प्रावरणान्तरे निकषति कष हिंसायां अच् निकष्यते ऽत्र गोचरेत्यादिना घः इति मुकुटश्चिन्त्यः तत्र कषेर
१२८ पाठात् नेर्ग्रहणमुपसर्गान्तरनिवृत्त्यर्थं निकषः शाणफलके इति विश्वमेदिन्यौ त्रीणि सुवर्णपरीक्षणपाषाणस्य स्वङ्गादितीक्ष्णीकरणपत्रस्येत्यन्ये व्रश्च्यते ऽने
न ओव्रश्चू छेदने करणे ल्युट् पत्त्रमिव परशुः हे सुवर्णादिच्छेदनद्रव्यस्य लघुकरवतेत्यन्ये इष्यते इषगत्यादौ कृञादिभ्यो वुन् ईषिके निपाठे ईष्यते ईषति
वा ईष उञ्छे क्वुन् तूलति तूल्यते वा तूल निष्कर्षे क्वुन् हे वीरणादिशलाकायाः सुवर्णादेरावर्तनपरीक्षार्थं निक्षिप्यमानायाः वा ३२ तेजसो विकारः सुवर्णादि
रावर्त्यते ऽस्याम् वृतु वर्तने ण्यन्तः अधिकरणे ल्युट् मूषति मूष स्तेये इगुपधेति कः मुष स्तेये इत्यस्मात् क्विदाघञि ह्रस्वादिरपि ह्रस्वा मूषा मूषी गौरादिः मूषा मु

नाराची स्यादेषणिका शाणस्तु निकषः कषः । व्रश्चनः पत्रपरशुरीषिका तूलिका समे ॥ ३२॥
तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका । आस्फोटनी वेधनिका कृपाणी कर्तरी समे ॥ ३३॥

षा त्वावर्तनी मूषीति शाश्वतार्णवः यत्तु मुष स्तेये गुरोश्च हलः इत्यकारप्रत्ययः टापि अन्येषामपीति दीर्घत्वे मूषा मुषा चेति मुकुटः तन्न गुरुत्वाभावात् दीर्घस्य धातोः स
त्वेनान्येषामपीत्यस्यानुपयोगाच्च हे भस्यते ऽनया भस दीप्तौ हुयामाश्रुभसिभ्यस्त्रन् त्रितुत्रेति नेट् अजादिः चर्मणा प्रसीव्यते षिवु तन्तुसन्ताने कृञादिभ्यो वुन्
संज्ञायामिति ण्वुल्वा हे आस्फोट्यते ऽनया स्फुट भेदने चुरादिः करणे ल्युट् ललं तीमास्फोटयतीति पृषोदरादिरिति मुकुटः विध्यते ऽनया विध विधाने ल्युट् १२८
स्वार्थिकः वेधनी तुलास्फोटन्यां स्फोटनी वृषदंशिकेति वाचस्पतिः हे मुक्तादिवेधिन्याः कृपामणति अण शब्दे अण् ङीप् कृन्तति कृती छेदने बाहुलकाद
रः यद्वा कर्तनं घञ् कर्तं राति रा दाने आतोनुपेति कः गौरादिः हे ३३॥

वृक्षमत्ति अद भक्षणे कर्मण्यण् ल्युट् इति ल्युट् वृक्षं भेत्तुं शीलमस्य भिदिर् विदारणे सुपीति णिनिः हे काष्ठतनूकरणसाधनस्य टंकयति टकि बंधने चुरादिः अच् टमिति शब्दं
कायति वा कै शब्दे आतो नुपेति कः सुपीति वा पाषाणो दार्यतेऽनेन दृ विदारणे ण्यंतः ल्युट् हे क्रक इति कचति कच शब्दे अच् करेण करोह्यपतति पत्लृ पतने ष्ट्रन् हे कर
वत्र इति ख्यातस्य आ इयर्ति ऋच्छति वा ऋ गतौ अच् आर्यते वाभिदादौ आरा शस्त्र्यामिति पाठात् साधुः चर्मणः प्रभेदिका हे ३४ शोभना ऊर्मिः बहुव्रीहिर्वा सर्वतोक्तिन्नर्थो
दिति गौरादिर्वा ङीष् ग्रीष्मजाल्म शूर्मे इति मप्रत्यये शूर्मे देशे चेति मुकुटस्तु पाणिनीयः तालव्यादिरित्यप्ययुक्तं सूर्म्यं सुषिरामिं वति श्रुतिविरोधात् तिष्ठति ष्ठा गतिनि
वृत्तौ राखासा स्नास्थूणेति साधुः स्थूणा सूर्म्या स्तंभ हृगंतर इति हेमः अयसः प्रतिमा त्रीणि शील्यते शल्यते वा शील समाधौ शल गतौ वा स्वष्यशिल्पेति साधुः शि स्वं

वृक्षादनो वृक्षभेदी टंकः पाषाणदारणः क्रकचोस्त्री करपत्रमारा चर्मप्रभेदिका ३४ सूर्म्मी स्थूणा यः प्रतिमा शिल्पं कर्म कलादिकं
प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना ३५ प्रतिच्छाया प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् वाच्यलिंगाः समस्तुल्यः सदृक्षः सदृशः

सुवेक्रियायोगे इति विश्वः कला नृत्यगीतादिरूपा चतुःषष्टिभेदभिन्ना आदिना सुवर्णकारादिकर्मग्रहः एकं प्रतिकृत्य मीयतेऽनेन माङ् माने ल्युट् ((सदृक्॥
दृ प्रतिकृतिर्बिंबं यस्य कुगतीति समासः प्रतिमीयतेऽनयो आतश्चोपसर्गे इत्यङ् प्रतियात्यतेऽनया यतनिकारोपस्कारयोः चुरादिः ण्यासश्रंथेति युच् ३५ प्रकृ
ष्टा छाया प्रकृष्टा कृतिः प्रतिनिधेः कृतिर्वा अर्च्यते अर्च पूजायां गुरोश्च हलः इत्यः प्रतिनिधीयते सदृशी क्रियते डुधाञ् उपसर्गे घोः किः अष्टौ प्रतिमायाः उपमा
नेर्भावे अङ् ल्युटौ करणे वा हे करणे भावे च येनोपमीयते या चोपमितिस्तयोरेते नामनी कश्चित्तु पूर्वान्विते इत्याहुः समति समवैक्लव्ये अच् तुलया संमितः नौव
यद्रतिय तू समानरूपक्षरतित्यदादिषु इति कञ्चि नौ क्सश्च दृगृक्ष्यवतुषु दृक्षे चेति समासः ३६

अ॰टी॰ सह आधारणेन वर्त्तते वोपसर्जनस्येति समासः साधुस्यसंसिद्धेः रणो वाचकः एवसहमानेनवर्त्तते समानंमानमस्येति वा समानस्य छन्दसीति सः सम वाच्यलिं
टी॰रा॰ गा सप्त तुल्यस्य अमी निभादयउत्तरपदस्थाएवसदृशावचना वाच्यलिंगाः स्युः यथापितृनिभः पुत्रः मातृनिभाकन्या देवनिभमपत्यमिति नियतं भाति आत
१२६ श्चोपसर्गे इतिकः निभस्तु कथितो व्याजेपुल्लिंगः सदृशेत्रिषु संकाशते काशृदीप्तौ अचसंकाशः सदृशोऽगतिके इति हैमः नितरांकाशते इकः काशे इति दीर्घः नी
काशो निश्चयेतुल्ये इति विश्वः प्रतिकाशते आदिनाभूतरूपकल्पादिग्रहः यथापितृभूतः पितृकल्पः ३७ कर्मणा संपद्यते कर्मवेशाद्यत् कर्मणिसाधुर्वा तत्रसा
धुरिति यत् कर्मणि विधीयतेऽनया ङुधाञ् आतश्चोपसर्गे इत्यङ् भ्रियन्ते कर्मकराअनया भृञ्भरणे संज्ञायांसमजेति क्यप् कर्मणि भृताविति निर्देशात् क्लिन्नपि भ
भ्रियतेऽनेन डु भृञ् भृञ्भ्यामनिन् वीयतेऽनेनवी गत्यादौ वीपतिभ्यांतनन् भरणे साधुः तत्रसाधुरिति यत् भ्रियतेऽनेन ल्युट् भरणं वेतने भृताविति विश्वः मूलेन
आनाम्यं नोवयो धर्मेति यत् मूल्यं स्माद्वेतने रत्ने इति विश्वः निर्विश्यते अनेनवा विशप्रवेशने अकर्त्तरिचेति हलश्चेति वा घञ् निर्वेशस्तु पुमान्मार्गे वेतने मूर्छने

साधारणः समानश्च स्युरुत्तरपदे त्वमी निभसङ्काशनीकाशप्रतीकाशोपमादयः ३७ कर्म्मण्या तु विधा भृत्या भृतयो भर्मवेतनं भरण्यं
भरणं मूल्यं निर्वेशः पणः इत्यपि ३८ सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा॥ ३९ पिचपण्यते नित्यंपणः परिमाणेऽस्यप् पुंसीति घो वा पणो वरा
टमानेस्यान्मूल्ये कार्षापणे ग्लहे क्रय्य पणकादिके द्यूतव्यवहारे भृतौ धने एकादश ३८ सुष्ठुराति यांरादाने सुअतीवरायंत्यनया वा रैशब्दे आतश्चोपसर्गे इत्यङ् सुराच
षकमद्ययोः पुल्लिंगस्त्रिदिवेशे स्यात् हलिनो वलस्यप्रिया हलत्यंगहल्लविलेखने ज्वलादिणः हल्यतेऽनयावा हलश्चेति घञ् हालः शालिका हनयार्थि वे हाला सु
रायामिति विश्वः परितः स्रवति स्रुस्रवणे क्विप् तुक् वरुणालयोपि वरुणः तस्यात्मजा गंधेनोत्तमा गंधः उत्तमोयस्यावा राजदंतादिः यमी दृतिस्मषद्भविशरणादौ। १२६
गत्यर्थाकेतिक्तः रन्ध्यामितिनिष्ठानत्वंप्रसन्नास्त्री सुरायांस्यात् स्वच्छसंतुष्टयोस्त्रिषु इण् ऋजेन्द्रेति निपातितः यद्वा इं कामं राति रादाने आतोनुपेनिकः कुत्सितं अंबरं
कुगतीतिसमासः कोः कादेशे न्युरूपेचिकं इदं वरं नीलांवरमस्यास्ति अर्शआद्यच् तस्येयं तस्येदमित्यण्॥

कंदंवेजातोरसः तत्र जात इत्यण् कादंबं राति वा कः सौत्रादिः कादंबरसुरद्रुमग्रे मघमेदेन पुंसकं स्त्री वा रुग्लीपरभ्रतामारतोसारिकासु च भागुरिमते टापि परिस्रुता यद्वा
परितः स्रूयते स्म लोकैः स्रुगतौ क्तः परिस्रुता स्त्री वा रुण्यांस्यन्ते स्यादभिधेयवत् ३६ माद्यन्त्यनया मदी हर्षे इषिमदिमुदीत्यादिना किरच् कश्यते ऽनेन वा कश ग
दे वा हुलकाद्यः मद्याश्व मध्ययोः कश्यमिति रंतिदेवः कश्यास्त्रिषु कश्यार्हे स्यात् क्लीबं मद्याश्वमध्ययोरिति विश्वः माद्यंत्यनेन गदमदचरेत्यादिना यत् त्रयोद
शमद्यसामान्यस्य अवदश्यते दंशदशने कर्मणि घञ् भावे वा एकं पानरुचिजननभक्षणस्य शुन्यते शुनगतौ ग्रमता डुः शुंडापानगृहे मता शुंडापि जलह
स्तिन्यां मदिराकरिहस्तयोरिति विश्वः पिवं सत्र पापाने अधिकरणे ल्युट् पानं पातिभाजनरक्षणे मदस्य स्थानं त्रीणि मधुनो वारः मधुनः क्रमः द्वे मधुपानावस
रस्य ४० मधुकपुष्पं मधु तस्यासवः मधुनाकृतः संधितः कुलालादिभ्यो वुञ् मन्यते मनज्ञाने फलिपाटीति साधुः मधुपुष्परसे क्षौद्रे मद्ये नातु मधुद्रुमे वसंतदैत्यभि
च्चैत्रे स्यात् जीवं स्त्री तु योषितीति विश्वमेदिन्यौ मृद्वीका द्राक्षा तस्या विकारः तस्य विकार इत्यण् अनुशतिकादेरत्र वा के चित्तु माध्वीकमिति पठंति तत्र पृषोदरादित्वं अ

गंधोत्तमाप्रसन्नेराकादम्बर्यः परिस्रुता ३६ मदिराकश्यमद्ये चाप्यवदंशस्तु भक्षणं शुण्डापानं मदस्थानं मधुवारा मधुक्रमा ४० ॥
मध्वासवो माधवको मधु माध्वीकमद्वयोः मैरेयमासवः शीधुर्मेदको जगलः समौ ४१ सन्धानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः ॥

द्वयोरिति क्लीबमित्यर्थः चत्वारि मधुकपुष्पकृतमद्यस्य स्वामी तु द्वौ द्वौ पर्यायावाह मिरायां देशविशेषे ओषधिविशेषे वा भवं नद्यादिभ्यो ढक् आसूयते षुञ् अभिषवे
ऋदोरप् शीरते ऽनेन शीङ् धुक् अर्द्धर्चादिः पुंनपुंसकयोः हृजीवात्तुस्याण् शीधवत् इति त्रिकांडशेषः यद्यपि शीधुरीक्षुरसैः पक्वैरपक्वैरासवो भवेत् मैरेयं धातकीपु
ष्पगुडधानाम्बुसंहितमिति माधवस्तथापि भेदमनादृत्योक्तं त्रीणि इक्षुपक्वरसान्नमद्यस्य मेद्यति जिमिदास्नेहने कृञादिभ्यो वुन् भूषगालति गल्यते वा गल अदने
यङ्लुगन्तादच संज्ञापूर्वकत्वात् दीर्घोऽकित इति न दीर्घः जगलो मदनद्रुमे दके पिष्टमद्ये च द्वे सुराकल्कस्य ४१ संधीयते डुधाञ् ल्युट् संधानः स्यादभिषवे त
थासीधवृत्तेऽपि चेति विश्वः अभि सूयते षुञ् अभिषवे ऋदोरप् भावे वा ल्युडपो भवेदभिषवः स्नाने मद्यसंधानयज्ञयोरिति विश्वः द्वे आम्रादिसंधानस्य करणं कणश्च द्वे

CC-0. In Public Domain. Digitization by eGangotri

अ॰टी॰ उत्वाद्यश्चेतिसाधुः कर्मणिवाकिप्एवंपापेसुरावीजेइतिविश्वः ह्वानं ह्वयतेवाह्वेञ्संपदादिः क्विपलयूस्यहूः हे नानाद्रव्यकृतसुरावीजस्य मत्तनग्नकृता ह्वानस्येत्य
टी॰रा॰ न्येकारोत्तक्रियया उत्तरः सुरायाःमंडः कारोत्तमइतिस्वामीहे आसंभूयपिबंत्यत्रल्युट् पानस्यगोष्ठीस्वार्थेकः हे ४२ चष्यतेऽनेनचषभक्षणे क्वुन् चषकोऽस्त्रीसुरापात्रंमद्य
१३० मद्यप्रभेदयोः पानस्यपात्रं हे स्त्रियतेसृगतौ कृआदिभ्यो वुन् सरकः शीधुपानेस्तुशीधुनोर्मद्यभाजनेइत्यजयः अपिशब्दात्सरकोप्यस्त्रीसरकंवानाऽनुतर्षेणेतिरत्न
कोशः अनुतर्षणं अनेनवाञितृषापिपासायां भावेकरणेवाल्युट् घञि अनुतर्षोपि चषकश्चानुतर्षश्चेति भागुरिः हे मद्यपानस्य चत्वारि मद्यपानपात्रस्येति मुकु
टः धूर्वतिधुर्वीहिंसायांहसिमृग्रिणिणिति तन् राल्लोपः धूर्त्तंतुखंडलवणेधत्तूरेनाविटेत्रिषु धार्तइतिपाठे धावनं धावुगतौ संपदादिः वाहुलकाद्वलोपः धावनेन
आर्तिः धार्तिरस्यास्तिज्योत्स्नादण् यद्वा धावनेन आर्तः अक्षे दीव्यति सुपीनिणिनिः कितानेभावेक्तः कितंवायति कितेनवातिवा ओवैशोषणे वागंधने आतोनुपति
कः कितवो धूर्तवन्मत्तेवंचकेकनकाह्वयेइतिविश्वः अक्षेषुधूर्तः सप्तमीशौंडैरितिसमासः द्यूतंकरोतिक्विपपंच ४३ लस्जतेस्म ओलस्जीव्रीडने गत्यर्थेतिक्तः स्व

कारोत्तरः सुरामंडआपानंपानगोष्ठिका ४२ चषकोस्त्रीपानपात्रंसरकोप्यनुतर्षणं धूर्तोक्षदेवीकितवोऽक्षधूर्तोद्यूतकृत्समाः ४३ स्युर्लग्
नकाः प्रतिभुवः सभिकाद्यूतकारकाः द्यूतोस्त्रियामक्षवतीकैतवंपणइत्यपि ४४ पणोक्षेषुग्लहोक्षास्तुदेवनाः पाशकाश्चते॥ ॥

र्थेकः प्रतिनिधिर्भवतिक्विप् हे जामिनइतिख्यातस्य सभाद्यूतमाश्रयत्वेनास्यास्तित्रीह्यादित्वाट्ठन् सभाद्यूतंसभागृहमितिरुद्रः द्यूतंकारयतिअण् स्वार्थेकः ण्वु
लितुद्यूतस्यकारकः हे देवनं दिवुक्रीडादौ भावेक्तः अक्षाः पाशकाः संत्यस्यां मतुप् लोकास्त्रीत्वं कितवस्यकर्मयुवादित्वादण् कैतवंतुछलेद्यूतेकैतवः कितवे १३०
रिपौपणोग्लहो ऽस्यस्मिन् अर्धआद्यच् चत्वारिद्यूतक्रीडनस्य ४४ पण्यतेउत्सृज्यते पणव्यवहारेनित्यपणइतियोगविभागात् अप् ग्लस्यतेअनेनवा ग्लहआदा
नेपुंसीतिघः हलश्चेतिघञ् संज्ञापूर्वकत्वान्नवृद्धिः गृह्यतेवाअक्षेषुग्लहइतिसाधुः हे द्यूतेलाप्यमानस्य अक्षतिअक्षूव्याप्तौ अच् अक्षोज्ञानात्मशकटावय
वेषुसुपाशकेरुद्राक्षद्राक्षयोः सर्पेविभीतकेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ·टी· रावपिचक्रे कर्षप्रमास्त्री वमत्संसौवर्चलेंद्रिये दीव्यंतियेन करणेति ल्युट् देवनं व्यवहारे स्याज्जिगीषाकीडयोरपि अक्षेषु देवनः प्रोक्त इति विश्वः पाशयति पाश।
टी·रा· बंधे चुरादिः ण्वुल् कुत्वात्रीलिपरिणो वामहस्तिणतो नयनं लीलापरिण्योरिति घञ्‌ एकं ४४ पंक्तो पंक्तौ अष्टापदान्यस्य अष्टनः संज्ञायामिति दीर्घः अष्टापदमस्त्रि
१३१ यां शारीणां फलं पटः अष्टापदोऽस्त्री फलके शारीणां फलकेपि चेति मेदिनी. फलं हेतु समुत्थेस्यात्फलके व्युष्टिलाभयोरिति विश्वः शारीणां खेलनाधारपटस्य
हूसमाख्यामिः कृतं द्यूतं सम्यगाहूयंते ऽत्र हूत्र पुंसीतिघः बाहुलकान्नात्वं हूः सर्वलिंगासंग्रहादसंपूर्णतां परिहरति उक्ता इति अत्र वर्गेये योगिकापूर्णा व्या

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियां ४५ अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः
उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः ४६ ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥
इति शूद्रवर्गः ॥ इत्यमरसिंहकृतौ नामलिंगानुशासने भूम्यादिकाण्डो द्वितीयः साङ्गः एवसम

मालाकारमार्दंगिकवैणविकादयः पुंसि प्रचुरप्रयोगदर्शनादेकस्मिन् लिंगे पुंसि ये यौगिका उक्तास्ते ताद्धर्म्यात्तद्योगवृत्तेर्तेषामन्यतोऽन्यत्र जातौ वृत्तौ सत्यां अ
न्यत्र स्त्रियां क्लीबे चोहनीयाः यथा मालाकारी स्त्री मालाकारं कुलमित्यादि येप्ययौगिकाः करणमालिककुंभकारादयस्ते जातिवचनत्वाच्छूद्रादिवज्जातेरि
त्यादिना ङीषि लिंगांतरे स्त्रीलिंगे क्लीबत्वेपि बोद्धव्याः ४६ इति शूद्रवर्गविवरणम् ॥ इति श्रीवघेलवंशोद्भवश्रीमहीपरविषयाधिपश्रीमहाराजकुमारश्रीकीर्ति १३१
सिंहदेवाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजीदीक्षितविरचितायाममरटीकायां व्याख्यासुधाख्यायां द्वितीयः कांडः संपूर्णम् ॥ शुभम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इतिद्वितीयकांण्डसमाप्तम्·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सटीकामरकोशस्य तृतीयकाण्डः प्रारम्भः ॥

अ॰ तृ॰
टी॰ रा॰
१

॥श्रीगणेशाय नमः॥ ॐ विशेष्यनिघ्नैरिति। इह सामान्यकाण्डे एतैः कृत्वा उपलक्षिता वर्गा उच्यन्ते कीदृशास्ते वर्गाः स्वर्गादयः संश्रय आश्रयो येषां तं सुकृत्या
दयो देवासुरमनुष्येष्वेव विशेषणत्वेन कर्मधारयेणादयो व्यापारेन यासंबद्धं ते लिंगान्यादेयेषां तानि तेषां संग्रहाः आदिना नामानि लक्षशेफालिकेत्यादीनि
१ अस्मिन्वर्गे लिंगज्ञानोपायमाह स्त्रीति स्त्रीदारकलत्रादिभिः पदैर्यल्लिंगसंख्याविशिष्टैः स्त्रीदारकलत्रादिरूपं यद्विशेष्यमुक्तं तेन गुणादिशब्दास्तल्लिंगसंख्याविशि
ष्टास्तस्य विशेषणानि स्युः तथाहि सुकृतिनी स्त्री सुकृतिनो दाराः सुकृतिकलत्रं दंडिनी स्त्री दंडिनो दाराः दंडिकलत्रं पाचिका स्त्री पाचका दाराः पाचकं कलत्रं २ सु
कृतमस्यास्तीति इनिः पुण्यमस्यास्ति मतुप् धनं लब्धा धनगणं लब्धेति यत् धन्याधान्यामलक्योः स्याद्धन्यं पुण्यवति त्रिषु इति विश्वमेदिन्यौ श्रीलक्ष्मीसौभाग्यस्य महती
च्छास्य महानाशयोऽस्य आशयः स्यादभिप्राये मानसाधारयोरपि हैम महाभिलाषस्य प्रशस्तं हृदयमस्य हृदयाच्चालुरन्यतरस्यां शोभनं हृदयमस्य मित्रत्वाविवक्षणा

श्रीगणेशाय नमः॥ विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि। लिंगादिसंग्रहे वर्गाः सामान्ये वर्गसंश्रयाः १ स्त्रीदाराद्यैर्यद्विशेष्यं यादृ
शैः प्रस्तुतं पदैः। गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः २ सुकृती पुण्यवान्धन्यो महेच्छस्तु महाशयः। हृदयालुः सुहृदयो महोत्साहो
महोद्यमः ३ प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः॥ (१ नत्वज्ञावः सुहृदय इति वा पाठः सह हृदयेन तेन सहेति बहुव्रीहिः आलिमात्रस्य
तथात्वादत्र प्रशस्तपरत्वे हृदयशब्दस्य हेतुः शुद्धमनसः महानुत्साहोऽस्य महानुद्यमोऽस्य हेतुः साध्य कृत्येपि साधनपरस्य ३ प्रकृष्टो वीणायां यद्वा वीणया प्रगा
यति प्रगीयते वा सत्यायेति णिजन्तात् पचाद्यच् कर्मणि घञ्वा एरज् एयं तानामिति नाच् निपुणति पुणकर्मणि शुभे इगुपधेति कः अभिजानाति विजानाति आत
श्चोपसर्ग इति कः ष्णसामीन् गत्यर्थेति क्तः निनदीभ्यामिति षत्वं शिक्षा जातास्य तारकादिः यद्वा शिक्ष विद्योपादाने अकर्मकत्वात् कर्तरि क्तः विज्ञानं
बुद्धिः विज्ञानं यज्ञं तनुत इति श्रुतेः विज्ञाने नियुक्तः तत्र नियुक्तः इति ठक् यद्वा विज्ञानेन जायति तेन दीव्यतीति ठक् यत्तु विज्ञानेनैव पुण्यं तेन व्यवहरति तेन
दीव्यतीत्यादिना ठन्नित्यभाणि मुकुटेन तन्न उक्तसूत्रे व्यवहारमात्रस्यानुपादानात् कठिनान्तेति सूत्रेऽर्थोपादानेपि विज्ञानस्यानुपादानात् श्रोत्रियादित्वात् ठुनि विज्ञानि

संस्कृतपरत्वं यद्वा कृतं कर्म प्रशस्तमस्य इनिः कुशान् लातीति कः कौ पृथिव्यां शलति वा शल चलने पचाद्यच् णिजर्थे लक्षणया वा कौ शलति चालयति राजकार्याणीति यद्वा कुः पा
पिपर्दर्थयोः पापात् शलति बुद्धिवैभवात् कुशलः शिक्षिते त्रिषु क्षेमे च सुकृते वापि पर्याप्तौ च नपुंसकमिति विश्वमेदिन्यौ इत्थं ४ पूज्यते पूज पूजायां अर्चायत् प्रती
क्षते ईक्ष दर्शने ऋहलोर्ण्यत् पूज्यः श्वशुरे बन्धुयोरिति हैमः प्रतीक्ष्यः प्रतिपाल्यो मान्यः पूज्ये चेति हैमः द्वे संशयमापन्न इति ठक् संशयमापन्नं मानसं यस्य यस्मिन् वा
द्वे संदेहविषयस्य संदेहाश्रयस्य वा दक्षिणामर्हति कडङ्गरदक्षिणाच्छ चेति छ यतौ दक्षिणामर्हति अर्ह पूजायां अर्हे इत्यच् त्रीणि दक्षिणायोग्यस्य ५ मा
याचक्षेति वदति वदेरान्यः वदान्यो दानशौण्डस्याज्वारु वादिनि वाच्यवत् स्थूलं कूटं लक्षमस्य स्थूललक्षः महेद्रिर्लक्ष्यते वा कर्मणि ण्यत् अयकारपाठे तु घञ् दाने शौ
डः सप्तमी शौण्डैरिति समासः शौण्डो मत्तेऽपि विख्याते इति विश्वः बहु प्रददातीति प्रदाता इति कः चत्वार्यतिदातुः जीवति जीवेरातृकन् वृद्धिश्च जैवातृकः पुमान् सोमे

वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ४ पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः दक्षिणीयो दक्षिणार्हस्तत्र दाक्षिण्य इत्यपि ५
स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् ६ परीक्षकः कारणिको वरदस्तु समर्द्धकः हर्षमा
णो विकुर्वाणः प्रमना हृष्टमानसः ७ दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः ॥

११ कृषकायुष्मतोः क्षिविति विश्वमेदिन्यौ अतिशयितमायुर
स्य मतुप् तसौ मत्वर्थ इति मत्वान्नरुत्वं द्वे आयुषः अन्तर्वाण्यस्य समासान्तविधेरनित्यत्वान्न कप् गोस्त्रियोरिति ह्रस्वः यद्वा अन्तर्वाणयति वण शब्दे स्वार्थे णिजन्तादिच्
ः शास्त्रं वेत्ति सः शास्त्रवित् क्विप् द्वे ६ परीक्षते ईक्ष दर्शने ण्वुल् द्वे हर्षति हृषु चरतीति ठक् करणं हेतुकर्माणि द्वे परीक्षाकारकस्य वरं ददातीति कः वरदः पुनः प्रसन्ने
शान्तचित्ते वरदा तु कुमारिका इति हैमः समृद्धोति ऋधु वृद्धौ राऽऽवुल् द्वे हर्षति हृषु अलीके नाच्छीत्येति चानश् यत्तु हृष्यतीति विगृहीतं मुकुटेन तन्न देवादिकत्वा
त् श्यनि सति हृष्यमाण इत्यापतेः विकुरुते चानश् शानच् वा प्रकृष्टमनो यस्य हृष्टं मानसमस्य चत्वारि हर्षितमनसः ७ दुःस्थितं मनोऽस्य विगतं विविधं वा मनो
यस्य त्रीणि दुःखितमनसः उद्गतमनोऽस्य उत्क उन्मना इत्युद्गतमनस्काद्धेतोरुच्छब्दात् स्वार्थे कन् द्वे उत्कण्ठितमनसः दक्ष वृद्धौ शीघ्रार्थे च दुदक्षिभ्यामिनन् दक्षतीति

अ. तृ. नेदिभिस्त्रियांसरतिसृगतोअलचसरलः प्रतिकाष्टेनाथोदारावक्रयोस्त्रिषुउत्कृष्टमासमंतात्नराति आनश्चेतिकः उदर्यतेऋगतिप्रापणयोः कर्मणिघञ्वाउ

टी. रा. दारोदातृमहतोरीस्त्रिलोप्यविधेयवतात्रीणिऋज्वाशयस्यसुकल्पते कलशब्दसंख्यानयोः ईषद्दुरितिखल् शोभनाकलायस्येतिवाएकं ८ ततपरमुत्तमयस्यतेन

२ पूर्यतेः पृपालनपूरणयोः ऋदोरपवाप्रासायिषिञ्चं धनेः आसंजिषञ्जसंगेकर्मणिक्तः त्रीणितात्पर्ययुक्तस्य इष्टश्चासावर्थश्चतत्रउद्युक्तः उत्तउद्योगंसवतिसुनो

तिवाषुप्रसवैश्वर्ययोः सुञ्अभिषवेवाविचिसंज्ञापूर्वकत्वात्गुणाभावः क्विपि आगमशास्त्रस्यानित्यत्वात्तुगभावोवाततः संज्ञायांकनयद्वाउत्सुवतिषूप्रेरणेमित

द्रवादितुडुः सन्स्विति क्विपवाकनिकेणइतिह्रस्वः द्वेइष्टार्थोद्यमवतः पंचापितत्परपर्यायाइत्येकेप्रत्येकमगात्प्रतीयतेस्मेतिवाइण गतौगत्यर्थत्वात्कर्तरिक्त

र्मणिवाक्तः प्रथतेस्मप्रथप्रख्यानेअकर्मकत्वात्कर्तरिक्तः अख्यापिख्याप्रकथनेचक्षिङः ख्याञ्वाक्तः अवेदिविद्लाभेक्तः विनोभोगप्रत्यययोरितिसाधुः यज्ञा

यितःअववोधनेक्तः यद्वाविजानातिमतिबुद्धीतिक्तः व्यश्राविश्रुश्रवणेक्तः षट्प्रसिद्धस्य ८ कृतमुच्चारितंलक्षणंनामास्यलक्षणंनाम्निचिन्हेचेतिश्वः आहता

दक्षिणेसरलोदारौसुकलोदातृभोक्तरि ८ तत्परेप्रसितासक्ताविष्टार्थोद्युक्तउत्सुकः प्रतीतेप्रथितख्यातवित्तविज्ञातविश्रुताः ८

गुणैः प्रतीतेतुकृतलक्षणाहतलक्षणौ इभ्यआढ्योधनीस्वामीत्वीश्वरः पतिरीशिता १० अधिभूर्नायकोनेताप्रभुः परिवृढोधिपः ॥

मभ्यस्तंलक्षणंयस्यआहतंगुणितेपिस्यादितिविश्वः द्वेगुणैः प्रसिद्धस्य इभमर्हतिदंडादित्वाद्यत् यद्वा एकामातंभ्यसतेभ्यसभयेअन्येभ्योपिदृश्यतइतिडः इभ्योधनवती

भ्यानुक रेणवांसल्लकीतरावितिहेमचंद्रः आध्यायतिआतइतिकः पृषोदरादिः बहुधनमस्यइनिः त्रीणिबहुधनेस्वस्वमस्यास्तिस्वामिन्नैश्वर्ये इतिसाधुः स्वामीप्र राम

भुविप्रोषयोरितिविश्वः ईष्टेईशऐश्वर्येष्येशतिवरचइश्वरोमन्मथेशंभोनार्थेस्वामिनिवाच्यवत् ईश्वरीचेश्वरोमायामितिविश्वमेरिन्योपातिपारक्षणेपातेर्डतिः पति २

र्धवेनात्रिषीशेचेतिविश्वः ईष्टेतृनतृन्वा १० अधिभवतिभुवः संज्ञातरयोरितिक्विपनयतिणीञ्प्रापणेण्वुलतृचौनायकोनेतरिश्रेष्ठेहारमध्यमणावपीतिविश्वः

मचंद्रोप्रभवतिविप्रसंभ्यइतिडुः परिवर्हतिपरिवृंहतिवावृहवृहिवृद्धौप्रभोपरिवृढइतिसाधुः अधियातिआतश्चोपसर्गइतिकः मूलविभुजादिरितिमुकुटोक्तिश्वं

समृध्नोति ऋधु वृद्धौ अकर्मकत्वात् क्तः द्वेअति संपन्नस्य कुटुंबपोषणे संसक्तः व्याप्रियते स्म पृङ् व्यायामे अकर्मकत्वात् क्तः व्यापृतस्तत्परो युक्त इति वा पालितः ११ अभ्यागारे नियु
क्तः अगारांतात् ठन् अभि अधिकः आगारिको वा आधानमाधिः उपसर्गे घोः किः उपगत आधिं अन्यादय इति समासः यत्तु उपाद्धाति कुटुंबमिति विगृह्य उपसर्ग इति किरित्यु
पन्यस्तं मुकुटेन तन्न कर्तरि किप्रत्ययासंभवात् उपाधिर्धर्मचिंतायां कुटुंबव्यापृते छले विशेषणे पुंसीति विश्वमेदिन्यौ श्रीणि कुटुंबव्यापृतस्य अंगानि च रूपं च अंगरूपा
णि वराणि च तान्यंगरूपाणि तैरुपेतः सिंहः श्रेष्ठं संहननमस्य संहनने सिंह इति वा राजदंतादिः एकं १२ निश्चयेन ध्रियते ध्वर पोत्रानृ हलो णयत् निर्ध्रार्य इति पाठे धृञ् धा
रणे इति धातुः व्यसनेष्वपि दृय्येवापि स्वविकारं स दाम नः तत्त्व सत्त्वमिति शोकं तत्संपदा संपन्न उद्यमं कुर्वन् संयुत इति वा पाठः एकं निःशंककार्यकर्तुः न वाच्यस्यमूकमिति काय
ति आतो नुपेति कः यत्तु मूयते बध्यते वाग स्य मूङ् बंधने बाहुलकात् कवतिमवतिभ्यामिति कगिति मुकुटेनोक्तं तन्न धातुप्रत्ययानां कारकेषु विहितत्वात्संबंधे विधानाभा

अधिकर्द्धिः समृद्धः स्यात्कुटुंबव्यापृतस्तु यः ११ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयं वरांगरूपोपेतो यः सिंहसंहननो हि सः १२ निर्द्धार्यः का
र्यकर्ता यः संपन्नः सत्वसंपदा अवाचि मूकोऽथ मनोजवः सपितृसन्निभः १३ सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः लक्ष्मीवान् लक्ष्मणः श्री
लः श्रीमान् स्निग्धस्तु वत्सलः ॥१४॥ ९ वात् अवतेः प्रयोजनाभावात् धातोरित्येकत्वविवक्षणेन धातुसमुदायात् प्रत्ययाभावात् उक्तसूत्राभावाच्च मूके
देस्याद् वाग्दीने ष्विति हेमः ऊज वतिज्ञः सौत्रः अच् मनोजवं वेगवत् यस्मिन् यत्तु मनोजवति प्रविशतीत्यजिति मुकुटेनोक्तं तन्न उक्तविग्रहात्पितृसंनिभस्यालाभात्
अधिकरणे विवक्षायां तु अचो संभवात् अप् ओ चित्यात् मनोजव पितृसधर्माणः इति नाममाला पितेव सम्यग्निभातिभादीप्तौ आत श्चोपसर्गे इति कः स्वामीतु मनोज
व सश्च मसादिवदिसाह द्वैपितृसमस्य १३ को कनिकुक आदाने इगुपधेति कः एषोदरादिः यद्वा कवनं कूः कूङ् शब्दे संपदादिः कुवः शब्दस्य कुमूः कीर्तिभूमिरिति
यावत् कूकं ददाति कूकं वा दयति वा दैप् शोधने आतो नुपेति सुपीति योगविभागात् कः एकं लक्ष्मीरस्यास्तिमतुपल स्म्या अचेति पामादित्वान्नोत्वं च लक्ष्मणालौ षधीमे
देसारस्याम पियो भितिरामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवत् श्रीरस्यास्तिसिध्मादित्वाल्लच् श्रियं लाति वा कपिलकादित्वाल्लत्वे श्रीलोपि मतुवपि च त्वारि सिस्त्वति स स्नि

Digitization by eGangotri

अ० तृ०
टी० स०
३

दयतेस्मृहिगृह्णीत्यालुच् करुणा शीलमस्य शीलमिति ठक् कृपां लातिमितद्र्वादित्वात् डुः शोभनः उः शंभुः सूःस्थिरतः रतं वायस्य यह्यासुरभते सो रभेः कोरम्भेपूर्वपदस्य च दीर्घः यत्तु नातपुलितसूरता इति रभेःक्तः दीर्घश्चेति वचनमुपन्यस्तं मुकुटेन तन्न तपं चयाग्धातोनलभ्यते चत्वारि स्व आत्मा तंत्रं प्रधानमस्य अपगतमावृत्तमावरणमस्य अपावृतस्त्वपहृतेस्वतंत्रेपि च वाच्यवदिति विश्वमेदिन्यौ स्वेन ईरितुं शीलमस्य ईर गतौ सुप्यजातौ णिनिः स्वादीरेरिणोरितिवृद्धिः स्वः छंदोभिलाषोयस्य निरङ्कुशोवग्रहः। न्नियमात् निरादयइति समासः पंच १५ परस्तंत्रं प्रधानं यस्य परस्मिन्नधि सप्तमीशौण्डेरिति समासः अषडक्षेति स्वः यत्तु परोऽध्युपर्यर्थ इति विगृहीतं तन्न शौण्डादिषु अधिशब्द्पाठवैयर्थ्यापातात् परः स्वाम्यस्यास्तिनाथो स्यास्तीति मतुप् चत्वारि इ नमधिगतः अस्यादय इति समासः अधि उपरि इनो स्येति वा निहन्यते निगृह्यते हन्तेर्घञर्थे कः आयतते स्मयतीप्रयत्ने अकर्मकत्वात् क्तः न स्वः छंदोस्य गृह्यते गृह उपादाने पद स्वैरीति कापस्वार्थे कन् गृह्यकानि घ्नके द्वे के इति विश्वमेदिन्यौ पंचाधीनसामान्यस्य एके तु न कामिः

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः स्वतंत्रोपावृतः स्वैरी स्वच्छंदो निरवग्रहः १५ परतंत्रः पराधीनः परवान् नाथवानपि अधीनो निघ्न आयत्तोऽस्वच्छंदो गृह्यकोऽप्यसौ १६ खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः जाल्मोऽसमीक्ष्यकारी स्यात् कुंठो मंदः क्रियासु यः १७ कर्मक्षमोऽलंकर्मीणः क्रियावान् कर्मसूद्यतः स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः ॥१८॥

१९ पर्यायमाह १६ खलं भूस्थानकल्कौ क्षितिविश्वः खलं पुनाति पूञ् पवने क्विप् बहु करोति भुवं संमार्ष्टि किंयत्न टङ्क डु कृञ् विधानमित्यस्य च स्त्रियां बहुकरा यत्तु नाच्छील्यार्थविवक्षायां तु ट एव स्त्रियां बहुकरी त्युक्तं मुकुटेन तन्न टापवादत्वेनाञ्विधानात् ह्रस्वं मार्जयतः सूत्रं तंतु व्यवस्थयोरिति विश्वः दीर्घसूत्रं व्यवस्था यस्य चिरा क्रिया यस्य द्वे अतिविलंबेन क्रियासंपादकस्य जाल यति जाल्मे वा जलअपवारणे वाहुलकात् मः धूमवन्म इति मुकुटस्तु चिंत्यः इषियुधीति सूत्रे जलेरग्रहात् धूमेत्तु गुणप्रसंगात् नगिति वर्क्षयुक्तत्वाच्च जाल्मस्तु पामरे असमीक्ष्यकारिणि चेति हैमः असमीक्ष्याविचार्य कर्तुं शीलमस्य सुप्यजातौ णिनिः द्वे कुंठति कुठि च गतिप्रतिघाते आलस्ये च पचाद्यच् एकं मंदः क्रियासु यस्य १७ कर्मसु क्षमः सप्तमीति योगविभागात् समासः कर्मणे क्रियायै अलं समर्थः अषडक्षेति खः प्राप्तापन्नालं पूर्वेति परवल्लिंगनिषेधात् समासः पर्यादयो ग्लानाद्यर्थे इति वा द्वे क्रियाकरणे समर्थस्य क्रियास्यास्तीति मतुप् एकं कर्मशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भरण्यंवेतनं भुंक्ते क्विप् क्वचित् कर्मण्यभुगिति पाठः तत्र कर्मणि साधु तत्र साधुरिति यत् तु कर्मण्यं वेतनं कर्म करोति कर्मणि भृतावित्तिटः हे मूल्येन कर्म कुर्वतः अयं शूद्रवर्गे उ
क्तो विभरण्यभुगिति पर्यायो तत्र कथनार्थमनूदितः करोति कर्मण्यण् तन् क्रियः कर्म कारः क्रियः अभृतक्रिय इत्यर्थः यो वेतनं विना कर्म करोति तस्यैकं अपकृष्टं स्नातः प्राद
योगतादर्थ इति समासः मृते स्नातः सप्तमीसमासः हे मृतमुद्दिश्य स्नातस्य आमिषमश्नाति अश्नभोजने सुपीति णिनिः शुष्कली शुष्कमांसे पिमांसमात्रेपि सामतानाम
ति श्रोषे इत्यण् स्वामी तु शष्कुल इति पठति तत्र पृषोदरादिः संज्ञापूर्वकत्वाद्वृद्ध्यभावो वापि शुष्कलः शुष्कमांसस्यपलिके पिशिताशिनि इति हेमः द्वे १९ बुभुक्षा जातास्य भ
तारकादित्वादितच् क्षुध्यतिस्म अकर्मकत्वान् क्तः वसतिक्षुधोरिडीट् अशुमिच्छुः अदेः सनि लुङ् सनोर्घस्लृ सनादंसेत्युः अशनस्येच्छा अशनायेति साधुः अशनाया
जातास्य तारकादिः चत्वारि परस्यान्नं परान्नं नित्यमस्य अर्शआदिभ्योऽच् वापिंडमाजीवन इति धरणिः परस्यपिण्डः तमति कर्मण्यण् द्वे परान्नजीवनस्य भक्ष्यति भ

कर्मण्यभुक्कर्मकरः कर्मकारस्तु तत्क्रियः अपस्नातो मृतस्नात आमिषाशी तु शौष्कलः १९ बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः
नः परान्नः परपिंडादो भक्षको घस्मरोऽद्मरः २० आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके २१ सर्वान्नी
नस्तु सर्वान्नभोजी गृध्नुस्तु गर्द्धनः लुब्धोभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ २२ सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः ॥

स्य अदने एवुल् धसतिघस्लृ अदनेस घस्मरः क्मरच् अति त्रीणिभक्षणपरस्य २० आद्वीत् स्य अकर्मकत्वात् क्तः द्विवो विजिगीषायामिति निष्ठानत्वं यस्य विभाषेति नेट्
उदरे प्रसितः उदराट्ठगाद्यून इति ठक् द्वे आत्मानं कुक्षिं च विभर्ति फले ग्रहिरात्मंभरिश्चेति साधुः चात् कुक्षिंभरिः द्वे २१ सर्वेषामन्नानि सर्वान्नानि भक्षति अनुपदसर्वा
न्नेति खः सर्वान्नानि भोक्तुं शीलमस्य सुपीति णिनिः द्वे सर्ववर्णान्नभक्षकस्य गर्द्धनशीलः गृधु अभिकांक्षायां त्रसिगृधीति क्नुः जुचंक्रम्येति युच् लुभ्यति स्म लुभ गार्द्ध्ये ग
त्यर्थेति क्तः लुब्ध आकांक्षिणि व्याघे इति हेमचंद्रः अभिलष्यति लषकांतो लषपतपदेत्युकञ् तृष्यति ञितृषपिपासायाम् स्वपितृषोर्नजिङ् पंच लुब्धस्य गार्हितं लुपति
लुभ्यति लुब्ध इदेदेलुपसदेतियङ् नाद् च गर्हितं लुभ्यति लुभ गार्द्ध्ये धातोरेकाच इति यङ् नाद् च द्वे अति लुब्धस्य २२ उद्धतो मदो हर्षोस्य क्वचित् सोन्माद इति पाठः सुन्माद इत्सपि स

२८ उन्मादेन वर्तते सु अतिशायित उन्मादोऽस्य तत्र सोप
मर्गत्वान्मदेर्घञ् उन्मदनशीलः ॥

अ·टी·रा· मदो हर्षे अलंकृत्रितीष्णुच् हेउन्मादश्शीलस्य नव्यनापिणी त्रुश्चापणोक्तः समुद्धतिस्म समुद्धन्यते स्मेति वा हन्तेर्गत्यर्थत्वात्कर्तरि कर्मणि वा क्तः समुद्धतं समुद्धोऽप्यविनीते चवा
च्यवन्त् हेमात्पतिगत्यर्थेतिमदेः क्तः शुंडायांपानागारे भवः तत्र भवइत्यण् शौंडो मत्ते च विख्याते पिप्पल्यां तु भवेत् स्त्रियामिति विश्वमेदिन्यौ उद्धतः कटआवरणमावारको वास्यय
४ द्वाउद्धतमरदृते रुच्छु व्यात्सार्थसंभोरश्चेति कटच् उत्कटः स्त्री त्रमनयोरिति हैमः स्त्री वतिस्म स्त्रीहमदे अकर्मकत्वात्कर्तरि क्तः कोवा अनुपसर्गात्फुल्लेति साधुः नांतोप्यपभ्र
ष्टो वालो समवुध्यते ति व्यासप्रयोगात् तत्र वाकुल्लकात्कनिन् चत्वारि कामयते कमुकान्तो लषपतपदे त्युकञ् णिङभावेत् च अनुकामयतेऽभिकामयते अनुकामि
केति साधुः २२ नमिकंपीतिरः अभिकामयते अनुकामिकेति साधुः अभीकः कामुके क्रूरे निर्भये त्रिषु नाकवो अनुदात्तेत श्चेति युच् कमनः कामुका कामेऽभिरूपेऽश्रो
कथादयेणिङ् नाद्युच् नवविधातुंशक्यः अचोयत् ईदयतिगुणः प्रदृप्तो निदृत्तो वाविनये ग्रहीतुं शीलमस्य सुपीति णिनिः वचने तिष्ठति स्म गत्यर्थेति क्तः तत्पुरुषे कृती

मतेशौंडोत्कटक्षीवाः कामुके कमितानुकः २३ कम्रः कामयिताभीकः कमनः कामनोभिकः विधेयो विनयग्राही वचनेस्थित आश्रवः २४
वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः धृष्टे धृष्णुर्वियातश्च प्रगल्भः प्रतिभान्विते २५ स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते ॥

सप्तकू आश्रृणोतिश्रुश्रवणेपचाद्यच् आश्रवो वचने स्थिते प्रतिज्ञायां च क्लेशे चेति हैमः चत्वारि प्रवृत्तिनिवृत्त्योर्विधातुं शक्यस्य २४ वशमधीनत्वं गतः वशंगत इत्ययनु
वशमायत्तता यां स्यादिति विश्वः प्रकर्षेण नेतुं शक्यः अचोयत् ह्वेनितराम भारिभृत्रभरणे क्तः व्यनापिणीत्रुक्तः विनीतस्तु निभृते निर्जितेंद्रिये वाणिज्ये साधुवाक्यस्थे वि
नयग्राहि ते हि ते दृति हैमः प्रश्रयमत्राप्रिगुणोः श्रित्रसेवायां क्तः त्रीणि विनययुक्तस्य धृष्णोति स्म त्रिधृषाप्रागल्भ्ये गत्यर्थेति क्तः धृषिशासीतीडभावः धृषेश्चेति नजिङ् धृ ४
ष्णुरिति पाठे त्रसि गृधीति क्नुः विरुद्धं यातं यस्य विरुद्धं यासीद्वा गत्यर्थेति क्तः त्रीणि निर्लज्जस्य प्रगल्भते गल्भ धाष्ट्र्ये पचाद्यच् प्रतिभानं आतश्चोपसर्गे इङ् प्रतिभयान्वितः प्र
ज्ञानवन्नवोन्मेषशालिनी प्रतिभा मतेति रुद्रः हेमप्रत्युत्पन्नमतेः २५ शालाप्रवेशमर्हति शालीनकौपीने इति साधुः हेसलज्जस्याविशेषेण लक्षयति लक्ष आलोचने अ
च्विस्मयेनाश्चर्येणान्वितः हेपरकीयधर्मशीलादेरशाश्चर्यसनधीरो धैर्यस्य ईश्वरस्य अपि अच् दृश्यदर्शे चेति कोः कादेशः हेरोगादिलक्षणेनाकुलमनसः त्रस्यति त्रसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रसित्रधीतिक्रुः विभेति ञिभी भये भियः क्रुक्लुकनौ क्रुकन् अपि भीरुरादौ त्रिलिंगः स्याद्रूपणोवितियावितिरूनि विश्वमेदिन्यौ चत्वारि भयशीलस्य २६ आशंसनं आङः शसि इच्छायां सनाशंसेरुः तृन् द्वे इष्टार्थप्राप्ती च्छोः गृह्यति गृह ग्रहणे चुरादावदंतः स्पृहिगृहीत्यालुच् अयामंतेत्यया देशः तृन् द्वे ग्रहणशीलस्य श्रद्दधाति स्पृहीत्यालुच् एकम् पतयति पत गतौ आलुच् लष पतेत्युकञ् द्वे पतनशीलस्य २७ लज्जाशीलमस्य अपत्रपते अलंकृञ्निराकृञ् इतीष्णुच् द्वे वंदते वदि अभिवादनस्तुत्योः शृवंद्योरारुः अभिवादयति एवुल् द्वे वंदनशीलस्य शृणाति शृ हिंसायां आरुः हंति लषपतेत्युकञ् हिनस्ति हिसि हिंसायां नमिकंपीति रः हिंस्रा का कारः नीमांस्योः स्त्रियां स्यात् घातुकेन्यवदिति विश्वमेदिन्यौ त्रीणि हिंसाशीलस्य वर्द्धते। वृधु वृद्धौ अलंकृञ्निती ष्णुच् अनुदात्तेतश्चेति युच् वर्द्धनं छेदने वृद्धौ वर्द्धनी तु गर्लतिकेति हेमः द्वे वर्द्धनशीलस्य २८ उत्पतति पत्लृ गतौ इष्णुच् तृन् द्वे ऊर्ध्वपतनशीलस्य भ अलंकरणशीलः अलंकृञ्निती ष्णुच् मंडनशीलः मडि भूषायां क्रुधमंडार्थेभ्यश्चेति युच् द्वे अलंकरणशीलस्य भवनशीलः ग्लाजिस्थश्च ग्स्नुः चाद्भुवः भुवश्चेतीष्णुच् तृन्

अधीरे कातरस्त्रस्ते भीरुभीलुकभीरुकाः २६ आशंसुराशंसितरि गृहयालुर्ग्रहीतरि श्रद्धालुः श्रद्धया युक्ते पतयालुश्च पातुके २७ लज्जाशीलोपत्रपिष्णुर्वंदारुरभिवादके शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुश्च वर्द्धनः २८ उत्पतिष्णूत्पतितालंकरिष्णुस्तु मंडनः भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः समौ २९ निराकरिष्णुः क्षिप्नुः स्यात्सांद्रस्निग्धस्तु मेदुरः ज्ञाता तु विदुरो विंदुर्विकासी तु विकस्वरः ३० विसृत्वरो विसृमरः प्रसारी च विसारिणि॥

त्रीणि भवनशीलस्य वर्त्तनशीलः वृतु वर्त्तने अलंकृञ्निती ष्णुच् अनुदात्तेतश्चेति युच् द्वे वर्त्तनशीलस्य २९ निराकरणशीलः इष्णुच् क्षेपणशीलः क्षिप प्रेरणे त्रसीति क्नुः द्वे निराकरणशीलस्य सांद्रो घनः स्निग्धश्चिक्कणः मेदनशीलः ञिमिदा स्नेहने भंजभासमिदो घुरच् द्वे जानाति तृन् वेदनशीलः विदिभिदि छिदेः कुरच् विंदुरिच्छुरिति साधुः त्रीणि ज्ञानशीलस्य विकसति कस गतौ वौ कसलसेति घिनुण् विकासः स्फुटनं व्यक्तीभावः इति इदं त्यांतेघरणिः तस्मादि निर्वास्थेशभासेति वरच् द्वे विकसनशीलस्य ३० विसरणशीलः सृ गतौ इण्नशजिसर्तिभ्यः क्वरप् ह्रस्वस्येति तुक् सृघसीति मरच् प्रसरणशीलः प्रेलपेति घिनुण् विसरणं यत्र विसारो स्मास्ति इनिः चत्वारि सहनशीलः षह मर्षणे अलंकृञ्निती ष्णुच् अनुदात्तेतश्चेति युच् क्षमणशीलः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·तृ· टी·रा· मृ

क्षमूसहनेक्तनतिजेः क्षमायांगुक्षिजकिदस्य इतिसनतितिक्षणशीलः सनाशंसेत्युः तृनः स्वरतीतिपक्षे इट् क्षमित्याह्यम्य इतिघिनुणूष ट् ३१ क्रोधनशीलः क्रुधकोपेक्रुध
मंडेतियुचनमर्षशीलः युच् अवश्यंकुप्यतिआवश्यकेतिणिनिः त्रीणिक्रोधनस्य चंडतेचडिकोपेपचाद्यच् चंडस्तुपमहासतिकोपनेतीव्रे इत्यविशेषेचचंडीतुशिवयोषिति
चंडाघनहरीशं खपुष्पयोरितिहेमचंद्रः अत्यंतंकुप्यतिक्रुधमंडार्थेभ्यश्चेतियुच् द्वेअतिक्रोधनस्यजागरणशीलः जागृनिद्राक्षये जागरूकः तृनेद्वेघूर्णतेस्म घूर्णभ्रमणे
गत्यर्थेतिक्तः घूर्णीजातास्येतिवातारकादिः प्रचलइवाचरतिकर्तुः क्यङ् सलोपश्चप्रचलायतेस्मगत्यर्थेतिक्तः प्रचलायाजातास्येतिवा द्वेसंजातघूर्णस्य ३२ स्वपनशीलः
त्रिष्वप् शये स्वपितृषोर्नजिङ् शयनशीलः शीङ् स्वप्ने शीङः श्रेत्यालुच् शयालुः स्याद्जागरेनिद्राशीलेचकुंजरइतिविश्वमेदिन्यौ निद्राशीलः द्राकुत्सायां गतौस्पृहिगृही
त्रिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् त्रीणिनिद्राशीलस्यनिद्रा तश्चअकर्मकत्वात्क्तः संयोगादेरितिनः शांतेस्मशीङ् पूर्ववत्क्तः निष्ठाशीङिति न किलंद्वेनिद्रांप्राप्तस्यपरांचस्यनभिमुखोभवतिअं
चुगतिपूजनयोः ऋत्विगितिक्विन् पराङ्मुखमस्यविभाषांचेरितिखार्थे खः द्वेविमुखस्य अवांचत्यधोमुखोभवति क्विन् अधोमुखंयस्यद्वे ३३ विष्व देवयोरित्यद्रिः ए

सहिष्णुः सहनः क्षन्तातितिक्षुः क्षमिता क्षमी ३१ क्रोधनोमर्षणः कोपी चंडस्त्वत्यंतकोपनः जागरूको जागरिता घूर्णितः प्रचलायितः ३२ स्वप्न
क्शयालुर्निद्रालुर्निद्राणशयितौसमौ पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ३३ देवानंचतिदेवद्र्यङ् विश्वद्र्यङ् विष्वगंचतियःसहांच
तिसध्र्यङ् स्यात्सतिर्यङ्यस्तिरोंचति ३४ वदो वदावदो वक्ता वागीशो वाक्पतिः समौ वाचोयुक्तिपटुर्वाग्मी वावदूकोतिवक्तरि ३५ स्याज्जल्पाक
स्तुवाचालोवाचाटोबहुगर्ह्यवाक्॥ १९ कंमूर्द्धन्यमध्यस्तालव्यमध्यश्चएकंसर्वतोगच्छतः सहस्यसध्रिः स्त्रियांदेवद्रीचीसध्रीचीएकंसहचरितस्यतिरसस्ति

र्यलोपेएकंवक्रंगच्छतः ३४ वदतिवदव्यक्तायांवाचिपचाद्यच्चरिचलीतिद्वित्वादिवक्तिवचभाषणेतृनवक्तानुपंडितेपिस्यात् वाग्ग्मिन्यर्थंभिधेयवत् इतिविश्वः
त्रीणिवावागीशः वाचांपतिः द्वेपदुवचनस्य वाचोयुक्तिः सयुक्तिकत्वंवादिकृपणाज्ञ इत्यलुक्तत्रपटुः प्रशस्तावागस्यवाचोग्मिनिः वाग्ग्मीपटौसुराचार्येइतिविश्व
मेदिन्यौकुर्वादिषुवावदूकशब्दपाठसामर्थ्याद्द्वेइक्षूकः अतिवक्तिसाधुकारिणितृन तृज्वाचत्वारि ३५ जल्पतिजल्पव्यक्तायांवाचिजल्पभिक्षेतिषाकन्षित्वान्ङी

५

CC-0. In Public Domain. Digitization by eGangotri

॥३६ ह्रः॥

भाषिणिः कुत्सायामिति वाच्यं चत्वारि बहुगर्ह्यभाषिणः दुर्निंदितं मुखमस्य दुर्मुखः कपिभिन्नागभिदोर्नामुखो त्रिष्विति विश्वः निंदितं मुखमस्य खमुखेतिरः मुखशब्दो लक्षणया त्रवच नपरः न बद्धं नियमितं मुखमस्य श्रीरप्यप्रियवादिनः शक्नोति शक्लः शक्तो मृड् शकाविभ्यः क्तः प्रियं वदति प्रियवदो वदः खच्च हे ३६ लोहनं लुह गार्ध्ये इति वोपदेवः भावे घञ् लोहं लाति आतो नुपेति कः यद्वा रोहयते वा हुलकात् रलच् कपिलिकादित्वाल्लत्वं लोहलः अस्फुटं खलाधारोऽव्यक्तवाचिनि च त्रिष्विति विश्वहेमचंद्रौ नस्फुटा वागस्य हे गर्ह्यं वदति सुप्यजातौ विनिर्णिनिः कुत्सितं वदति रथवदयोश्चेति कोः कत् हे कुत्सितो वादोस्य कुत्सितं चरति अच् हे कुकथ्यनशीलस्य असौम्या रूक्षः स्वरो यस्य अप्रशस्तः स्वरो यस्य हे काकादिवद्दुःस्वरस्य ३७ रवणशीलः रुशब्दे चलनशब्दार्थादिति युच् शब्दनशीलः शब्दशब्दक्रियायाम् युच् हे शब्दकरणशीलस्य नांदीवदनशीलः सुपीति वदेर्णिनिः नांदीं करोति वदति वा दिवाविभेत्ति टः आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रवर्तते देवद्विजनृपादीनां तस्मान्नांदीति कीर्त्यते इति भरतः नाटकादौ मंगलार्थं भेर्यादिवा

दुर्मुखे मुखराबद्धमुखौ शक्तः प्रियंवदे ३६ लोहलः स्यादस्फुटवाग्गर्ह्यवादी तु कद्वदः समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः ३७ रवणः शब्दनो नांदीवादी नांदीकरः समौ जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ३८ तूष्णींशीलस्तु तूष्णीको नग्नोऽवासा दिगंबरः निष्कासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः ॥ ३९ ॥

॥ इकस्य हे जलति जलघातने पचाद्यच् डलयोरभेदः ॥ इष्टं वानिष्टं वा सुखं दुःखं वा न वेत्ति यो मोहात् परवशगः स भवेदिह जडसंज्ञकः पुरुषः जडा स्त्रियां शूकशिंब्यां हिमग्रस्तमूकापटुषु च त्रिष्विति विश्वमेदिन्यौ न जानाति इगुपधेति कः हे इडो बधिरश्चासौ मूकश्च पाठांतरे नास्त्येडमूको स्मादित्यर्थः त्रिलिंगोऽनेडमूकः स्याच्छठे वाक्श्रुतिवर्जिते इति रभसः एकं ३९ तूष्णीं शीलं यस्य शीले को मलोपश्च केण इति न ह्रस्वः मलोपसामर्थ्यात् अन्यथा ठकमेव विदध्यात् शीलमिति ठकि अव्ययानामिति टिलोपेन सिद्धत्वादिति मुकुटः तन्न कविधानस्य स्वरार्थत्वात् ठकि उदात्तनिवृत्तिस्वरेण मध्योदात्तताप्रसंगाच्च वृद्धिप्रसंगाच्च हे मौनशीलस्य ओनजी व्रीडे नजते स्म अकर्मकत्वात् क्तः ओदितश्चेति नत्वेन नग्नो वंदिक्षपणयोः पुंसि त्रिषु विवाससीति विश्वः न वासोऽस्य दिगेवांबरमस्य दिगंबरः स्यात्क्षपणोऽधनेन मसि शंकरे त्रीलिनि निष्कास्यते स्म कस गतौ ण्यंतः क्तः अवकृष्यते स्म कृष विलेखने क्तः हे अपध्वस्यते स्म ध्वंसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Domain. Digitization by eGangotri

अ॰ टी॰ तृ॰ कां॰ ६

आत्तगर्वीयस्य आत्तगंध इति पाठांतरं गंधो गंधक आमोदसंबंधलेशगर्वयोरिति विश्वः गंधो गर्वो लवोपि चेति त्रिकांडशेषः अभिभूयते स्म क्तः द्वे चत्वारः पर्याया इत्येके दाप्यते स्म ण्यंतः दापित इति पाठांतरं तत्र दयदाने इति धातुः साध्यते स्म साध संसिद्धौ द्वे धनादिकं प्रदापितस्येति मुकुटः प्रदापितस्य धनादेर्वा प्रत्यादिश्यते स्म दिश अतिसर्जने क्तः निरस्यते स्म असु क्षेपणे क्तः निरस्तः प्रेषिते पूरं संत्यक्ते त्वरितोदिते निष्ठ्यूते प्रतिहते चेति हेमः प्रत्याख्यायते स्म ख्या प्रकथने च क्षिङ रंशे वा क्तः निराक्रियते क्तः चत्वारि ४० न्यकारि क्तः निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिष्विति विश्वमेदिन्यौ द्वे विप्रलभ्यते स्म डुलभष् प्राप्तौ क्तः वंचु गतौ ण्यंतः वंच्यते स्म क्तः द्वे मनो हतं यस्य प्रतिहन्यते स्म क्तः भवेत्प्रतिहतं द्विष्टे प्रतिस्खलितरुद्धयोः प्रतिवध्यते स्म वंध वंधने क्तः हन्यते स्म क्तः चत्वारि हततमनोभंगस्य ४१ अधिक्षिप्यते स्म क्षिप प्रेरणे क्तः अधिक्षिप्तः शप्ते हिते कुत्सिते भर्त्सिते त्रिष्विति विश्वहेमचन्द्रौ प्रतिक्षिप्तं वारिते स्यात्प्रेषिते पंचकं त्रिषु द्वे कृताक्षेपस्य वध्यते स्म बध वंधने क्तः कील्यते स्म कील वंधे क्तः संयम्यते स्म यम उपरमे क्तः त्रीणि आपद्यते स्म पद गतौ क्तः आपन्नः सापदि प्राप्तेपि वाच्यलिंगकः आपदं प्राप्तः द्वे कांदिशं यामीत्याह तदाहेति माशब्दादिभ्य इति ठक् पृषोदरादिः मुकुटस्तु कादि

आत्तगर्वोभिभूतः स्याद्दापितः साधितः समौ प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ४० निकृतः स्याद्विप्रकृतो विप्रलब्धस्तु वंचि
तः मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ४१ अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ आपन्न आपत्प्राप्तः स्यात्कांदिशीको भयद्रुतः ४२
आक्षारितः क्षारितोभिशस्ते संकसुकोस्थिरे ॥ ११ वैक्लव्यभावे ष्यंतान्मत्वर्थ इनिः कांदिशी कृसे च ने भावे घञ् शीकः स्मरणार्थत्वादश्रुपाते वर्तते वै

क्लव्ययुक्तोश्रुपातः कांदिशीकः तद्योगाज्ज्योत्स्नाघणित्याह अद्रुद्रवत् द्रुगतौ कर्तरि क्तः भयाद्द्रुतः पंचमीति योगविभागात्समासः द्वे ४२ आक्षार्यते स्म क्षर संचलने ण्यंतः क्तः आक्षारो मैथुनं प्रत्याक्रोशो जातोस्येति वा इतच् क्षारितः श्राविते क्षारैरभिशस्तेपि च त्रिषु अभिशस्यते स्म शसु हिंसायां क्तः यस्य विभाषेति नेट् धृषिशसि इति वा स्त्रीत्रिमैथुननिमित्तं मिथ्यादूषितस्य संकसति कस गतौ समि कस उकन् पृषोदरादय इति कन् उकृ चागम इति मुकुटः स्तपालिनीयः न स्थिरः द्वे चलस्वभावस्य व्यसनेनार्तः उपरज्यते स्म रंज रागे क्तः उपरक्तो व्यसनार्त्ते राहुग्रस्तेंदुसूर्ययोरिति विश्वः द्वे एवमानुषपीडायुक्तस्य विक्षिप्तो हस्तोस्य विहस्तस्तु विह्व पंडके ऽऽ ॥ ॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करे इति हेमः व्याकोलति कुलसंख्याने बंधुषु च इगुपधेति कः द्वे शोकादिभिरिति कर्तव्यताशून्यस्य ४३ विक्लवते क्लुङ् गतौ अच् विह्वलयति ह्वल चलने अच् द्वे स्वांगान्यव
धारयितुमशक्तस्य विरुद्धं दृष्टिवशा कांतौ अच् विवशस्त्रिषु वश्यात्मा रिष्टदुष्टधियोऽपि अरिष्टेन दुष्टा अरिष्टदुष्टा धीर्यस्य द्वे आसन्नमरणसूचितलक्षणेन दूषितमतेः॥
कशामर्हति दंडादिभ्यो यः कश्यं कशार्हमद्ययोः अश्वमध्येपीति हेमः कशामर्हति अर्हं इत्यच् द्वे ताडनार्हस्य सन्नह्यति स्म नह बंधने अकर्मकत्वात् क्तः भावक्तांता दर्श
आद्यच् वा आततं यथा तथाऽयितुं शीलमस्य अय गतौ सुपीति णिनिः एकं ४४ द्वेष्टुमर्हः द्विष अप्रीतौ एण्यत् अक्षिविषयं गतः शाकपार्थिवादिः द्वे द्वेषार्हस्य वधमर्हति म
सदंडादिभ्यो यः यद्वा हंतुमर्हः हनो वध चेति यत् शीर्षस्य शिरसश्छेदः तमर्हति शीर्षच्छेदाद्यत् द्वे शिरश्छेदार्हस्य विशेषेण वध्यः नौवयोधर्मेति यत् एकं मुसलेन वध्यः
दंडादिभ्यो यः एकं ४५ अकृष्णं शुक्लं कर्मास्य शिश्विंदिः श्विदि श्वैत्ये लिटः कानच् अनित्यत्वान्नुम् कृष्णकर्मेति पाठांतरं तत्र श्विता वर्णे धातुः श्वेतितुमिच्छति श्वित्ते दृश्वेत्या
नच् इत्वं सनो लुक् द्वे अपापकर्मणः पापकर्मणो वा च पति चप सांत्वने चमादित्वात् कलच् चपलश्चोरके चले क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरांतरे मीनेपि चपला तु स्त्री।

व्यसनार्त्तोपरक्तौ द्वौ विहस्तव्याकुलौ समौ ४३ विक्लवो विह्वलः स्यात्तु विवशोऽरिष्टदुष्टधीः कश्यः कशार्हे सन्नद्धे त्वाततायी वधोद्यते ४४ द्वेष्ये
त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ विष्यो विषेण यो वध्यो मुसल्यो मुसलेन यः ४५ शिश्विदानोऽकृष्णकर्मा चपलश्चिकुरः समौ दोषैकदृक् पुरो
भागी निकृतस्त्वनृजुः शठः ४६ कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलः॥

९ पिप्पल्यां विद्युति स्त्रियां पुंश्चल्यामपीति हेमः चीति अव्यक्तं कुरति कुर शब्दे
इगुपधेति कः चिकुरोऽहौ गृहे बभ्रौ केशे चं चलशीलयोः पक्षिद्रुमभिदोश्चापि इति हेमः द्वे दोषमनिश्चित्य वधादिकमाचरतः दोषे एकस्मिन् दृक् ज्ञानं यस्य पुरं पूर्वं भजते भ
ज सेवायां संपृचेति घिनुण् द्वे द्वेषैकग्राहकस्य निकृंतति कृती छेदने इगुपधेति कः निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु ऋजुविरुद्धः नञ् इति तत्पुरुषः नलोपो नञः
शठति शठ कैतवे पचाद्यच् शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेपि चेति हेमचंद्रः त्रीणि वक्राशयस्य ४६ कर्णे जपति जप व्यक्तायां वाचि स्तंबकर्णयोरित्यच् हलदंतादि
त्यलुक् सूचयति सूच पैशुन्ये इत्यादिरदंतः ण्वुल् सूचकः शुचि दुर्जने कथके सीवनद्रव्ये मार्जारे वायसेपि चेति हेमः द्वे पिंशति पिश अवयवे क्षुधिपिशिमिथिभ्यः कि
त् उनन् वा हुलकात् इनन्निति मुकुटोक्तिः स्वेतसूत्रासरणमूलिका पिशुनं कुंकुमेपि च कपिवक्त्रे च काके ना सूचक क्रूरं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

अ·टी· तृ·का· ७

यास्त्रियु पृष्कायां विश्रुनाम्नी स्यादिति विश्वमेदिन्यौ दुष्टो जनः कुगतीति समासः खलति खल संचये अचुखं छिद्रं लातिवा खलः कल्के मुदि स्याने क्रूरे कर्णेजपः धमे इति हेम मेदिन्यौ त्रीलिपरस्य रंधेदकस्य स्वामी तु सूचक पर्याये एवेतानाह न्नृनृशंसति शंसु हिंसायां कर्मण्यण् अजंत इति मुकटोक्तं न सम्यक् अजपवाद स्याणोजागरूकत्वा। त्‌ हननशीलः लषपतेत्युकञ् हंततीति क्तौ नीछेदनेक्तोनेष्ठः क्रूरेचेति रक् प्रत्ययो धातोः कूआदेशश्च यत्तु मुकुटेन कृणातीति विगृह्य कृते दूरादयश्चेति रक् क्रूश्च आ देशश्च कुडोवा दूरादित्वाद्रक् दीर्घ इत्युक्तं तदुक्तसूत्रासरणमूलं परस्य रविरुद्धं च दूरादयश्चेति सूत्रं च नास्ति क्रूरस्तु कठिने घोरे नृशंसेप्यभिधेयवदिति विश्वः पापम स्यास्ति अर्श आद्यच् चत्वारि परद्रोहकारिणः धूर्वति धुर्वी हिंसायां हसिमृग्रिणीति तन् राल्लोपः धूर्तस्तु खंडलवणे धूर्तो धत्तूरस्यायिनोरिति हेमचंद्रः वंचयति वंचु गतौ ण्यंतः ण्वुल वंचकस्तु खले धूर्ते गृहवभ्रौ च जंबुके इति विश्वमेदिन्यौ द्वे परप्रतारकस्वभावस्य ४७ न जानाति इगुपधेति कः अज्ञश्च जडमूर्खयोरिति विश्वः मुह वैचित्ये गत्यर्थेति क्तः मूढस्तु तंत्रिके जडे इति विश्वः जातं जन्मकालविशेषमनतिक्रम्य वर्तते पदार्थानतिवृत्तावव्ययीभावः तदस्यास्ति अर्श आद्यच् मुह्यति मुहेः खो मूर्च्छ वि

नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वंचकः ४७ अज्ञे मूढ यथाजात मूर्ख वैधेय बालिशाः कंदर्य कृपण क्षुद्र किंपचान मितंपचाः ४८ निःस्वस्तु १८ दुर्विधो दीनो दरिद्रो दुर्गतोपि सः ॥

धेयं विधानं तस्यायमधिकारी अविद्यावद्विषयवत्वात् शास्त्राणां तस्येदमित्यण् बलिशस्य मत्स्यवेधनस्यायं मूर्खत्वाद् पूज्यत्वात् बलिशस्तु शिशौ मूर्खे षट् कुत्सितोऽर्थः स्वामी कुगतीति समासः कोः कत्तत्पुरुषेचि कृपां करोति तत्करोतीति णिच् कृप्यते कृन्यत्युट् इति कर्मणि त्युट् अजादेशस्य पूज्यत्वात् ... स्यानिवत्वान्न गुणः यद्वा कृषते कृपा विषयी क्रियते कृपू सामर्थ्ये वा हुलकात् क्युन् ल्युटि वा संज्ञापूर्वकत्वाद्गुणाभावः वाहुलकाल्लत्वाभावः यद्वा क्रपकृपायां गतौ वित्यस्य वाहुलकात्संप्रसारणं यद्वा क्रमेत्यत्र मतांतरे कृपेतिपाठः अतएव कृपः व्यङ् कृपायामिति वोपदेवः ततोवाहुलकात् क्युन् क्षुनत्ति क्षुदिर् संपेषणे स्फायितंचीति रक् क्षुद्रो दरिद्रे कृपणेनिकृष्टेऽल्पनृशंसयोः क्षुद्रा व्याघ्री नटी व्यंगा वृहतीसरघासु च चांगेरिकायां हिंसायां मक्षिकामात्रवेश्ययोरिति हेमचंद्रः किंपचतिनाच्छोल्येति चा नघूशानज्वा अनित्यमागमशासनमिति नमुक् किंस्यपचइति समासः मितंपचति मितनखेचेति खच् यद्वा किंपचः अनमितंपच इति छेदः पचाद्यच् नमितंपचोऽमितं

पचः नृक्किलः अनमितंपचः पं च ४८ निर्गतं स्वमस्मात् स्वा
[illegible] वा दुःस्थाविधायकारः सन्नृद्धिर्वासद्दुर्विधोवाच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यान्तदुर्गतेपि खलेपि च दीयते स्म दीङ् क्षये गत्यर्थेति क्तः स्वादय ओदितः ओदितश्चेति नत्वं दरिद्राति दरिद्रा दुर्गतोपचारात् चत् दुर्गे च्छति स्म गत्यर्थेति क्तः पंच वननं वनु याचने सर्व धातुभ्य इन् वनिर्याच्ञा वनिमिच्छति सुप आत्मनः क्यच् ण्वुल् वनीयक इति पाठे वनीयाति कः ततः संज्ञायां कन् कुन्चायं तु मुकुटे न वनतीति विगृह्य वनियां चेत्युक्तं तच्चिंत्यं याचक इत्यापत्तेः याचति इया चूया च्ञा यां ल्युः स्वार्थे कन् मार्गति मार्ग आन्वेषणे वहुलमन्यत्रापीति युच् याचति ण्वुल् अर्थो स्यास्ति अर्थी चासन्निहित इतीनिः अर्थयते अर्थयाचने ग्रहादित्वाणिनिर्वा आवश्यके णिनिर्वा पंच ४८ अहंकारो स्यास्ति मत्वुप् अहमस्यास्ति अहं शुभमिति मांतमव्ययं अहं शुभमो युस् इ सा हंकारस्य शुभम। स्यास्ति युस् शुभेनान्वितः कर्तृकरणे इति समासः द्वे दिविभवाः द्युप्रागपेति यत् उपपद्यंते पद्गतौ लक्षपत्तपदेसु कर्त्तरि चेते च नारकव्यावृत्तये दिव्यपदं मानुषित्रादि हम्मुका रणनिरपेक्षा अदृष्टसहकृतेभ्यो ऽणुभ्यो जाताः ये देवास्ते दिव्योपपादुका उच्यंते एकं नाच गौश्चाद्यो येषां आद्य शब्देन खराश्वादीनां ग्रहणं एकं जरायो गर्भाशया ज्जाताः पंच म्यामिति जनेर्डः ५० स्वेदजनकत्वादूष्मा स्वेदः स्वेदाज्जाताः डः कृमिश्च दंशश्चाद्यो येषां आद्य शब्देन मशक मत्कुणादि ग्रहणं एकं पक्षी च सर्पश्चादी येषां आदि शब्देन नक्र

वनीयको याचनको मार्गणो याचकार्थिनौ ४८ अहंकारवानहंयुः शुभंयुस्तु शुभान्वितः दिव्योपपादुका देवा नृगवाद्या जरायुजाः ५० स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोंडजाः उद्भिदस्तरुगुल्माद्या उद्भिदुद्भिज्जमुद्भिदं ५१ सुंदरं रुचिरं चारु सुषमं साधु शोभनं ॥

९ मत्स्य पिपीलिकादिग्रहः अंडेजाताः सप्तम्यां जनेरिति डः एकं प्राणि वर्गः तरुश्च गुल्मश्चाद्यो येषां आद्य शब्देन तृणोषधिलतादि ग्रहः भुवमुद्भिद्यंति भिदिर् विदारणे सत्स्विति क्विप् उद्भिद उच्यंते उद्भिज्ज पर्यायानाह उद्भिदुक्तः उद्भेदनमुद्भित् संपदादिभ्यः क्विप् उद्भिदो जातं पंचम्यामिति डः उद्भिनत्ति इगुपधेति कः त्रीणि ५१ सुद्रियते इदङ् आदरे ग्रह वृदृनिश्च पपृश्चो दरादिः यद्वा सु उनत्ति चित्तं द्रवीकरोति उंदी क्लेदने वाहुलकात् दरः घार्क ध्वादिः स्त्रियां गौरादित्वान्ङीष् रोचते रुच दीप्तावभिप्रीतौ च इरूषिमदिमुदीति किरच् चरति चित्ते चरगतौ दृसनिजनीति ञुण् चारुर्द्रेहस्यतौ पुंसि शोभनेत्वभिधेयवदिति विश्वः सुष्ठु शोभनं समं सर्वमस्य सुविनिर्दुर्भ्यः इति षत्वं साध्नोत्यर्थे साध संसिद्धौ कृवापे त्युण् साधुर्जैनमुनौ वार्धुषिके सज्जनरम्ययोरिति हेमचंद्रः शोभते शुभ दीप्तौ अनुदात्तेतश्चेति यच् शोभनो योगभेदे नासुंदरे वाच्यलिंगकः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·टी· कम्यते स्म कमु कांतौ क्तः यस्य विभाषेति नेट् अनुनासिकस्येति दीर्घः यद्वा कनति स्म कनी दीप्त्यादौ गत्यर्थेति क्तः कांतास्यात् प्रियंगौ स्त्री शोभने त्रिषु नाथवे लोहे च चंद्रसू
रा·तृ· र्याग्निपर्यायेषु शिलासु चेति विश्वमेदिन्यौ मनो रमयति रमु क्रीडायां ण्यंतः कर्मण्यण् मनोहरमिति पाठे मनो हरति हरतेरनुद्यमनेऽच् रोचते रुच्यते वा [illegible] जयति साधुः
८ मनसा जानाति इगुपधेति कः निवृत्तप्रेषणोऽत्र जानातिर्मूलविभुजादित्वात्क इति मुकुटः तन्न तस्यापि कर्तरि विहितत्वेन ज्ञायत इति विग्रहप्रदर्शनस्य विरुद्धत्वात्
यदपि सुप्सुपेति समास इति तदपि न कर्तृकरणे इति तत्पुरुषविधायकस्य सत्त्वात् मंज्यते मजि ध्वनौ इति सौत्रो धातुः बाहुलकादुः मंजुमंजुत्वं लाति आतोनुपेति कः
मंजुलं च जलांतरे रम्ये कुंजे मंजुलः सुदात्यूहे इति हेमः द्वादश पर नसिच्यते मनोऽत्र बिचक्षणे लोकरलोनि ल्युट् संज्ञायां कअदीर्घादिपाठे आङ् बोध्यः एकं अभिनद्यते
स्मरेच्छायां क्तः अभिवी प्साभिमुख्ययोरिति विश्वः अभ्याप्तुमिष्यते स्म आप्लृ व्याप्तौ सन्नंतः आप्ज्ञप्यृधामीत् क्तः हृदयस्य प्रियमिति यत् हृदयस्य हृल्लेखेति हृ
हृदेशः हृद्यं धवलजीरके हृत्प्रिये हृद्ग्वेपि च वशाकृहृदमंत्रे च हृद्यो वृद्ध्यास्यभेषजे इति विश्वः दयते स्म दय दानादौ क्तः वल्भ्यते वल्लते वल्लसंवरणे रासिवल्लिभ्या

कांतं मनोरमं रुच्यं मनोज्ञं मंजु मंजुलं पर तदासेचनकं तृप्तेर्नास्त्यंतो यस्य दर्शनात् अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियं ५३ निकृष्टप्रति

चेत्यचू वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरंगमे इति विश्वः प्रीणाति प्रीञ् तर्पणे इगुपधेति कः प्रियो वृद्ध्यौषधे हृद्ये धवे ११ कृष्टार्वरेफयाप्यावमाधमाः ॥
इति हैमः षट् ५३ निकृष्यते स्म प्रतिकृष्यते स्म कृष विलेखने क्तः ऋच्छति ऋगतौ अन्येभ्योपि दृश्यते वनिप् यद्वा ऋच्छतेः अवद्यावमाधमार्वरेफाः कुत्सिते इति व
न्तो निपातः अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिंगकः रि, फ ते रिफ कत्थनयुद्धनिंदाहिंसादानेषु अकर्तरि चेति घञ् रेफो रवर्णे पुंसि स्यात् कुत्सिते वाच्यवत्पुन ८
रिति विश्वः यद्वा रिफतेः अवद्यावमाधमेति अप्रत्ययांतो निपातः रेप इति पाठे री गतिरेषणयोः बाहुलकात्पः रेपः स्यान्निंदिते क्रूरे इति विश्वः याप्यते यापणे ण्यं
तः अचो यत् याप्यं तु यापनीये स्यान्निंदितेऽप्यभिधेयवत् अवयत्स्माद्वाल्मानं अवरक्षणे अवद्येति सूत्रे णमप्रत्ययांतो निपातः तत्रैव वकारस्य पक्षे धकारः अध
मः स्यान्न्यक्कुने इति विश्वः कुत्सितं पूयते पूयी विशरणे अच् पृषोदरादित्वात् इत्वे कुपूय इत्यपि कुत्सासंजातास्य तारकादिः नउद्यते अवद्यपण्येति निपातः खेटति खिट त्रा

CC-0. In Public Domain. Digitization by eGangotri

खेटः कफे ग्रामभेदे स्वर्मेप्यस्त्रवर्ति विगुणस्वे तेगर्हे कुत्सायां कः हलोर्थेन अणोति अणःशब्दे अच् कुत्सायां कन् त्रयोदश ५४ मलोऽस्यास्ति ज्योत्स्नादित्वान्मलीमसेति साधुः मलीमसं तु
मलिने पुष्यकासीसलोहयोः रिजितविश्वमेदिन्यो शठे वसंते धत्तूरे मलिनं कुत्सादोषयोः मलिनी रजस्वलायां चेति हैमः कुत्सितं चरति अत्र अथवा दयोश्चेति चकारात् कोः कत् स्युरुस्व
रूतियोगविभागाद्वा कोः कत् मलेन दूषितं कर्तृकरणे इति समासः चत्वारि पूयते स्म पूङ् पवने पूञ् पवने वा क्तः पूतं त्रिषु पवित्रे च शठिते बहुलीकृते पुनाति कर्तरि चर्षिदेवतयोरितीत्रः प
वित्रं तु मध्ये ताम्रे कुशे जले अर्घोपकरणे चापि पवित्रा तु नदीभिदीति हैमः मेधनार्हं मेधृ संगमे च एण्यत् पवित्रः प्रयतः पूत इति प्राणिविषयमुक्तं इह त्वप्राणिनि त्रीणि वीं धेति
रूंधी दीप्तौ वा विंधेरिति कन् रूंधेरगिति मुकुटस्तुचिंत्यः विमलआत्मा स्वभावो यस्य हे स्वभावनिर्मलस्य ५५ निर्णिज्यते स्म णिजिर् शौचपोषणयोः क्तः शोध्यते स्म शुंधशुद्धौ ण्यंतः क्तः
मृज्यते स्म मृजूशुद्धौ क्तः निष्क्रांतं शोध्यतेऽस्मात् शोध्यान्निष्क्रांतमिति वा अवस्करोत्र पंचापापीनमलस्य नसारोऽत्र फलत्ति जिफला विशरणे फलिपाटीति साधुः फल्गुः काको
दुंबरिके वृक्षे निरर्थकेपि चेति हैमः फलग्वसारेऽभिधेयवत् नदीभेदे मलयां स्त्रीति विश्वः हेश्वुने हितं श्वनः संप्रसारणं वा दीर्घ इति यत् शून्यं विंदौ च निर्जने

कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ५४ मलीमसं तु मलिनं कच्चरं मलदूषितं पूतं पवित्रं मेध्यं च वीध्रं तु विमलात्मकम् ५५ नि
र्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करं असारं फल्गु शून्यं तु वशिकं तुच्छरिक्तके ५६ क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्यवरे
शून्या तु नलिका इति हैमः॥ (ण्याश्च प्रवर्होऽनवरार्ध्यवत् ५७ ॥

उच्यते वशकां तौ सर्वधातुभ्य इन् संज्ञायां कन् तोदनं संपदादित्वात् क्विप् तुदा व्यथया छ्यति छो छेदने मूलविभुजादित्वात् कः तुदं छ्यति वा आतो नुपेति कः रिच्य
ते स्म रिचिर् विरेचने संपर्चनयोः क्तः स्वार्थे कन् चत्वारि ५६ प्रदधाति ल्युट् युज्वा प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा प्रकृष्टं
मुखमस्य प्रमुखं प्रथमं मुख्ये इति हैमः प्रविच्यते विचिर् पृथग्भावे घञ् नोत्तमोऽस्मात् अतिशयेनोत्कृष्टः उत्कृष्टार्थवृत्तेरुच्छब्दात् तमप् द्रव्यप्रकर्षार्थत्वान्नाम्‌ अप्यद्वा उन्ना
म्यति तमुकाक्षायां अच् उन्नम्यते वा घञ् नोदात्तेति न वृद्धिः मुखमिव मुख्यं शाखादित्वाद्यः शरीरावयवत्वाद्यत् वर्यते वर ईप्सायां चुरादिः वदंतः अचो यत् न्विय
ते वृञ् वरणे वृञ एण्यः प्रवर्हति वृह वृद्धौ अच् अवरस्मिन्नर्हं भवः अर्घ्यो दिगादित्वात् यत् परावराधमोत्तमपूर्वाच्चेन अवरार्घ्यः नञिति समासः ५७॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

अ॰ टी॰ यस्मिन्नुदेईभवः यत् अगति अगकुटिलायां गतौ ऋज्रेंद्रेति साधुः अग्रं पुरस्तादुपरि परिमाणे बलस्य च आलंबने समूहे च प्रांते च स्यान्नपुंसकं अधिके च प्र धाने च प्रथमे चा
स्॰ तृ॰ भिधेयवत् प्रकृष्टमग्रं प्राग्र्यं हरति हरते रसुघमने च प्राग्रभवः अग्रा यत् घछौ च समस्तदृशा अतिशयेन प्रशस्यः अतिशायने तमबिष्ठनौ द्विवचनविभज्योपपदे त
६ रबीयसुनौ अजादीगुणवचनादेव प्रशस्यस्य श्रः श्रेयो मुक्तौ शुभे धर्मे तिप्रशस्ते तु वाच्यवत् श्रेयसी करिपिप्पल्यामभयापाठयोरपीति विश्वमेदिन्यौ श्रेष्ठो वरे कुबे
रे चेति हेमः पुष्यति पुष्य पुष्टौ पुषः किन् कलं श्चेति कलन् पुषः करन् कपिरिकादिरिति मुकुटः तच्चिंत्यं नादृशपाठाभावादस्मदुक्तसूत्रसत्वाच्च पुष्कलस्तु पूर्णे श्रेष्ठे इति हे
मः॥ अतिशयेन सन् तमप् सत्तमः स्यान्नृज्यतमे साधीयस्तु मेत्रिषु अतिशयेन शोभनः पंचवर्यप्रधानं युक्तं मनुतमं सत्तमं प्रवर्हणं चेति नाममालायां अग्रं प्राग्रं ह
रं श्रेष्ठं मुख्यं वर्यं प्रवर्हणमिति त्रिकांडशेषे च श्रेष्ठस्य पाठः दैकविंशतिरेव शोभनस्येत्यन्ये ५८ पुंमाश्चासौ गौश्च गोरतद्धितलुकीति टच् श्रेष्ठस्यार्थः श्रेष्ठार्थो गोचरो ये
षां ते क्वचिद्रूपकादित्यपाठः एकं ५९ प्राग्याङ्गिनं प्रधानादन्यत् उपसृज्यते सृज विसर्गे कर्मणि ल्युट् स्त्रीलिंगविस्तृतार्थवृत्तेर्विशब्दात् वेःशालच् शंकटचौ विशालादि

प्रार्ध्यो ग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियं श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ५८ स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः सिंहशा
र्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ५९ अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने विशंकटं पृथु बृहद्विशालं पृथुलं महत् ६० वड्रोरु विपुलं
पीनपीव्नोस्तु स्थूलपीवरे

द्वाहत्याभुजुयिन्यां तु योषिति नृपहस्तमिदो पुंसि पृथुले त्वभिधेयवदिति विश्वमेदिन्यौ प्रथते प्रथ प्रख्याने प्रथिम्रदीति कुः संप्रसा ((पीनपीव्नोस्तु स्थूलपीवरे
रणं च पृथुर्विशाले भूपाले वाच्यिकाकृष्णजीरयोरिति हेमचंद्रः वर्हति बृह बृहि वृद्धौ महति महपूजायां वर्तमाने पृषद्बृहन्महदिति निपातः पृथुत्वमस्यास्तीति सिध्मादि
त्वाल्लच पृथुत्वं लातीति वा ६० वलते वल संवरणे संचरणे च वहुत्वमन्यत्रापीति रक् स्फूर्जादयः तिरकूरिति मुकुटः तन्न उज्वलदन्तादाव दर्शनात् डलयोरेक
त्वस्मरणं तु उर्णोति उर्णु त्र आच्छादने महति ह्रस्वश्चेति कुप्रत्ययः नुलोपः ह्रस्वश्च विपोलति पुल महत्वे इगुपधेति कः विपुलः पृथुले गाधे मेरुपश्चिमभूधरे इति वि ८
श्वमेदिन्यौ नव प्यायते स्म ओप्यायी वृद्धौ गत्यर्थेति क्तः ओदितश्चेति नत्वं प्यापः पीप्यायते श्चेड् वृद्धौ प्याप्योः संप्रसारणं चेति क्त निपात्स्त्रियां वनोर चेति ङीप् स्थूलयति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थूलं बृहल्लो अ च स्थूलः पीने जड इति हेमः प्यायतेः स्थिल्त्वरेति निपातः पीवरः स्थूलकूर्मयोरिति हेमचन्द्रः चत्वारि स्तु अत्र तेषु च प्रसादेर्घञ् न्यङ्क्वादिः स्तूपते वा वाहुलकात्स्तुत्रः कः
स्तोकं स्त्रियां स्वल्पे चातके पुमान् अस्यते वार्यते अलम्भूषणादौ वाहुलकात्पः स्तोदनं क्षुद्रिर् संपेषणे संपदादिः क्षुद्रं लाति आतो नुप इति कः ततो स्त्रियां स्वार्थे कन् यद्वा क्षुद्यते स्फायि
तेर्चीतिरक् रलयोरेकत्वस्मरणात् कपिलिकादित्वाल्लत्वं क्षुल्लकस्त्रिषु नीचेऽल्पे इति विश्वः श्लिष्यते श्लिष्यति वा श्लिष आलिंगने॥ श्लिषेश्चोपधाया इति क्सः सूच्यते सू
च पैशून्ये सूचेः स्मन् सूक्ष्मं स्यात्कतके ध्यात्मे पुंसि स्त्री त्रिषु चाल्पके इति विश्वः दभ्यते दंभु दंभने स्फायितंचीतिरक् कृश्यते स्म कृश तनूकरणे फुल्लक्षीबेति साधुः तन्यते
तनु विस्तारे तनिचरीत्युः तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे इति विश्वमेदिन्यौ ह्रसीयते माङ् माने ष्ट्रन् अनित्यः षित्त्वांडीष् टापमात्रे त्वचधृतौ स्वार्थे कान्त्ये भ
मात्रा परिच्छदे अक्षरावयवे द्रव्यमाने स्ये कर्णभूषणे काले वृत्ते चेति हेमः त्रुट्यते त्रुटूच्छेदने इगुपधात्किदितीन लूयते लूञ् छेदने ऋदोरप् लवः कालभिदि क्लि
ट्टि विलासे रामजे लेशे तथा किंजल्कपक्ष्मणोः गोपुच्छलोमस्वपि चेति हेमः लिशति लिश गतौ अच् लिश्यते वा घञ् कणति कण निमीलने अच् कणो धान्यांशलेशयोः

स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु । स्त्रियां मात्रा त्रुटी पुंसि लवलेशकणाणवः ॥ अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥१९॥ प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ॥

कणो जीरके पिप्पल्योरिति हेमचन्द्रः॥ अणति अण्यते वा अण शब्दे अणश्चेत्युः अणुर्व्रीह्यल्पलेशयोरिति हेमः
चत्वारि इष्ठ अतिशयेनाल्पः अजादी गुणवचनादेवेतीष्ठन्नीयसुनौ युवाल्पयोः कनन्यतरस्यामिति कन्वा अतिशयेनाणुः ईयसुन् चत्वारि ह्र प्रभवति स्म गत्यर्थेति क्तः
प्रभूतमुद्गते प्राज्ये इति हेमः प्रचीयते चुर स्तेये इगुपधेति कः चुरादीनां णिज्वैकल्पिकः प्रगतं चुराया इति वा प्रचीयते अजगतोऽण्यत् वहुलं तल्गीतिवोनयद्वा प्रकर्षेण
ज्यते काम्यते अंजू व्यक्त्यादौ आङ्पूर्वाद् दंजेः संज्ञायामिति कप् दभ्राद् अन्यत् नञ्समासः बहून् लाति अतो नुप इति कः वहुला नीलिकायां स्यादेलायां दिवियोषिति कृ
त्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकं पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राज्ये कृष्णयोरिति विश्वमेदिन्यौ बंहते बहि वृद्धौ लंघिवंह्योर्नलोपश्चेत्युः यत्तु बंहते वर्द्धते व
हुपूर्वं नेमित ह्यादित्वात् डरिति मुकुटेनोक्तं तत्र टिलोपेनोक्तरूपासिद्धिप्रसंगात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

... in Public Domain. Digitization by eGangotri

अ·त· बहुतुल्यादिसंख्यासु विपुले त्वभिधेयवदिति विश्वः पुरुहं तिगच्छति अन्येष्वपीति डः यद्वा पुरून् जहाति जिहीते वा आतो नुपेति कः पिपर्ति पूर्यते वा पृ पालनपूरणे

टी·रा· योः पृभिदीति कुः यत्तु पृभूहिपृधषिभ्यः कुरिति सूत्रं पठितं मुकुटेन तन्न क्रमेणोरुच्चेति पृथक्सूत्रात् अन्यथा उत्वाभावप्रसंगात् पुरुषः श्वा त्वभिधेयवत् पुंसि स्यादेव

लोके च नृपभेदपरागयोरिति हैमः अतिशयेन बहु बहोर्लोपो भू च बहोः स्वार्थे वैषु दृष्टा इयः स्फायते स्फायी रक्दृष्टौ अजिरशिशिरेति साधुः स्फारमित्यपि पाठः॥ रकु स्फा

१० रस्तु करकादीनां वृद्धे विपुले पि चेति हेमचन्द्रः अतिशयेन बहु बहोर्लोपो भू च बहोः भवति अद्भिमूस्त्रुः दिभ्य क्रिन् भूरि स्यात्प्रचुरे स्वर्णे इति हैमः द्वादश ६३ शतात्प

रे पंचमीति योगविभागात्समासः राजदन्तादिः पारस्करादित्वात्सुट् आद्येन परः सहस्राः एकं शतात्परः त्यस सहस्राणाम् आर्याछंदः गण्यते गणसंख्याने अनीयर् अचो

यत् संज्ञापूर्वकत्वात्सिलोपाभावः चितिपूजी त्सड् विधानादुणाभावार्थाङ्वा अन्यथा अप्रत्ययादित्यनेनंतरं पठित्वाऽकारमेव विदध्यात् यत्तु अप्रत्ययादित्यकारे प्राप्ते गु

णाभावार्थो दड् विधानादिति मुकुटेनोक्तं तच्चिन्त्यं ण्यासश्रन्थो युजितियुचाऽ प्रत्ययस्य बाधनात् हेत्गणयितुं शक्यस्य संख्यायते संख्या प्रकथने च क्तिइड् देशो वा ग

पुरुहं पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च ६३ परः शताद्यास्ते येषां परा संख्या शतादिकात् गणनीये तु गणेयं संख्याते गणितमथ समं सर्वं

विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषं ६४ समग्रं सकलं पूर्णमखंडं स्यादनूनके॥ ११ एयन्ते सम्यक् हसमति षमवैक्लव्ये अच सर्वा

र्थे सर्वनाम समासं वत्सरे त्रियां सर्वसाधुसमानेषु समंस्यादभिधेयवदिति विश्वः सरति सृगतौ सर्वनिघृष्वेति साधुः इति मुकुटस्त्वपाणिनीयः यद्वा सर्वति सर्वगतौ अच्

६४ विशन्ति विश प्रवेशने अशु पुषीति क्वन् विश्वं कृत्स्ने च भुवने विश्वदेवेषु नागरे विश्वाप्यति विषायां स्यान्नपोषोस्य कृन्तते कृतीवेष्टने कृत्यशूभ्यां वन्नः कृत्स्नं सर्वा १०

सु कुक्षिषु समस्यते स्म असुक्षेपणे क्तः निर्वृत्तं खिलमस्य न खिलमस्य निष्क्रान्तं शेषात् निरादय इति समासः ६४ संगलमग्रमस्य समंग्रसते वा ग्रसु अदने अन्येभ्यो

पीति डः सह कलाभिः पूर्यते स्म पूरी आप्यायने कर्तरि कर्मणि वा क्तः पूर्णः शब्दसमग्रेनापूरिते त्वभिधेयवत् पूर्वैति अच् पूर्वमिति पाठ इति स्वामी पूर्वपूरणेन खंड्य

ते खडि भेदने घञ् उन यति उन परिहाणे अच् नञुनं स्वार्थे कन्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चतुर्दश॥ हन्यते हननं हिंसा गत्योः मूर्तौ घन इत्यप् घनादेशश्च घनः सांद्रे दृढे दार्ढ्ये विस्तारे मुद्गरे वृदे संघे मुस्ते घनं मध्ये नृत्यवाद्यप्रभेदयोरिति हेमचंद्रः निर्गतमंतरात् निर्गत मंतरमस्मिन्वा सह अंघते अदिवं घने वा हुलकाद्रू कूत्रीणि येलनं पिलभेदने घञ् पेलो स्यास्ति अन्येभ्योपीति वः विराति वा हुलकात्कालन तन्वनेभ्यमृत्युः तनुर्वपुल्लचो विरले ल्पे कृशे इति हेमः त्रीणि ६५ संगता आपो यस्मिन् ऋकूपूरिति अः द्वंतरुपसर्गेभ्यो पईत् निवहं संघोरश्चेति चान्नेः कटच् निकटमिति वा कटे वर्षावरणे कं अच आसीदति स्म गत्यर्थेति क्तः आसद्यते स्मेति वा क्तः सन्निकृष्यते स्म कृषः क्तः समानं नीडं वा सह स्थानमस्य सहनीडे नेति वा समानो देशोस्य अभ्यश्यते अशूव्याप्तौ घञ् मुकुंदस्तु अभ्याश इति अन्येभ्योपीति डः इति दंत्य समाह समानाविधास्य समाना मर्यादास्य समानो वेशोस्याः यद्वा सह विधयेत्यादि ६६ उपगतः कंठः अत्यादयइति समासः उपगतः कंठः सामीप्यमस्यति वा अंतोस्यास्ति ठन् अंतिकं निकटे वाच्यं लिंगं स्त्री शोभनेोष घोत्र द्भ्यां ज्येष्ठभगिन्यां च नाट्योक्तां कीर्त्यते तिका इति विश्वमेदिन्यौ अभ्यद्यते स्म अभ्यर्द इति स्मेति वा अर्दगतो कर्मणि कर्तरि वा क्तः अमेश्याविदूर्यइतीडभावः अभिमुखमग्रमस्य पर्यभिभ्यां चेति अभिशब्दात्तसिल तसिरिति स्वामिमुकुटोक्तिस्तु स्वरणाद्राभिप्रायेण पंचदश सं

घनं निरंतरं सांद्रं पेलवं विरलं तनु ६५ समीपे निकटासन्नसन्निकृष्टसनीडवत् सदेशाभ्याशसविधसमर्याददसवेशवत् ६६ उपकंठां
तिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययं संसक्ते त्वव्यवहितमपदांतरमित्यपि ६७ नेदिष्ठमंतिकतमं स्याद्दूरं विप्रकृष्टकं दवीयश्च दविष्ठं च सुदूरं दीर्घमा
((यतं ६८ वर्तुलं निस्तलं वृत्तं बंधुरं तून्नतानतं॥

सज्यते स्म षज संगे क्तः न व्यवधायते स्म क्तः दधातेर्हिः पदेनांतरं न पदांतरमत्र मुकुटस्त्वपदांतमित्याहत्रीणि ६७ अतिशयेनांतिकं इष्ठन् अंतिकबाढयोर्नेदसाधौ तमप् ६७ अतिनिकटस्य दुःखेन यते दुरीणलोपश्चेति साधुः विप्रकृष्यते स्म कृषेः क्तः स्वार्थे वा कन् ६७ असंतं दूरं ईयसुनस्थूलदूरयुवेति साधुः इष्ठन् सु अत्यंतं दूरं त्रीणि दृणाति दृविदारणे वा हुलकात् घक् इर् हेति दहर इत्यौपचाद्य च संज्ञायां मे घनिदाघ दीर्घौ घा इति न्यङ्कादित्वं नर्गोन मूत्रेणानिपातनात्स्वल्पकुत्वे तत्रमेघनिदाघावदाघाघोर्घ इति पाठे पि प्रकृतगणस्याने कप्रयोजनाया कृतिगणत्वस्वीकार इति सिद्धः आयम्यते स्म क्तः आयतते वा यतीप्रयत्ने अच् ६८ वर्तते वा हुलकादुलच् निर्गतं तलमस्य निस्तलं वर्तुले चले इति विश्वः वर्तते स्म गत्यर्थेति क्तः वृत्तं दृढे मृते चरित्रे वर्तुले छंदः स्वधीनाधानयो न्नते र

लिङ्गसः श्रीशिवभक्तिवचंवाद्यतस्य हुरस्य क्षितिक्ष्णुः
उत्कंठवनज्ञानवद्धी॥

Public Domain. Digitization by eGangotri

उच्चिनोति अन्येभ्योपीति डः उच्चैस्त्वमस्यास्त्र वा अर्श आदिभ्योच् अव्ययानामिति टिलोपः प्रकृष्टा अंशावोस्य उन्नमति स्म नमप्रव्हत्वे गत्यर्थेति क्तः उद्गतमग्रमस्य उच्छ्रप ति स्म श्रिञ् सेवायां गत्यर्थेति क्तः उच्छ्रितं त्रिषु संजाते समुन्नद्धप्रवृद्धयोः तुंग्यते तुजि हिंसायां घञ् न्यङ्क्वादिः तुंगः पुन्नागनगयोर्वृषे स्यादुन्नतेः न्यवत् तुंगीशो क्षाहरिद्रायां वर्वरायामपीष्यते इति हैमः षट्वामयतिमंदंटु वमउद्गिरणे नघादिस्तुः हृदे न्यंचति अंचुगतौ ऋत्विगिति क्विन् नीचैस्त्वं अस्य त्र अर्श आद्यच् अव्ययानामिति टिलोपः नीचः पामरखर्वयोरिति हैमचंद्रः खर्वति खर्व गतौ अच् ह्रसति ह्रस शब्दे वा हुलकाद्धः खर्वे ह्रस्वो न्यग्वामनाविति हमः मेदिन्यो पंच अवनतमग्रमस्य अवनमति स्म गत्यर्थेति क्तः नीच्यधोमुखस्य ऋच्छति ऋगतौ विच् अरमाल्लाति मूलविभुजादिकः अरालानि वा अरालः कुटिले सर्जरसे समदद्विपे इति विश्वः वृज्यते वृजी वर्जने वृजेः किच्चेतीननन् वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु जहाति ओहाक् त्यागे जहातेः सन्वदलोपश्चेति मन् जिह्मस्तु कुटिले मंदे जिह्मं तगरपादपे इति हैमः उर्मिः प्रकाशे वेगभंगयोः ऊर्मिरस्यास्ति मतुप् यवादिः कुंचति स्म कुंच कौटिल्ये क्तः बाहुलकात् संज्ञापूर्वकत्वाद्वा नलोपाभावः नमति क्तः नतं तगरपार्वास्या

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेथ वामने ॥ न्यङ्नीचखर्वह्रस्वाः स्युरवाग्रेवनतानते ॥ अरालं वृजिनं जिह्ममूर्मिमत्कुंचितं नतम् ७० आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ७१ ॥

९ नतं क्लीबं कुटिलनम्रयोः ७० आविध्यते स्म व्यध ताडने क्तः ग्रहिज्येति संप्रसारणं आविद्धो वाच्यलिंगः स्यात् कुटिले च पराहते कुटिं कौटिल्यं लाति आतोनुपेति कः कुटति वा कुट कौटिल्ये मिथिलादयश्चेति इलच् कुटिला त्वापगायां स्त्री भुग्ने तु वाच्यलिंगकः भुजति स्म भुजो कौटिल्ये गत्यर्थेति क्तः ओदितश्चेति नत्वं वेल्लति स्म वेल्ल चलने गत्यर्थेति क्तः वेल्लितं गमने क्लीबं कुटिले विधुते त्रिषु वंचति वंचु गतौ स्फायितंचीति रक् वक्रं पुटभेदे वक्रः कुटिले क्रूरभौमयोरिति हैमः एकादश अर्जेति अर्ज अर्जने अर्जिदृशीति साधुः ऋजु अपष्ठादित्वात् कुरिति मुकुटे नोक्तं तच्चिंत्यं अपदुः सुपुस्थदूत्सस्य प्रगुणाभावात् गुणाभावाच्च भिन्नो जिह्मात् प्रकृष्टा गुणा यस्य त्रीणि व्यस्यते स्म असु क्षेपणे क्तः व्यस्तं तु व्याकुले व्यासे इति विश्वः भिन्नः प्रगुणात् आकोलति कुल संस्त्याने इगुपधेति कः त्रीणि व्याकुलस्य ७१ ॥ ९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शश्वद्भवः तत्र भव इत्यण् अनित्योव्ययानां टिलोपो बहिषष्टिलोपवचनाज्ज्ञापकात् अध्यात्मादित्वाट्ठञपि शाश्वतिक इति निर्देशान्नकादेशः ध्रुवति ध्रुव स्थैर्ये इगुपधेति कः ध्रुवो घट
वसुयोगभिदोः शमौ शंकावृत्तानपास्ञस्थिरे निश्चिते चेति हेमः नियतं भवः ष्यञ्प्रत्ययेने ध्रुवे नित्यं स्यात् सततेपि च शाश्वते त्रिषु सदा समना चक्षुभवः सायं चिरमिति ट्युट्युलौ सनात
नो च्युतेपि नृत्यमनि थोरुद्रवेधसोः शाश्वते स्थिरे इति हेमचंद्रः पंचस्थानशीलः ग्लाजिस्थश्च ग्स्नुः अतिशयेन स्थिरः स्थेयान् ईयसुनि प्रियस्थिरेति साधुः स्त्री एय्यनि स्थिरस्य अ
कूटवत्तिष्ठति सुपि स्थ इति कः कूटो स्त्री निश्चले राशौ एकंस्थानशीलः स्थेशभासेति वरच् जंगमादितरः हृ चरणशीलं चर गतौ अलंकृञिति ष्णुच् वक्रं गच्छति गत्य
र्थानां नित्यं कौटिल्य इति यङ् खाम्यादिशुभ्रं शार्थ एवयङ् मिच्छति अच् चरति अच् चरोक्षद्यूतभेदे च भौमे चारे त्रसे चले त्रसति त्रसी उद्वेगे अच् इंगति इगि गतौ अ
च् इंगः स्यादिंगितेद्भुते ज्ञानजंगमयोश्चापि हेमचंद्रः चरिचलीति द्वित्वादि चराचरं जङ्गमेस्यादिंगविष्टपयोरपि षट् ७३ चलनशीलं चल गतौ चलनशब्देति युच् चल
नं भ्रमणे कंपे कंप्रे तु वाच्यलिंगकमिति विश्वमेदिन्यौ कंपनशीलं कपि चलने युच् कंपनं नमद्भयोः कंपे कंप्रे स्यादभिधेयवत् नमिकंपीति रः चलति अच् लोडति लुड वि

शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः । स्थास्नुः स्थिरतरः स्थेयानेकरूपतयात्तु यः ॥ ७२ ॥ कालव्यापी स कूटस्थः स्थावरो जंगमेतरः । चरिष्णु
जंगमचरं त्रसमिङ्गं चराचरं ॥ ७३ ॥ चलनं कंपनं कंप्रं चलं लोलं चलाचलं । चंचलं तरलं चैव पारिप्लवपरिप्लवे ॥ ७४ ॥ अतिरिक्तः समधिको

लोडने क्वचित् अपवादविषयेप्युत्सर्गप्रवृत्तेर्णः डलयोरेकत्वं चरिचलीति द्वित्वादि चंचति चंचु गतौ वाहुलकाद्लच् चंचला तु तडित् दृढसंधिस्तु संहतः ॥
स्यो श्वं चलश्च पले इनलेतरति अलच् तरलं चं चले खिंगे भास्वरे पित्रिलिंगकं हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियामिति विश्वमेदिन्यौ परिप्लवते प्लुङ् गतौ अ
च् प्रज्ञाद्यण् पारिप्लवश्चाकुले स्याच्चंचले चेति हेमः द्वयं ७४ अतिरिच्यते स्म रिचिर् विरेचने क्तः सम्यगाधिकः द्वे दृढः संधिः संधानमस्य संहन्यते स्म क्तः संहतं संम
ति दृढे इति हेमः द्वे दृढसंधानस्य ककखति कक्कृखहसने कवर्गद्वितीयादिरित्यन्ये शकादिष्योटन् कठति कठ कृच्छ्रजीवने वहुलमन्यत्रापीती न च कठिनमति
निष्ठुरे स्यात्स्त्र्यौ त्रिषु नपुंसकम् स्यात्स्यां कठिनी खटिकायामपि कठिना गुडशर्करायां चेति विश्वः कृंतति कृती छेदने क्त इच्छः कृच्चेति रक् ॥ ॥ ॥

... Public Domain. Digitization by eGangotri

अ॰ तृ॰ टी॰ रा॰ ९२

क्रूरः नृशंसघोरोग्रकठिना इति हैमः कठिचकिभ्यामोरन् इत्युणादीनि स्वामिमुकुटौ कृत्सु विग्रहश्चित्यः कठोरो पूर्णे कठिनावितिहैमः निनिष्टत्निमद्गुरादिः दृर्हति दृंहति स्मवा दृह दृहिदृह्णौ दृढः स्थूलवलयोरितिसाधुः दृढं स्थूलं निर्तां तेच प्रगाढे वलवत्यपि ७५ जीर्यतिज्ज्वयोहानौ वाहुलकाट्ठच जरठः कर्कशपाडौ काठिने प्यभिधेयवदितिविश्वः मूर्तिः काठिन्यमस्यास्तिमतुप मूर्छेतिस्म मुर्छामोहसमुच्छ्राययोः अकर्मकत्वात्क्तः नध्याख्येतिनत्वं नमूर्तस्यात्त्रिषु मूर्छालेकठिने मूर्तिमत्यपीतिविश्वः नवप्रवृद्धे तेस्म वृधुवृद्धौ गत्यर्थेति क्तः प्रोद्यतेस्म वहप्रापणे क्तः प्रा दृहेति वृद्धिः एधतेस्मएधवृद्धौ गत्यर्थेतिक्तः त्रीणिपुराभवं सायंचिरमिति ट्युट्युलौ पुराणप्रोक्तेष्वि तिनिर्देशात्तुण्न आवा घकान्यपि निपातनानीतिपक्षेभवति पुराणं यत्न शास्त्रयोः पुराणः षोडशपणेन स्वपुराणे प्रादितिरुः चिरभवंसायं चिरमितितुः निपातनान्मां तत्वं पंच ७६ प्रतिनवमग्रमस्य अभिनूयते णुस्तुतौ कृदोरप् अचोपत्न नवएवं नवस्यत्नपतनपूर्वाश्च प्रत्ययाः नूरादेशश्च नूयते अपसमसुष्टु कुमार्यतेकुमारक्रीडायां

कक्खटंकठिनंक्रूरंकठोरंनिष्ठुरंदृढं ७५ जरठंमूर्तिमन्मूर्तंप्रवृद्धंप्रौढमेधितं पुराणेप्रतनप्रत्नपुरातनचिरंतनाः ७६ प्रत्यग्रोभिनवोनव्यो नवीनोनूतनोनवः नूत्नश्चसुकुमारंतुकोमलंमृदुलंमृदु ७७ अन्वगन्वक्षमनुगेनुपदंक्लीवमव्ययं प्रत्यक्षंस्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ७८ एकतानोनन्यवृत्तिरेकाग्रैकायनावपि॥ ९ चुराद्यदंतः॥ पुंसीतिघः एरज्वाय ह्रासु काम्यते कमेः किदुच्चोपधाया इत्यारन् वाहुलकाद्लच् अत्तउ त्वं च कोमलं मृदुले जले इति विश्वः मृदुर्गुणोस्यास्ति सिध्मादित्वाल्लच् मृद्यते मृदक्षोदे प्रथिम्रदिभ्रस्जां मितिकुः संप्रसारणं च मृडनी इत्योच कोमल इति हैमः मृगय्वादित्वात्कुरिति मुकुटो व्यर्थः चत्वारि॥ ७७॥ अन्वं चति अंचुगतौक्विन् अनुगतमक्षमिंद्रियं अनुगच्छति गम्लृगतौ अन्येभ्योपीति डः पदस्य पश्चात् पश्चादर्थेव्ययीभावः चत्वारि अक्षमिंद्रियं प्रतिगतं अत्यादय इति समासः इंद्रियेणानुभूयते कुलालादित्वाद्वुञ् द्वे इंद्रियेण ज्ञातस्याभिन्ने प्रत्यक्षात् अनध्यक्षमितिपाठ इत्यन्ये अक्षेषु अधि अध्यक्षम् विभक्त्यर्थेऽव्ययीभावः अतिक्रांतमध्यक्षं इंद्रियमतिक्रांतं द्वे इंद्रियेणाज्ञातस्य ७८ एकं तानयति तनुश्रद्धोपकरणयोः कर्मण्यण् एकस्तानो विस्तारोस्येति वा न अन्या वृत्तिरस्य एकमेकस्मिन्वा अग्रमस्य एकमयनमस्य एकमेकस्मि॥ ॥ ॥ ॥ ॥ ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्वासर्गो निश्चयो स्य एकमग्रं ज्ञेयमस्य एकं च तस्य नं च एकायनं गतः एकमस्मिन्नयने गतं ज्ञानमस्येति वा सस्त ७८ प्रथमं आदीयते गृह्यते उपसर्गे घोः किः पूर्वति पूर्व पूरणे
अच् पूर्वं तु पूर्वजे प्राच्यां प्राग प्यश्रुतिमिदं के पुरोभवः दक्षिणा पश्चात् पुरस्त्यक् प्रथते प्रथप्रख्याने प्रथेरमच् प्रथमस्तु भवेदादौ प्रधानेपि च वाच्यवत् आदौ भवः दिगादित्वा
द्यत् पंच अमति अमगतौ वा हुलकात् न अंततिवा अति बंधने अच् अंतः स्वरूपे निकटे प्रांते निश्चयनाशयोरिति हेमचंद्रः जघनेभवं दिगादित्वाद्यत् शरीरावयवत्वा द्य
जघन्यं हेमनिल्लौवं चरमे गर्हिते न्यवत् चरति चरगतौ चरेश्चेत्यमच् अंते भवं दिगादित्वाद्यत् अंत्यस्त्वंतभवे धर्म इति हेमः॥पश्चाद्भव दक्षिणेति त्यक् अग्रादिपश्चा
ड्डिमच् षट् ८० मुह्यति अस्मिन् मुहवैचित्त्ये हलश्चेति घञ् न्यंक्वादिः मुहेर् घी ति मुकुटोक्तिश्चिंत्या मोघादीनेनिष्फले च मोघास्यात्पाटला न राविति हेमः निर्गतो र्थो स्मात् निष्प्र
योजनस्य हेस्यायस्य तेस्मस्य शवाधनस्यर्श नयोः ण्यंतः क्तः वादांतेति साधुः मुकुटस्तु स्पश्यते स्मेति विगृहीतवान् तन्नेदृग्प्रसंगो दुर्वारः स्फुटति स्फुट विकसने इगुपधेति कः
स्फुटो व्यक्त प्रफुल्लयोः सितव्याप्ते चेति हेमः प्रव्यज्यते स्म अंजू व्यक्त्यादौ क्तः प्रव्यच्यते स्मेति वा अंचु विशेषणे क्तः उदुणाति वर्णशब्दे अच् पृष्ठोदरादिः चत्वारि सहअ

अप्येकसर्ग एकाग्र्योप्येकायनगतोपि सः ७८ पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियां अंतो जघन्यं चरममंत्यपाश्चात्यपश्चिमं ८० मोघं
निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्वणं साधारणं तु सामान्यमेकाकी त्वेक एककः ८१ भिन्नार्थका अन्यतर एकस्त्वान्येतरावपि॥ ॥

धारणेन आग्नीध्रसाधारणाभ्यामिति स्वार्थेञ् स्त्रियां ङीप् सहमानेन समानस्य सभावः ष्यञ् चातुर्वर्ण्यादित्वाद्धा स्वार्थे ष्यञ् द्वे अनेक संबंधिन एकस्य एक एव एका
दकिनिच्चासहाये च कारात् पक्षे कन् लुकौ च एकं संख्यांतरे श्रेष्ठे केवले तरयोस्त्रिषु त्रीण्यसजातीयासहायस्य ८२ भिन्नो अर्थो येषां ते अन्यतर एव अस्याच्चारमिति व
न्वार्थे तरप् द्वयोर्निर्द्धारणे डतरजिति मुकुटस्तु पाणिनीयः क्वचिदेकतर इति पाठः तत्रैकाच्च प्राचामिति डतरच् एति इण् भीति कन् तनोति तनोतेरन श्च वः चान्त्यक्ति विन्ये
के आगमानित्यत्वात् तु ग्वैकल्पिकः केचित्तु चिकमनुवर्त्तयंति एवं मतभेदसिद्धौ लन्त्वशब्दौ सर्वादिषु पठितौ अनिति अन प्राणने अध्न्यादित्वाद्यः अन्योऽसदृशे तरयोरिति
हेमः तरणं तरः ऋदोरप् एः कामस्य नरः इनाकामेन तरतीति वा अच् इतरः पामरेन्यस्मिन्निति हेमचंद्रः षट् उदक्क अथाक्कमयूरव्यंसकादयश्चेति साधुः एको भेदोस्य नए

अ.तृ. त्वान्मध्यपदेनलोपाभावः द्वे अनेकप्रकारस्य उच्चंडनं चडि कोपे घञ् विलंब्यते स्म लवि अवस्रंसने क्तः न विलंबितं स्वामी तु अवलंबनमिति पठति द्वे ८२ अरुं क्षिणुदति तुद
टी.रा. व्यथने विध्वकृ खो सुदृइति खच् अरुर्द्विषदिति मुम् मर्म स्पृशति स्पृश उपतापे स्पृशोनुदके इति क्विन् द्वे मर्मपीडकस्य न वाधा स्य निष्क्रांतमर्गलायाः निरादय इति समासः द्वे अ
९३ वाधितस्य प्रगतं सव्यात् प्रसव्यं वाच्यलिंगं स्यात् प्रतिकूलानुकूलयोः प्रतीपं कूलात् अपगतं सव्यात् अपसव्यं त्रिलिंगं तु दक्षिणे प्रतिकूलयोरिति विश्वः अपतिष्ठति अपष्ठुः सु
षुस्थ इति कुः सुषामादिः अपष्ठुः पुंसि कालि च वामे स्यादन्यलिंगकः चत्वारि विरुद्धार्थस्य ८३ सूयते सूप्रेरणे अचो यत् सव्यं वामे च दक्षिणे इत्यजयः सव्यं तु दक्षिणे वामे प्रतिकूले चे
ति विश्वः एकः अपक्रांतं सव्यात् एकं संकटति कटे वर्षावरणयोः अच् यद्वा संवाधार्थात् संप्रग्व्दान्स्वार्थे संप्रोदश्चेति कटच् सम्यग्वाधं ते अत्र वाध लोडने हलश्चेति घञ् सं
वाधः संकटे भये इति विश्वः द्वे संकीर्णस्य कलते कल्पते वा कल शब्दसंख्यानयोः सलिकलीनीलं च गात्यते गाहू विलोडने बहुलमन्यत्रापीति युच् पृषोदरादित्वाद्ध्रस्वः गम्य
मानस्य गतेर्वा हननं गहनं वन दुःखयोः गव्हरं कलिले चापीति विश्वः हेमो द्वे दुःप्रवेशस्य ८४ संकीर्यते स्म कृ विक्षेपे क्तः संकीर्णं निचिते पि स्यादशुद्धे चाभिधेयवत् संकोलति

उच्चावचं नैकभेदमुच्चंडमविलंबितं ८२ अरुंतुदं तु मर्मस्पृगवाधं तु निरर्गलं प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ८३ वामं शरीरं सव्यं स्यादपस
व्यं तु दक्षिणं संकटं ना तु संवाधः कलिलं गहनं समे ८४ संकीर्णं संकुलाकीर्णं मुंडितं परिवापितं ग्रथितं संदितं दृब्धं विसृतं विस्तृतं ततम् ८५ ॥

कुल संख्याने इगुपधेति कः आकीर्यते स्म कृ विक्षेपे क्तः यत्तु शक्तिधातोरुल्लचि शंकुलं तालव्यादीति तु स्वामीति मुकुटेनोक्तं तच्चिंत्यं संकोलतीति स्वामिना विगृहीतत्वात् त्रीणि
नानाजातीयसंमिलितस्य यथा संकीर्णवर्गः केचित्तु एतान्पूर्वपर्यायानाह संकीर्णं मृषिपत्नीनामिति प्रयोगात् मुंड्यते स्म मुडि खंडने क्तः परिवाप्यते स्म मुंडनार्थोत्र वपिः ९३
ण्यंतः द्वे ग्रंथ्यते स्म ग्रंथ संदर्भे ग्रंथितमिति पाठांतरं तत्र ग्रथि कौटिल्ये इति धातुः क्तः ग्रंथितं गुंफितेऽक्रांते हिंसिते च त्रिलिंगकं संदीयते स्म दो अवखंडने द्यतिस्यतीत्यं गुंफि
तमिति पाठे गुंफ ग्रंथे ण्यंतः दृभ्यते स्म दृभी ग्रंथे क्तः त्रीणि विसरति स्म सृ गतौ गत्यर्थेति क्तः विस्तर्यते स्म स्तृञ् आच्छादने क्तः तन्यते स्म तनु विस्तारे क्तः ततं व्याप्ते वि
स्तृते च त्रिलिंगकं क्लीवं वीणादिवाद्ये स्यात्पुंल्लिंगस्तु सहात नो त्रीणि ८५॥

अंतर्गम्यते स्म गच्छति स्म वा गम्लृ गतौ क्तः अंतर्गतं विस्मृते स्यान्मध्यप्राप्ते च वाच्यवत् इति विश्वः विस्मर्यते स्म स्मृ आध्याने क्तः द्वे प्राप्यते स्म आप्लृ व्याप्तौ क्तः प्राप्तं लब्धे समंजसे प्रणिधीयते स्म क्तः दधातेर्हिः द्वे स्थापितस्य वेल्ल्यते स्म वेल्ल चलने क्तः वेल्लितं गमने क्लीवं कुटिले विधुते त्रिषु प्रेंख्यते स्म इखि गतौ क्तः आधूयते स्म धूञ् विधूनने धूत्रू कंपने वा क्तः चल्यते स्म चल कंपने क्तः आकंप्यते स्म कपि चलने क्तः धूयते स्म धुञ् कंपने क्तः धुतं सक्तविधूते चेति हेमः षट् ८६ नुद्यते स्म नुद प्रेरणे क्तः नुदविद्रिजि वा नत्वं अस्यते स्म असु क्षेपणे क्तः अस्तः क्षिप्ते पश्चिमाद्रौ इति हेमः निष्ठीव्यते स्म ष्ठिवु निरसने क्तः यस्येति नेट् छ्वोः शूडित्यूट् आविध्यते स्म व्यध ताडने क्तः। आविद्धो वाच्यलिंगः स्यात् कुटिले च पराहते क्षिप्यते स्म क्षिप प्रेरणे क्तः ईर्यते स्म ईर गतौ कंपने च क्तः समपरितः क्षिप्यते स्म निव्रियते स्म वृञ् आवरणे क्तः द्वे परिखादिना वेष्टितस्य मूष्यते स्म मूष स्तेये क्तः मूषितं द्रुत खंडयोरिति विश्वः द्वे चोरितस्य ८७ प्रवर्ध्यते स्म प्रसरति स्म वृधु वृद्धौ सृ गतौ गत्यर्थेति क्तः द्वे प्रसृतस्य न्यस्यते स्म

अंतर्गतं विस्मृतं स्यात्प्राप्तप्रणिहिते समे वेल्लितप्रेंखिताधूतचलिताकंपिताधुते ८६ नुन्ननुत्तास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः परिक्षिप्तं तु निवृतं मूषितं मुषितार्थकं ८७ प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते निर्दिग्धोपचिते गूढगुप्ते गुंठितरूषिते ८८ द्रुतावदीर्णे उद्गूर्णोद्यते काचितशिक्यिते॥

असु क्षेपणे क्तः निसृज्यते स्म सृज विसर्गे क्तः द्वे त्यक्तस्य गुण्यते स्म गुण आमंत्रणे क्तः आहन्यते स्म हन् क्तः द्वे गुणितस्य निर्दिह्यते स्म दिह उपचये उपचीयते स्म चिञ् चयने क्तः भवेदुपचितं दिग्धे समृद्धे वाच्यलिंगकं द्वे पुष्टिं प्रापितस्य गुह्यते स्म गुहू संवरणे क्तः गूढं रहसि गुप्ते च नद्योः संवृते त्रिष्विति विश्वः गुप्यते स्म गुप गोपनार्थे क्तः गुप्तं गूढे त्राते इति हेमः द्वे छादनगोपनस्य गुंड्यते स्म गुडि वेष्टने क्तः गुंठितमिति पाठे गुठि वेष्टने क्तः रूष्यते स्म रूषि वेष्टनार्थः क्तः अपठितोपि भ्वादौ दृष्टव्यो भ्वादेरवृत्तकृतत्वात् द्वे गुंडालित इति ख्यातस्य ८८ द्रूयते स्म द्रु गतौ क्तः द्रुतं शीघ्रविलीनयोरिति हैमः अवदीर्यते स्म दॄ विदारणे क्तः द्वे प्रापितद्रवीभावस्य उद्गूर्यते स्म गुरी उद्यमे क्तः उद्यम्यते स्म यम उपरमे क्तः द्वे उत्तोलितस्य काचे धृतं शिक्ये धृतं प्रातिपदिकाद्धात्वर्थे इति णिच् क्तः द्वे शिक्ये स्थापितस्य घ्रायते स्म घ्रा गंधोपादाने क्तः नुदविदेति वा नत्वं घ्राणं तु घ्रातघ्राणयोरिति हेमः द्वे आघ्रातस्य दिह्यते स्म दिह उपचये क्तः दिग्धो विषाक्तबाणे स्यात्संसिलिप्तेऽन्यलिंगकः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitization by eGangotri

लिप्यते स्म लिप्तउपदेहे क्तः लिप्तं भुक्तिविलिप्तयोः विषाक्ते इति हेमः दिग्धलिप्तइति ख्यातस्य समुदच्यते स्म अंचुगतौ क्तः उद्ध्रियते स्म हृञ् हरणे धृञ् धारणे वा क्तः उद्धृतं
स्यात्रिषूत्क्षिप्ते परिभुक्तोज्झिते पि च वहेकूपादेर्निष्काशितजलादेः ८८ वेष्ट्यते स्म वेष्ट वेष्टने क्तः वेष्टितं रुद्धे लासके करणे नरे वलयं जातमस्य तारकादिः यद्वा वलयवत्कृतं तत्करो
तीति णिच् क्तः संवीयते स्म व्येञ् संवरणे क्तः रुध्यते स्म रुधिर् आवरणे क्तः आव्रियते स्म वृञ् आवरणे क्तः पंच नवादि वेष्टितस्य रुज्यते स्म रुजो भंगे क्तः ओदितश्चेति नत्वं भुग्न
ते स्म भुजो कौटिल्ये क्तः हे वक्रस्य निशाय्यते शो तनूकरणे क्तः शाच्छोरिति वेत्वं क्ष्णूयते स्म क्ष्णु तेजने क्तः तेज्यते स्म तिज निशाने चुरादिः क्तः चत्वारि शाणादिना तीक्ष्णीकृ
तस्य ८० विनश्यनं विनाशः भावे घञ् उद्गतं मुखमारंभोस्य विनाशे उन्मुखं पच्यते डुपचष् पाके क्तः पचो वः पक्वं परिणते नाशाभिमुखे इति हेमः द्वे अहेयीत ह्रील
ज्जायां क्तः नुदविदेति वा नत्वं लज्जा जातास्य तारकादिः त्रीणि व्रियते स्म वृञ् वरणे क्तः वृत्यते स्म वृतु वर्तने क्तः वृत्तं वृत्ते दृढे मृते चरित्रे वर्तुले छंदः स्वतीताधानयोर्भ

घ्राणघ्रातेदिग्धलिप्तेसमुदक्तोद्धृते समे ८९ वेष्टितंस्याद्वलयितंसंवीतंरुद्धमावृतं रुग्णंभुग्नेथनिशितक्ष्णुतशातानितेजिते ९० स्याद्वि
नाशोन्मुखंपक्वंह्रीणह्रीतौतुलज्जिते वृत्तेतुवृत्तवावृत्तौसंयोजितउपाहितः ९१ प्राप्यंगम्यंसमासाद्यंस्यन्नंरीणंस्नुतंस्रुते संमूढःस्या
त्संकलितोवगीतःख्यातगर्हणः ९२ विविधःस्याद्बहुविधोनानारूपःपृथग्विधः॥ ९३ नेति हेमचंद्रः केचित्तु वावृतु वर्तने इति पठंति तन्मते वा

वृत्यते स्म क्तः त्रीणि स्वयंवरादौ स्वीकृतस्य वरादेः संयोज्यते स्म युजिर् योगे ण्यंतः क्तः उपाधीयते स्म दधातेर्हिः उपाहितोऽनलो त्पाते पुमानारोपिते त्रिषु हेमः लितस्य
९१ प्राप्यते आप्लृ व्याप्तौ ण्यत् गम्यते गम्लृ गतौ पोरदुपधादिति यत् समासद्यते षद्लृ विशरणादौ ण्यत् त्रीण्याप्तुं शक्यस्य स्यद्यते स्म स्यंदू प्रस्रवणे रदाभ्यामिति
नत्वं रीयते स्म रीङ् प्रस्रवणे क्तः स्वादय ओदित इति नत्वं स्नूयते स्म स्नु गतौ क्तः स्रूयते स्म स्रु प्रस्रवणे क्तः चत्वारि संगुह्यते स्म गुहू संवरणे क्तः संकल्यते स्म कल सं
ख्याने क्तः द्वे अंकांतरे णौ कीकृतस्य संख्याकादेः अवगीयते स्म गै शब्दे क्तः घुमास्थेतीत्वं अवगीतं तु निर्वादे दुष्टगर्हितयोः पौनि विश्वः ख्याता गर्हणा यस्य द्वे प्रसिद्ध
निंदस्य ९२ विचित्रा विधा यस्य बहवो विधा यस्य नानारूपं यस्य पृथग्विधा यस्य चत्वारि अवरीयते स्म राङ् स्रवणे क्तः धिगकारिकः पर्यायांतरं दर्शयितुमुक्तं स्वे १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृतस्यानुवादः यद्वा निर्भर्त्सित उक्तः अत्र तु निंदितमात्रे हे अवध्वस्यते स्म ध्वंसु गतौ च क्तः अपध्वस्त इत्यपि पाठः अपध्वसं परिसक्ते विदितेप्यवचूर्णिते इति विश्वः अवचूर्ण्यते स्म सत्यापयतिण्यं तात् क्तः यद्वा चूर्ण पेषे चुरादिः हे सितसुधादिचूर्णादेः ९३ फण्यते स्म फण गतौ क्तः क्षुध्वस्तांते ति साधुः हे अनायासेन कृतस्य क्वाथविशेषस्य स्वन्यते स्म स्वन शब्दे ध्वन्यते स्म ध्वन शब्दे क्तः हे बध्यते स्म बधं बधने क्तः संदान्यते स्म दान खंडने क्तः मूयते स्म मूङ् बंधने क्तः उद्घते संघते स्म दो अवखंडने क्तः द्यतिस्यतीतीत्वं सीयते स्म षिञ् बंधने क्तः षट् निश्चयेन पक्कं क्वथ्यते स्म क्वथे निष्पाके क्तः हे श्रायते स्म श्रा पाके शृतं पाक इति साधुः एकं निर्वाति स्म वा गतिगंधनयोः गत्यर्थेति क्तः निर्वाणोऽवात इति साधुः आदिना निर्वाणो हस्ती निमग्न इत्यर्थः निर्वाणमस्तंगमने निर्वृत्तो गजमज्जने संगमे च्यपवर्गे चेति हेमः एकं गतश्वासावनिलश्च तस्मिन् निवहने दृष्यकृपरं वा एकं ९५ परिणामति स्म णम प्रह्वत्वे अकर्मकत्वात् क्तः हे परिणामं प्राप्तस्य गूयते स्म गु पुरीषोत्सर्गे दुर्गवोर्दीर्घश्चेति नत्वं ल्वादिभ्यश्चेति मुक्तो टोक्ति श्विं त्वा नो दारिकत्वेनास्य ल्वादित्वाभावात् हद्यते स्म हद पुरीषोत्सर्गे क्तः हे गुदनिष्काशितपुरीषस्य मिह्यते स्म मिह सेचने क्तः मूत्र्य

अवरीणो धिकृतश्चाप्य वध्वस्तोवचूर्णितः ९३ अनायासकृतं फांटं स्वनितं ध्वनितं समे बद्धं संदानितं मूतमुद्दितं संदितं सितं ९४ निष्पक्वं क्वथितं पाके क्षीराज्यपयसां शृतं निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गते निले ९५ पक्कं परिणते गूनं हन्नमीढं तु मूत्रिते पुष्टे तु पुषितं सोढे क्षांतमुद्वांतमुद्गते ९६ दांतस्तु दमिते शांतः शमिते प्रार्थितेऽर्दितः ॥ ९७

ते स्म मूत्र प्रस्रावे क्तः हे उपस्थनिष्काशितमूत्रस्य पुष पुष्टौ पुष्यते स्म क्तः भौवादिकस्य लिट् हे यस्य पोषणं कृतं तस्य सह्यते स्म षह मर्षणे क्तः सहि वहोरोदवर्णस्य क्षम्यते स्म क्षमूष सहने क्तः अनुनासिकेति दीर्घः हे उद्वम्यते स्म टुवम उद्गिरणे क्तः उद्गम्यते स्म गम्लृ गतौ क्तः हे वमित्वा त्यक्तस्यान्नादेः ९६ दम्यते स्म दमु उपशमे णिजंतः क्तः वा दांत शांतेति साधुः दांतस्तु दमिते पि स्यात्तपः क्लेशसहेपि च हे कृतं दमनं यस्य वृषभादेस्तस्य यत्तु मुकुटेनाणिजंतस्य निपातनमुक्तं तच्चिंत्यं वा दांतेत्यत्र णेरित्यनुवर्तनात् अणिजंतस्य यस्य विभाषेति नित्यनिषेधान्निपातं विनापि सिद्धत्वात् शम्यते स्म शमु उपशमे ण्यंतः शांतो रोगः निवृत्त इत्यर्थ इति यत्तु केवलस्य निपातनमुक्तं मुकुटेन स्त्रीकृतं तच्चिंत्यं वा दांतेत्यत्र णेरित्यनुवर्तनात् शांतो ति मुक्त रसयोः

अ॰ नृ॰ हिंसार्थ्यते स्म अर्थ याच्ञायां क्तः अर्द्यते स्म अर्द गतौ याचने च क्तः अर्दितं याचितं पिस्या हारान्याधौ च हिंसितं हि ज्ञप्यते स्म मारणादौ ज्ञा मित् ण्यन्तः वा दान्तेति साधु
टी॰ सा॰ हि छाद्यते स्म छद अपवारणे वा दान्तेति साधु छन्नं रह श्छादितयोरिति हेमः हि पूज्यते स्म पूज पूजायां क्तः अंच्यते स्म अंचु पूजायां अंचेः पूजायामितीट् नांचेः पूजा
१५ यामिति नलोपाभावः अर्चित इति पाठे अर्च पूजायां क्तः हि ८७ पूर्यते स्म पूरी आप्यायने ण्यन्तः वा दान्तेति साधुः पूर्णः क्रान्ते पूरिते चेति हेमः हि क्लिश्यते स्म क्लिश विबाधने क्तः
क्लिशः क्त्वा निष्ठयोरिति वेट् हि शमलक्लेशस्य अवस्यते स्म अवसीयते स्म वा षो अन्तकर्मणि क्तः द्यति स्यतीति त्वं सितं स्त्र वसिते वद्धे वर्णे सिताज्जुशर्करा इति हेमः हि समाप्त
स्य प्रुष्यते स्म प्लुष्यते स्म वा प्रुषप्लुष दाहे क्तः यस्येति नेट् उष्यते स्म उष दाहे क्तः उषितं व्युषिते दग्धे इति हेमः दह्यते स्म दह भस्मीकरणे क्तः चत्वारि तक्ष्यते स्म त्वक्ष्यते स्म
न सूक्ष्मतनूकरणे क्तः अतनु सूक्ष्मतनु कारि कृतं क्तः त्रीणि ८८ वेध्यते स्म विध विधाने ण्यन्तः छिद्यते स्म छिद द्वैधीकरणे अदन्तः क्तः विध्यते स्म व्यध ताडने क्तः विद्धं स्याद्वेधिते
क्षिप्ते सदृशे वासिते त्रिष्विति विश्वः त्रीणि विद्यते स्म विद विचारणे क्तः नुद विदेति वा नत्वं यत्तु विभाषा गमहनेति विकल्पाद्यस्य विभाषेतीड्भावः स्तुक्तं सुकुटे न तन्न

क्षमसुज्ञपिते च्छन्नश्छादिते पूजिते ञ्चितः ८७ पूर्णसुपूरिते क्लिष्टः क्लिशिते ऽवसिते सितः प्रुष्टप्लुष्टोषिता दग्धेतष्टत्वष्टौ तनूकृते ८८ वेधि
तच्छिद्रितौ विद्धविन्नविन्नौ विचारिते निष्प्रभे विगतारोकौ विलीने विद्रुतद्रुतौ ८९ सिद्धनिर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ०॥

असानिट्त्वात् विन्नं विचारिते लब्धे इति विश्वः वित्तं ख्यातं बंधने वाच्यलिंगः ख्यातेति विचारिते विचार्यते स्म चर गतौ ण्यन्तः क्तः त्रीणि निष्क्रान्ता प्रभा स्मात् विगच्छ
ति स्म गम्लृ गतौ गत्यर्थेति क्तः विगतो वीतं निष्प्रभावितिरुद्रः रोचनं रोकः रुच दीप्तौ घञ् नरोकोस्य त्रीणि विलीयते स्म लीङ् श्लेषणे गत्यर्थेति क्तः स्वादय ओदि
त इति नत्वं विद्रवति स्म द्रु गतौ गत्यर्थेति क्तः द्रुतं शीघ्र विलीनयोरिति हेमः त्रीणि स्वतः प्राप्त द्रवीभावस्य ८९ सिध्यति स्म षिधु संराद्धौ निर्वर्तते स्म वृतु वर्तने १५
निष्पद्यते स्म पद गतौ गत्यर्थेति क्तः सिद्धो वा द्यादिके स्व योनौ निष्पन्न मुक्तयोः नित्ये प्रसिद्धे चेति हेमः त्रीणि दीर्यते स्म दृ विदारणे ण्यन्तः क्तः भिद्यते स्म भिदिर् विदा
रणे क्तः चुरादिः ण्यन्तः क्तः त्रीणि उष्यते स्म उषी तंतु संताने क्तः सीव्यते स्म षिवु तंतु संताने क्लोरिस्युट् ऊयते स्म वेञ् तंतु संताने क्तः यत्तु षिवु तंतु संताने दी० ॥

CC-0. In Public Domain. Digitization by eGangotri

र्वादिः च्छोरित्यूट् वलि लोपः स्यूतमिति मुकुटेनोक्तं तदसंबद्धं दीर्घादित्वस्य वा धातुर्वस्य ऊठि वलि लोपासंभवाच्च स्यूतिः सीवनसंतत्योः स्त्रियां स्यूतिः प्रसेवके संतन्यते स्म क्तः तं-
तुभिः संततं कर्तृकरणेति समासः त्रीणि १० अर्हितेस्म अर्ह पूजायां क्तः नमः कृतं नमोवरिवश्चित्रङः क्यच् क्तः क्यस्य विभाषेति य लोपः अपचाय्यते स्म चायृ पूजानिशामनयोः क्तः अर्च्य-
ते स्म अर्च पूजायां क्तः चायते श्चिरिति चिभावः षट् नमस्कृतस्य वरिवः कृते नमोवरिवश्चित्रङ इति क्यच् क्तः क्यस्य विभाषा उपास्यते स्म आस उपवेशने क्तः उपचर्यते स्म चरेः क्तः चत्वारि
पूजितस्य ११ संताप्यते स्म तप दाहे चुरादिः संतप्यते स्म तप संतापे क्तः धूप्यते स्म धूप संतापे आयादय इति वा ऽयः क्तः दूयते स्म टु दु उपतापे क्तः दुग्वोर्दीर्घश्चेति नत्वं एभ्यः कर्मणि क्त
भ्यः कर्तरि क्तः एतान्येव रूपाणि पंच हर्षितस्य हृष्यति स्म वा हृषु अलीके हृष तुष्टौ क्तः हृषेर्लोमसु इति विकल्पितेट्कत्वान्नत्वस्य विभाषेति नेट् हृष्टो रोमांचितेऽपि च जात हर्ष प्रति-
हते विस्मितेऽप्यभिधेयवत् माद्यति स्म मदी हर्षे क्तः नध्याख्येति णत्वं न तृप्यति स्म तृप प्रीणने क्तः ल्हादते स्म ल्हादी सुखे च क्तः रदाभ्यामिति नत्वं ल्हादो निष्ठायामिति ह्रस्वः प्रमोदते
स्म मुद हर्षे क्तः नध्याख्येति नत्वम् प्रीयते स्म प्रीङ् प्रीणने क्तः षट् १२ छिद्यते स्म छिदिर् द्वैधीकरणे क्तः छिन्नं कृत्ते त्रिलिंगं स्यात् द्वयोः प्यामपि योषिति छायते स्म छो छेदने क्तः

ऊतं स्यूतमुतं चेति त्रितयं तन्तुसंतते १० स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितं वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ११
संतापितसंतप्तौ धूपितधूपायितौ च दूनश्च हृष्टे मत्तस्तृप्तः प्रह्लन्नप्रमुदितःप्रीतः १२ छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् स्रस्तं ध्व-
स्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् १३ लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥ १९ शाच्छोरन्यतरस्यामिति इत्वं वा लूयते स्म लूञ् छेदने क्तः ल्वादिभ्यश्चे-

ति नत्वं कृत्यते स्म कृती छेदने क्तः दायते स्म दाप् लवने क्तः दीयते स्म दो अवखंडने क्तः द्यतिस्यतिमास्थामिति इत्वं वृश्च्यते स्म ओ व्रश्चू छेदने क्तः अष्टौ स्रस्यते ध्वस्यते भ्रस्यते स्म स्रं-
सु ध्वंसु भ्रंसु अवस्रंसने क्तः स्कंद्यते स्म स्कंदिर् गत्यादौ क्तः पद्यते स्म पद गतौ क्तः च्यूयते स्म च्युङ् गतौ गल्यते स्म गल अदने क्तः एभ्यो गत्यर्थाकर्मकेति कर्तरि क्ते एतान्येव रू-
पाणि सप्त १३ लभ्यते स्म डुलभष् प्राप्तौ क्तः प्राप्यते स्म आप्लृ व्याप्तौ क्तः विद्यते स्म विद्लृ लाभे क्तः भाव्यते स्म भू प्राप्तौ आधृषाद्वेति णिजंतः क्तः आसाद्यते स्म षद्लृ विशरणग-
त्यवसादनेषु ण्यंतः क्तः ६ षट् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

... Public Domain. Digitization by eGangotri

अ॰ तृ॰ अन्वेष्यते स्म एष्ट गतौ इषिरेयं तौ वा क्तः गवेष्यते स्म गवेष मार्गणे क्तः अन्विष्यते स्म इष इच्छायां क्तः मार्ग्यते स्म मार्ग अन्वेषणे क्तः मृग्यते स्म मृग अन्वेषणे क्तः पंच १०४ अर्द्यते स्म
टी॰ रा॰ अर्द गतौ अर्देर्दीर्घश्चेति रक् आर्द्रीन क्षत्रभेदे स्यात्त्रियां क्लिन्नेभिधेयवत् उपसर्गाद्ध्रस्व ऊहेतेरिति पूर्वपदस्यनैर्हस्वो रेफः आङ्पूर्वाद् दर्द आ अर्द्यते स्म आर्द्रीं चीति रकि आर्द्र इति मु
१६ कुटमूक्त सूत्रात् दर्शनमूल क्तः सहार्द्रत्वे नक्लिद्यति स्म क्लिदू आर्द्रीभावे अकर्मकत्वात् कर्तरि क्तः तिम्यति स्तिम्यति स्म तिम ष्टिम आर्द्रीभावे अकर्मकत्वात् क्तः तिमितस्तरलेलि
न्ने इति हेमः समुनत्ति स्म उन्दी क्लेदने अकर्मकत्वात् क्तः नुदविदेति वा नत्वं सह त्रायते स्म त्रैङ् पालने क्तः नुदविदेति वा नत्वं त्राणं त्रातेरक्षणे च त्रायमाणोषधावपीति हेमः
रक्ष्यते स्म रक्ष पालने क्तः अव्यते स्म अव रक्षणादौ क्तः गोपायते स्म गुपू रक्षणे क्तः आयादय आर्द्धधातुके वा गुप्यते स्म क्तः गुप्तं गूढे त्राते इति हेमः षट् १०५ अवगण्यते स्म ग
णसंख्याने क्तः अवमन्यते स्म मन ज्ञाने क्तः अवज्ञायते स्म अवमान्यते स्म अवमान पूजायां क्तः परिभूयते स्म पंच त्यज्यते स्म त्यज हानौ क्तः हीयते स्म ओहाक् त्यागे क्तः घुमा
स्थेति ईत्वं विधूयते स्म धूञ् कंपने क्तः समुज्झ्यते स्म उज्झ उत्सर्गे क्तः धूयते स्म धू विधूनने क्तः धूतो कंपिते भर्त्सिता विति हेमचंद्रः॥ उत्सृज्यते स्म सृज विसर्गे क्तः षट् १०६ उच्य

अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितं १०४ आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च त्राणं त्रातं रक्षितमवितं गोपायितं गुप्तं १०५ अव
गणितमवमतावज्ञातेऽवमानितं च परिभूते त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टं १०६ उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं ल
पितं बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते॥१०७॥ १९ तेस्म वच भाषणे ब्रुञो वचिर्वा क्तः भाष्यते स्म भाष व्यक्तायां वाचि क्तः उद्यते स्म वद व्य
क्तायां वाचि क्तः जल्प्यते स्म जल्प व्यक्तायां वाचि क्तः आख्यायते स्म ख्या प्रकथने चक्षिङ आदेशो वा क्तः अभिधीयते स्म दधातेर्हिः लप्यते स्म लप व्यक्तायां वाचि क्तः सप्त बु
ध्यते बुध अवगमने क्तः श्व्यादिः सेट् क्तः बुद्धः पंडिते बोधिते जिने इति हेमः मन्यते स्म मनु अवबोधने क्तः यस्य विभाषा त्यस्यानित्यत्वादिट् न दृनित्यत्वे च क्तौ छेदनइतीदिल १६
क्षणं लिंगं अन्यथा सेक्षिवीति वेद्ध त्वात् स्विद्धे किं तेन यद्वा मनवेति भ्वादिमनिर्वोपदेवः पठति स सेट् विद्यते स्म विद ज्ञाने क्तः प्रतिपद्यते स्म पद गतौ क्तः अवसीयते स्म षो अं
तकर्मणि क्तः द्यतिस्यतीति त्वं अवगम्यते स्म गम्लृ गतौ क्तः सप्त १०७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उरीक्रियते स्म उररीक्रियते स्म अनंगमंगमकारि आश्रूयते स्म श्रुश्रवणे कः प्रतिज्ञायते स्म संगीर्यते स्म गॄनिगरणे कः विद्यते स्म विदज्ञाने कः संश्रूयते स्म समधीयते स्म दधा तिहिः उपश्रूयते स्म उपगम्यते स्म एकादश १०७ ईड्यते स्म ईडस्तुतौ कः इलयोरैक्यात् शस्यते स्म शंसु स्तुतौ कः शासंसमे प्रशंसे चेति हेमः पण्यते स्म पण व्यवहारे स्तु तौ आयो वा पनाय्यते स्म पन च आयो वा प्रणूयते स्म णु स्तुतौ गीर्यते स्म गॄ शब्दे कः वर्ण्यते स्म वर्ण वर्णक्रियाविस्तारगुणवचनेषु कः अभिष्टूयते स्म ष्टुञ् स्तुतौ कः स्तुतम र्थेपि षां ज्ञानि द्वादश १०८ भक्ष्यते स्म भक्ष अदने कः चर्व्यते स्म चर्व अदने कः लिह्यते स्म लिह उपदेहे कः क्वचित्तु लीढमिति पाठः तत्र लिह आस्वादने धातुः प्रत्यवसी यते स्म षो अन्तकर्मणि कः गीर्यते स्म गॄ निगरणे कः अचि विभाषेति वा लत्वमिति स्वामी तन्न श्रुकः कितीति णिषेधप्रसंगात् गारणं गिलिः इक् कृष्यादिभ्यः अचीति वा लत्वं गिलिर्जातास्य तारकादिः खाद्यते स्म खाद भक्षणे प्सायते स्म प्सा भक्षणे अभ्यवह्रियते स्म अद्यते स्म अद भक्षणे अदोऽनन्ने इति ज्ञापकाज्जग्धिर्वा ग्रस्यते स्म ग्रसु ग्लसु अदने।

उरीकृतमुररीकृतमंगीकृतमाश्रुतं प्रतिज्ञातं संगीर्णं विदितं संश्रुतं समाहितोपश्रुतोपगतं १०७ ईलितशस्तपणायितपनायितप्रणुतपणि
तपनितानि अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि १०८ भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातं अभ्यवहृतान्नजग्धग्र
स्तग्लस्ताशितं भुक्ते ११० क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः १११ साधिष्ठद्राघिष्ठस्फेष्ठगरि
ष्ठह्रसिष्ठवृंदिष्ठाः बाढव्यायतबहुगुरुवामनवृंदारकातिशये ११२॥ इति विशेष्यनिघ्नवर्गः॥

११ अश्यते स्म अश भोजने भुज्यते स्म भुज पालनाभ्यवहारयोः चतुर्दश ११० अतिशयेन क्षिप्रः स्थूलदूरेति साधुः अतिशयेन क्षुद्रः पूर्ववत् अतिशयेन प्रियः प्रियस्थिरेति साधुः अतिशयेन उरुः पूर्ववत् अतिशयेन स्थूलः स्थूलदूरेति साधुः अतिशयेन बहुलः प्रियस्थिरेति साधुः पीवरेति पाठस्त्वयुक्तः ष्ठं टेर्भंगात् पीवेति पाठो नान्तोऽयुक्तः क्षेपिष्ठादीनां क्षिप्रादिभिर्यथासंख्यं ज्ञेयं एकैकं १११ अतिशयेन बाढः अन्तिकबाढयोर्नेदसाधौ अतिशयेन दीर्घः प्रियस्थिरेति साधुः अतिशयेन स्थिरः अतिशयेन गुरुः पूर्ववत् अतिशयेन ह्रस्वः स्थूलेति। साधुः अतिशयेन वृंदारकः प्रियस्थिरेति साधुः साधिष्ठादीनां बाढादिभिर्यथासंख्यं बोध्यं एकैकं ११२ ॥ इति विशेष्यनिघ्नवर्गविवरणं॥ ० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitized by eGangotri

अ॰ तृ॰ टी॰ रा॰ ९७

संकीर्णार्थैः संकीर्णलिंगैश्चारब्धत्वात्संकीर्णवर्गे प्रकृत्यर्थादिभिर्लिंगमूहेत यथा अपरस्पराः अयंहि लिंगविशेषाभिधायिप्रत्ययस्या विधानात् प्रकृतिः अस्य च परवल्लिंगमित्यतिदेशात् परशब्दस्यैव लिंगं भवति परशब्दस्य च सर्वनामत्वात् त्रिलिंगत्वं न च द्वंद्वे चेति निषेधः तस्य समुदायत्वेनावयवविषयत्वाभावात् यत्तु अयंहि विभक्तिप्रकृतित्वात् प्रकृतिरिति मुकुटेनोक्तं तन्न एवं सति सर्वत्र प्रकृत्यैव लिंगनिर्णये प्रत्ययार्थेन लिंगनिर्णयाभिधानस्य वैयर्थ्यप्रसंगात् प्रत्ययार्थे न यथा शांतिः स्त्रियां क्तिनो विधानात् विधूननं नपुंसके ल्युटो विहितत्वात् आद्यशब्देन रूपभेदादिग्रहः रूपभेदेन कर्मादेः क्लीवत्वादि साहचर्येण डित्वादेः पुंस्त्वादि यद्वा भिन्नजातीयेन लिंगेन संसर्गे सति अत्र वर्गे वर्गांतरे च प्रकृत्यर्थाद्यैर्लिंगं ज्ञेयं लिंगसंग्रहे वक्ष्यमाणमपि लिंगमुन्नेयत्वेनेहोक्तं क्रियते कृत्तो भावे कर्मणि च मनिनूषाश्वरिङ् घायग्लिङ् सु अचिश्वितीयङ् कर्मण्याप्ये क्रियायां च पुंनपुंसकयोर्मतमिति रुद्रः द्वे क्रियायाः तत्सातत्ये क्रियायाः क्रियावतां चनैरंतर्ये अपरे च परे चेति द्वंद्वः अपरस्पराः क्रियासातत्ये इति सुट् निपात्यते क्रियासातत्ये अपरस्परं गच्छंति निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परमिति भागुरिः क्रियावतां च सातत्ये तु लिंगं त्रयं अपरस्पराः सार्थाः स्त्रियश्च गच्छंति अपरस्परा॥

प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिंगमुन्नयेत् कर्मक्रियातत्सातत्ये गम्ये स्युरपरस्पराः १ साकल्यासंगवचने पारायणतुरायणे यदृच्छा स्वैरिता हेतुशून्यात्वास्था विलक्षणम् २ शमथस्तु शमः शांतिर्दांतिस्तु दमथो दमः॥ ११ त्रिकु ललानि एकं नैरंतर्ये त्क्रियायाः क्रियावतश्च १ साकल्यं च आसंगश्च तौ वक्तः वचैः कर्तरि ल्युट् पारस्य अयनं पूर्वपदात् इति णत्वं क्लीवलिंगमेवेत्येके परायणमिति वा पाठः परमयनं आश्रये तत्परामीष्टपरायणपरं इति द्विरूपिणश्वतः तो तार्ति तुरस्त्वरणे इगुपधेति कः तुरस्य अयनं यत्तु त्वरणं तुरणं वा तृः तुरा आसमंतात् दयनमिति स्वामिमुकुटावाहतुः तन्न अंतर्वर्तिविभक्त्यापदांतत्वेन णत्वोरूपधाया इति दीर्घप्रसंगात् एकैकं ऋच्छनमृच्छा ऋच्छ गत्यादौ गुरोश्चेत्यप्रत्ययः ऋच्छा विशेषणमिति समासः स्वैनेरितुं शीलमस्य सुप्यजातौ णिनिः स्वैरिणो भावः तस्य भाव इति तल् हेतुशून्यत्वं तस्य हेतुनाकारणेन शून्या आस्था स्थितिः विगतं लक्षणमालोचनं यत्र विलक्षणं मतं तस्यानं यदृच्छा निष्प्रयोजनमिति भागुरिः एकं २ शमनं दमनं शमु दमु उपशमे शमादिभ्यः घञ् च भाव इति घञ् नोदात्तोपदेशेति वृद्ध्यभावः स्त्रियां क्तिन् अनुनासिकेति दीर्घः त्रीणि त्रीणि कामक्रोधाद्यभावस्य॥ ॥ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपःक्लेशसहयोः २ पणोधने भावे ल्युट् वर्त्तनं वृञ् वरणे भावे क्तः कर्मणि कर्मणि वा वृतं क्वचिद्दपदानमिति पाठः ३ अस्त कर्मणः कामोऽस्ति यत्र अन्यत्रापीति यः पूर्हिमादित्वात् यवि। तिमुकुटस्तत्पाणिनीयः यद्वा काम्यते कमु कान्तौ अचो यत् काम्यच्छया काम्यस्य वरस्त्री हस्व श्वादेर्वा दानं प्रक्रियते वृञ् वरणे चुरादिः ल्युट् प्रवारणं महादानमिति त्रिकाण्डशेषः २ ३ वशस्य करणं कृञः शाचसंपूर्वः वनु याचने इति वशीकरणार्थः ल्युट् ३ वशीकरणस्य औषध्यादिमूलेन कर्म कर्मैव कार्मणं तद्युक्तात् कर्मणोऽण् ३ कार्मणं इति ख्या तस्य धूञ् कंपने चुरादिः धूञ् प्रीञो रिति नुक् धूविधूननं ल्युट् गाङ् कुटादिभ्य इति ङित्वाद् गुणाभावः ३ कंपनस्य तृप प्रीणने प्रीञ् तर्पणं स्वार्थण्यंतान्नुक् अव रक्षणे ल्युट् त्रीणि ४ पर्याप्तं पर्याप्तिः त्राणार्थः क्तिन् त्रैङ् पालने ल्युट् हस्तेन हस्तस्य वारणं क्वचिद्धारणमिति पाठः प्रहारोद्यतस्य हस्तस्य धारणं रोधः त्रीणि मारणोद्यतनिवारण स्य षिवु तंतुसंताने ल्युट् पृषोदरादित्वाद् दीर्घः ष्ठिवुसिवोर्वा दीर्घ इति स्वामी अन्येषामपीति तु मुकुटः तन्न वचनाभावात् पूर्वपदत्वाभावाच्च क्तिन् च्छ्वोः शूठ् सेवसुसेव नं स्यूतिरिति पाठस्तु न्याय्यः त्रीणि विदरणं दृ विदारणे ऋदोरप् यत्तु ग्रहवृदृ इत्यपीति मुकुटेनोक्तं तन्न दृङादरे इति ह्रस्वस्यैव ग्रहणात् दृ विदारणे इत्यस्य स्वयमुपन्यस्तत्वात्

अवदानं कर्म वृत्तं काम्यदानं प्रवारणं ३ वशक्रिया संवननं मूलकर्म तु कार्मणं । विधूननं विधुवनं तर्पणं प्रीणनाऽवनं ४ पर्याप्तिः स्यात्प
रित्राणं हस्तधारणमित्यपि सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ५ आक्रोशनमभीषङ्गः संवेदो वेदना न ना संमूर्छनमभिव्याप्तिर्याञ्चाभि
शस्तिरर्थना ६ वर्द्धनं छेदनेऽथ द्वे आनंदनसभाजने ॥ ॥

११ स्फुट विकसने कुटादिः ल्युट् भिदिर् विदारणे भिदादयङ् त्रीणि ५ क्रुश आह्वाने ल्युट् षंज संगे घञ् उपसर्गस्य घञीति दीर्घः २ शापस्य विद ज्ञाने घञ् विद चेतनाख्याननिवासेषु चुरादिः ण्यासेति युच् यद्वा विद ज्ञाने घट्टिवंदिविदिभ्यश्चेति युच् ल्युट् चेति ल्युट् स्त्रीक्लीबत्वं २ अनुभवस्य मूर्छा मोहसमुच्छ्राययोः ल्युट् अभिव्यापनं आप्लृ व्याप्तौ क्तिन् लावादिभ्य इति क्तिन् २ सर्वतो व्याप्तेः याचनं टुयाचृ याच्ञायां यजयाचेति नङ् भिक्षणं भिक्ष याच्ञादौ गुरोश्चेत्यः अर्थ याच्ञायां चुरादिः ण्यासेति युच् अर्द गतौ याचने स्वार्थण्यंतः युच् चत्वारि ६ वर्द्ध छेदनपूरणयोः छिदिर् द्वैधीकरणे ॥ ल्युट् वर्द्धनं छेदने वृद्धाविति दंत्योष्ठ्यादावजयः २ टुनदि समृद्धौ ल्युट्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमंत्रणमिति क्वचित्पाठः तत्रमंत्रिगुप्तभाषणे समाजप्रीतिसेवनयोः ल्युट् प्रच्छन्नी प्सायां आङ्पूर्व आनंदनार्थः ल्युट् त्री एष्या लिंगनकुशलप्रश्नादिनानंदनस्य आ
म्नानं म्ना अभ्यासे घञ् आतइतियुक् संप्रदानं दानो घञ् युक्तो दुगुरु परं परागतसदुपदेशस्य स्यपरां क्षिप्रये एरच् हीवहिंसायां विद्धिसादिभ्यो ङ् हेअपचयस्य ७ ग्रहणं ग्रह
म्नानं म्ना अभ्यासे घञ् आतइतियुक् संप्रदानं दानो घञ् युक्तो हुगुरु परंपरागतसदुपदेशस्य स्यपरां क्षिप्रये एरच् हीवहिंसायां विद्धिसादिभ्यो ङ् हेअपचयस्य ७ ग्रहणं ग्रह
उपादाने ग्रहवृद्रित्यप् स्वार्थे एयं तादच् घञ्वा हेग्रहणस्यवशः कांतौ वशिरण्योरित्यप् कमु कांतौ आयादय इतिणिङ्भावे क्तिन् हेइच्छायाः इषु पालने यजयाचेतिनङ् त्रै
उपालने ल्युट् हेरक्षणस्य रणं रणशब्दे वशिरण्योरित्यप् क्वणनं क्वणशब्दे क्वणोवीणायामिति साधुः हे शब्दकरणस्य व्यधनं व्यध ताडने व्यधजपोरित्यप वेधनं विध
विधाने घञ् हेवेधनस्य पचनं डुपचष् पाके वित्वादङ् घञ् हेपचनस्य ह्वानं ह्वेञ् स्पर्द्धायां शब्दे च भावेऽनुपसर्गस्येत्यप् संप्रसारणं च क्तिन् हे आह्वानस्य वरणं वृञ् वर
णे ग्रहवृद्रित्यप् क्तिन् नयोभिरिष्यतेयसुरेवेभ्यः सर्वरोमतः ८ ओवलं उपदाहे घञ् होवलं लुप दाहे घञ् हेदाहस्य नयनं णीञ् प्रापणे घञ् संज्ञापूर्वकत्वाद्वृद्धिर्नयहाली
णी ग्रहवृद्रित्यप् क्तिन् नयोभिरिष्यतेयसुरेवेभ्यः सर्वरोमतः ८ ओवलं उपदाहे घञ् ओवलं लुप दाहे घञ् हेदाहस्य नयनं णयगतौ घञ् संज्ञापूर्वकत्वाद्वृद्धिर्नयहाली
णी त्रप्रापणे श्रिणीभुवइति घञ् हे नीतेः ज्यानं ज्यावयोहानौ ग्लाज्याहाभ्यो निः जरणं जृष्वयोहानौ ॠल्वादिभ्यः
त्राएरच् क्वचिदपवादविषयेप्युत्सर्गोभिनिविशते णीत्रप्रापणे श्रिणीभुवइति घञ् हेनीतेः ज्यानं ज्यावयोहानौ ग्लाज्याहाभ्यो निः जरणं जृष्वयोहानौ ॠल्वादिभ्यः

आप्रच्छन्नमथाम्नायः संप्रदायः क्षयेक्षिया ७ ग्रहे ग्राहो वशः कांतौ रक्षणस्त्राणे रणः क्वणे व्यधो वेधे पचा पाके हवो हूतौ वरो वृतौ ८ ओषः प्लो
षे नयो नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ स्फातिर्वृद्धौ प्रथा ख्यातौ स्पृष्टिः पृक्तौ स्रवः स्रवे ९ एधा समृद्धौ स्फुरणे स्फुरणा प्रमितौ प्रमा० ॥

क्तिनिष्ठवत्वाच्यः रदाभ्यामिति नत्वं हेजीर्णत्वस्य भ्रमणं भ्रमु अनवस्थाने घञ् नोदात्तोपदेशस्येति वृद्ध्यभावः मित्वाद्ध्रस्वः इति मुकुटस्तु चिंत्यः णिच्यस्य प्रवृत्तेः इत्य
क्तिनिष्ठवत्वाच्यः रदाभ्यामिति नत्वं हेजीर्णत्वस्य भ्रमणं भ्रमु अनवस्थाने घञ् नोदात्तोपदेशस्येति वृद्ध्यभावः मित्वाद्ध्रस्वः इति मुकुटस्तु चिंत्यः णिच्यस्य प्रवृत्तेः इत्य
ष्यादिभ्यः हेभ्रमणस्य स्फायी वृद्धौ क्तिन् स्फातिर्वृद्धिः प्रसारो नेति वो पालितः वर्द्धनं वृधु वृद्धौ क्तिन् हेवृद्धेः प्रथनं प्रथ प्रख्याने भिदादयङ् ख्यानं ख्याप्रकथने चक्षिङ १८
देशो वा क्तिन् हेस्पर्शनं स्पृश संस्पर्शे क्तिन् पचनं पृची संपर्के क्तिन् हेस्पर्शनस्य स्रवनं स्नुप्रस्रवणे स्नुगतौ ॠदोरप् हेप्रस्रवणस्य ९ विधानं धाञ् आतश्चोप
इविधागजान्ने ॠद्धौ च क्वचिदेधेतिपाठः एधवृद्धौ गुरोश्चेत्यः समर्द्धनं ॠधु वृद्धौ क्तिन् हेधनसंपत्तेः स्फुरस्फुरणे संचलने च कुटादिः ल्युट् अदुपधपाठे स्फरणम
पिस्तार्थ एयं तादच् संज्ञापूर्वकत्वान्न गुणः हे स्फुरणस्य प्रमाणं डुमिञ् प्रक्षेपणे क्तिन् माङ्माने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनश्चेत्यङ् ह्वे प्रमाणं ज्ञानस्य प्रसवने षूङ् प्रसवे क्तिन् ऋदोरप् पूप्रेरणे वा ह्वे प्रसवनस्य प्रेरणस्य वा श्चोतनं श्चुतिः क्षरणे घञ् प्रघरणं घृ क्षरणदीप्त्योः उपसर्गस्येति
दीर्घः ह्वे क्षरणस्य क्रमणं क्रमु ग्लानौ शमादिभ्यो घञ् च घञि नोदात्तोपदेशेति वृद्धिर्न मित्वाद्ध्रस्व इति मुकुटस्तु चिंत्यः मित्वाणो ह्रस्वविधानात् ह्वे ग्लानेः १० उत्कर्षणं
क्रुष विलेखने घञ् अतिशयनं शीङ् एरच् ह्वे संधानं धाञ् उपसर्गे घोः किः श्लेषणं श्लिष आलिंगने घञ् ह्वे संधानस्य विषयनं षिञ् बंधने एरच् परिनिविभ्यः सेवेति षः
यत्तु वध्यं तेत्रे तिषं सीतिषः विसीयते विषिनोति वात्रेति मुकुटेनोक्तं तन्न भावप्रत्ययानामेव पूर्वापरयोर्दर्शनेनाधिकरणार्थस्यानौचित्यात् ल्युट्प्रसंगाच्च वध्यं तेत्र पुंसी
ति घ इत्यस्यानुपयोगाच्च शीङ् एरच आश्रय इति पाठे श्रिञ् एरच् ह्वे क्षेपणं क्षिप प्रेरणे अभिदाधङ् ल्युट् ह्वे गिलनं गॄ निगरणे क्तिन् ऋत्वादिभ्यः क्तिन्निष्ठावत् इ कृष्यादिभ्यः
साहचर्यात्स्त्रीत्वमिति मुकुटश्चिंत्यः स्त्रियामित्यधिकारात् ह्वे गिलनस्य गुरी उद्यमे कुटादिः ल्युट् उद्यमनं यम उपरमे घञ्संज्ञापूर्वकत्वाद्वृद्ध्यभावः ह्वे आरा उद्यमनस्य

प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्लमे १० उत्कर्षोऽतिशये संधिः श्लेषे विषय आश्रये क्षिपायां क्षेपणं गीर्णिर्गिरौ गुरणमुद्यमे ॥ ११ ॥ उन्नाय
उन्नये श्रायः श्रयणे जयने जयः निगादो निगदे मादो मद उद्वेग उद्भ्रमे १२ विमर्दनं परिमलेऽभ्युपपत्तिरनुग्रहः निग्रहस्तु निरोधः स्यादभि
योगस्त्वभिग्रहः १३ मुष्टिबंधस्तु संग्राहो डिंबे डमरविप्लवौ ॥ ११ ॥११॥ उन्नयनं अवोदौ नियं इति घञ् क्वचिदपवादविषये उत्सर्गोभिनिविशत इत्यस्य ह्वे

उन्नयनस्य श्रयणं श्रिञ् सेवायां श्रिणीभुवः इति घञ् ल्युट् ह्वे जि जये ल्युट् एरच् ह्वे निगदनं गद व्यक्तायां वाचि नौ गदेत्यप् वा घञ् ह्वे गदनस्य मदनं मदी हर्षे मदोनुपसर्गे इत्यप
संधमादयोः इति ज्ञापकात् क्वचिदपवादेति न्यायाद्वा घञ् ह्वे उद्वेजनं ओविजी भयचलनयोः घञ् उद्भ्रमणं भ्रमु अनवस्थाने घञ् नोदात्तोपदेशेति न वृद्धिः ह्वे उद्वेजनस्य १२
मृद क्षोदे ल्युट् परिमलनं मल धारणे घञ् संज्ञापूर्वकत्वान्न वृद्धिः ह्वे कुंकुमादिमर्दनस्य अभ्युपपदनं पद गतौ क्तिन् अनुग्रहणं ग्रह उपादाने ग्रहवृदृनिश्चिगमश्चेत्यप् ह्वे हित
संपादनाहितनिवारणप्रवृत्तेः नियमेन ग्रहणं अप् निरोधनं रुधिर् आवरणे घञ् ह्वे अभियोजनं युजिर् योगे घञ् अभिग्रहणं अप् अभिग्रहो अभिग्रहणेप्यभियो
गः चं गौरव इति रुद्रः ह्वे १२ मुष्टेर्बंधः संग्रहणं समि मुष्टौ वितिग्रहेर्घञ् ह्वे मुष्टिबंधनस्य डिवनम् डिवि नोदे घञ् डीङ् विहायसा गतौ उपनं विद्रवो डिवं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰नृ॰ उणादिनिपात इति मुकुटस्तु निर्मूलः मयच्चनौ पुष्कसेपिंडिवः स्त्रीहनिविप्लवेरति रभसः डमेति शब्दस्य ग्रहणं रादाने वाहुलकात् घञर्थे कः विप्लवनं प्लुङ् गतौ ऋदोरप्
टी॰रा॰ त्रीणि धाडकलुंठनादेः अप्रसत्वकलहस्येति स्वामी वंधनं वंध वंधने ल्युट् प्रसयनं षिञ् वंधने क्तिन् चरणं चर गतौ अनेकार्थत्वाद्वंधने घञ् वंधायसर्पयोश्चार इति रुद्रः
१९ त्रीणि वंधनस्य मुकुटस्तु वंधनसाधनरज्जुनिगडादेरित्याह तन्न भावप्रकरणात् स्वामी तु चारस्थाने स्वारं पठित्वा स्वारादीनां चतुर्णां पर्यायतामाह स्वरति स्पृशत्येपं तापयोः
अचप्रत्याघण् स्पृशति स्पृश वाधनस्पर्शनयोः पदरुजेत्यत्र स्पृश उपताप इति कर्तरि घञ् रेफहीनपाठे तु स्पृश स्पर्शेन वाचयोरिति धातोरच् स्पृशति तृच् अनुदात्त
स्यचेति अमागमः उपतपति तप संतापे तृच् यद्वा स्फारस्पर्शयोर्भावे घञ् स्प्रष्टोपतप्त्रा भवि कृत्यल्युटो वहुलमिति तृच् भावार्थप्रकरणानुरोधात् त्रीणि संतप्तस्य संताप
स्य वा ९७ निकृष्टीकरणं कृञो घञ् विप्रकरणं निकारः स्यात्परिभवे धान्यस्योत्क्षेपणेपि चेति धरणिः द्वे अपकारस्य आकरणं घञ् इंगनं इगि गतौ घञ् कः त्रीणि अभिमा

वंधनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि १४ निकारो विप्रकारः स्यादाकारस्त्विंग इंगितं परिणामो विकारो द्वे समे विकृतिविक्रिये १५ अ
पहारस्त्वपचयः समाहारः समुच्चयः प्रत्याहार उपादानं विहारस्तु परिक्रमः १६ अभिहारोभिग्रहणं निर्हारोभ्यवकर्षणम् अनुहारोनुका
रः स्यादर्थस्यापगमे व्ययः १७ प्रवाहस्तु प्रवृत्तिः स्यात्प्रवहो गमनं वहिः ॥ १४ यानुरूपचेष्टायाः परिणामनं णम प्रह्वत्वे घञ् विकरणं घञ् विकरणं क्ति

न् कृञः शुचवत्वादि प्रकृतेरन्यथाभावस्य द्वयोः साम्यं स्त्रीत्वात् १५ अपहरणं ह्रञ् हरणे घञ् अपचयनं एरच् द्वे अपहरणस्य समाहरणं घञ् समुच्चयनं चिञ् चयने ए
रच् द्वे राशीकरणस्य प्रत्याहरणं घञ् उपादानं दाञो ल्युट् द्वे स्वविषयेभ्य इंद्रियपरावर्तनस्य विहरणं घञ् परिक्रमणं क्रमु पादविक्षेपे घञ् नोदात्तोपदेशेति वृद्धिर्न द्वे
क्रीडार्थं संचरणस्य १६ अभिहरणं घञ् अभिग्रहे ल्युट् द्वे आभिमुख्येन ग्रहणस्य निर्हरणं घञ् अभ्यवकृषे ल्युट् शास्त्रादेर्युक्त्या निःसारणस्य द्वे अनुहरणं अ
नुकरणं घञ् द्वे सदृशाकरणस्य व्ययनम् व्यय वित्तसमुत्सर्गे अरंतः घञ् एरज्वा एकम् १७ प्रवहणं वह प्रापणे घञ् प्रवर्तनं वृतु वर्तने क्तिन् द्वे अविच्छेदेन जला
दिप्रवृत्तेः प्रकृष्टो वहः गोचरसंचरेति साधुः प्रवहस्तु वहिर्यात्रामात्ररिश्वप्रभेदयोरिति विश्वः एकम् ॥

वियमनं यमः समुपनिविषु चेति अप् वा चादनुपसर्गेप्यन्ता पक्षे घञ् वृद्धिः संयमनस्य नामानि तु द्वे विविधयमनस्य द्वे उपरतिमात्रस्य द्वे संयतस्येत्याहु १८ हिंसाफलं कर्म श्याकपार्श्वि
वादिः अभिचरणं घञ् द्वे मारणादिक्रियायाः जागरणं जागर्तेरकारो वा पक्षे यक् जागर्या वेति गुणः भावे घञ् त्रिपुंसि द्वे जागरणस्य विहननं घञर्थे कः अंतर्मध्ये अंतरस्य व्यवधान
स्य वा अयनं अयगतौ इण् वा घञ् ज्वा प्रत्यूहनं घञ् त्रीणि उपहन्यते उपहननं वा उपघ्नः आश्रय इति साधुः अंतिके आश्रीयते आश्रयणं वा एरच् द्वे संनिहिताश्रयस्य आ
श्रयणस्य वा १९ निर्वेशनं विशते र्घञ् उपभोजनं भुजपालनाभ्यवहारयोः घञ् द्वे समंतात्सर्पणं सृप्लृगतौ घञ् परिकरणं कृञः शचरिङ् न्यायग्लिङ् द्यु द्वे परिजनादे
नापि एनस्य विमता धूः कार्यभारः ऋक्पूरित्यः प्रविश्लेषणं श्लिष आलिंगने घञ् वैकल्यपि च विश्लेषे विधुरं विकले त्रिषु इति त्रिकांडशेषः द्वे विश्लेषस्य अभिप्रयणं प्री
नाति एनस्य विमता धूः ... छंदनं छदिसंवरणे घञ् आशयनं शीङः एरच् त्रीणि २० संक्षिपे र्ल्युट् असुक्षेपणे ल्युट् द्वे संक्षेपस्य पर्यवस्थानं आतश्चोपसर्गे अङ् रुधिर् आवरणे ल्युट् द्वे वि

वियामो वियमो यामो यमः संयामसंयमौ १८ हिंसाकर्माभिचारः स्याज्जागर्या जागरा द्वयोः विघ्नोंतरायः प्रत्यूहः स्यादुपघ्नोंतिकाश्रये
१९ निर्वेश उपभोगः स्यात्परिसर्पः परिक्रिया विधुरं तु प्रविश्लेषोभिप्रायश्छंद आशयः २० संक्षेपणं समसनं पर्यवस्था विरोधनं परिसर्या
परीसारः स्यादास्या त्वासना स्थितिः २१ विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः संवाहनं मर्दनं स्याद्विनाशः स्याददर्शनं २२ संस्तवः
स्यात्परिचयः प्रसरस्तु विसर्पणम् ॥

रोधस्य परिसरणं सृगतौ परिचर्यापरिसर्येति साधुः घञ् उपसर्गस्य घञीति दीर्घः द्वे सर्वतो गमनस्य आस
नं आस उपवेशने ण्यासेति युच् स्थानं ष्ठा गतिनिवृत्तौ स्त्रियां गे तिक्तिन् त्रीण्यासनस्य २१ विस्तरणं स्तृञ् आच्छादने प्रथमे वा व शब्दे इति घञ् निग्रहणं ग्रह हृद्रि
व्यप व्यसनं असु क्षेपणे घञ् त्रीणि स व्यासः ऋद्धोरप् एकं मृद क्षोदे ल्युट् वह प्रापणे स्वार्थे ण्यंतात् ल्युट् वाहनं माहितादिति निपातनाद्दीर्घः इत्येके द्वे पादमर्द
नादेः विनशनं णश अदर्शने घञ् दर्शनस्याभावः द्वे तिरोधानस्य २२ संस्तवनं ष्टुञ् स्तुतौ ऋद्धोरप् समंताच्चयनं चिञ् चयने एरच् द्वे प्रसरणं सृगतौ बाहुलका
कारप् सृप्लृगतौ ल्युट् द्वे व्रणादि विसरणस्य निवचनं घञ् उपसर्गस्येति दीर्घः प्रथमणं यमे र्घञ् द्वे धान्यसंचयस्य ॥ ॥ ॥

Public Domain. Digitization by eGangotri

क्रयादरस्य वा संनिधानं धाञ् उपसर्गे घोः किः कृषेर्ल्युट् हे सन्निधानस्य २३ लवनं लूञ्छेदने ऋदोरप् निरभ्योः पूल्वोरिति घञ् ल्युट् स्त्रीलिङ्गे छेदनस्य निष्पवनं घञ्
ल्युट् अपस्त्रीलिं धान्यादीनां वहुलीकरणस्य प्रलवनं पूञ् स्तुञो मे दुस्तुस्तुव इति घञ् अवसरणं सृगतौ वाहुलकादप् हे प्रसंगस्य त्रसनं त्रसी उद्वेगे अरन् त्रसेरभद्रा
दिल्वादरन्निति मुकुन्दस्त्व पाणिनीयः तसर इति पाठे तन्तूं वि भ्यां क्सरन् हे सूत्रस्य वेष्टनक्रियायाः २४ प्रजननं जनी प्रादुर्भावे घञ् जनिवध्योरिति न वृद्धिः उपसरणं
सृगतौ प्रजने सर्तेरित्यप् प्रथमगर्भग्रहणस्य हे प्रश्रयणं प्रणयनं श्रिञ् णीञ् एरच् प्रसर इति पाठे सरतेर्वाहुलकादप् प्रसरः प्रणये वेगे हे धीन्यायार्थेनस्य धियः शक्तिः
साष्टधा शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ऊहापोहो चविज्ञानं तत्त्वज्ञानं च धीगुणाः निष्क्रमणं क्रमु पादविक्षेपे घञ् नोदात्तोपेति वृद्धिर्न निष्क्रमो निर्गमख्यातो बु
द्धिसंपदि निष्क्रम इति रुद्रः हे संक्रमणं घञ् नोदात्तोपेति न वृद्धिः संचरणं चर गतौ पुंसीति घः घञि तु संचारः दुर्गस्य संचरः संचारो निर्गमो भ्रमो वा पथ इति रत्नकोषः हे दुर्ग

नीवाकस्तु प्रयामः स्यात्संनिधिः संनिकर्षणं २३ लवोऽभिलावो लवने निष्पावः पवने पवः प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनं २४ प्रजनः स्या
दुपसरः प्रश्रयप्रणयौ समौ धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः २५ प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः स्यादभ्यादानमुद्घात आरं
भः संभ्रमस्त्वरा २६ प्रतिवंधः प्रतिष्टंभोऽवनायस्तु निपातनं उपलंभस्त्वनुभवः समालंभो विलेपनम् २७॥ १९ हे प्राप्रवेशक्रियायाः २५ प्रत्युत्क्रम

णं घञ् प्रयोजनं युजिर् योगे घञ् प्रयोगोऽर्थोऽस्य प्रयुक्त्यर्थ इति पाठे प्रकृष्टं युद्धमर्थोऽस्य प्रत्युत्क्रमः प्रयोगार्थ इति भागुरिः हे कर्मारंभे प्रथमप्रयोगस्य प्रक्रमणं उपक्रमणं
घञ् आभिमुख्येनादानं उद्घननम् हन्॥ घञ् हनस्तोऽचिण्णलोः आरंभणं रभ राभस्ये घञ् रभिजभो रचीति नुम् पंचारंभस्य संभ्रमणं भ्रमु अनवस्थाने घञ् नोदात्तोपेति
न वृद्धिः त्वरणं ञित्वरा संभ्रमे घटादयः षित इति षित्वातिदेशादङ् आवेगस्तु त्वरात्वरिरिति वाचस्पतिः हे २६ प्रतिवंधनं वंध वंधने घञ् प्रतिष्टंभनं ष्टंभु रोधे घञ् विष्कंभः
प्रतिवंधो वियोग इति वोपालितः हे रोधस्य अवनयनं णीञ् आवोदोर्नियः इति घञ् पतेः स्वार्थण्यन्तात् ल्युट् निपातनमिति पाठे यत्तनिकारोपस्कारयोर्धातुः हे अधो
नयनस्य उपलंभनं डुलभष् प्राप्तौ घञ् उपसर्गात् खल्घञोरिति नुम् अनुभवनं ऋदोरप् हे समालभनं घञ् लिप उपदेहे ल्युट् हे कुंकुमादिना उपलेपस्य॥ २७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विप्रलब्धिः लभेर्घञ्। विप्रयोजनं युजिर् घञ् हेरागिलोर्वियोजनस्य विलब्धिः लभेर्घञ्। सृजविसर्गे। ल्युट्। हेदानस्य। विश्रवणं श्रुश्रवणे। वौ स्रुश्रुव इति घञ् प्र
विख्यानं क्तिन् हे अतिप्रसिद्धेः। अवेक्षणं। ईक्ष दर्शने। गुरोश्च हल इत्यः। प्रतिजागरणं। जागृ घञ्। जाग्रोवीति गुणः हे अवेक्षणस्य २८ निपठनं। पठ व्यक्ता
यां वाचि नौ गदनदेत्यल्वा पक्षे घञ्। त्रीणि पठनस्य। तेमनं स्तेमनं तिम ष्टिम आर्द्रीभावे घञ्। उंदी क्लेदने ल्युट्। त्रीण्यार्द्रीभावस्य आदानं दीङ् क्षये। भाव
क्तः स्वादय ओदितः ओदितश्चेति नत्वं। आदीनस्य वा नं। घञर्थे क इति बाहुलकाद्धूतेः कः आस्रवणं स्रु गतौ। ऋदोरप्। क्लेशनं क्लिशू विबाधने घञ्। त्रीणि क्ले
शस्य मिल संश्लेषे। घञ स्वार्थिकः। संजनं। षंज संगे। घञ्। संगमनं। ग्रहवृद्दि स्यप्। नामेलः संगमो नावेत्यमरमाला। त्रीणि संगमस्य २९ सम्यक् विविधा ईक्षर

विप्रलंभो विप्रयोगो विलंभस्त्वतिसर्जनं विश्रावस्तु प्रविख्यातिरवेक्षा प्रतिजागरः २८ निपाठनिपठौ पाठे तेमस्तेमौ समुन्दने आदीनवा
ऽऽस्रवौ क्लेशे मेलके सङ्गसङ्गमौ २९ संवीक्षणं विचयनं मार्गणं मृगणा मृगः परिरंभः परिष्वंगः संश्लेष उपगूहनं ३० निर्वर्णनं तु निध्या
नं दर्शनालोकनेक्षणं॥ प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ३१ उपशायो विशायश्च पर्यायशयनार्थकौ॥ अर्तनं च ऋतीया च
हृणीया च घृणार्थके ३२ स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये॥ पर्ययोतिक्रमस्तस्मिन्नतिपात उपात्ययः॥३३॥ १ ईने ल्युट् चित्र चय

ने ल्युट्। मार्ग अन्वेषणे। ल्युट्। मृग अन्वेषणे। अदंतः। ण्यासश्रंथो युच्। घञ्। पंचान्वेषणस्य। परिरंभणं। रभराभस्ये। घञ्। रभेरशब्लिटोरिति नुम्। परिषंजनं षंज परिष्वंगे
घञ्। परिनिविभ्य इति षः। संश्लेषणं श्लिष आलिंगने घञ् गुहू संवरणे। ल्युट्। चत्वार्यालिंगनस्य ३० वर्णन व्याप्तन् सत्यापेति णिच्। ल्युट्। ध्यै चिंतायां दृशिर् प्रेक्षणे। लो
क दर्शने। ईक्ष दर्शने। ल्युट् पंच ख्या प्रकथने। चक्षिङ आदेशो वा। असु क्षेपणे। ल्युट्। प्रत्यादेशनं दिश अतिसर्जने घञ् निराकरणं कृञः क्तिन्। चत्वारि निराकरणस्य
३१ उपशयनं विशयनं श्रुपयोः शेतेः पर्याये इति घञ्। पर्यायेण शयनं पर्यायशयनं समर्थौ ययोस्तौ। द्वे ऋतिः सौत्रः। ईयङ् भावे ल्युट्। ईयङ् पक्षे अप्रत्ययात्। हृणीङ् कंड्वा
दिः यक् अप्रत्ययात्। सोहो वा ज्याजुगुप्सा च हृणीया हृणीया घृणेति वाचस्पतिः। चत्वारि जुगुप्सनस्य ३२ व्यत्यसनं असु क्षेपणे घञ् विपर्यसनं घञ् व्यत्ययनं इण् एरच् विपर्य

पर्यय इत्यत्र वलादित्वात् क्रमस्य पर्ययस्य वर्णई
अतिक्रमणं पर्यय इति अस्य अर्थः घञ उपाय वर्णइ

अ॰को॰ शासु अनुशिष्टौ ल्युट् । एकं भृत्यादिप्रेषणस्य समेत्य स्तुवंत्यत्र ष्टुञ् स्तुतौ यज्ञे समि स्तुवः इति घञ् एकं यज्ञे स्तावकद्विजावस्थानभूमेः ३४ ऊर्द्ध्वं हन्यतेस्मिन् उद्घनो न्या
तृ॰कां॰ धानमिति साधुः एकं स्तंबो हन्यते येन स्तंबघ्नश्चेति काष्ठो घनादेशश्चेद् तृणादिगुच्छोन्मूलनसाधनस्य नीवारादिग्रहणार्थं कृतं वंशपात्रस्येत्यन्ये ३५ आविध्यते येन
२१ व्यध ताडने घञर्थे कः एकं भ्रमरसूच्यादेः वर्मा इति ख्यातस्य निपतं हन्यते निघो निमितमिति साधुः एकं तुल्यारोहपरिणाहवृक्षादेः उत्करणं निकरणं च विक्षेपे कृ
धान्ये इति घञ् द्वे धान्यानामूर्द्ध्वक्षेपणस्य ३६ निगरणं गृ निगरणे उन्न्योर्ग्रः इति घञ् उद्गरणं गृ शब्दे उन्न्योरिति घञ् विस्रवणं द्रु स्रु गतौ वौ क्षुश्रुवः इति घञ् उत्
ग्रहणं ग्रह उपादाने उदिग्रहः इति घञ् आदिना उद्धरणं विस्रवणं उद्धरणं क्रमेणैकैकं आर्येयं आरमणं रम क्रीडायां क्तिन् एवमवविभ्यां उपरमणं घञ् च

प्रेषणं यत्समाहूय तत्र स्यात्प्रतिशासनं सः संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनां ३४ निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः स्तं
बघ्नस्तु स्तंबघनः स्तंबो येन निहन्यते ३५ आविधो विध्यते येन तत्र विष्वक्समे निधः उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थको ३६ नि
गारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु आरत्यवरतिविरतय उपरामेथास्त्रियां तु निष्ठेवः ३७ निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि ।
जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे जूर्तिः ३८ उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे गोत्रांतेभ्यस्तस्य वृंदमित्यौपग
वकादिकं ३९ आपूपिकं शाष्कुलिकमेवमाद्यमचेतसां ॥

९९ स्यात् उपरमणस्यापि ष्ठिवु निरसने घञ् । यत्तु निष्ठीव्यतीति विग्रहय्य पचाद्यजि स्तुतं मु
कुटेन तन्न निष्ठ्यूत्यादिभिरेकत्वासंभवात् ३७ क्तिन् त्सुट् ष्ठिवि सिव्योः ल्युटि दीर्घो वेति स्वामी टिष्ठोदरादित्वादिति मुकुटः चत्वारि मखेन श्लेष्मनिरसनस्य
जुः सौत्रो वेगे ल्युट् क्तिन् ऊतियूतीति साधुः द्वे वेगस्य षो अन्तकर्मणि क्तिन् ऊतियूतीति साधुः ल्युट् द्वे समापनस्य ज्वरणं ज्वर रोगे घञ् संज्ञापूर्वकत्वात् वृद्ध्य
भावः क्तिन् ज्वरत्वरेत्यूठ् द्वे ज्वरणस्य ३८ उदजनं अज गतौ समुदोरजः पशुष्विति अप् अघञपोरिति पर्युदासात् वीभावो न पशूनां प्रेरणं द्वे अकरणि आ
क्रोशे नञ्यनिः आदिना अजननिः अवग्राहः आक्रोशे अवन्योर्ग्रह इति घञ् निग्राहः एकमाक्रोशनस्य अपत्यप्रत्ययांतेभ्यः तस्य समूहः इत्यर्थे औपगवा २१
नां समूहः गोत्रोक्षोष्ट्रेति वुञ् आदिना गार्गिकं दाक्षकं ३९ अचेतसां वृंदं अपूपानां समूहः ष्वष्कुलीनां समूहः । अचित्तहस्तिधेनोष्ठक् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥७॥

आदिनासाक्तुकंमाणवानांसमूहः ब्राह्मणमाणवेतियत् सहायानांसमूहः गजसहायाभ्यामितितल् ४० हलानांसमूहः पाशादिभ्योयः ब्राह्मणानांवाडवानांसमूहः
ब्राह्मणेतियत्पर्शूनांसमूहः पर्श्वाणस्सितिचेतिपदत्वाङ्गत्वाभावः पृष्ठानांसमूहः पृष्ठाद्यन्यज्ञविषयेइदंस्मरेति ४१ खलानांसमूहः। इनित्रकटयचश्चेतीनिः स्वा
लगोरथादितियः मनुष्याणांसमूहः गोत्रोक्षोष्ट्रेतिवुञ्प्रकृत्याकेराजन्येतियलोपोनग्रामाणांसमूहः जनानांसमूहः ग्रामजनेतितल् धूमानांपाशानांगलानांचसमूहः
पाशादिभ्योयः गलोष्ट्रहल्काशः ४२ सहस्राणांकरीषाणांचर्मणां अथर्वणांचसमूहः भिक्षादिभ्योण् आदिनावार्मणांआंगारं ४३ इतिसंकीर्णार्थानांवर्गः संकीर्णा
र्थत्वंचघञादीनांकर्तृभिन्नकारकेभावेचविधानात् उणादीनांभावकारकेषुविधानात् भावेप्रायेणविग्रहोदर्शितः कारकेषुतुयथासंभवमूह्यः इतिसंकीर्णवर्गः

माणवानांतुमाणव्यंसहायानांसहायता ४० हल्याहलानांब्राह्मण्यवाडव्येतुद्विजन्मनो द्वेपर्शुकानांपृष्ठानांपार्श्वंपृष्ठ्यमितिक्रमात् ४१ खला
नांखलिनीखल्याप्यथमानुष्यकंनृणांग्रामताजनताधूम्यापाश्यागल्यापृथक्पृथक् ४२ अपिसाहस्रकारीषचार्मणाथर्वणादिके ४३
इतिसंकीर्णवर्गः। नानार्थाःकेपिकांतादिवर्गेष्वेवात्रकीर्तिताः भूरिप्रयोगायेयेषुपर्यायेष्वपितेषुते १ आकाशेत्रिदिवेनाकोलोकस्तुभुव
नेजने पद्येयशसिचश्लोकः शरेखड्गेचसायकः २ जंबुकौक्रोष्टुवरुणौपृथुकौचिपिटार्भकौ आलोकौदर्शनोद्योतौभेरीपटहमानकौ ३ उत्संगचिन्ह
((योरंकः कलंकोंकापवादयोः
विवरणं अनेकार्थाः केचिदत्रैववर्गेकांतान्नादयोयेषांस्वांतगांतादीनांतेषुवर्गेषुकथिताः यथा कशब्दः येकांतादयोयेषुपर्यायेषु
प्रचुरप्रयोगास्तेकथिताः अपिशब्दादिहापियथानाकशब्दः अतःपुनरुक्तिर्नोद्भाव्येतिभावः १ नअकंदुःखंअत्रलोक्यतेलोकृदर्शनेघञ् श्लोक्यतेश्लोकृसंघा
ते घञ्स्यतिषोअंतकर्मणिण्वुल्युक् २ जमतिजमुअदनेमित्वद्वादयश्चेतिसाधुः जंबुकः फेरवेनीचेपश्चिमाशायनावपिपृथुरेवसंज्ञायांकन्प्रथमेप्रथम।
ख्यानेअर्भकपृथुकपाकावयसीतिसाधुर्वापृथुकः पुंसिचिपिटेशिशौस्यादभिधेयवत् आलोकनं लोकृदर्शने आलोकस्तुपुमान्द्योतेदर्शनेवंदिभाषणेअनिति
अनप्राणनेण्वुल्आनकः पटहेभेर्यांमृदंगध्वनदंबुदे ३ अंकतेनेनअकिलक्षणेहलश्चेतिघञ् अंकोरूपकभेदांगचिन्हेरेखातिभूषणेरूपकांशांतिकोत्संग

स्थानेकंपापदुःखयोःकलतिकलशब्दसंख्यानयोःक्षि

CC-0. In Public Domain. Digitization by eGangotri

अ·को· कलचासावंकश्च कलंकोंकेःपवादेचकालायसमलेपिच नश्यति नश्यतन्नृकरणो एवुलु अर्क्यते अर्कस्तवने अर्च पूजायांवा घञ् न्यङ्कादित्वादर्च्चेः कुत्वम्· अर्कोर्के
तृ·कां· पर्णोफ टिकेरवौ ताम्रे दिवस्पतौ ४ कायति कचतिवाके शब्दे कचदीप्तौ अन्येभ्योपीतिडः को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे मयूरेग्नौ च पुंसिस्यात् सुखशीर्षजलेषुकं
२२ पोलनं पुलमहत्त्वे संपदादिः पुलमकति अककुटिलायांगतौ कर्मण्यण् पोलतिवा वलाकादय श्चेति साधुः ५ पचति पच्यतेवा दुःखेनपचिमस्यारिच्चोपधाया इतिवु
न् करोतिक्रुनादिभ्योवुन् करकस्तुपुमान् पक्षिविशेषेदाडिमेपिच द्वयोर्मेघोपले न स्त्री करकंच कमंडलौ विनयति णीञ् एवुल् विनायकस्तु हेरंबे ताक्ष्ये विघ्नजि
नेगुरौ ६ कायतेऽनेनकेशब्दे मृगय्वादिः किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठेकरेपिचवृश्चति ओव्रश्चू च्छेदे नव्रश्चिक्रुषोः किकन् वृश्चिकस्तुद्रुणौराशौ शूककायौ
षधीभिदोः प्रतिगताईलक्ष्मीर्येयेनवान नष्टतश्चेति कप् प्रतिकोवयवेपिस्यात् प्रतिकूलविलोमयोः ७ भवतिक्तिच्क्तौ च संज्ञायामिति क्तिच् संज्ञायांकन् स्या

नष्टकोनागवद्देकोर्कः स्फटिकसूर्ययोः ४ माहतेवेधसिन्नध्वे पुंसिकः कंशिरोंबुनोः स्यात्पुलाकस्तुच्छधान्ये संक्षेपेभक्तसिक्थके ५ उ
लूकेकरिणः पुच्छमूलोपांते च पेचकः कमंडलौ च करकः सुगते च विनायकः ६ किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिकः प्रतिकूले प्रतीक
स्त्रिष्वेकदेशेतु पुंस्ययं ७ स्याद्भूतिकंतु भूनिंबे कट्फले भूस्तृणेपिच ज्योत्स्निकायांच घोषेच कोशातकाथकट्फले ८ सितेच खदिरे सोमवल्कः
स्यादश्वसिल्हके तिलकल्केच पिण्याको वाल्हीकं रामठेपिच ९ महेंद्रगुग्गुलूकव्यालग्राहिषु कौशिकः रुक्तापशंकास्वातंकः स्वल्पेपिक्षुल्लकस्त्रि

ष्टुतिकंतु भूनिंबे दीप्यभूस्तृणकत्तृणे कोशमतति अतसातत्यगमने कुन्गौरादिः कोशातकः कचेपुंसि पटोल्यां घोषके स्त्रियां ज्योत्स्न्यांचंद्रमसो भासि स्फुरज्ज्योति
ईर्निशिस्मृता ज्यस्यजयः ज्योत्स्निका पटोली घोषोऽपामार्ग इति स्वामी सोमइववल्कोवलमस्य ८ पण्यते पणव्यवहारे पिनाकादयश्चेति साधुः पिण्याकोऽस्त्रीतिलकल्के
हिंगुवाल्हीक सिल्हके वाल्हीकं वाल्हिकं धीरः हिंगुनोनीम्बृदेशयोरितिरभसः उह्यते वहतिवा वह प्रापणे अलीकादयश्चेति साधुः ९ कुशिकस्यापत्यंऋष्यण्।
कौशिकोनकुलेव्यालग्राहिगुग्गुलुघूकयोः विश्वामित्रे च कोशज्ञोलूकयोरपि कौशिकः कौशिकीचंडिकायांचनदीभेदे चयोषिति आतंकनं तकिकृच्छ्र। एम·
जीवने घञ्हलश्चेति करणेवा आतंको रोगसंतापशंकासु मुरजध्वनौ क्षोदनं त्रिश्विदा संचूर्णने संपदादिः क्षुदं क्षुधं वाला तिकुन् क्षुल्लकस्त्रिषु नीचेल्पे १० २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवति जीवप्राणं धारणे आतृकन् हृद्धिश्च जैवातृकः पुमान् सोमे दीर्घायुः कृशयोस्त्रिषु वर्तते वृतु वर्तने ण्वुल् वर्तक सुखुरे अश्वस्य विहगे वर्तिका द्वयोः पुंडयति पुडि भूषा यां कर्करीकादयश्चेति साधुः पुंडरीकः सितांभोजे सितछत्रे च भेषजे पुंसि व्याघ्रेग्निदिङ्नागे कोशकारांतरेपि च दीपयति दीपी दीप्तौ एंयंतः ण्वुल् दीपकं वा गलंकारे वाच्य वद्दीप्तिकारके दीपकश्चाजमोदायां यवानी बर्हिचूडयोः ११ शालां वृणोति वृञ् वरणे मृगमूः सुषि मुषिभ्यः ककु एषो दशादिरिति सुकृष्टत्वं त्वं गिरौ भवं अध्यात्मादि त्वात् ठञ् गैरिकं धातु रुक्मयोः अलति अल भूषणादौ अलीकादयश्चेति साधुः विगतमलीकं व्यलीको नागरे स्मृतः व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने इति विश्वः अलीकमप्रिये पि स्याद्दिव्य सत्येन पुंसकं १२ अनूच्यंति उच समवाये रुगुपधेति कः न्यंक्वादिः अनूकं तु कलेशीले पुंसि स्याद्गतजन्मनि यद्वा अनुकायति कै शब्दे आतश्चेति कः अन्येषामपीति दीर्घः शलति शल चलने ईंणभीकेति कन् निश्चयेन कायति आतश्चोपेति कः रुदुरुपधेति षः यद्वा निषीदति षद्लृ सदेरड इत् चेति कः सद्विप्रमिति रिति षः

जैवातृकः शशांकेपि खुरेप्यश्वस्य वर्तकः व्याघ्रेपि पुंडरीको ना यवान्यामपि दीपकः ११ शालावृकाः कपिक्रोष्टुश्वानः स्वर्णेपि गैरिकं पीडार्थे
पि व्यलीकं स्यादलीकं त्वप्रियेनृते १२ शीलान्वयावनूके द्वे शल्के शकलवल्कले साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले १३ दीनारेपि च निष्को
स्त्री कल्कोस्त्री शमलैनसोः दंभेप्यथ पिनाकोस्त्री शूलशंकरधन्वनोः १४ धेनुका च करेण्वां च मेघजाले च कालिका ॥ ॥

निष्कस्त्वस्त्री साष्टहेमशते दीनारकर्षयोः वक्षोलंकरणे हेममात्रे हेमपले पि च १३ दीनारः सांव्यवहारिकं रूप्यकं कलते कल शब्दसंख्यानयोः कधारेति कः त्रिपुपापाशयेकल्को स्त्री विट्कि ट्टेभ दंत्र योरिति विश्वः ॥ कल्कोस्त्री घृततैलादि शेषे दंभे विभीतके पनाप्यते पन स्तुतौ पिनाकादयश्चेति साधुः पिनाकोस्त्री रुद्रचापे पांशुवर्षे त्रिशूलयोः १४ धेनुरेव स्वार्थे कन् स्याद्धेनुका करिण्यां च धेनावपि पुंसि दाने च विशेषे कालोवर्णोऽस्त्यस्याः ठन् यद्वा काल्येव स्वार्थे कन् धूसरी योगिनी भेदे मानवृद्दे तु कालिका क्रमदेयवस्तुमूल्ये का स्त्र्यें काकां घनेषु चेति रभसः कालिका चण्डिकाभेदे कार्ष्णे वृश्चिकपत्त्रयोः क्रमदेयवस्तुमूल्ये धूसरी नवमेघयोः पटोल मूलखारोमाली मांसीकाकी शिवासु च मे घालेच करणं धात्वर्थ निर्देशे ण्वुल् कारिकान ट्योषिति कृतौ विवरणे श्लोके शिल्पयातनयोरपि नपुंसकं तु कर्मादौ कारके कर्तरि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·नृ· टी·रा· २३

त्रिषु वृत्योरिति पाठे विवरणश्लोके कर्णस्यालंकारः कर्णाल्ललाटादिति कन् कर्णिका करिहस्ताग्रे करमध्यांगुलावपि क्रमुकादिह्वदांशेः ज्ववराटे कर्णभूषणे कर्णिकाक।
ध्यते संत सूक्ष्मवस्त्वग्निमंथयोः १५ खांतेभ्यः प्राक् प्रथमसंवृंदमस्य शृंगाग्रं दाभ्यामारकन् वृंदारकः सुरे पुंसि मनोज्ञे श्रेष्ठे यास्त्रिषु एतिरुणगनोरुणभीके निकन्नाएकं संख्यांतरे
श्रेष्ठे केवले तरयास्त्रिषु १६ कुक्कुटीं पश्यति संज्ञायां ललाटकुक्कुट्यौ पश्यतीति ठक् ललाटं पश्यति ललाटिकः प्रभोर्भालदर्शिन्याः श्लेषणांतरे कार्याक्षमे भावदर्शीति वाप
ठः लालाटिकः सदालस्य प्रभुभालनिदर्शिनी स्यजयः १७ इति कानवर्गः॥ मिमीते माङ् माने माङ ऊखो मयच मयूखः किरणेपि च ज्वालायामपि शोभायां शिलीमुख्यमु
खेयस्य शाम्यत्यनेन शमु उपशमे शमेः खः शंखः कं वो नयोः षिन्नाभालास्थिनिधिभिन्न खे खनति खनु अवदारणे अन्येभ्योपीति डः खमिंद्रियपुरे क्षेत्रे शून्यविंदौ विहायसि
संवेदने देवलोके शर्मण्यपि नपुंसकं १८ शोतेभीडाहूस्वश्चेतिस्कः शिखा शाखा वर्हि चूडा लांगलिकाग्रमात्रके चूडामात्रे शिफायां च ज्वालायां प्रपदेपि च इति खांताः नग

कारिकायातनाकृत्योः कर्णिका कर्णभूषणे १५ करिहस्तांगुलौ पद्मबीजकोश्यां त्रिषुत्तरे वृंदारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः १६ स्याद्दांभिकः
कौक्कुटिकोयश्चादूरेरितेक्षणः ललाटिकः प्रभोर्भालदर्शी कार्याक्षमश्चयः १७ इति कांताः मयूखस्त्विट्करज्वालास्वलिबाणौ शिलीमुखौ शंखो निधौ
ललाटास्थ्नि कंबौ न स्त्री द्रियेपि खं १८ घृणिज्वाले अपि शिखे खांताः शैलवृक्षौ नगावगौ आशुगौ वायुविशिखौ शरार्कविहगाः खगाः १९ पतंगौ प
क्षिसूर्यौ च पूगः क्रमुकवृंदयोः पशवोपि मृगा वेगः प्रवाहजवयोरपि २० परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि गजेपि नागमातंगावपांगस्ति

च्छति गम्लृ गतौ अन्येभ्योपि अन्यत्रपीति वा डः नमोप्राणिष्विति नत्र्वा प्रकृत्या नगो महीरुहे शैले भास्करे पवनाशने आशु गच्छति खे गच्छति पूर्ववत् खगः सूर्यग्रहे देवमार्ग २३
णा च विहंगमे १९ पतति पत्लृ गतौ पतेरंगच् पक्षिणि पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः क्लीबं सृजे पुनाति पूञ् पवने छापूखडिभ्यः किदिति गन् मृग्यते मृगा अन्वेष
णे घञ् मृगः पशौ कुरंगे च करिनक्षत्रभेदयोः अन्वेषणायां याच्ञायां मृगी तु वनितांतरे वेजनं ओविजी भयचलनयोः घञ् २० परागच्छति डः परागः कौसुमे रेणौ। ॥
धूलिस्नानीययोरपि गिरिप्रभेदे विख्याता तु परागे च चंदने नक्षत्रगः मतंमस्यायं तस्येदमित्यण् अपगतोऽगात् निरादय इति समासः अपांगो नय॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्यांते स्याच्चित्रकप्रधानयोरित्यजयः।।अपांगस्त्वंगहीने स्यान्नेत्रांते तिलकेपि च।।२१।। सृज्यते सृज विसर्गे घञ् सर्गस्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिषु निर्मोक्षस्त्यागः
मोक्षाभावो वा योजनं युज समाधौ युजिर् योगे घञ् योगो पूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु वपुःस्थैर्यप्रयोगे च विष्कंभादिषु भेषजे विश्रब्धघातके द्रव्योपायसन्नहनेषु
पि कार्मणेपि च सन्नहनं कवचं उपायः सामादिः २२ भोजनं भुज पालनाभ्यवहारयोः भुजो कौटिल्ये घञ् भोगः सुखे धने पुंसि शरीरफणयोर्मतः पालने व्यवहारे च योषि
नादिभृतावपि भृतिर्भाडिः आदिना हस्त्यश्वादिकर्मकाराणां च भृतिः पालनेभ्यवहारे च निर्वेशोपण्ययोषितामिति विश्वः।।सारमंगं यस्य शाकं त्वादिः सारं गच्छतीति वा
रवच् सहारंगेणेति वा सारंगः पुंसि हरिणे चातके च मतंगजे शबले त्रिषु २३ प्लवेन गच्छति डः प्लवगो वानरे भेके सारथौ चोपदीधितेः अभिषंजनं षंजसंगे घञ्।।
उपसर्गाद्दिति षः अभिषंगः पुल्लिंगः पराभवाक्रोशशपथेषु योजनं युज्यते वा युजिर् योगे घञ् संज्ञापूर्वकत्वान्न गुणः रथयुगेति निपातनाद्वा युगो रथे हलाद्यंगे न द्वयोस्तु कृ

सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु योगः सन्नहनोपायध्यानसंगतियुक्तिषु २२ भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः चातके
हरिणे पुंसि सारंगः शबले त्रिषु २३ कपौ च प्लवगः शापे त्वभिषंगः पराभवे यानाद्यंगे युगः पुंसि युग्मं युग्मे कृतादिषु २४ स्वर्गेषुपशुवाग्वज्रदिङ्ने
त्रघृणिभूजले लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिंगं चिन्हशेफसोः २५ शृंगं प्राधान्यसान्वोश्च वरांगं मूर्द्धगुह्ययोः भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककी
नादिषु युग्मे हस्तचतुष्केपि वृद्धिनामौषधेपि च २४ गच्छतीति गम्यते वानेन गमेर्डोः गोर्नादिसे बलीवर्दे किरणक्रतुभेदयोः स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि
नृस्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोमस्विति केशवः गोः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् स्त्री सौरभेयीदृग्बाणादिग्वाग्भूष्वप्सु भूम्नि च लिंग्यतेनेन लिंगि मतो हल
श्चेति घञ् लिंगं चिन्हेनुमाने च सांख्योक्तप्रकृतावपि शिवमूर्त्तिविशेषे च मेहनेपि नपुंसकं २५ शृणाति शॄ हिंसायां शृणातेर्ह्रस्वश्चेति गन् नुट् च शृंगं प्रभुत्वे शिखरे चि
न्हे क्रीडांबुयंत्रके विषाणोत्कर्षयोश्चाथ शृंगः स्यात्कूर्चशीर्षके स्त्री विषाण्यां स्वर्गमीनभेदयोः ऋषभौषधौ वरं च तदंगं च वरांगं योनिमात्रेगमस्तकेषु गुडत्वचि भ
ज्यते भजसेवायां पुंसीति घः खनो घ च इति घो वा भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु माहात्म्यैश्वर्ययत्नेषु धर्ममोक्षेष्वथ नारवो २६ ।। ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·नु· इतिगांताः॥परिहननं परिहन्यते ऽनेन वा हननहिंसा गत्योः परौ घः इत्यप् घादेशश्च परेश्च घांकयोरिति लत्वमपि परिघो योगभेदेस्त्रविशेषे ऽर्गलघातयोः व हति वहः प्रापणे
टी·रा· पचाद्यच् न्यंकादित्वात् साधुः ओघो वेगे जलस्य च हरेः परं परायां च द्रुतनृत्योपदेशयोः अर्ध्यते ऽनेन अर्हपूजायां हलश्चेति घञ् न्यंकादिः अर्घो मूल्ये नरं वा अध्यतेनेन अ
२५ घिगत्याक्षेपे घञ् अनित्यमागमशासनमिति नुम् २२ लंघ्यते लघि गतौ ल. घिं ल्वो र्न लोपश्चेत्युः कुत्सायुत्कृष्टे शीघ्रे चलघुक्लीवगुरो त्रिषु निःसारे च मनोज्ञे च पुः
कायां च लघुः स्त्रियामिति रभसः लघुः गुरोचमनोज्ञे निःसारे वाच्यवत् क्लीवं शीघ्रे कृष्णागुरुणि एकानामेोघो तु स्त्री इति घांताः कच्यते अनेन वा कच बंधे॥ घञ्न्यंका
दित्वात् कुत्वं न लिजंतात् पचाद्यज्वा काचः शिक्ये मलो नेत्ररोगभेदे मृदंतरे प्रपंच्यते पचि व्यक्तीकरणे पचाद्यच् प्रपंचः संचये पि स्यात् विस्तरे च प्रतारणे शोचत्यनेन शुच
शोके इगुपधात्किदितीन् शुचिर्ग्रीष्माग्निशृंगारेष्वाषाढे शुद्धमंत्रिणि ज्येष्ठे च पुंसि धवले शुद्धे ऽनुपहते त्रिषु २८ उपधाशुद्धो चमतिक्रांते ऽमात्ये चेति हेमचंद्रीमा
इति गांताः परिघः परिघातेस्त्रप्योघो वृंदेंभसां रये मूल्ये पूजाविधावर्घो हो दुःखव्यसनेष्वघं २७ त्रिष्विष्टे ल्पे लघुः इति घांताः काचाः शिक्य
मृद्भेद दृग्रुजः विपर्यासे विस्तरे च प्रपंचः पावके शुचिः २८ मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु अभिषंगे स्पृहायां च गभस्तौ च रु
चिः स्त्रियां २९ चांताः केकिताक्ष्यौ वहिभुजौ दंतविप्रांडजा द्विजाः अजाविल्लु हरच्छागा गोष्ठाध्वनिवहा व्रजाः ३० धर्मराजौ जिनयमौ कुं
जो दंते पि न स्त्रियां॥ वलजे क्षेत्रपूर्द्वारे वलजा वल्गुदर्शना ३१॥ ११ मिश्रीतो वा॥ इगुपधात्किदितिर् नृत्वचिः स्त्रीदीप्तो शोभायाममिषंगाभिलाषयोः
२९॥ चांताः॥ अहिभुक्तेः भुजपालनाऽभ्यवहारयोः क्विप् द्विर्जायते अन्ये ष्वपीति डः द्विजः स्यात् ब्राह्मणक्षत्रियवैश्यदंतांडजेषु नाद्विजा भार्ग्याहरेणौ वनजायते पूर्ववत्
डः अजति वा वहुलं तृणीति वीन पचाद्यच् अजो हरो हरे कामे विधौ छागे रघोः सुते इति विश्वः॥ व्रजति अस्मिन्वा व्रज गतौ पचाद्यच् गोचरसंचरोनिवासाधुः ३० घ
र्मेण राजति अच् धर्मस्य राजा धर्मश्चासौ राजा चेति वा राजाहः स खिभ्यष्टच् धर्मराजो यमे बुद्धे युधिष्ठिर नृपे पुमान् कौ जायते। सप्तम्यां जनेर्डः पृषोदरादिः यत्तु
निकुंजं त्यत्र कुजि अव्यक्ते शब्दे हलश्चेति घञिप्याहतन्न कुजिधातोरप्रसिद्धत्वात् गुजिधातोर्दर्शनात् कुंजो स्त्रियां निकुंजे पि हनौ दंते पि दंतिनाम वलेजातम् २५

CC-0. In Public Domain. Digitization by eGangotri

अजंत्यस्यां अजगतो अज्यतिभ्यां वेत्तीण अद्याजिः स्त्री समभूमौ च संग्रामे प्रजायते उपसर्गे च संज्ञायामिति जनेर्डः अप्सु जायते स्मस सप्तम्यामिति डः अब्जो स्त्री शंखे वानि चुलेध
न्वंतरौ च हिमकिरणे क्लीवं पद्मे निजायते स्म उपसर्गे चेति डः ३२ इति जांताः क्षेत्रं जानाति ज्ञा अवबोधने आतो नुपेति कः संज्ञानं आत श्चोपे त्यङ् संज्ञा नाम निगायत्र्यां वेतना
रवियोषितोः अर्थस्य सूचनायां च हस्ताद्यैरपि योषिति ३३ इति ञांताः केनिरटति रट् शब्दे पचाद्यच् करटो गजगंडे स्यात् कुसुंभे निद्यजीवने एकादशाहादिश्राद्धे दुर्दुरू
टपि वा यसे कटति कटे वर्षावरणयोः पचाद्यच् कटः श्रोणौ क्रियाकारे कलिंजेति प्राये प्रावे समये गजगंडे पि पिप्पल्यां च कुटो मतेति विश्वः कटः श्रोणौ द्वयोः पुंसि क
लिंजेति प्राये प्रावे शिपी परश्मिषु पशुषु चाविष्टः शिपिविष्टः शिवः श्रोणौ दुश्चर्मा खलतिस्तथा ३४ त्वक्षति त्वक्ष्यते वा त्वक्ष तनूकरणे न प्तृनष्टृ इति साधुः त्वष्टा पुमान् देवशिल्पिन् तक्ष्णि
आदित्यभिद्यपि दिश्यते स्म दिश अतिसर्जने क्तः दिष्टं दैवे पुमान्काले कटति कटे मृगग्यादित्वादुः कटुः स्त्री कटुरोहिण्यां लताराजि कयोरपि नपुंसकमकार्ये स्यात्पुल्लि

समभे क्ष्मां शूरणोप्याजिः प्रजा स्यात्संततौ जने अब्जो शंख शशांको च स्वके नित्ये निजं त्रिषु ३२ इति जांताः पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्य
लिंगकः संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना इति ञांताः ३३ काके भगंडो करटो गजगंड कटी कटौ शिपिविष्टस्तु खलतौ दुश्चर्म
णि महेश्वरे ३४ देवशिल्पिन्यपि त्वष्टा दिष्टं दैवे पि न द्वयोः रसे कटुः कटु कार्ये त्रिषु मत्सर तीक्ष्णयोः ३५ रिष्टं क्षेमा शुभा भावेष्वरिष्टे तु शुभा
शुभे मायानिश्चलयंत्रेषु कैतवानृतराशिषु ३६ अयोघने शैलशृंगे सीरांगे कूटमस्त्रियां सूक्ष्मैलायां त्रुटिः स्त्री स्यात् काले ल्पे संशयेपि सा ३७
अत्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा व्युष्टिः फले समृद्धौ च दृष्टिर्ज्ञाने क्षिणि दर्शने ॥३८॥ ((गोरसमात्रके त्रिषु न द्वयोः संगच्छे श्चमत्सरे पि खरे पि च

॥३५॥ रेषणं रिष्यते स्म इति वा रिष हिंसायां क्तः रिष्टं स्याद् शुभे न क्षेति स्म जयः रिष्टं क्षेमा शुभा भावे पुंसि खड्गे च फेनिले न रिष्टं अरिष्टो लशुने निवे फेनिले काक कंकयोः अरि
ष्टमशुभे तक्रे सूतिकागार आसवे शुभे मरणचिन्हे च माया विपरीत दर्शने यंत्रं मृगवंधन विशेषः ३६ सीरांगे फाला धारे कूट्यते कूट अप्रदाने पचाद्यच् त्रुट्यते अ
नेन वा त्रुट छेदने नेदृगुपधादि गीन त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मे कालात्समानयोः ३७ कोटयते कुट प्रतापने अच इः कोटिः स्त्री धनुषोग्रे स्तो संख्याभेद प्रकर्षयोः जट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri

आ·तृ· एषणे रूषइ च्छायांक्तिन् इष्यते नयेनिवा पजेः क्तिन् इष्टिर्मे नाभिलाषेपि संग्रहश्लोक यागयोः सर्जनं सृज विसर्गे क्तिन् अकारांतपाठेभावे क्तः मुक्तनिर्मितयोः श्रा से
टी·रा· त्रिषुसृष्टं तुनिश्चीते इतिरुद्रः कष्यतेस्म कषहिंसायां क्तः कृच्छ्रगनयोः कषइतिनेट् ४६ पाटयति पटगतौ एयंतः फलिपाटोत्युः पटादेश श्चपटुस्त्री स्त्रो स्फुटेद्क्षे निष्ठुरे
२५ निर्दयेपिचेतिरुद्रः पटुर्दक्षेचनीरोगे चतुरेप्यभिधेयवत् पटोलेतु पुमान् स्त्री वेछत्रालवणयोरपि इतिदंताः नीलः कंठोयस्य कालकंठस्तु दात्यूहे कलविंके चखंजने सि
ताथांगेहरे पीतसारके नीलकंठवदितिविश्वः कुष्यते कुषनिष्कर्षे उष्किकुषीतिथन् कोष्ठः कुसूलेचात्मीयेमध्येकुक्षेर्गृहस्य च ४७ निष्ठानं ष्ठागतिनिवृत्तौ आतश्चोपस
र्गेइत्यङ् निष्ठानिष्पत्तिनाशांतयाच्ञानिर्वहणेषुच काष्ठते काशृदीप्तो हनिकुषीति क्थन् काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः स्थानमात्रेदिशि च स्त्री दारुणि
स्यान्नपुंसकं अतिशयेन प्रशस्यः अतिशायनेतमविष्ठनौ ज्यचेति प्रशस्यस्य ज्यादेशः ज्येष्ठः श्रेष्ठेच वृद्धे च त्रिषु मासांतरे पुमान् ज्येष्ठा तु गृहगोधाख्य जंतुनक्षत्र भेदयोः

इष्टिर्यागेच्छयोः सृष्टिर्निश्चिते बहुनि त्रिषु कष्टं तु कृच्छ्रगहने दक्षामंदागदेष्वपटुः ४६ पटुद्वौ वाच्यलिंगौ च दंताः नीलकंठः शिवेपिच ॥ पुंसि कोष्ठो
न्तर्जठरं कुसूलं तर्गृहं तथा ४७ निष्ठा निष्पत्तिनाशांताः काष्ठोत्कर्षे स्थितौ दिशि त्रिषु ज्येष्ठोति शस्तेपि कनिष्ठोति युवाल्पयोः ४८ इति
ष्ठांताः दंडोस्त्री लगुडेपि स्याद्गुडो गोलेक्षुपाकयोः सर्पमांसात्पशू व्याडौ गोभूवाचस्त्विडा इलाः ४९ क्ष्वेडा वंशशलाकापि नाडी कालेपि

अतिशयेन युवाल्पो वा इष्ठन् युवाल्पयोः कनन्यतरस्याम् ॥ कनिष्ठोतियुवत्यल्पानुजस्त्री दुर्वलांगुलो इतिष्ठांताः ४८ दंडयति अनेन वा दंडनिपातने पचाद्यच् पुं
सीतिघो वा दमेर्डो वा दंडो दमे मानभेदे लगुडे यमसैन्ययोः व्यूहभेदे च कांडे श्च कोणमंथानयोरपि अभिमाने ग्रहे दंडश्चंडांशोः पारिपार्श्विक इतिविश्वः गुडतिगु
डवेष्टने इगुपधेति कः गुडं स्याद्गोलके हस्तिसन्नाहे स्नुविकारयोः गुडास्नुत्यांच कथितागुडिकायां च योषितीति व्याडति अडउद्यमे पचाद्यच् व्याडो व्याघ्रे खले सर्प इति २५
भसः इलति इलउत्क्षेपे इगुपधेति कः ईडानुबन्धयोविति सोसैय्याचवचने वसुमत्यामपि स्त्रियां डलयोरेकत्वस्मरणाद्विडा ४९ क्ष्वेलति क्ष्वेलचलने पचाद्यच् भ
डलयोरेकत्वं क्ष्वेडा ध्वनौ कर्णामयेविषे क्ष्वेडावंशशलाकायां सिंहनादे च योषिति लोहितार्कपर्णेफले घोषपुष्पेनपुंसकं दुरासदे चैव कुटिलेवाच्यलिंगः प्रकीर्तितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नालयति नलं गंधेय चाद्य च उलयोरेकत्वं गौरादिः नाडी नाले त्र्यलंतरे सिरायां गंड दूर्वायां चर्योयां कुहनस्य च तथा षट्स्वरकाले पिकनतिकनी दीप्तोय मंता डुः क्वादिभ्यः कि
त् अनुनासिकस्येति दीर्घः कांडं चावसरे वाले नाले स्कंधे च शाखिनां॥ संवेर हसिवर्गो चेति धरणिः ४२ भण्यते भणः शब्दे पूर्ववत् पृषोदरादिः भांडं भूषणे मात्रे स्यादि
ति धरणिः भांडं पात्रे वणिग्मूले धने भूषाश्वभूषयोः इति डांताः उडुः ते स्म वहन्ना पलोकः स्युध्वस्तो नेति साधुः प्रगाढस्त्वे नेस्मा गाहू विलोडने क्तः यस्य विभाषेति नेट् प्रगाढं दृढे
कृच्छ्रे इति धरणिः ४४ दृंहति दृंहति स्म वा दृह दृहि वृद्धौ गत्यर्थेति क्तः दृढः स्थूल बलयोरिति साधुः दृढः स्थूले नितांते च प्रगाढे बलवत्यपि विशेषेणोद्यते स्म वहना
पलोकः व्यूढः संहत विन्यस्त पृथुलेष्वभिधेयवत् इति ढांताः भ्रूण्यते भ्रूणः आशायां घञ् स्त्रियाः अयं स्त्री पुंसाभ्यामिति नञ् स्नञ् लण्श्वा सो गर्भश्च शल्यादिर्गर्भ व्यावृ
त्यर्थो विशेषणं भ्रू णः स्त्रीगर्भ डिंभयोः वाणयति वणशब्दे स्वार्थेण्यंतः पचाद्यच वाणः स्याद्बाणसने दैत्यभेदे केवल कांडयोः वाणा तु वाणमूल्ये स्त्री नीलझिंट्यां

कांडोस्त्री दंडवाणार्ववर्गावसरवारिषु ४३ स्याद्भांडमश्वाभरणे मत्रे मूलवणिग्धने इति डांताः भृशप्रतिज्ञयोर्वाढं प्रगाढं भृशकृच्छ्र
योः ४४ शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्त संहतौ इति ढांताः भ्रूणोर्भके स्त्रैणगर्भे वाणो बलिसुते शरे ४५ कणोतिसूक्ष्मे धान्यांशे संघाते
प्रमथे गणः पण्ये द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेपि च ४६ मौर्व्यां द्रव्याश्रिते सत्वशुक्लसंध्यादिके गुणः निर्व्यापारस्थितौ कालविशेषोत्सवयोः
क्षणः ४७ वर्णौ द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे अरुणो भास्करेपि स्याद्वर्णभेदेपि च त्रिषु ४८॥ (र)पुनर्द्वयोः ४५ कणति कणनिमीलने पचा

द्यच् कणाजीरक कुंभीर मक्षिका पिप्पलीषु च कणोतिसूक्ष्मे धान्यांशे गण्यते गणः संख्याने घञ् अज्वा गणः स्यात्प्रमथे संघे संख्या सैन्य प्रबंधयोः पणनं अनेन वा
नित्यं पणः परिमाणे र्यपृपणो भाने वराटानां मूल्ये कार्षापणे धने द्यूते विक्रय्यशाकादेर्वृंदमुष्टौ गलहे भृतौ इति धरणिः ४६ गुण्यते गुणः आमंत्रणे घञ् गणो मौर्व्यामप्रधा
ने रूपादौ सूदे इंद्रिये त्यागे शौर्यादिके संध्यासत्वाद्यावृत्तिरज्जुषु शुक्लादावपि वृद्धौ च क्षणोति क्षणु हिंसायाम्॥ पचाद्यच् क्षणो व्यापार शून्यत्व मुहूर्तोत्सवपर्वसुविति
हदुः ४७ वर्ण्यते वर्णः भेरणे घञ् वर्णो द्विजादि शुक्लादि यशो गुणकथासु च स्तुतौ नानं स्त्रियां भेदरूपाक्षर विलेपने ऋच्छति ऋगतौ अर्ते श्वेतु नन् अरुणो व्यक्तरागे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0 In Public Domain. Digitization by eGangotri

अ·त· तिष्ठति स्थाणुः स्थाणुः कीलेऽद्धरे पुमान् अस्त्री ध्रुवे द्रवति द्रुर्गतौ द्रुः द्रुजूसीति नः द्रोणः स्त्रियामाढके स्यात् सदृढकादि चतुष्टये पुमान् कृपीपतौ द्रोणः काके स्त्री नीवृदंतरे स्त्रिया
टी·रा· काष्ठांबुवाहिन्यां गवादन्यामपीष्यते रणो निरणः शब्दे पचाद्यच् रणः कोणे क्वणे पुंसि समरे पुन्नपुंसकं ग्रामं नयति णीञ् सत्स्विति क्विप् अग्रग्रामाभ्यामिति णत्वं ग्रा
मणीर्भोगिके पत्यौ प्रधाने नापितेपि च ग्रामणीर्नीलिकायां च ग्रामीणां पण्ययोषितोरिति विश्वः ग्रामं णीर्नीलिकायां स्त्री ग्रामादभूतेभिधेयवत् ४८ ऊर्णेति ऊ
२६ र्णुञ् आच्छादने अन्येभ्योपीति डः आदिनाशशोष्ट्रमृगादिग्रहः हरिणस्य स्त्री पुंयोगादिति ङीष् वर्णादनुदात्तादिति ङीप् नो हरिणी हरितायां च नारीभिद्वृत्तभेदयोः
सुवर्णप्रतिमायां च ५० हरति हृञ् श्यास्त्याहृञ इनच् हरिणः पुंसि सारंगे शबले त्वभिधेयवत् तिष्ठति रास्नासास्नेति साधुः स्थूणा स्यात्तु स्थूणा स्तंभेपि वेश्मनः तर्षणं
ञितृष पिपासायां तृषिशुषिरसिभ्यः कित् इति नः घर्णं नं घृणु दीप्तौ भिदादेङ् ५१ विपण्यते अस्यां वा पणः व्यवहारे सर्वधातुभ्य इन् आपणः पण्यवीथ्यां च पण्ये च वि

स्थाणुः शर्वेपि च द्रोणः काकेपि च रवे रणः ग्रामणीर्नापिते पुंसि त्रिषु श्रेष्ठाधिपे त्रिषु ४९ ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः हरिणी स्या
न्मृगी हेमप्रतिमा हरिता च या ५० त्रिषु पाण्डौ च हरिणः स्थूणा स्तंभेपि वेश्मनः तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे ५१ वणिक्पथे
च विपणिः सुरा प्रत्यक् च वारुणी करेणुरिभ्यां स्त्री नेभे द्रविणं तु बलं धनं ५२ शरणं गृहरक्षित्रोः श्रीपर्णं कमलेपि च विषाभिमरलोहेषु ती
क्ष्णं क्लीबे खरे त्रिषु ५३ प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ॥ ८९ पणिस्त्रियामिति रुद्रः वरुणस्येयं तस्येदमित्यण् वारुणी गंडदूर्वायां प्रतीचीसुरयोः स्त्रि

यां करोति कृषणाभ्यामेणुः करेणुर्गजभूषायां स्त्रियां पुंसि मतंगजे करेणुरस्यास्तीति वा करेण ऋच्छति गच्छति वा करेणुः करिणी कर्णिकारयोरिति रंतिदेवः द्रूयते द्रवति वा द्रुगतौ द्रुदक्षिभ्य
मिनन् द्रविणं न द्रूयोर्वृत्ते कांचने च पराक्रमे ५२ शृणाति शृ हिंसायां ल्युट् भावे वा शरणं गृहरक्षित्रोर्वधरक्षणयोरपि श्रीः पर्णोऽस्य श्रीपर्णी कुंभीगंभार्योः क्लीबे पद्मा
ग्निमंथयोरिति विश्वः तेजयति तिज निशाने ति· जक्षीर्घश्वात कत्रेः तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके क्लीबं यन्त्राश्चे पुंसि तिग्मात्मत्यागिनोस्त्रिषु भवेदभिमरायुद्धे २६
वधे स्वबलसाध्वसे ५३ प्रमीयतेऽनेन माङ् माने ल्युट् नेन वा करणे कर्तरि भावे च ल्युट् प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करणं कारणे कार्ये साधनेन्द्रियकर्मसु कायस्थे व्रतबंधे च नाट्यगीतप्रभेदयोः पुमान् शूद्राविशोः पुत्रे वा नरादौ च कीर्त्यते इत्यजयः कर्तृकर्मकरणे भावे च ल्युट् ५४ सम्यक् सरंत्य
नेन सृगतौ करणे ल्युट् उद्ध्रियते उद्धरते ल्युट् भावे वा मुक्तोज्झितोन्मूलितयोः स्यादुद्धरणमुन्नये इति रभसः ५५ आणंतं व्याप्तिअसंभु विचान श श्रसो रह्लोपः उपसर्गस्य दुरि
ति षत्वं यत्तु वेवेष्टि विषाणं विषेः ग्णानजिति मुकुटः तन्न शपः श्लोसति श्लाविति प्रसंगात् विषाणी क्षीरकाकोल्यामजशृंग्यां च योषिति कुष्ठनाम्नौषधौ स्त्रीवं त्रिषु शृंगेभदं
तयोः प्रवर्तते नेनात्र वा पुङ् गतौ ल्युट् प्रवणः क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे आपणे च तथा क्षीणे प्रगुणे समुदाहृत इति धरणिः प्रवणो ना चतुष्पथे क्रमनिम्नमहीभा
गोदारप्रह्वेषु च त्रिषु ५६ संकीर्यते नेन स्त्रकृ विक्षेपे कर्मणि क्तः संकीर्णः संकटे व्याप्ते कुत्रचिद्वर्णसंकरे इत्यजयः संकीर्णं निचितेपि स्यादशुद्धे चाभिधेयवत् ऋच्छन्ति यस्मिन् अ

करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ५४ प्राण्युत्पादे संसरणमसंबाधचमूगतौ घंटापथेथ वांतान्ने समुद्धरणमुन्नये ५५ अतस्त्रिषु वि
षाणं स्यात्पशुशृंगेभदंतयोः प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ५६ संकीर्णौ निचिताशुद्धौ वीरिणं शून्यमूषरं ॥ णांताः॥ देवसूर्यौ विव
स्वंतौ सरस्वंतौ नदार्णवौ ५७ पक्षिताक्ष्यौं गरुत्मंतौ शकुंतौ भासपक्षिणौ अग्न्युत्पातौ धूमकेतू जीमूतौ मेघपर्वतौ ५८ हस्तौ नु पाणिनक्षत्रे
मरुतौ पवनामरौ यंता हस्तिपके सूते भर्ता धातरि पोष्टरि ५९॥ ऋ गतौ अर्तेः किरीच्चेतीनन् ईरिणं तूषरे शून्ये इत्यादिरपि इरिणं निराश्रये भूभागे कथितं
ऊषरे इति ह्रस्वादावजयः॥ इति णांताः॥ विवस्तेजो स्यास्तीति मतुप् विवस्वान् सुरे सूर्ये तन्नगयोर्विवस्वती सरो गमनमस्यास्तीति मतुप् सरस्वान् तु नदे चाब्धौ नान्यवद् इति केशि
यां वाणी स्त्री रत्नवाग्देवीगोनदीषु नदीभिदि ५७ गरुतः सन्त्यस्य मतुप् शक्नोति शकेरुनोन्तुन्यरुंतः भासो भासि समाख्यातो गोष्ठकुक्कुटगृध्रयोरिति विश्वः धूमः केतुश्चिह्नम
स्य धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोरिति विश्वः जीवनं मुंचति पृषोदरादिः जीमूतोब्दे घृतिकरे देवताडे पयोधरे ५८ हसति हसे हसने हस्तिमृग्निपाणिनि तन् ह
स्तः करे करिकरे सप्रकोष्ठकरेपि च ऋक्षे केशात्परो व्राते म्रियते नेन मृङ् प्राणत्यागे मृग्रोरुतिः मरुद्देवे समीरे ना ग्रंथिपर्णे नपुंसकं यच्छति यमु उपरमे तृच्
बिभर्ति भरति वा डुभृञ् धारणपोषणयोः भृञ् भरणे तृच् भर्ता स्वामिनि धारके इति विश्वः भर्ता स्वामिनि पुंसि स्यात्त्रिषु धातरि पोष्टरि ५९ ॥ ५९ ॥

अ॰ तृ॰ पुनाति पूयते वा पूञ् पवने हसिमृग्रिणितितन् पोतः शिशौ वहित्रे च गृहस्थाने च वा समिभकर्षेण प्रेतः प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिंगकः चाय्यते अनेन वा चायृ
टी॰ ए॰ पूजानिशामनयोः चायः किरितितुः केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि सूयते स्म सौति स्म वा षुञ् अभिषवे षु प्रसवैश्वर्ययोः क्तः सुतः स्यात्पार्थिवे पुत्रे त्वपत्ये तु पु
२७ ताख्यता ५९ तिष्ठन्त्यस्मिन् घञर्थे कः स्थश्चासौ पतिश्च स्थपतिः कंचुकिन्यपि जीवेष्टियाजके शिल्पिभेदे नासत्तमे त्रिषु भुवं बिभर्ति डुभृञ् क्विप् तुक् मूर्द्धनि अभिषिच्यते
स्म षिच क्षरणे क्तः मूर्द्धाभिषिक्तो भूपाले मंत्रिणि क्षत्रियेऽपि च ऋच्छति अर्तेश्चतुः किच्च ऋतुर्मासि वसंतादौ धीरे स्त्रीकुसुमेऽपि चेति धरणिः ६१ न जीयते स्म जि अभि
भवे क्तः अजितो ना हरौ त्रिषु अनिर्जिते चेति विश्वः न व्यज्यते स्म अञ्जू व्यक्तौ क्तः अव्यक्तः शंकरे विष्णौ अव्यक्तं महदादिके आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत्

यानपात्रे शिशौ पोतः प्रेतः प्राण्यन्तरे मृते गृहभेदे ध्वजे केतुः पार्थिवे तनये सुतः ६० स्थपतिः कारुभेदेऽपि भूभृद्भूमिधरे नृपे मूर्द्धाभिषिक्तो भूपे
ऽपि ऋतुः स्त्रीकुसुमेऽपि च ६१ विष्णावप्यजिताव्यक्तौ सूतस्त्वष्टरि सारथौ व्यक्तः प्राज्ञेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ६२ क्षत्ता स्यात्सारथौ द्वाः
स्थे क्षत्रियायां च शूद्रजे वृत्तान्तः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः ६३ आनर्तः समरे नृत्यस्थाननीवृद्विशेषयोः कृतान्तो यमसिद्धान्तदैवा
कुशलकर्मसु ६४ श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ६५॥ इति विश्वः सुवति सूयते स्म

वा षु प्रेरणे क्तः सूतस्तु सारथौ तक्षिणि क्षत्रियाद्ब्राह्मणीसुते वंदिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु व्यज्यते स्म अंजू क्तः व्यक्तः स्फुटमनीषिणोः दृष्टः अंतोऽत्र अंतः प्रा
तेंति केनाशद्वति विश्वः दृष्टान्ते उदाहरणे शास्त्रे च मरणे ६२ क्षदंति क्षद सौत्रः तृन् तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ २७
भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजीति विश्वः वृत्तोऽन्तोऽस्य वृत्तस्यान्त इति वा वृत्तान्तोऽवसरे भावे कार्त्स्न्ये वार्ताविशेषयोः वृत्तान्तः प्रक्रियायां चेति विश्वः ६३ आनृ
त्यंत्यत्र नृती गात्रविक्षेपे हलश्चेति घञ् आनर्तो नृत्यशालायां जनेऽजनपदान्तरे इत्यजयः॥ आनर्तो देशभेदेऽपि नृत्यस्थाने जने रणे कृतान्तो येन यस्य वा ६४ आदि
नापितादिग्रहः रसः प्रथमं आहारस्य विकारः आदिना वसा मज्जा शुक्रादिग्रहः तद्गुणा गंधादयः गैरिकादिः दधाति धीयते वा धाञ् सितनिगमीति तुन् ६५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धोःन्तोस्य असर्वेतिपूर्वविशेषणं शुद्धांतोः तः पुरेराजकक्षाभेदे च भूपतेरित्यजयः शक्यते नया शक्लृ शक्तौ क्तिन् शक्तिरस्त्रांतरे गौर्यामुत्साहादौ बले स्त्रियां कासूर्विकल वाचि स्यात्कासूः शक्त्यायुधेपि चेति विश्वः मूर्च्छ्यते मूर्च्छा मोहादौ क्तिन् राल्लोपः ६६ व्रजंतीतनिरस्याः पृषोदरादिः ओजसुव्रत धातुं स्वीकृतवान् ततो वाहुलकादतिः व संत्यस्यां वसनिवासे वहिवसीत्यतिः वसतिः स्यात्स्त्रियां वासे यामिन्यां च निकेतने अपचीयते अपचाय्यते स्म वा चायृ पूजादौ चायः चिः क्तिन् इति चिः भवेदपचितिः पूजा व्ययनिष्कृतिहानिषु सनने सानं वा षणु दाने षोऽन्तकर्मणि च क्तिन् ऊतियूतीति साधुः यत्तु सनः क्तिचि नलोपा हूयोः सातिः संतिश्चेति मुकुटो व्याख्यत् तन्न क्तिचः कर्त्तरि विधानात् भावकर्मणोरसंभवात् ६७ अर्दनं अर्दहिंसायां क्तिन् नावादिभ्यः आङ् ऋच्छतेः क्तिन् उपसर्गादृतीति वृद्धा वार्त्तिरिति कश्चित् जननं अनयेति वा जनी क्तिन् जनसने त्यात्वं जातिश्छंदसि सामान्ये मालत्यां गोत्रजन्मनोः जातिर्ज्जातीफले धात्र्यां चुल्लीकंपिल्लयोरपि इति विश्वः जातिः स्त्री गोत्रजन्मनोः—

कक्षांतरेपि शुद्धांतो नृपः स्यात्सर्वगोचरे कासूःसामर्थ्ययोः शक्तिर्मूर्त्तिः काठिन्यकाययोः ६६ । विस्तारवल्ल्योर्व्रततिर्वसती रात्रिवेश्मनोः क्षयार्च्चयो
रपचितिः सातिर्दानावसानयोः ६७ अर्त्तिःपीडाधनुष्कोट्योर्जातिःसामान्यजन्मनोः प्रचारस्यंदयो रीतिरीतिर्डिंबप्रवासयोः ॥ ६८ ॥ उदयेधिगमे प्राप्ति
स्त्रेतात्वग्नित्रयेयुगे वीणाभेदेपि महती भूतिर्भस्मनिसंपदि ६९ नदीनगर्योर्नागानां भोगवत्यथसंगरे संगे सभायां समितिः क्षयवासावपिक्षिती. ७०

अथमंतिकामलको श्चसामान्यच्छंदसोरपि जातीफलेच मालत्यां रीयते रिणाति वा रयणं वा रीश्रवणे । रीगतिरेषणयोः क्तिच् क्तिन् वा रीतिः प्रचारे स्यंदे च लोहकिट्ट रकूटयोरिति विश्वः ईयते नया ईङ् गतौ क्तिन् डिंबो विप्लवः ईतिर्डिंबे प्रवासेपि दृष्ट्यादिषट्सु च स्त्रियां ६८ आपणं आप्लृ व्याप्तौ क्तिन् नावादिभ्यः प्राप्तिर्महोदये लाभेपि च स्त्रियां त्रीनभेदानि ता पृषोदरादिः मह्यते मह पूजायां वर्त्तमाने पृषदिति साधुः महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकं तत्त्वभेदे पुमान् श्रेष्ठवाच्यवत्तु भवति अनया वा भवनं वा क्तिच् भूतिर्भस्मनि संपत्तौ हस्तिशृंगारयोः स्त्रियां ६९ भोगोस्त्यस्यां मतुप् अथ भोगवती नागपुरी नद्योर्हो पुमान् समपदे समीयते वास्यां इण् गतौ क्तिन् क्षयणं क्षीयतेस्यां वा क्षि क्षये क्षि निवासगत्योः क्तिन् क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम् ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri

हंतिहिनोतिवा हन्यतेनयावाक्तिन् ऊतियूतीतिसाधुः गच्छतिवर्तमानेष्टपरितिसाधुः यद्वा घृतिगमिजुहोतीनांद्वेचेतिक्विपि गमः क्वाविति मलोपः तुक् जगत्स्यादिष्टपेस्त्री
वेनावायोजंगमेत्रिषु जगतीभवनेक्ष्मायांछंदोभेदेजनेपि च हारः दशाक्षरपादे ७१ पंचनं पचिव्यक्तीकरणेक्तिन् यद्वा पंचकद्वयं पंक्तिविंशतीतिसाधुः दशाक्षरपादः
पंक्तिः पंक्तिर्दशाक्षरंछन्दोदशसंख्यालिषुस्त्रियां आयम्यतेनया आयमनंवायमउपरमेक्तिन् आयतिः संयमेदैर्घ्येप्रभावागामिकालयोः पततिपादलगतोक्तिच् पत्तिर्नी
पदगेस्त्रियां गतावेकरथेभेकत्र्यश्वपंचपदातिके पक्षस्यमूलंपक्षतिः प्रतिपदिगरुन्मूलेच ७२ प्रकुरुतेक्तिच प्रकरणंक्तिन प्रकृतिर्गुणसाम्येस्यादमात्यादिस्वभावयो
योनौलिंगेपौरवर्गेभारतीसात्वतीचैवकैशिक्यारभटीतथा चतस्रोवृत्तयश्चैताः यासुनाट्यंप्रतिष्ठितमितिरभसः वृत्तिर्विवरणेजीव्येकैशिक्यादिषुवेष्यते इतिविश्वः
सिच्यतेषिचक्षरणेवाहुलकाद्दतच् पृषोदरादिः सिकतास्त्रीसिकतिलेवालुकायांतु भूमनिश्रूयतेऽनयावा श्रुश्रवणेक्तिन् श्रुतिः श्रोत्रेतथाम्नायेवार्तायांश्रोत्रकर्म

ण्येरर्चिश्चशस्त्रंचवह्निज्वालाचहेतयः जगतीजगतिच्छंदोविशेषेपिक्षितावपि ७१ पंक्तिश्छंदोपिदशमंस्यात्प्रभावेपिचायतिः॥ पत्तिर्गतौ
चमूलेतुपक्षतिःपक्षभेदयोः ७२ प्रकृतिर्योनिलिंगेचकैशिक्याद्याश्चवृत्तयः सिकतास्यात्वालुकापिवेदेश्रवसिचश्रुतिः ७३ वनिताजनितात्य
र्थानुरागायांचयोषिति गुप्तिःक्षितिव्युदासेपिधृतिर्धारणधैर्ययोः ७४ बृहतीक्षुद्रवार्ताकीछन्दोभेदेमहत्यपि॥ वासितास्त्रीकरिण्योश्चवार्ता

णीतिविश्वः ७३ वन्यतेस्मवनुयाचनेवनसंभक्तौवाक्तः यस्याविभावेन्यस्यानित्सत्वादिट् वनिताजातरागस्त्रीस्त्रियो स्त्रीत्रिषुयाचितेगुप्यते वृत्तौजनश्रुतौ ७५
गोपनंवागुपूरक्षणेक्तिन् गुप्तिः काराचरक्षाचदीर्णंचविवरंभुवः इतिशाश्वतः॥ गुप्तिःस्याद्वकरस्थानेकारागारेचरक्षणेधारणं धृञ् धारणेक्तिन् धृतिर्योगांतरेधैर्यधार
णाध्वरतुष्टिषु इतिविश्वः ७४ बर्हति वृह वृद्धौ वर्तमानेपृषदितिसाधुः वृहती क्षुद्रवार्ताकीकंटकार्यांचवाचिचपरिधान्यांमहत्यांचछंदोवसनभेदयोरितिविश्वः॥ २९
वासयति वसनिवासे ण्यन्तः वासउपसेवायांवाक्तः वासिताकरिणीनार्योर्वासितंसुरभीकृते ध्वानमात्रेखगारावेवासितंवस्त्रवेष्टिते इतिविश्वः स्वामीतुनालव्यम
ध्यपाठमाह तन्त्रवाशृशब्देहतिरस्त्यस्यांवृत्तेश्चेतिणः आर्तावार्तिगरणेवृत्तौवार्ताकृष्याद्युदंतयोरितिविश्वः ७५॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वार्त्तं फल्गुन्यरोगे स्याद्रोगापवृत्तिमस्य पीति धृतिः म्रियते जिघर्ति वा घृस्मरणदीप्त्योः अंजि घृसिभ्यः क्तः घृतमाज्ये जले क्लीवं मदीप्त्वमित्येयवत् नमृतं मरणमत्र अमृतं यज्ञ
शेषे स्यात् पीयूषे सलिले घृते अयाचिते च मोक्षे च नाधन्वंतरि देवयोः कलो मलो धौतोस्य कलधौतं सुवर्णे स्याद्रजते च नपुंसकम् निमिद्यते निमिदास्नेहने त्रीतः क्तः संज्ञापूर्व
कत्वान्नणत्वं अनात्मनेपदनिमित्ते इति निर्देशाद्वा ७६ श्रूयते स्म श्रवणं च श्रुश्रवणे क्तः अकारि डुकृञ् क्तः शक्तो निवारणे नृक्षोपर्याप्तं स्याद्यथेप्सितमिति रुद्रः कृतं युगे लम
र्थे प्यविहिते हिंसिते त्रिषु अतीव धीयते स्म मनसि डुधाञ् क्तः दधातेर्हिः ७७ प्राण्यतीत तरूति समाहार द्वंद्वः अभवत् भूगत्यर्थेति क्तः भूतं क्ष्मादौ पिशाचादौ जंतौ क्लीवं त्रि
षूचिते प्राप्ते वृत्ते समे सत्ये देवयोन्यंतरेऽपि ना कुमारेऽपि वर्तते स्म वर्तनं वा वृतु वर्तने क्तः रणे वा गत्यर्थेति क्तो भावे वा वृत्तोऽधीतेऽधीतेऽपि वर्तुलेऽपि मृते वृत्ते वृत्ते न्यलिंग वा न क्ली
वं छंदश्चारित्र्यवृत्तिषु ७८ महत्यते मह पूजायां वर्तमानेऽप्यदिति साधुः महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकं नलभेदे पुमान् श्रेष्ठे वाच्यवत् अवगीयते स्म गै शब्दे क्तः ज

वार्त्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते कलधौतं रूप्यहेम्नोर्निमित्तं हेतुलक्ष्मणोः ७६ श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतम् अत्याहितं म
हाभीतिः कर्म जीवानपेक्षि च ७७ युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ७८ महद्राज्यं चावगीतं जन्ये स्याद्गर्हि
ते त्रिषु श्वेतं रूप्येऽपि रजतं हेम्नि रूप्ये सिते त्रिषु ७९ त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। अवदातः सिते पीते शुद्धे बद्धार्जुनौ सितौ ८०॥

न्ये जनापवादे च अवगीतस्तु निर्वादे दुष्टगर्हितयोरपि श्वेतते श्विता वर्णे पचाद्यच् श्वेतो द्वीपाद्रिभेदयोः श्वेता वराटिका काष्ठपाटला शंखिनीषु च क्लीवं रूप्ये न्यवच्छु
क्ले रजति रज्यतेऽनेन वा रंज रागे पृषिरंजिभ्यां कित् इत्यतच् रजतं रंजने रूप्ये शोणिते हृद्दहारयोरित्यजयः ७९ आ तां न गच्छति इणि गमिज्ञु होमी नांद्वे चेति क्विप् गमः क्वौ
विति मलोपः तुकृ जगत्स्याद्विष्टपे क्लीवं वायौ ना जंगमे त्रिषु रजति रज्यते वा रंज रागे गत्यर्थेति क्तः कर्मणि वा क्तः रक्तोऽनुरक्ते नील्यादिरंजिते लोहिते त्रिषु क्लीवं तु कुंकु
मे ताम्रे प्राचीनामलकेऽसृजि अवदायते स्म दैप् शोधने क्तः सीयतेऽस्मात् षिञ् बंधने क्तः सितमवसिते बद्धे धवले त्रिषु शर्करायां स्त्री॥ ८०॥ ८०॥ ८६ ॥

अभिनीयते स्म णीञ् क्तः मर्षिणि क्षंतरि संक्रियते स्म संस्कृतः कृत्रिमे शस्ते भूषिते प्यन्यलिंगकः क्लीवं तु लक्षणोपेते लक्षणेनोपेते पाणिन्यादिसूत्रव्युत्पादिते न अंतोस्य
अनंतः केशवे शेषे पुमान् निरवधौ त्रिषु अनंता च विशल्यायां धारिवादूर्वयोरपि। कलादु शलभापथ्यापार्वत्यामलकी पुच विश्वं भरागुडूच्योः स्यादनंतं सुरवर्त्मनि ८१ पतीयते स्म
रूण् गतौ क्तः प्रज्ञात ज्ञात हृष्टेषु प्रतीतः सादरे त्रिषु इति रभसः अभिजायते स्म गत्यर्थे ति क्तः अभिजातः कुलीने स्यान्न्याय्ये पंडितयोस्त्रिषु बुधे पंडिते विविच्यते विजिर पृथग्भा
वे क्तः विचिर् विरेचने वा विविक्तं त्रिषु संपृक्तेरहः पूतविवेकिषु मूर्छति स्म मूर्छा मोहसमुछ्राययोः गत्यर्थे ति क्तः मूर्तं स्यात् त्रिषु मूर्छालेकठिने मूर्तिमत्यपि ८२ शुच्यते स्म ईशुचि
र् पूतीभावे पूताम्ल निष्ठुरे शुक्तं मृन्मयादिषु चौ भांडे स गुडं क्षौद्र कांजिकं धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते इति वैद्यकं शीयते शि नो ति स्म वा शि त्र निशाने क्ति नु
क्तिन्वा निशिते सिते भूर्जे ना सिता सितयोस्त्रिषु अस्ति असभुविलटः शतृ श्नसोरल्लोपः सन् साधौ धीरशस्तयोः मान्ये सत्ये विद्यमाने त्रिषु साध्व्यां स्त्रियां ८३ पुरोऽकारि

युक्तेतिसंस्कृते मर्षिण्यभिनीतोथ संस्कृते॥ कृत्रिमे लक्षणोपेतेप्यनंतोनवधावपि ८१ ख्याते हृष्टे प्रतीतोभिज्ञातस्तु कुलजे बुधे विविक्तौ पूतवि
जनौ मूर्छितौ मूढसोच्छ्रयौ ८२ द्वौ चाम्लपरुषौ शुक्तौ शिती धवलमेचकौ सत्ये साधौ विद्यमाने प्रशस्तेभ्यर्हिते च सत् ८३ पुरस्कृतः पूजितेरात्य
भियुक्तेग्रतः कृते निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ८४ जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रितास्तु उत्थितास्त्वमी वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ
सादरार्चितौ नानाः ८५ अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ ८६॥

९९ डु कृञ् क्तः पुरोव्ययमिति गतित्वं नमस्पु
रसोरिति सत्वं पुरस्कृतोभिशस्तारिग्रस्तायेकृतपूजिते निरुद्धो निहतो वा वातो स्मात् निवातो दृढसन्नाहे निवासे वातवर्जिते इत्यजयः ८४ उच्छ्रयति उच्छ्रीयते स्म वा
श्रिञ् सेवायां गत्यर्थे ति क्तः कर्मणि वा उच्छ्रितं त्रिषु संजातोन्नद्धप्रवृद्धयोः उत्तिष्ठति स्म गत्यर्थे ति क्तः॥ उत्थितं स्यात् त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि आद्रियते स्म दृङ् आदरे क्तः २९
इति नानाः ८५ अर्यते ऋच्छति वा ऋ गतौ उषिकुषिगार्तिभ्यस्थन् यद्वा अर्थ्यते अर्थ उपयाच्ञायां घञ् अर्थो विषयार्थनयोर्धनकारणवस्तुषु तीर्यते अनेन वा तृ प्लवन त
रणयोः पातृतुदीति थक् तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजस्सु च अवतारर्षिजुष्टांबुपात्रोपाध्यायमंत्रिषु निपानं जलाव तारः निदानमुपाय इति मुकुटः ८६ ॥

CC-0. In Public Domain. Digitization by eGangotri

समर्थयते समर्थ्यते वा अर्थउपयाच्ञायां पचाद्यच् घञ् वा दशम्यां तिष्ठति सपिस्थ इति कः दशमी स्थो नष्टवीजे स्थविरे प्यन्यलिंगकः विथ्यते नया विथ याचने घञ् पृषोदरादिः गौ
रादिः वी थी पंक्तौ गृहांगे च रूपकां तर वर्त्मनोः ८७ आतिष्ठंत्यस्यामास्थानाम् ष्ठा गति निवृत्तौ आतश्चोपेत्यङ् आस्थात्वालंवनास्थानं यत्नापेक्षासु योषिति प्रतिष्ठंते स्मिन्ननेन वा
घञर्थे कः प्रस्थोस्त्रियांमानभेदे स्तामावुन्नितवस्तुनि इतिथांताः छंद्यते छदि संवरणे घञ् अपोदस्यति आतोनुपेतिकः अव्दः संवत्सरे मेघे करिभेदे च मुस्तके इति विश्वः ८८
अ पोद्यते अपवदनं वा वद व्यक्तायां वाचि घञ् अपवादस्तु निंदायामाज्ञाविश्रंभयोरपि मुकुटस्तु अपवादे पि पठित्वा अववादस्तु निंदायामाज्ञाविश्रंभयोरपि इति विश्वमुदा
जहार दायमत्ति अदभक्षणे कर्मण्यण् यद्वा दत्ते डुदाञ् आतश्चोपेतिकः दायस्य आदः दायादस्तु भवेत्पुंसि सपिंडे तनयेपि च पद्यते पदगतौ पदरुजेति घञ् पादो वुध्ने तुरी
यांशे शैलप्रत्यंतपर्वते चरणे च मयूखे च तमोनुदति णुद प्रेरणे क्विप् ८९ निर्वदनं वद व्यक्तायां वाचि घञ् निर्वादस्या ल्लोकवादपरिनिष्ठितवादयोः शाद्यते अनेन वा शद्लृ

समर्थस्त्रिषु शक्तिस्थे संवद्धार्थे हितेपि च दशमीस्थौ क्षीणरागवृद्धौ वीथी पदव्यपि ८७ आस्थानी यत्नयोरास्था प्रस्थोस्त्री सानुमानयोः थांताः
अभिप्रायवशौ छंदावव्दौ जीमूतवत्सरौ ८८ अपवादौ तु निंदाज्ञे दायादौ सुतवांधवौ पादारश्म्यंघ्रितुर्यांशाः चंद्राग्न्यर्कास्तमोनुदः ८९ निर्वादो
जनवादेपि शादो जंवालशष्पयोः आराववहंदिते त्रातर्याक्रंदो दारुणे रणे ९० स्यात्प्रसादोनुरागेपि सूदः स्याद्व्यंजनेपि च गोष्ठाध्यक्षेपि गोविं
दो हर्षेप्यामोदवन्मदः ९१ प्राधान्ये राजलिंगे च वृषांगे ककुदोस्त्रियां ॥ ९९ शातने ह्लस्चेति भावे वा घञ् जंवालः पंकः शष्यं वालतृणं आक्रंदनं आक्रंदते आ
क्रंद्यते ऽस्मिन्नाक्रंदयति वा कदि क्रदि आह्वाने रोदने च आङ्ः क्रंदशब्दसातत्ये घञ् पचाद्यज्वा आक्रंदः क्रंदने ह्वाने मित्र दारुणयुद्धयोः ९० प्रसदनं अनेनवा षद्लृ विशरण
दौ घञ् प्रसादोनुग्रहे काव्यगुणे स्वास्थ्य प्रसन्नतः सूद्यते सूदयति वा सूद क्षरणे एरच् पचाद्यज्वा सूदस्तु सूपवत्सूपकारे च व्यंजनेपि चेति विश्वः गां विंदति विद्लृ लाभे गवादिषु
विंदेः संज्ञायामिति शः गोविंदो वासुदेवे स्याद्गवाध्यक्षे वृहस्पतौ आमोदनं आमोदयति वा मुद हर्षे स्वार्थे ण्यंतः घञ् पचाद्यज्वा आमोदो गंधहर्षयोः मदनं अनेन वा मदी हर्षे
मदोनुपसर्गे इत्यप् मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति विश्वः ९१ कं सुखं कौति कुशब्दे क्विप् तत्कृपृषोदरादिः ककुद्मत् ककुदश्रेष्ठे वृषांगे राजलक्ष्मणीति विश्वः प्राधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...Public Domain. Digitization by eGangotri

संवेदनं संविद्यते नया वा विद् ज्ञाने विद् चेतनादौ च संपदादित्वात् क्विप् संवित् स्त्रियां प्रति ज्ञायां आचारे ज्ञानसागरे संभाषणे क्रियाकारे संकेते नाम्नि तोषणे क्रियायाः कारो नियमः
पणबंधो वा आजिर्युद्धं ९२ उपनिषदनं उपनिषत् दीति श्रेयोस्यां वा षद्लृ विशरणगत्यवसादनेषु उपसर्गादिः भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियां शृणाति शृ हिंसायां शृदृभसोदिः
शरत् स्त्री वत्सरे ऋतौ पदगतौ पद्यते गम्यते नेन पद्यते स्थैर्यं पदत्राणो वा पचाद्यच् भावकर्मकरणेषु वा घञ् संज्ञापूर्वकत्वात् वृद्ध्यभावः पदं शब्दे च वाक्ये च व्यवसायापदेशयोः पादतच्चिन्ह
योः स्थानत्राणयोरंकवस्तुनोरिति विश्वः श्लोकपादेपि च क्लीवं पुल्लिंगः किरणे पुनः ९३ गोः पदं गोष्पदं सेवितेति साधुः गोष्पदं गोः पदस्थभेगवां च गतिगोचरे इति विश्वः आपद्य
तेस्मिन् आस्पदं प्रतिष्ठायामिति साधुः आस्पदं पदकृत्ययोः स्वदते स्वद आस्वादने क्तवायेन्युणस्वादुमिष्टमनोज्ञयोः म्रद्यते म्रद मर्दने प्रथिम्रदीति कुः संप्रसारणं च आदान्त
त्रिषु ९४ मंदते मद स्तुत्यादौ पचाद्यच् मंदे स्वल्प रुग्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ शारदि भवः संधिवेलेत्यण् शारदः स्त्रि

स्त्री संविद्ज्ञानसंभाषा क्रियाकाराजिनामसु ९२ धर्मे रहस्युपनिषत्स्यादृतौ वत्सरे शरत् पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुषु ९३ गोष्प
दं सेविते मानेप्रतिष्ठाकृत्यमास्पदं त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ९४ मूढाल्पापटुनिर्भाग्या मंदाः स्युर्द्वौ तु शारदौ प्रत्यग्राप्रतिभौ वि
द्वत्सुप्रगल्भौ विशारदौ ९५ दान्ताः व्यामो वटश्च न्यग्रोधावुत्सेधः काय उन्नतिः पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ९६ परिधिर्यज्ञियतरोः शा
खायामुपसूर्यके बंधकं व्यसनं चेतःपीडाधिष्ठानमाधयः॥ ९७॥ ((यां तौ यपिप्पलीसंप्रपर्ण्योः शसेक्लीवं शरज्जा तनूतनाप्रतिमे त्रिषु विशेष्यौं विपरीतौ वा
शारदः शारद्योगतेति समासः विशारदः पंडिते च धृष्टे इति दान्ताः ९५ न्यक्रुहणद्विरुधिर आवरणे कर्मण्यण् न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरावितिविश्वः उत्सेध
नं अनेन वा षिधु गत्यां घञ् विविधो वधो हननं गमनं वा अनेन वा मादिभ्यो फन्तुजस्येति समासोन्त्यप इलोपो अन्येषामपीति दीर्घः विवधो वीवधश्चापि पर्याहारेध्वभा ३०
रयोरिति विश्वः परितः आह्रियते नेन पर्याहारः उभयतो वद्ध शिक्यं स्कंधवाह्यं काष्ठं कावडी तिख्यातं यत्तु उपसर्गस्येत्यादिदीर्घ इति मुकुट आह तन्न वधशब्दस्यादंतत्वे
नाघञन्तत्वात् ९६ परिधीयते डुधाञ् उपसर्गे घोः किः आधानं अनेनास्मिन्वा पूर्ववत् आधिः पुमांश्चित्तपीडा प्रत्याशा बंधकेषु च व्यसने चाप्यधिष्ठाने॥ ९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समाधानं अनेन वा पूर्ववत् समाधिर्ध्याननीवाकनियमेषु समर्थने इति विश्वः नीवाको वचनाभावः मूल्योत्कर्षार्थं धान्यादिसंग्रहो वा समाधिर्नासमर्थने ध्याने वैरस्य नियमे काव्य
स्य च गुणान्तरे अनुबध्यते वेध वंधने घञ् ९८ मुख्य पित्रादिकमनुयातियः शिशुः प्रकृतस्य प्रारब्धस्यानुवर्तने निवर्तने अनुबंधातु हिक्कायां तृष्णायामपि योषिति विनश्वरे प्रकृ
त्यादेः प्रकृतस्यानिवर्तने मुख्यानुयायि वाले च दोषस्योत्पादने पुमान् विध्यति विरहिणं व्यध ताडने भूमिदीर्तिकुः ग्रहिज्येति संप्रसारणं विधुः शशांके कर्पूरे हृषीकेशे च राक्ष
से इति विश्वः अवधानं उपसर्गे तिकिः अवधिस्त्ववधाने स्यात्सीम्नि काले बिले पुमान् ९९ विधानमनेन वा पूर्ववत् किः विधिर्नानियतो काले विधाने परमेष्ठिनि प्रणिधाने प्र
णिधीयते वा किः प्रणिधिर्ना खले चरे प्रणिधिरवधाने पि बुध्यते बुध अवगमने इगुपधेति कः बुधः कवौ रौहिणेय इति विश्वः वर्द्धते स्म वृध वृद्धौ गत्यर्थेति क्तः वृद्धो जीर्णे प्रवृ
द्धे त्रिषु क्लीबं तु शैलजे कं शिरो दधाति आतोनुपेति कः पारस्करादित्वात्सुट् स्कंधः स्यान्नृपतौ वंशे संपराय समूहयोः काये तरुप्रकांडे च भद्रादोह्लदसोमिदिः १०० संदते॥

स्युः समर्थननीवाकनियमाश्च समाधयः दोषोत्पादेनुबंधः स्यात्प्रकृत्यादिविनश्वरे ९८ मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने विधुर्विष्णौ
चंद्रमसि परिच्छेदे बिलेवधिः ९९ विधिर्विधाने दैवेपि प्रणिधिः प्रार्थने चरे बुधवृद्धौ पंडितेपि स्कंधः समुदयेपि च १०० देशे नदविशेषेब्धौ सिं
धुर्ना सरिति स्त्रियां विधा विधौ प्रकारे च साधू रम्येपि च त्रिषु १०१ वधूर्जाया स्नुषा स्त्री च सुधा लेपोमृतं स्नुही संधा प्रतिज्ञा मर्यादा श्रद्धा संप्र
त्ययः स्पृहा १०२ मधु मद्ये पुष्परसे क्षौद्रेप्यंधं तमस्यपि॥

९९ स्यंदते स्त्रवतीति स्यंदेः संप्रसारणं धश्चेत्युः सिंधुः समुद्रे नद्यां च ना देशेभदानयोरिति विश्वः सिंधु
र्वमथु देशाब्धिनदे ना सरिति स्त्रियां विधानं डुधाञ् आतश्चोपेत्यङ् विधो विधाने विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधावितिविश्वः साध्नोति साध संसिद्धौ कृवापेत्युण् सा
धुर्वार्धुषिके चारौ सज्जने चाभिधेयवदिति विश्वः १०१ वहति वह प्रापणे वहो धश्चेत्युः वधूः स्नुषा नवोढा स्त्री भार्या पृक्का गन्धासु च शुण्ठ्यां च शारिवायां चेति विश्वः सुष्ठु धी
यते डुधाञ् धेट् आतश्चोपेत्यङ् सुधा गंगेष्टका चूर्णं स्नुही चामृतमूर्वयोरित्यजयः संधानं अन्त्र वा डुधाञ् आतश्चोपेत्यङ् श्रद्धानं पूर्ववत् संप्रत्यय आदरः श्रद्धा द
रवकांक्षायां १०२ मन्यते मन ज्ञाने फलिपाटीत्युः धश्च मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः दैत्ये चैत्रे वसंते च जीवाशाके मधुद्रुमे इति विश्वः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·तृ· अंधयति अंधः दृष्ट्युपघाते पचाद्यच् अंधं तु तिमिरे क्लीबं च स्युर्हीनेभिधेयवत् आध्मांताः समुन्नद्धौ तस्यान्नस्मण इह बंधने क्तः समुन्नद्धः समुद्भूतेपंडितंमन्यदृप्तयोरिति विश्वः
टी·रा· १०३ ब्रह्मैव ब्राह्मणजातिः बंधुरस्य ब्रह्मबंधुरधिक्षेपे निर्देशे च द्विजन्मनामिति विश्वः अवलंबितः आश्रितः वस्त्रादिरुद्धो वा अवष्टभ्यते स्मष्टंभिसंभे संभुरोधने वा क्तः संभेः।
३१ अवाच्चेति षः अवष्टब्धो विदूरे स्यादाक्रांते चावलंबिते प्रसिद्धा तिपसिध्यते स्मवा षिधुसंराद्धो गत्यां वा कर्तरि कर्मणि वा क्तः इति धांताः १०४ चित्राभानवोरश्मयोस्य भातिभा
टीप्तौ दाभाम्यां नुः भूतानामात्मा भूतानि आत्मा स्वभावो यस्येति च पृथग्यक्तायोजनः शाक पार्थिवादिः १०५ ग्रसने ग्रसु अदने अन्येभ्योपीति डः आवनति वनसंभक्तौ श्रद्धे
वाविच् ग्रश्मासावावाचप त्राणि सं न्यस्य अत इनिः पत्त्री श्येने रथे कांडे खगद्रुरथिकाद्विपिति विश्वः शिखरमस्त्ययोः अत इनिः शिखाः संत्यस्य ईहोपनायेनीनिः व्रीखा
दिर्वा शिखी वन्हौ बलीवर्दे शरे हेतुग्रहे द्रुमे मयूरे कुक्कुटे पुंसि शिखावत्स्यन्यलिंगकः १०६ प्रतियतनं प्रतियत्यते वा यत्नो प्रयत्ने निकारादौ वा यजयाचेति नङ् उपग्र

अतस्त्रिषु समुन्नद्धौ पंडितंमन्यगर्वितौ १०३ ब्रह्मबंधुरधिक्षेपनिर्देशोथावलंबितः अविदूरोप्यवष्टब्धः प्रसिद्धौ ख्यातभूषितौ धांताः १०४ सूर्य
वन्ही चित्रभानू भानू रश्मिदिवाकरौ भूतात्मानौ धातृदेहौ मूर्खनीचौ पृथग्जनौ १०५ ग्रावाणौ शैलपाषाणौ पत्त्रिणौ शरपक्षिणौ तरुशैलौ शि
खरिणौ शिखिनौ वन्हिबर्हिणौ १०६ प्रतियत्नावुभौ लिप्सोपग्रहावथ सादिनौ द्वौ सारथिहयारोहौ वाजिनोश्वेषुपक्षिणः १०७ कुलेप्यभिजनो
जन्मभूम्यामप्यथ हायनाः वर्षार्चिर्व्रीहिभेदाश्च चंद्राग्न्यर्का विरोचनाः १०८ केशेपि वृजिनो विश्वकर्मार्कसुरशिल्पिनोः॥ ९हो वंदीग्रहणादिः प्रति

यत्नश्च संस्कारे लिप्सोपग्रह लोपि चुञ वध्यंसीदतिसादयति वा षद्भविशरणादौ आवश्यके तिणिनिः ग्रस्वादिर्वा सादीतुरंगमातंगरथारोहेषु दृश्यते वाजाः पक्षाः संत्यस्य अ
त इनिः १०७ अभिजायतेऽस्मिन् जनी हलश्चेति घञ् जनिवध्योश्चेति वृद्धिर्न अभिजनः कुले ख्यातो जन्मभूम्यां कुलध्वजे इति विश्वः जहाति जिहीते वा ओहाक् त्यागे ओहाङ् ३१
गतौ वा हश्च व्रीहिकालयोरिति ण्युट् हायनो न स्त्रियां वर्षे पुंसि अर्चिर्व्रीहिभेदयोः वर्षो ऽर्दं अर्चिः रश्मिः व्रीहिभेदो नीवारादिरिति मुकुटः षष्ठिक इति स्वामी विरोचते इह च
दीप्तौ अनुदात्तेतश्च हलादेरिति युच् विरोचनः प्रल्हादसुतनयेर्केग्निचंद्रयोः १०८ वृज्यते वृजी वर्जने वृजेः किच्चेतीनन् वृजिनं कल्मषे क्लीबं केशे ना॥ ॥

कुटिले त्रिष्विति रभसः विश्वं कर्मा स्यात् स्वेत्विति विश्वकर्मा सहस्रांशोमुनिभिद् वशिल्पिनोः अनति अनसात त्यगमने सातिष्यांमनि मूसनिणो आत्मा कलेवरे यत्ने स्वभावे
परमात्मनि चित्ते धृतौ च बुद्धौ च परस्या वर्तने पिचेति धरणिः १०८ हेति हन हिंसागत्योः हंतेर्घश्चेतिप चाद्यचि द्वित्वं आक्काभ्यासस्य अन्योन्य घट्टने चैव घातुके च घना
घन इति धरणिः अभिमननं मननं ज्ञाने घञ् मीत्र हिंसायां भावे ल्युट् मिनाती त्यात्वं आदिनाकुलपशुगुणादिग्रहः ११० मूर्तिगुणे काठिन्ये हननं हन्यते वा मूर्तौ घनर
त्यप् घनं सांद्रं घनं वाद्यं घनाम्सुः लो घनोऽ बुदः घनः काठिन्यसंघाते विस्तरे लोहमुद्गराविति धरणिः राजति रूयते वा रूणसि जीतिनक् राजति राजृ दीप्तौ कनिन्यु वृषीति
कनिन् राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ यक्षे शक्रे च पुंसि स्यात् १११ अवश्यं वणति वणशब्दे आवश्यके तिगृत्स्यादित्वाद्दृणिनिः वचयोरैक्यं वाणिनी नर्त
कीमत्ताविदग्धवनितासु च वहति ग्रस्यादिणिनिः वाहिनी स्यात्तरंगिण्यां सेनासैन्यप्रभेदयोरिति विश्वः ह्लादते वर्ष्यं ह्लाद अव्यक्ते शब्दे आवश्यके तिणिनिः अव

आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च १०८ शक्रे घातुकमत्तेभवर्षुकाब्दे घनाघनः अभिमानोर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ११० घनो
मेघे मूर्तिगुणे त्रिषु मूर्ते निरंतरे दनः सूर्यप्रभो राजा मृगाङ्के क्षत्रिये नृपे १११ वाणिन्यौ नर्तकीदूत्यौ स्रवंत्यामपि वाहिनी ह्लादिन्यौ वज्रतडि
तौ वंद्यायामपि कामिनी ११२ त्वग्देहयोरपि तनुः सूनाधोजिह्विकापि च क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ११३ मंदे थके तनं क्लीबे
केतनं तूपनिमंत्रणे वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः॥११४॥ ९ श्यं कामयते कमु कांतौ पूर्ववत्णिनिः वंदा वृक्षे विजातीयप्ररोहः कामिनी भीरुवंद्
योः कामी तु कामुके चक्रवाके पारावतेपि च ११२ तनोति तन्यते वा तनु विस्तारे भृमृशीत्युः तनुः कायेत्वचि स्त्री स्यात्त्रिषु स्वल्पे विरले कृशे सवनं सूयते वा षूड् प्राणि
गर्भविमोचने भावे कर्मणि वा क्तः स्वादय ओदित इति निष्ठानत्वं सूना स्या पुष्पिते पुष्पे जिह्वातले वधालये इत्यजयः सूना पुत्र्यां वधस्थाने गलशुंठिकयोरपि
विततनं वितन्यते वा घञ् वितानो यज्ञ विस्तारो ल्लोचे पुक्रतु कर्मणि वृत्तभेदावसरयोर्वितानं तुच्छमंदयोरिति विश्वः वितानो यज्ञ उल्लोचे विस्तारे पुन्नपुंसकं क्ली
वे इन विशेषस्यां त्रिलिंगो मंद तुच्छयोः मंदे मूढे ११३ किंतनि वासादौ भावकर्मकरणोऽधिकरणे पुल्युट् केतनं तु ध्वजे कार्ये निमंत्रणे निवासयोरित्यजयः इहति द

 गंधअर्दनेभावादौल्युट् गंधनंसूचनोत्साहहिंसनेषुप्रकाशनइतिविश्वः तस्त्रुगतौ। ल्युट्प्रतीवापोद्ग्धादौ दध्यादिभावार्थतस्माद्दिप्रक्षेपःनिक्षेपोवाजवनंवेगः॥आ
 प्यायनंतर्पणं ११५ व्यज्यतेऽनेनवाल्युट्निष्ठानंतेमनं व्यंजनंतेमनेचिह्नेश्मश्रुण्यवयवेपिचकुलीनस्यकर्मभावोवायुवाघ्रण्कौलीनंपशुभिर्युद्धेकुलीनत्वापवादयो
 रितिधरणिः ११६ उद्यात्यनेनास्मिन्वायाप्रा पणेकरणेतिल्युट् उद्यानंचनभेदेस्यान्निःसृतौचप्रयोजनेइतिधरणिः स्थीयतेत्रअधिकरणेभावेचल्युट्स्थानंसादृश्येऽव
काशेस्थितौवृद्धिक्षयेतरेदीव्यतेऽनेनदिवुक्रीडादौभावकरणादौल्युट्देवनंव्यवहारेस्याज्जिगीषाक्रीडयोरपिअक्षेषुदेवनःप्रोक्तइतिविश्वः ११७ उत्थानमुद्यमेतंत्रेपौरुषे
पुस्तकेरणेतंत्रंकुटुंबकृत्येस्यात्सिद्धांतेचौषधोत्तमे प्रधानेतंतुवानेचशास्त्राभेदेपरिच्छदेश्रुतिशाखांतरेहेतावुभयार्थप्रयोजनेविरुद्धसुत्थानंप्रादयोगतेतिसमा
सःस्वतंत्रताचव्युत्थानं इतित्रिकांडशेषः ११८ साधसंसिद्धौ भावकर्मकरणादौल्युट्उपकरणंसाधनसामग्रीसाधनंमृतसंस्कारेसैन्यसिद्धौवधेगतौनिर्वर्तनोपाय

उत्साहनेचहिंसायांसूचनेचापिगंधनं आतंचनंप्रतीवापजवनाप्यायनार्थकं ११५ व्यंजनंलांछनंश्मश्रुनिष्ठानाऽवयवेष्वपि स्यात्कौलीनं
लोकवादेयुद्धेपश्वहिपक्षिणां ११६ स्यादुद्यानंनिःसरणेवनंभेदेप्रयोजने अवकाशेस्थितौस्थानंक्रीडादावपिदेवनं ११७ उत्थानंपौरुषेतंत्रेसन्नि
विष्टोद्गमेपिच व्युत्थानंप्रतिरोधेचविरोधाचरणेपिच ११८ मारणेमृतसंस्कारेगतौद्रव्योपपादने निर्वर्तनोपकरणानुव्रज्यासुचसाधनं ११९।
निर्यातनंवैरशुद्धौदानेन्यासार्पणेपिच व्यसनंविपदिभ्रंशेदोषेकामजकोपजे १२० पक्ष्माक्षिलोम्निकिंजल्केतंत्वाद्यंशेप्यणीयसि तिथिभेदे
क्षणेपर्ववर्त्मनेत्रच्छदेप्यनि १२१॥ एधवृद्धौपनेःनुगमेधने ११९ यतनिकारादौस्वार्थण्यंतः भावादौल्युट् व्यस्तिअसुक्षेपणेभावादौल्युट् कामजेदोषेमृग
याक्षयानादौ कोपजेवाक्पारुष्यदंडपारुष्यार्थदूषणादौ व्यसनंत्वशुभेसक्तौपानस्त्रीमृगयादिषु दैवानिष्टफलेपापेविपत्तौनिष्फलोद्यमइतिविश्वः १२० पक्ष्यतेऽ
नेनवापक्षपरिग्रहेकर्मकरणादौमनिन् पक्ष्मसूत्रादिसूक्ष्मांशेकिंजल्केनेत्रलोमनीतिविश्वःपर्वति पर्व्यतेवा पर्वपूरणेवाहुलकात् कनिन् पर्वःस्यादुत्स
वेग्रंथोप्रस्तावेविषुवादिषुदर्शप्रतिपदोःसंधौस्यात्तिथिःपंचकांतरेइतिधरणिः वर्त्तते ऽनेनास्मिन्वादृनुवर्त्तनेमनिन् १२१॥ ॥ ॥

कूपपतनमर्हतीति खालीनः कौपीनेः घृष्टाकार्ययोरिति साधुः कौपीनं स्यादकार्येपि चीरे गुह्यप्रदेशयोरिति विश्वः मिथुनस्येदं वा संबंधे सुरते युग्मे राशौ मिथुनमिष्यत इति। व्याडिः प्रधत्ते धीयतेनेनास्मिन्वा डुधाञ् कर्तृकरणादौ ल्युट् प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि प्रज्ञायामपि च क्लीबमेकत्वे तु नृत्ये सदा प्रज्ञायतेनेन वा भावादौ ल्युट् १२२ प्रसूयते षुञ् अभिषवे सुत्रोदीर्घश्चेति नः निधानं निधीयतेऽत्र वा कृपृवृजीति क्युः क्रदि आह्वाने रोदने च भावे ल्युट् वर्षते वृष्यते वा वृषु सेचने मनिन् वर्ष्म देहप्रमाणाति सुंदराकृतिषु स्मृतं १२३ दधाति धीयते वा डुधाञ् मनिन् धाम शक्तौ प्रभावे च तेजो मंदिरजन्मसु इति विश्वः संस्थीयतेऽत्रानेन वा संस्थितिर्वा भावाधिकरणादौ ल्युट् संस्थानमाकृतौ मृतौ लक्ष्यते अनेन वा लक्ष दर्शने मनिन् १२४ आछाद्यतेऽनेन छद अपवारणे चुरादिः करणे भावे वा ल्युट् अच्छादनं संपिधाने वस्त्रप्रकृतिमात्रक इति ध

अकार्यगुह्ये कौपीनं मैथुनं संगतौ रते॥ प्रधानं परमात्मा धीः प्रज्ञानं बुद्धिचिन्हयोः १२२ प्रसूनं पुष्पफलयोर्निधनं कुलनाशयोः क्रंदने रोदना
ह्वाने वर्ष्म देहप्रमाणयोः १२३ गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे संनिवेशे च संस्थानं लक्ष्मचिन्हप्रधानयोः १२४ आच्छादने संपि
धानमपवारणमित्युभे आराधनं साधने स्यादवाप्तौ तोषणेपि च १२५ अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि रत्नं स्वजातिश्रेष्ठेपि वने सलिल
कानने १२६ तलिनं विरले स्तोके वाच्यलिंगास्तथोत्तरे समानाः सत्समैकेस्युः पिशुनौ खलसूचकौ १२७॥ ((

इति: आराध्यतेनेन राध संसिद्धौ भावादौ ल्युट् १२५ अधिष्ठीयते अनेन वा भावादौ ल्युट् अधिष्ठानं रथस्यांगे प्रभावेध्यासने पुर इत्यजयः रमयति रमक्रीडायां ण्यंतः अंतर्भावितण्यर्थो वा रमंतेस्मिन्वा रमस्त चेन्निनः नेड्वशीति नेट् लोरंतिटि रत्नं स्वजातिश्रेष्ठेपि मणावपि नपुंसकं वन्यते वन संभक्तौ वनु याचने वा हलश्चेति घञ् संज्ञापूर्वकत्वान्न वृद्धिः कर्तरि पचाद्यच्वा क्लीवे स्यात्कानने नीरे निवासे निलये वनमिति रभसः १२६ तलति तल्यते वा तल प्रतिष्ठायां तलिपुलिभ्यामिनन् तलिनं विरले लोके स्वच्छेपि वाच्यलिंगकम् तथा तलिनवउत्तरे आनांतात् समति षमवैक्लव्ये नाच्छील्यवयोवचनशक्तिषु चानश् आगमशासनमनिपत्यमितिमुम्न सहमानेन वर्तन इति वा समानं सत्समैकेषु त्रिषु नानाभिमानत्वे पिशंति पिश अवयवे क्षुधिपिशिमिथिभ्यः कित् इत्युनन् पिशुनं कुंकुमे स्मृतं कपिवक्त्रे चकाके नासूचकक्रूरयोस्त्रिषु दुष्टकार्यापिशुना

जहाति हीयते स्म वा ओहाक् त्यागे आदिकर्मणि क्तः कर्मणि वा ओदितश्चेति निष्ठातत्वं हीनं गर्हितं न योस्त्रिषु न्यूनयति न्यूयते स्म वा ऊन परिहाणे पचाद्यच् घञ् वा यत्तु इगुपधे
त्तिक इति मुकुटेनोक्तं तन्न चुरादिण्यंतत्वेन अदंतत्वेन च इगुपधत्वाभावात् न्यूनं गर्हितं नयोः तरो वलं जवो वा स्यास्ति अस्मायेति विनिः अभिपद्यते स्म यद्गतो गम्यर्थेति
क्तः कर्मणि वा अभिपन्नो पराद्धे भिद्रुते ग्रस्ते विपद्गते इति विश्वः इति नामानि ॥ १२८ कलामाप्नोति आप्लृ व्याप्तौ कर्मण्यण् कला आप्यते नेन वा हलश्चेति घञ् कलापः संहतौ
वर्हे कांच्यां भूषणे तूणयोरित्यजेयः परिवपनं अनेनात्र वाडुवप् बीजतंतुसंताने भावे घञ् हलश्चेति वा उपसर्गस्येति दीर्घः परिच्छदः परिवारः १२८ गां पाति पारक्षणे आ
तो नुपेति कः गोपो ग्रामौघगोष्ठाधिकृतयोर्वल्लवे नृपे इति विश्वः वृषं धर्मं न कंपयति कपि किंचिच्चलने अंहिकंप्योर्नलोपश्चेनीः वृषाद्धर्मादाकंपयति दुष्टानिति वा यद्वा वृषति
कामान् वृषु सेचने इगुपधेति कः आकंपयति पापानि पूर्ववदिः वृषश्चासावाकपिश्च यद्वा वृषा इंद्रो नेन कंपते आकंपते वा ऽस्मात् । यद्वा वृषो धर्मो वृषा इंद्रो वा कपिरिव

हीनन्यूनावूनगर्ह्यौ वेगिशूरौ तरस्विनौ अभिपन्नोपराद्धोभिग्रस्तव्यापद्गता अपि इति नामानि ॥ १२८ कलापो भूषणे वर्हे तूणीरे संहतेपि च परिच्छदे
परीवापः पर्युप्तो सलिलस्थिते १२९ गोधुग् गोष्ठपती गोपो हरविष्णू वृषाकपी वाष्पमूष्माश्रु कशिपु त्वन्नमाच्छादनं द्वयं ॥ १३० ॥ तल्पं शय्याट्टदारेषु
स्तंबे पि विटपो स्त्रियां प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ॥ १३१ ॥ ((वशीयस्य यद्वा वृषो रक्षकः कपिर्वराहः शाकपार्थिवादिः अन्येषामपीति दीर्घः

यद्वा वृषमिंद्रस्य अकंपीयति पिगतो अंतर्भावितण्यर्थो वा इंद्रः खं वाप्नोति प्रापयति वा रेस्मान्रक्षकत्वात् विचि संज्ञापूर्वकत्वान्न गुणः क्विपि तु आगमशास्त्रस्यानि
त्यत्वान्न तुक् परशब्दस्येष्टवाचित्वादियङ् बाधित्वा पूर्वसवर्णे दीर्घ पूर्वरूपे सः अन्येषामपीत्येषु दीर्घः वृषाकपिः पुमान्कृष्णे शंकरे जातवेदसि वा यति ओवै शोष
णे वाति वा कागत्यादौ खष्प शिल्प शष्पेति साधुः कशति इः खं कष्पते वा कशगति शासनयोः मृगय्वादित्वात्साधुः एकोत्पा कशिपूर्भक्ताच्छादने च द्वयोः पृथगिति विश्व
१३० तल्पते स्मिन् तल प्रतिष्ठायां खष्प शिल्पेति साधुः वक्ष्यमाणमस्त्रियामिति कशिपु तल्पाभ्यामपि संबध्यते अट्टं अट्टालिकां वेटति विटपते वा विट् आक्रोशे शब्दे च
विटपपिष्टपविशिपोल्पयाः विटपः पल्लवे स्किंदे विस्तारे स्तंबशाखयोरिति विश्वः प्राप्तो रूपं प्राप्तापन्ने चेति समासः प्राप्तं रूपं येन वा प्राप्तरूपो ज्ञरम्ययोः स्वस्येव रूपं य ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कच्छे कच्छं वापि वति कच्छेन पाति वा सुपीति कः गपोष्टक तुन पिवतेः सुरासी ध्योरिति वचनात् गनि कारको पय देति सुवुत्पत्तेः शाक् समासः जातेरिति ङीष् कच्छपी वल्लकीभे
दे दुलौ सुद्रमृगांतरे इति विश्वः इति पां ताः रादिफः रिष्फ ते रिफति वा रिफ हिंसायां घञ् पचाद्यज्वा इति फांताः १३ अंतरा मरण जन्मनोर्मध्ये भवं सत्वं यातनाशरीरं यस्य
द्रः अंतराभव देहो हि नेष्यते विंध्यवासिनो तन्न लक्ष्यविरोधात् तस्मादंतरिक्षवासिनो गंधर्वाख्या भूताः यद्व्यासः अस्माभिर्यदनुष्ठेयं गंधर्वैस्तदनुष्ठितं इति स्वा
मी तच्चिंत्यं गंधर्वः पशुभेदे स्यात्पुंस्कोकिल तुरंगयोः अंतराभवसत्वे च गायने खेचरेपि चेत्यादौ द्वयोः पृथक् पाठात् दृष्टांतोपि विषमः दिव्यगायनानां विश्वावस्वादी
नामेव तत्र ग्रहणात् गंधं अर्वति अर्व गतौ कर्मण्यण् शकंध्वादिः कं वति कं वगतौ मृगय्वादिः काम्यते वा कंवुः शंखस्त्रियां पुंसि शंबूके वलये गजे द्वैजिह्वेयस्य १३३ पू
र्वयति पूर्व निकेतने पचाद्यच् पूर्वे तु पूर्वजेषु स्युः पूर्व आगाद्ययोस्त्रिषु प्राक् पूर्वमग्रत इति धरणिः इति वांताः कुंभूमिं कुत्सितं वा उंभति उंभ पूरणे कर्मण्यण् पचाद्यज्वा

भेद्यलिंगा अमी कूर्मी वीणाभेदश्च कच्छपी ॥ पांताः ॥ स्वर्णेपि पुंसि रेफः स्यात्कुत्सिते वाच्यलिंगकः १३२ फांताः ॥ अंतराभवसत्वेश्वे गंधर्वो दिव्यगायने
कंवुर्ना वलये शंखे द्विजिह्वोसर्पसूचकौ १३३ पूर्वोन्यलिंगः प्रागाह पुंवहुत्वेपि पूर्वजान् वांताः कुंभो घटेभमूर्द्धांशो डिंभो तु शिशुवालिशौ १३४ स्तं
भो स्थूणाजडीभावो शंभू ब्रह्मत्रिलोचनौ कुक्षिभ्रूणार्भका गर्भा विस्रंभः प्रणयेपि च १३५ स्याद्भेर्यां दुंदुभिः पुंसि स्याद्क्षे दुंदुभिः स्त्रियां ॥

शकंध्वादिः कुंभः स्यात्कुंभकर्णेसुते वेश्यापतौ घटे राशिभेदे द्विपांशे च कुंभं त्रिवृति गुग्गुलौ विति विश्वः डिंभयति डिभि संघाते चुरादिः पचाद्यच् १३४ स्तम्भा
ति स्तंभु रोधने पचाद्यच् भावे घञ् शंभवति भूः सत्तायां प्राप्तौ वा अंतर्भावितण्यर्थः मितद्र्वादित्वाड्डुः शंभुः पुंसि महादेवे परमेष्ठिनि वार्हति। विष्णौ च गिरति गृणा
ति गीर्यते वा गृनिगरणे गृशब्दे वा अर्तिगृभ्यां भन् गर्भो भ्रूणार्भके कुक्षौ संधौ पनसकंटके विस्रंभणं विस्रम्यतेनेन वा स्रंभु विश्वासे घञ् विस्रंभः केलि कलहे
विश्वासे प्रणये वधे इति विश्वः परिचयप्रार्थनयोः प्रणयः परिकीर्तित इत्यमरमाला १३५ दुंद इति शब्देन उंभति उंभ पूरणे इगुपधात्किदितीन् शकंध्वा
दिः यद्वा दुंदिति हंलं तस्येवानुकरणं दुंदुभिः पुमान् वरुणे दैत्यभेर्यां श्वस्त्रह्सविंदुः त्रिकद्वयेकसंभ्यति अनेन वा कुसुंभ इपपचाद्यच् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हलश्चेति घञ् वा पृषोदरादिः कुसुमं हेमनि महारजनं ना कमंडलौ १३६ नभ्यते णभ हिंसायां इत्रं जारादिभ्यः यद्वा नाभयति स्वार्थ एयं नाभिः नाभिर्मुख्यनृपे चक्रम

अ॰ टी॰ हलश्चेति घञ् वा पृषोदरादिः कुसुमं हेमनि महारजनं ना कमंडलौ कस्तूरिकामदे सुष्टु रमति रम्यते वा रभ राभस्ये सर्वधातुभ्य इन् सुरभिः शल्लकीमातृभि सुरगोषु योषिति चंपके च वसं

रा॰ तृ॰ ध्य क्षत्रिययोः पुमान् द्वयोः प्राणि प्रतीके स्यात्स्त्रियां कस्तूरिकामदे सुष्टु रमति रम्यते वा रभ राभस्ये सर्वधातुभ्य इन् सुरभिः शल्लकीमातृभि सुरगोषु योषिति चंपके च वसं

३५ तिचतथा जातीफले पुमान् स्वर्णे गंधोत्पले स्त्री वं सुगंधि कांतयोस्त्रिषु सहभांतियोयस्यां वा भादीनां सुपीतिकः अन्येभ्योपीति डोवा स्त्रियां सामाजिके गोष्ठ्यां घृतमंदि

रयोः सभेति रभसः वल्लते वल्यते वा वल्ल संवरणे संचरणे च रासि वल्लिभ्यां च त्यभ च वल्लभो दयिते ध्यक्षे सल्लक्षणतुरंगमे इति मां ताः १३७ अश्नुते अनेन वा अभू

व्याप्तो अश्नोते रश्च इति मिः रश्मिः पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपि स्त्रवेनल्लुत्याग च्छति गमश्चेति खच् कमनं कम्यते वा कमु कांतौ घञ् कामः स्मरे च्छयोः

स्यान्महारजने स्त्री वं कुसुमं कर के पुमान् १३६ क्षत्रियेपि च नाभिर्न्ना सुरभिर्गवि च स्त्रियां सभासंसदि सभ्ये च त्रिषु ध्यक्षेपि वल्लभः इति मां

ताः ३१ किरणप्रग्रहो रश्मी कपिभे कोल्ल वंगमो इच्छा मनोभवौ कामो शौर्योद्योगो पराक्रमो ३५ धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः

उपाय पूर्व आरंभ उपधा चाप्युपक्रमः ३८ वणिक्पथः पुरं वेदो निगमो नागरो वणिक् नैगमो द्वौ वले रामो नील चारु सिते त्रिषु ४० शब्दादि

पूर्वो वृंदे पि ग्रामः क्रांतौ च विक्रमः स्तोमः स्तोत्रे ध्वरे वृंदे जिह्मस्तु कुटिलेलसे ४१॥ १९ पुमान् रतस्यापि नि कामे च काम्यपि स्यान्नपुंसकं पराक्रमणं अ

नेन वा क्रमु पादविक्षेपे घञ् नोदात्तोपदेशस्येति न वृद्धिः पराक्रमः स्यात्सामर्थ्ये विक्रमोद्योगयोरपि ३९ धरति ध्रियते वा धृञ् धारणे अर्तिस्तुस्विति मन् धर्मः स्त्रीपु

ण्य आचारे स्वभावोपमयोः कृतौ अहिंसोपनिषन्न्यायेना धनुर्यमसोमये उक्तो च उपक्रमणं अनेन वा पूर्ववत् उपक्रमः स्यादुपधा चिकित्सारंभ विक्रमइति विश्वः

३८ निगम्यते त्रानेन वा गोचरसंचरेति साधुः निगमो वाणिजे पुर्यां कटेवे दे वणिकपथे इति विश्वः निगमेभवः तत्रभव इत्यण् नैगमः स्यादुपनिषद्वणिजोर्नागरेपि ३५

चेति विश्वः रमते अनेन वा रमक्रीडायां ज्वलितिकसंतेभ्यो णः हलश्चेति घञ् वा रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे राघवे चासितश्चेतमनोज्ञेषु तु वाच्यवदि

ति विश्वः १४० ग्रसते ग्रस्यते वा ग्रसु अदने ग्रसेरा च इति मः ग्रामः स्वरे संवसथे वृंदे शब्दादि पूर्वक इति विश्वः विक्रमणं अनेन वा घञ् विक्रमः शक्तिसंपत्तिः क्रांतिमात्रं च

विक्रम इति धरणिः स्तूयते अनेन वा ष्टुञ् स्तुतौ अर्तिस्तुस्विति मः जहाति जिहीयते वा ओहाक् त्यागे जहातेः सन्वदालोपश्चेति मः १४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुड्यते गुडवेष्टने रक्षणे वा बाहुलकान्मक् उलयोरेकत्वं च ह्रस्वकुउदररोगः स्तंबो प्रकाण्डः गुल्मः स्तंबे स्त्रीन्हि घट्टसैन्ययोः सैन्यरक्षणे इति विश्वः जायति जयते वा जे सर्पेवा ह
लकादिभिः यद्वा जमु अदने बाहुलकादिण् दीर्घश्च कर्मणि नञाद्विश्वरूती स्त्रेति स्वामीजि हस्तुकुटिले मं रे जामिः स्वसृकुलस्त्रियोरिति च वर्गादौ वृजयः मुकुटस्तुप्रहरे संप्रमेथ
मायाभिः स्वसृकुलस्त्रियोरिति रभसादंतस्यादित्यामाह यामिः कुलस्त्री स्वस्त्रोः स्त्री न त्रया प्रापणे धातुर्वा ध्यः क्षमणं क्षमूष सहने षित्वादङ् क्षमते क्षम्यते वा क्षमूष सहने
पचादिच् घञ्वा नोदात्तोपदेशस्येति न वृद्धिः क्षमान्तिति क्षा पृथ्वी च योग्ये शक्ते हिते क्षममिति धरणिः १४२ ध्यायते ध्यै ङ् गतौ रूषयुधीधीतिमक् ध्यामो वटे प्रथ गस्य वा भ
रिदृहृदारके पिके च कलमहरिते पुंसि स्यात्तद्वति त्रिषु मरिचे सिंधुलवणे क्लीबं स्त्री शारिवौषधौ अप्रसूतांगनायां च प्रियंगावपि चोच्यते यमुनायां त्रियामायां क स्त्रि
इति कोषधौ नीलिकायामथ ध्यामो मासखंडककाकयोः लडनं लड वा क्से संपदादित्वात् क्विप् डलयोरेकत्वं ललमति अमगत्यादौ कर्मण्यण् वाहुलकात्कनिनि नां

गुल्मारुक् स्तंबसेनाश्च जामिः स्वसृकुलस्त्रियोः क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु १४२ त्रिषु ध्यामो हरित्कृष्णो ध्यामा स्यात् क्षारिवा निशा
ललामं पुच्छपुंड्राश्वभूषाप्राधान्यकेतुषु १४३ सूक्ष्मम् अध्यात्मम् अप्यादौ प्रधाने प्रथमस्त्रिषु वामौ वल्गुप्रतीपौ द्वावधमौ न्यूनकुत्सितौ १४४ जीर्णं च परि
भुक्तं च यातयाममिदं द्वयम्॥ मान्ताः॥ तुरंगगरुडौ तार्क्ष्यौ निलयापचयौ क्षयौ १४५॥ ९८ नोपि प्रधानध्वजशृंगेषु पुंड्रवालधिलक्ष्मसु भूषा वाजि प्रभावेषु

ललामं स्याल्ललामं चेति रुद्रः पुंड्रं [illegible] रीनां ललाटचित्रं अश्वो वाजी भूषा सामीप्यादश्वस्यैव ४३ सूच्यते सूच धैर्य शून्यसूचेः स्मन् सूक्ष्मं स्यात् कैतवे ध्यात्मे पुंस णो
त्रिषु चाल्पके यत्तु सुछुड [illegible] मी सुष्टु उष्मयतेरिति मुकुटः श्वव्याचष्टे न तु क्तसूत्रादर्शनमूलकं प्रथते प्रथ विस्तारे प्रथेरमच् आम्नातं प्रथमस्तु भवेदादौ
प्रधानेपि च वाच्यवत् वमति वम्यते वा टुवम उद्गिरणे ज्वलितीति णः घञ्वा वामं सव्ये प्रतीपे च द्रविणे चातिसुंदरे पयोधरे हरे कामे विधाद्वा मामपि स्त्रियां वामी शृ
गाली वडवा रासभी करभी षु चेति विश्वः अवति अव रक्षणादौ अववा वमा धमेति साधुः यद्वा न धम्यते धमति वा धमध्माने सौत्रः घञ् पचाद्यच् वा अधोभवः अवो
ध सो लोपश्चेति स्वामी १४४ यातो गतो यामउपभोगकालो यस्य यातयामो न्यवज्जीर्णे परिभुक्तोज्झितेपि च इति मान्ताः॥ तार्क्ष्यस्य कश्यपस्यापत्यं तार्क्ष्य ढकेरपण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·नृ श्वशुरस्यापत्यं राजश्वशुराद्यत् भ्रातुरपत्यं भ्रातुर्व्यच्चव्यन्सपत्नेपि पर्तियर्वति वा पृपालनपूरणयोः पृषु सेचने पर्जन्य इति साधुः पर्जन्यो मेघशब्देपि ध्वनदंबुद शक्र

टी·रा· योरिति विश्वः अर्यते ऋ गतौ अर्यः स्वामि वैश्ययोरिति साधुः १४६ लेषति लिषदीप्तौ अध्यादिः तिष्यः कलियुगे ऋक्षेति ष्वाधात्री चक्री र्यते इति धरणिः पर्ययणं इण् ग

३५ तौ परार्व नुपात्यय इति घञ् पर्यायस्तु प्रकारे स्यान्निर्माणावसरे क्रमे इति विश्वः प्रत्ययनं प्रतीयते नेन वा प्रत्येतीति वा एरच् पुंसीति घो वा पचाद्यच् वा प्रत्ययः शपथे रं

ध्रविश्वासाचार हेतुषु प्रथित त्वे सन्निहाधीन ज्ञानयोरपीति विश्वः १४७ अनुशयनं अनेन वा शीङ् स्वप्ने एरच् पुंसीति घो वा भवेदनुशयो द्वेषे पश्चात्तापानुबंध

योरिति विश्वः उच्चयनं चिञ् चयने एरच् स्थूल स्थोच्चयः स्थूलोच्चयस्तु साकल्ये गडोपलकरंडयोरिति विश्वः १४८ समयनं समीयते त्र्याः नेन वा समेति वा इण् ग

तौ इण् गतौ वा एरच् पुंसीति घो वा पचाद्यच् वा समयः शपथाचार सिद्धांतेषु तथाधियिक्रियाकारे च निर्देशसंकेते काल भाषयोः व्यसनं स्त्री द्यूतपानादि अशुभं देव

श्वशुर्यो देवर श्याली भ्रातृव्यो भ्रातृजद्विषौ पर्जन्यो रसदब्देंद्रौ स्यादर्यः स्वामि वैश्ययोः १४६ तिष्यः पुष्ये कलियुगे पर्यायोवसरे क्रमे प्रत्ययोधी

नशपथज्ञान विश्वासहेतुषु १४७ रंध्रे शब्दे थानुशयो दीर्घद्वेषानुतापयोः स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते १४८ समयाः शपथाचार

कालसिद्धांतसंविदः व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः १४९ अत्ययोतिक्रमे कृच्छ्रे दोषे दंडेप्यथापदि युद्धायत्योः संपरायः पूज्यस्तु श्वशुरे

पिच १५० पश्चाद्वस्थापि वलं समवायश्च सन्नयौ संघाते संनिवेशे च संस्त्यायः प्रणयास्त्वमी १५१ विश्रंभयाञ्चाप्रेमाणो विरोधेपि समुच्छ्रयः॥

विशेषणे नयनं अनेन वा अत्रवाणी त्र्याप्य लोएरच् विरोधेनञ् अयात् शुभावहविधेरन्यः अनयस्तु विपदैवाशुभयोर्व्यसने पिच १४९ अत्ययनं अनेन वा इण् गतौ

एरच् अत्ययोतिक्रमे कृच्छ्रे तुत्पातेनाशदंडयोरिति धरणिः संपरायणं इण् गतौ पूर्ववत् संपरायः समीके स्यादापदुत्तरकालयोः पूजयितुमर्हः पूज पूजायां अर्हे

कृत्यतृचश्चेति यत् पूज्यो श्वशुरपूजार्हाविति धरणिः १५० संनयनं सन्नीयते वा सन्नयति वा णीञ् प्रापणे एरच् पचाद्यच् वा संस्त्यानं स्त्यै शब्दसंघातयोः घञ् आ

तो युक् संस्त्यायः सन्निवेशे च संघाते विस्तृतावपि प्रणयनं णीञ् एरच् प्रणयः प्रसरे प्रेम्णि १५१ विस्रंभः स्यात्परिचयविश्वासविप्रलंभयोरित्यजयः सुष्ठु ऊर्ध्वं श्रि

CC-0. In Public Domain. Digitization by eGangotri

समुच्छ्रय इति रभसः विसयनं अत्र वा विसिनोति वा षिञ् बंधने एरच् पुंसीति घो वा पचाद्यच् वा परि निविभ्यः सेवसितसयेति षः विषयो गोचरे देशे तथा जनपदेपि च प्रबंधाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान् १५२ कषति कंठं कष हिंसायां बाहुलकादायः कषायो रागभेदे स्याद् अंगरागे विलेपने निर्यासे च कषायो ध्रसुरभौ लोहिते न्यवदिति विश्वः निर्यासः क्वाथः प्रतिश्रयणं अत्र वा श्रिञ् एरच् घो वा प्रतिश्रयः सभायां च श्रयेभ्युपगमेपि च प्रायणं अयगतौ घञ् दूणगतौ एरज्वा प्रायश्चानशने मृत्यौ प्रायो बाहुल्य तुल्ययोरिति विश्वः मन्यते मनज्ञाने मृगय्वादि यजिमनिशुधिदसिजनिभ्यो युच् मन्युः पुमान् क्रुधि दैन्ये शोके च यज्ञे च १५३ गूहनं गुह्यते वा गुहू संवरणे शंसिदुही ति क्यप् गुह्यं रहस्युपस्थे च गुह्यः कमठदंभयोरिति विश्वः सनति साधुः तत्र साधुरिति यत् सत्यं कृते च शपथे तथ्ये च त्रिषु तद्वति वीर्यते नेन वीर विक्रांतौ अचो यत् वीर साधुर्वा तत्र साधुरिति यत् वीर्यं प्रभावे शुक्रे च तेजः सामर्थ्ययोरपि द्रोः रिदं द्रव्यं च भव्य इति साधुः द्रव्यं स्यात् द्रु विलेभव्ये पृथिव्यादौ च पित्तले भेषजे च विलेपे

विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि १५२ निर्यासेपि कषायोस्त्री सभायां च प्रतिश्रयः प्रायो भूम्न्यंतगमने मन्युर्दैन्ये क्रतौ क्रुधि १५३
रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः वीर्यं बले प्रभावे च द्रव्यं भव्ये गुणाश्रये १५४ धिष्ण्यं स्थाने गृहे भेग्नौ भाग्यं कर्म्म शुभाशुभं कशे
रुहेम्नोर्गांगेयं विशल्या दंतिकापि च १५५ वृषाकपायी श्रीगौर्योरभिख्या नामशोभयोः आरंभो निष्कृतिः शिक्षापूजनं संप्रधारणं १५६॥

चजतु द्रुमविशेषयोरिति विश्वः १५५ धिष्यते धृष्णोति वा धिषशब्दे ञिधृषा प्रागल्भ्ये सानसि वर्णसीति साधुः यत्तु संध्यादयश्चेत्युक्तं मुकुटेन तदेतत्सूत्रास्मरणमूलकं नि मूलं च धिष्ण्यस्थानाग्निसद्मसु धीर्नाम्नो वृद्धीपि भज्यते नेन भज सेवायां ऋहलोर्ण्यत् चजोरिति कुत्वं भाग्यं शुभात्मकविधौ स्याच्छुभाशुभकर्म्मणीति विश्वः गंगाया अपत्यं शुभ्रादिभ्यश्चेति ढक् गांगेयः स्यात्पुमान् भीष्मे क्लीबं स्वर्णकशेरुणोः विगता शल्यात् विगतं शल्यं यस्या वा विशल्याग्निशिखा दंती गुडूची त्रिपुटासु च १५५ वृषाकपेः स्त्री वृषाकप्यग्नीति ङीषैच् वृषाकपायी श्रीगौरीवरीजीवंतिकासु च अभिख्यानं ख्या प्रकथने चक्षिङः देशो वा आतश्चोपसर्गे इत्यङ् अभिख्यात्वभिधाने स्याच्छोभायां च यशस्यपि करणं भावादौ कृञः श च निष्कृतिः प्रायश्चित्तं संप्रधारणं विचारः उपायः सामादिः चेष्टा परिस्पंदः क्रिया कर्म्मणि चेष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

छ्यति छेदे छेदने श्याद्यधेतिणः आतोपुक् यद्वा माछासससिभ्यो यः छायास्यादातपाभावे प्रतिविंबार्कयोषितोः १५७ कृत्स्ने भवा शारीरावयवाद्यत् कस्याद्गहतिकायांस्यात्
करणे कृञः श्चेति चात्कप् कृत्यते कृती छेदने कृदुपधादिति काप् कृत्यो विद्विषि कार्ये च कृत्या क्रियादेवो कर्मोरिति रभसः १५८ जनानां वादः मत्तजनहल्लादि
तियत् यद्वा जायते जनयति वा अहल्लोण्यंत् अचो यद्वा जनिवध्योश्चेति न वृद्धिः जनीं वहति संज्ञायां जन्या इति वा साधुः जन्या मातृवयस्या स्याज्जन्या जनी वरप्रिया
जननी जनयित्र्योश्च जन्यं निर्वा युत्सु मृते धरणिः जघने भवः शारीरावयवाद्यत् यद्वा कुटिलं हन्यते हंतेर्यङ् नाद चो यत् अनित्यमागमशासनमिति नुगत इति न
नु कृ जघन्यं चरमे श्रेष्ठे जघन्यं गर्हितेन्यवदिति विश्वः वचनार्हः वचपरिभाषणे कृत्य आदेशो वा तव्यः वक्तव्यं कुत्सिते हीने वचनार्हे च वाच्यवत् कल्ला सुसाधुः त
त्र साधुरिति यत् यद्वा कल्पते कल्प गतौ संख्याने च चुरादिरदंतः अचो यत् सज्जो वद्धसन्नाहादिः कल्पं प्रभाते क्लीवं स्यात् कल्यो वा कृ श्रुति वर्जिते सज्ज नीरोग दक्षयुक्

उपायः कर्म चेष्टा च चिकित्सा च नव क्रिया छाया सूर्यप्रिया कांतिः प्रतिविंवमनातपः १५७ कक्ष्या प्रकोष्ठे हर्म्यादेः कांच्यां मध्येभबंधने कृत्या
क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ५८ जन्यं स्याज्जनवादेपि जघन्योंतेधमेपि च गर्ह्याधीनौ च वक्तव्यौ कल्यौ सज्ज निरामयौ १५९ आत्मवा
ननपेतोर्थ्याद्रथ्यो पुण्यं तु चार्वपि रूप्यं प्रशस्तरूपेपि वदान्यो वल्गुवागपि १६० न्याय्येपि मध्यं सौम्यं तु सुंदरे सोमदैवते ॥ इति यांताः ॥

त्साण वचनेपि च उपाय वचनेपि स्यात् ५८ आत्मवान् ज्ञानी अर्थ्ये साधुः तत्र साधुरिति यत् अर्थादनपेतः धर्मपथ्यर्थेति यत् अर्थ्यो विज्ञार्थशालिनोरिति
जयः अर्थ्यः शिलाजतु न्यर्थो वुधेन्यायेतु वाच्यवत् पुनाति पूञ् पवने पूञो यण्णुक् ह्रस्वश्च यद्वा पुणति पुण कर्मणि शुभे इगुपधेति कः पुणे साधुः तत्र
साधुरिति यत् पुण्यस्त्रिषु मनोज्ञे स्यात् क्लीवं सुकृत धर्मयोरिति विश्वः आहतं प्रशंसा वा रूपमस्यास्ति रूपादाहत प्रशंसयोरिति यप् रूप्यः स्यात् सुंदरे त्रि
षु आहतस्वर्णरजते रजते च नपुंसकं वदति वदेरान्यः वदान्यो दानृवाग्मिनोरित्यजपः १६० मां ध्यायति ध्यै चिंतायां आतोनुपेति कः यद्वा महान्तेमहपूजा
यां अध्न्यादिः न्याय्याऽवलग्नयोर्मध्यमंतरे चाधमे त्रिष्विति रभसः सोमो देवतास्य सोमात् ट्यण् यद्वा सोम इव सोमः ततश्चातुर्वर्ण्यादित्वात् ष्यञ् यत्तु शाख

CC-0. In Public Domain. Digitization by eGangotri

वा स्यति व्रियते वा वृञ् वरणे पचाद्यच् घञ् वा वारः सूर्यादि दिवसे वारो ऽवसरवृन्दयोः कुब्जवृक्षे हरे वारो वारं मद्यस्य भाजने इति विश्वः संस्तीर्यते स्तृञ् आच्छादने ऋ दोरप्
संस्तरप्रस्तरौ वेतौ प्रस्तराध्वरयोरपि मणिपाषाणयोरपीति विश्वः प्रस्तरः शय्या १६१ गृणाति गॄ शब्दे कृग्रोरुश्चेत्युः गुरुस्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि पुमान्निषेका
दिकृत्पित्रादौ सुरमन्त्रिणि हाभ्यां परः ह्नौ परावक्त्रवा पृषोदरादिः प्रकरणं कृञ् घञ् प्रकारस्तुल्यभेदयोः आकरणं घञ् इङ्गितं चेष्टा आकृतिरवयवसंस्थानं १६२ किंचित्
